51 K_3 $B_{1.4}$ Dc Dn $D_{4.6}$ धनेश्वर उ°; K_4 D_5 धनद उ°; $B_{2.3}$ G_1 कुबेर उ° (G_1 om. उ°). — ^{a}) $Ś_1$ K D_{1-3} G_4 सत्रं; $G_{1.2}$ M_2 संत्रं. — ^{b}) $Ś_1$ $K_{2.4m}$ $D_{1.3}$ मेरुपृष्ठे; B_4 S कुशावत्यां. $Ś_1$ $K_{1.2}$ जनाधिप; D_5 नराधिप (for नरे°). — ^{c}) T_1 G_1 M_1 तत्राहूतो°; M_2 वृतस्ताता° (for वृतस्तत्रा°). — ^{d}) S वृतः (for त्रिभिः). — ^{e}) B_4 कामरूपाणां; M_1 राक्षसानां च. — ^{f}) $Ś_1$ $K_{1.2}$ °पाणिनां.

52 After 52^{ab}, T_2 $G_{3.4}$ read 53^{cd}. — ^{c}) B D (except $D_{1-3.5}$) तप्यमानं (for तपस्यन्तं). — ^{d}) S नानाद्रुमविभूषितं. — ^{e}) S यमुनातीरमाश्रित्य (T_1 °साद्य). — ^{f}) D_6 S पुण्यं ब्रह्म(T_1 देव)र्षिसंकुलं.

53 ^{a}) S अथो° (for तमू°). B Dc Dn_1. n_2 $D_{4.6}$ [ए]त्र; Dn_3 च; S तं (for तु). — ^{b}) B D (except D_{1-3}) [अ]भिमुखे. S अगस्त्यमृषिसत्तमं. — T_2 $G_{3.4}$ read 53^{cd} after 52^{ab}. — ^{d}) Dc G_1 इवेधितं; D_5 इवानलं.

54 ^{a}) $Ś_1$ $K_{1.2}$ $D_{3.5}$ तत्राधिपो राक्षसानां. — ^{d}) $Ś_1$ K D_{1-3} (by transp.) मोहाद्दर्पाच्च; T G_{2-4} दर्पमोहा°. B_{1-3} D (except $D_{1-3.5}$) पार्थिव (for भारत). — ^{e}) $Ś_1$ K $B_{2.3}$ Dc Dn_1 $D_{1-3.5}$ अष्ठीवद् (for न्यष्ठी°). M ष्ठीवताकाशगस्तस्य. — ^{f}) B_4 M परमर्षेः स मूर्धनि.

55 ^{ab}) K_4 D_3 transp. स and कोपात्. D_5 प्रदहन्निव तेजसा. S ततः क्रुद्धः स भगवानुवाचेदं तपोधनः. — ^{d}) $Ś_1$ $K_{1.2}$ देव (for एव).

56 ^{a}) S (except T_2 G_3) धर्षणं. K_4 एनां; $D_{1.2}$ एवं; T_1 M एष; T_2 (before corr.) $G_{1.2.4}$ एतत् (for एतां). — ^{c}) $Ś_1$ K_1 सैन्यं. $G_{1.4}$ M_2 तैर् (for ते). — ^{d}) T_1 M_1 मानवात्.

57 K_4 om. 57^{ab}. — ^{b}) B D (except $D_{1.2.5}$) G_1 M_2 प्राप्येह; T_2 G_{2-4} प्राप्नुहि (for प्राप्स्यसि). B D (except $D_{1-3.5}$) दुर्मतिः.

58 ^{b}) $K_{1.2.4}$ B_{2-4} D_6 T_1 G_1 M_1 पुत्रपौत्रं बलान्वितं (T_1 M_1 °नुगं). — ^{c}) $Ś_1$ ते शापं; K_2 तं शापं; G_2 विशापं; M_2 नानाशं (for न शापं). B Dc_1 Dn_3 D_4 प्राप्यते. — ^{d}) N तत्त्वा(D_5 °तोव)ज्ञां (for गच्छतेऽऽज्ञां).

59 ^{b}) T_2 G_3 तत्तस्माद्; G_1 अगस्त्याद्; G_2 पुरास्माद् (for प्राक्तस्माद्). $Ś_1$ मुनि° (for ऋषि°). — ^{c}) $Ś_1$ K $D_{1-3.5}$ महाबाहो.

सैन्यानां तु तवैतेषां पुत्रपौत्रबलान्वितम् ।
न शापं प्राप्स्यते घोरं गच्छ तेऽऽज्ञां करिष्यति ॥ ५८
एष शापो मया प्राप्तः प्राक्तस्मादपिसत्तमात् ।
स भीमेन महाराज भ्रात्रा तव विमोक्षितः ॥ ५९

इति श्रीमहाभारते आरण्यकपर्वणि अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

१५९

वैश्रवण उवाच ।
युधिष्ठिर धृतिर्दाक्ष्यं देशकालौ पराक्रमः ।
लोकतन्त्रविधानानामेष पञ्चविधो विधिः ॥ १
धृतिमन्तश्च दक्षाश्च स्वे स्वे कर्मणि भारत ।
पराक्रमविधानज्ञा नराः कृतयुगेऽभवन् ॥ २
धृतिमान्देशकालज्ञः सर्वधर्मविधानवित् ।
क्षत्रियः क्षत्रियश्रेष्ठ पृथिवीमनुशास्ति वै ॥ ३
य एवं वर्तते पार्थ पुरुषः सर्वकर्मसु ।
स लोके लभते वीर यशः प्रेत्य च सद्गतिम् ॥ ४
देशकालान्तरप्रेप्सुः कृत्वा शक्रः पराक्रमम् ।
संप्राप्तस्त्रिदिवे राज्यं वृत्रहा वसुभिः सह ॥ ५
पापात्मा पापबुद्धिर्यः पापमेवानुवर्तते ।
कर्मणामविभागज्ञः प्रेत्य चेह च नश्यति ॥ ६
अकालज्ञः सुदुर्मेधाः कार्याणामविशेषवित् ।
वृथाचारसमारम्भः प्रेत्य चेह च नश्यति ॥ ७
साहसे वर्तमानानां निकृतीनां दुरात्मनाम् ।
सर्वसामर्थ्यलिप्सूनां पापो भवति निश्चयः ॥ ८
अधर्मज्ञोऽवलिप्तश्च बालबुद्धिरमर्षणः । C. 3. 11811 B. 3. 162. 9 K. 3. 163. 9

Colophon. — *Major parvan :* Ś$_1$ K$_{1.\,2}$ Dn$_2$ T$_1$ G$_{2.\,4}$ आरण्य (T$_1$ आरण्यकांड !). — *Sub-parvan :* K$_3$ D$_{1-3}$ (all om. sub-parvan name) mention only लोमशतीर्थयात्रा ; B$_{1.\,2.\,4}$ Dn D$_{4-6}$ T$_2$ G$_{3.\,4}$, likewise, only गंधमादनप्रवेश (B$_2$ °नवास ; D$_5$ °दर्शन) ; and finally B$_3$, only गंधमादन. — *Adhy. name :* K D$_3$ धनेश्वरसमागमः ; Dc कुबेरसंवादः ; D$_{1.\,2}$ G$_2$ कुबेरसमागमः ; G$_1$ कुबेरपांडवसंवादः. — *Adhy. no.* (figures, words or both) : Dn 160 (Dn$_3$ 161) ; D$_1$ 166 ; S (M$_2$ *sup. lin.*) 162 (M$_2$ orig. 164). — *Śloka no. :* Dn$_1$. n$_2$ D$_1$ 63 ; Dn$_3$ 64.

159

1 B$_{1-3}$ Dn D$_{1.\,2.\,4-6}$ धनद उ° ; B$_4$ Dc कुबेर उ°. — ^{b}) K$_2$ °कालं पराक्रमं ; B D (except D$_{1-3.\,5}$) °कालपराक्रमाः. — ^{c}) Ś$_1$ K D$_{1-3.\,5}$ लोकतंत्रविधानं च (K$_4$ D$_{3.\,5}$ वा) ; B$_4$ S °विभागानाम्. — ^{d}) Ś$_1$ K D$_{2.\,3.\,5}$ [अ]प्येष (for एव). K$_{3.\,4}$ D$_{1-2.\,5}$ नयः (for विधिः).

2 ^{c}) S (except G$_1$) °विभागज्ञा. — D$_5$ om. (hapl.) 2^{d}–3^{a}.

3 D$_5$ om. 3^{a} (cf. v.l. 2). — ^{b}) Ś$_1$ K Dc D$_{1-3.\,5}$ G$_1$ M$_1$ सर्वध(Ś$_1$ °क)र्मविभागवित्. — ^{d}) Ś$_1$ K$_{1.\,2.\,4}$ D$_{1-3}$ हि ; K$_3$ D$_5$ ह (for वै). B$_{1-3}$ Dc Dn D$_{4.\,6}$ प्रशास्ति पृथिवीं चिरं ; B$_4$ पृथिवीमनुशासति.

5 ^{ab}) Ś$_1$ K D$_{1-3.\,5}$ देशकालोत्तरं (K$_2$ °त्तरः ; D$_5$ °चितं) शक्रः, and तात (for शक्रः). — ^{d}) Dc बंधु° ; T$_1$ M बहु° (for वसु°). Ś$_1$ K D$_{1-3.\,5}$ मरुद्भिः सह वृत्रहा. — After 5, N (except B$_1$ D$_{4.\,6}$) ins. :

821* यस्तु केवलसंरम्भात्प्रपातं न निरीक्षते ।

6 K$_3$ D$_5$ om. 6^{ab}. — ^{a}) Ś$_1$ K (K$_3$ om.) B$_4$ D$_{1-3}$ च (for यः). — ^{d}) =7^{d}. Ś$_1$ K$_{1-3}$ D$_{1-3.\,5}$ स प्रेत्ये° (for प्रेत्य चे°). K$_4$ B$_2$ Dn D$_{4-6}$ वि- (for the second च).

7 Ś$_1$ D$_5$ T$_2$ G$_3$ om. (hapl.) 7. — ^{a}) K$_{1-3}$ D$_{1-3}$ हि ; M$_2$ स (for सु-). — ^{b}) B$_2$ अविधानवित् ; G$_4$ अविभागवित्. — ^{c}) K$_4$ दुर्वृत्ताचारसंरंभी (m वृथाचारसमारंभात्). — ^{d}) =6^{d}. K$_{3.\,4}$m D$_{1.\,2}$ स प्रेत्येह ; K$_4$ सोचिरेण (for प्रेत्य चेह). K$_4$ (m as in text) B$_{1.\,2}$ Dn D$_{3.\,4.\,6}$ G$_1$ वि- (for च).

8 ^{b}) K$_4$ D$_{1.\,2.\,5}$ निकृतानां (K$_4$m प्राकृतानां) ; D$_3$ प्रवृत्तीनां. — ^{c}) Ś$_1$ K$_{1.\,2}$ सर्वसामर्थ्यलुप्ता(K$_1$ °लिप्सा)नां ; K$_4$ (m as in text) सर्वेषामर्थलिप्सानां ; T G सर्वेषामर्थलिप्सूनां ; M$_2$ स त्वस्मान्सत्त्वलिप्सूनां. — ^{d}) K$_4$m Dc पातो ; D$_{1.\,2}$ T$_1$ पापे (for पापो). K$_4$ निश्चितः ; T$_2$ G$_{2-4}$ नित्यशः.

C. 3. 11812
B. 3. 162. 10
K. 3. 163. 9

निर्भयो भीमसेनोऽयं तं शाधि पुरुषर्षभ ॥ ९
आर्ष्टिषेणस्य राजर्षेः प्राप्य भूयस्त्वमाश्रमम् ।
तामिस्रं प्रथमं पक्षं वीतशोकभयो वस ॥ १०
अलकाः सह गन्धर्वैर्यक्षैश्च सह राक्षसैः ।
मन्नियुक्ता मनुष्येन्द्र सर्वे च गिरिवासिनः ।
रक्षन्तु त्वा महाबाहो सहितं द्विजसत्तमैः ॥ ११
साहसेषु च संतिष्ठन्निह शैले वृकोदरः ।
वार्यतां साध्वयं राजंस्त्वया धर्मभृतां वर ॥ १२
इतः परं च राजेन्द्र द्रक्ष्यन्ति वनगोचराः ।
उपस्थास्यन्ति च सदा रक्षिष्यन्ति च सर्वशः ॥ १३
तथैव चान्नपानानि स्वादूनि च बहूनि च ।
उपस्थास्यन्ति वो गृह्य मत्प्रेष्याः पुरुषर्षभ ॥ १४
यथा जिष्णुर्महेन्द्रस्य यथा वायोर्वृकोदरः ।
धर्मस्य त्वं यथा तात योगोत्पन्नो निजः सुतः ॥ १५
आत्मजावात्मसंपन्नौ यमौ चोभौ यथाश्विनोः ।
रक्ष्यास्तद्वन्ममापीह यूयं सर्वे युधिष्ठिर ॥ १६
अर्थतत्त्वविभागज्ञः सर्वधर्मविशेषवित् ।
भीमसेनादवरजः फल्गुनः कुशली दिवि ॥ १७
याः काश्चन मता लोकेष्वग्र्याः परमसंपदः ।
जन्मप्रभृति ताः सर्वाः स्थितास्तात धनंजये ॥ १८
दमो दानं बलं बुद्धिर्ह्रीर्धृतिस्तेज उत्तमम् ।
एतान्यपि महासत्त्वे स्थितान्यमिततेजसि ॥ १९

---

9 ^{b}) D$_{1.2.5}$ T$_1$ पाप° (for बाल°). — ^{d}) Ś$_1$ पुरुषोत्तमं; K$_1$ B$_2$ D$_{1.2}$ पुरुषर्षभं. K$_4$ त्वं शाधितुमिहार्हसि. — After 9, K$_4$ ins.:

822* तच्छ्रुत्वा धनदो वाक्यं पाण्डवानां समागमम् ।
उत्थाय स ह तैः सार्धं चलितस्तत्क्षणाद्द्रुतम् ।
कुबेरः प्राप्य राजानं युधिष्ठिरमभाषत ।

10 ^{a}) B (as usual) आर्ष्णिसेनस्य. — ^{b}) Ś$_1$ K$_{1.2}$ D$_8$ transp. प्राप्य and भूयः. Ś$_1$ K$_{1.2}$ तथा° (for त्वमा°). — ^{c}) K$_{2-4}$ B$_{1.3.4}$ Dc$_2$ D$_{3.5.6}$ तामिश्रं; G$_{2.4}$ त्वरितं. T$_2$ G$_{2-4}$ प्राप्य (for पक्षं). T$_1$ G$_1$ M तमिस्रां प्रथमां प्राप्य (T$_1$ तत्र).

11 ^{a}) Ś$_1$ K$_3$ B$_3$ D$_{1.3}$ M$_1$ अलका; K$_{1.4}$ G$_{1.4}$ M$_2$ अलकां; Dn$_2$ D$_6$ आलकाः; D$_6$ अलंकां; T$_1$ अकालः; G$_3$ आलकैः. — ^{b}) N (except Ś$_1$) M$_2$ यक्षाश्च. B$_{1-3}$ D (except D$_{1-3.5}$) किंनरैः (for राक्षसैः). — ^{d}) T$_1$ M$_1$ सर्वैश्च गिरिवासिभिः. — ^{e}) Ś$_1$ K$_{3.4}$ D$_{3.5}$ रक्षंति; K$_{1.2}$ रक्षंते; D$_2$ रक्षितुं. B Dc Dn D$_{4.6}$ रक्षिष्यंति (for रक्षन्तु त्वा). K$_{1.2.4}$ D$_{1.3.5}$ T G त्वां (for त्वा).

12 ^{a}) G$_1$ न (for च). Ś$_1$ K$_{1.2}$ साहसे चापि संतिष्ठन्; K$_4$ (marg. *sec. m.* as in text) साहसं स्वयमातिष्ठन्; B D (except D$_{1-3.5}$) साहसादनुसंप्राप्तः (Dc °प्ता); T$_2$ G$_{3.4}$ साहसेषु न कर्तव्यं. — ^{b}) B Dn D$_{4.6}$ प्रतिबुध्य; Dc$_1$ प्रतिहर्षं; Dc$_2$ प्रतिबुद्धान्; T$_2$ G$_{2-4}$ त्वया शैले (for इह शैले). — ^{d}) S स्वयं (G$_1$ भीमो) (for त्वया).

13 ^{a}) B D (except D$_{1-3.5}$) अतः (for इतः). Ś$_1$ K$_{1-3}$ D$_{1-3}$ वः सर्वान्; K$_4$ D$_5$ वः सर्वे; B Dn D$_{4.6}$ वो राजन् (for राजेन्द्र). — ^{b}) K$_{1.2}$ प्रेक्ष्यंति; K$_3$ Dc रक्ष्यंति. — ^{c}) B$_{1-3}$ Dc वः सर्वान्; B$_4$ Dn D$_{4.6}$ वो राजन्; D$_3$ M च तदा (for च सदा). — ^{d}) Dn D$_{4.6}$ रक्षिष्यंते; G$_{1.2}$ संरक्ष्यंति. B$_{1.2.3m}$ D (except D$_{1-3.5}$) वः सदा (for सर्वशः). K$_4$ (marg. *sec. m.* as in text) रक्षांसि तव सर्वशः.

14 ^{b}) K$_3$ D$_{1.2.5}$ विविधानि; Dc च फलानि (for च बहूनि). — ^{c}) K$_{1.2}$ वै गृह्य; K$_4$ च सदा; K$_4$ (marg. *sec. m.*) D$_{1-3.5}$ [उ]पादाय (for वो गृह्य). B Dc Dn D$_{4.6}$ आहरिष्यंति मत्प्रेष्याः. — ^{d}) D$_3$ -भृत्याः (for -प्रेष्याः). K$_4$ भरतर्षभ. B Dc Dn D$_{4.6}$ सदा वः (B$_2$ Dc सदाराः) पुरुषर्षभाः.

16 ^{b}) G$_2$ धर्मौ (for यमौ). K$_{1.2}$ Dc T$_2$ G तथा (for यथा). K$_{1.2}$ D$_{1-3}$ [अ]श्विनौ. — ^{c}) Dc ते तन्; T$_1$ तावन्; T$_2$ G$_{2-4}$ तथा (for तद्वन्). K$_4$ B$_2$ Dc D$_{1.6}$ T G$_{2.3}$ M$_1$ मया° (for ममा°). K$_{1.2}$ रक्ष्यास्तद्धर्ममप्येह. — ^{d}) B$_1$ स्वयं (for यूयं).

17 ^{a}) B D (except D$_{1-3.5}$) °विधानज्ञः. — ^{b}) Ś$_1$ K$_{1.2.4}$ D$_1$ °विभागवित्; K$_3$ B Dc Dn D$_{2-6}$ °विधानवित्. — ^{c}) K$_4$ भीमादवरजः श्रीमान्; G$_1$ °सेनोदयं राजन्. — ^{d}) N (except Ś$_1$ K$_{1.2}$) फाल्गुनः.

18 ^{ab}) K$_4$ B Dc Dn D$_{3.4.6}$ मता लोके; S महाबुद्धेर् (T$_1$ °द्ध्या) (for मता लोकेषु). D$_1$ काश्चित्सर्वमता लोके; D$_{2.5}$ याः काश्चित्संमता लोके. K$_4$ बुद्धेः; B D (except D$_5$) स्वर्ग्याः; T$_1$ वश्याः (for [अ]ग्र्याः).

19 ^{a}) Ś$_1$ K$_{1-3}$ D$_{1-3.5}$ transp. दमो and दानं. — ^{b}) K$_3$ D$_{1-3.5}$ T$_1$ धृतिस्तेजः पराक्रमः (T$_1$ °ज अनुत्तमं). — ^{c}) Ś$_1$ K$_{1-3}$ D$_{1-3.5}$ हि (for [अ]पि). T$_2$ (before corr.) G$_4$ महाबुद्धे. — ^{d}) T$_1$ M$_1$ स्थितानि हि यथा त्वयि.

20 ^{d}) Ś$_1$ K (K$_4$ marg. *sec. m.*) D$_{1-3.5}$ नरा नृप; Dc

न मोहात्कुरुते जिष्णुः कर्म पाण्डव गर्हितम् ।
न पार्थस्य मृषोक्तानि कथयन्ति नरा नृषु ॥ २०
स देवपितृगन्धर्वैः कुरूणां कीर्तिवर्धनः ।
मानितः कुरुतेऽस्त्राणि शक्रसद्मनि भारत ॥ २१
योऽसौ सर्वान्महीपालान्धर्मेण वशमानयत् ।
स शंतनुर्महातेजाः पितुस्तव पितामहः ।
प्रीयते पार्थ पार्थेन दिवि गाण्डीवधन्वना ॥ २२
सम्यक्चासौ महावीर्यः कुलधुर्य इव स्थितः ।
पितॄन्देवांस्तथा विप्रान्पूजयित्वा महायशाः ।
सप्त मुख्यान्महामेधानाहरद्यमुनां प्रति ॥ २३
अधिराजः स राजंस्त्वां शंतनुः प्रपितामहः ।
स्वर्गजिच्छक्रलोकस्थः कुशलं परिपृच्छति ॥ २४

वैशंपायन उवाच ।

ततः शक्तिं गदां खड्गं धनुश्च भरतर्षभ ।
प्राध्वं कृत्वा नमश्चक्रे कुबेराय वृकोदरः ॥ २५
ततोऽब्रवीद्धनाध्यक्षः शरण्यः शरणागतम् ।
मानहा भव शत्रूणां सुहृदां नन्दिवर्धनः ॥ २६
स्वेषु वेश्मसु रम्येषु वसतामित्रतापनाः ।
कामानुपहरिष्यन्ति यक्षा वो भरतर्षभाः ॥ २७
शीघ्रमेव गुडाकेशः कृतास्त्रः पुरुषर्षभः ।
साक्षान्मघवता सृष्टः संप्राप्स्यति धनंजयः ॥ २८
एवमुत्तमकर्माणमनुशिष्य युधिष्ठिरम् ।

C. 3. 11834
B. 3. 162. 32
K. 3. 163. 34

नरोत्तम.°

21 ^{c}) T_2 (before corr.) G_4 आनीतं; $G_{1.\,2}$ आनीतः (for मानितः). — ^{d}) Ś_1 K_{1-3} $D_{1-3.\,5}$ पांडवः; T_1 M_1 मानद (for भारत).

22 ^{c}) B D (except $D_{1-3.\,5}$) शांतनुर्. — ^{f}) $D_{1.\,2}$ T G_3 °धन्विना.

23 ^{a}) T_2 G सम्यक्चापे (G_1 संत्यक्त्वासौ). Ś_1 K (K_4 marg. *sec. m.*) $D_{1-3.\,5}$ समागम्य महाकीर्तिः. — ^{b}) K_4 यथा मेरुर् (for कुल°). T_1 M_2 [उ]त्थितः (for स्थितः). Ś_1 K (K_4 marg. *sec. m.*) Dc $D_{3.\,5}$ कुलधर्मेण पार्थिवः; B Dn $D_{1.\,2.\,4.\,6}$ कुलधु(Dn_2. n_3 °धै)र्येण पार्थिवः. — ^{c}) B D (except $D_{1-3.\,5}$) ऋषीन्विप्रान्; T_1 पूजयित्वा (for तथा विप्रान्). — ^{d}) T_1 यातः स्वर्गं (for पूजयित्वा). B D (except $D_{1-3.\,5}$) महातपाः. — ^{f}) B_4 T_1 M_1 अनु (for प्रति).

24 ^{a}) K_4 D_{1-3} अति राज्ञां ($D_{1.\,2}$ °ज्ञः) स; T_1 अथ आह च; T_2 G_3 अतिराजसु; $G_{1.\,4}$ अधिराजसु; G_2 M_2 अतिराजा स. K_1 M_2 राजंस्त्वा; T_1 M_1 राजेंद्रः. — ^{b}) Some N MSS. शांतनुः. T_1 M_1 त्वां (for प्र-). — ^{c}) T_2 G स्वर्ग° (for शक्र°).

25 After the ref., B_1(marg.)$._4$ D (except $D_{1-3.\,5}$) ins.:

823* एतच्छ्रुत्वा तु वचनं धनदेन प्रभाषितम् ।
पाण्डवाश्च ततस्तेन बभूवुः संप्रहर्षिताः ।

— ^{b}) Some MSS. भरतर्षभः. — D_2 om. 25^{c}–26^{b}. — ^{c}) Ś_1 $K_{1.\,2.\,4}$ (m as in text) D_5 T (T_2 by corr.) G_3 प्रह्वं; G_1 प्रध्वं; G_2 पादौ; G_4 पादे; M_1 प्रांचं; Cnp प्राज्यं (= ज्यारहितं Nil.) (for प्राध्वं). — ^{d}) T_1 पूजयित्वा (for कुबे°). K_4 (marg. *sec. m.* as in text) महात्मने (for वृको°).

26 D_2 om. 26^{ab} (cf. v.l. 25). — ^{a}) Ś_1 K (K_4 marg. *sec. m.*) $D_{3.\,5}$ तमब्र° (for ततोऽब्र°). K_4 (marg. *sec. m.* as in text) राजराजा (for धना°). — ^{b}) K_4 (marg. *sec. m.* as in text) T_1 M_1 शरणैषिणां; M_2 शरणं गतः. — ^{d}) Ś_1 K_{1-3} Dn_2 $D_{3.\,5}$ T_1 G_2 सुहृदानंद°; B_4 सुहृदां मान°. — After 26, T G ins.:

824* विभवस्तात शैलाग्रे वसानः सह बन्धुभिः ।
सुपर्णपितृदेवानां सततं मानकृद्भव ।
ऋजुं पश्यत मा वक्रं सत्यं वदत मानृतम् ।
दीर्घं पश्यत मा ह्रस्वं परं पश्यत मापरम् ।

[(L. 1) T_1 G_1 विभयः; G_2 विहरन् (for विभवः).]

27 ^{a}) S सर्वेषु (for रम्येषु). — ^{b}) Ś_1 K_{1-3} B_4 $D_{1-3.\,5}$ °कर्षणाः (for °तापनाः). — ^{c}) $B_{1.\,3}$ Dn $D_{4.\,6}$ कामाञ्च परिहास्यंति; D_5 कामाञ्च प्रहरिष्यंति; S कामानभिहरिष्यंति. — ^{d}) K_4 मम शासनात् (भर°).

28 ^{a}) Ś_1 K_{1-3} $D_{1-3.\,5}$ चापि (for एव). — ^{b}) B D (except $D_{1-3.\,5}$) पुनरेष्यति (for पुरु°). — ^{c}) K_4 स्वयं (for साक्षान्). Ś_1 D_3 पृष्टः; K_2 दृष्टः; T_1 M_1 [उ]त्सृष्टः; M_2 सृष्टं.

29 ^{a}) Ś_1 K $D_{1-3.\,5}$ एवमुत्तमधर्माणम् (K_4 उक्त्वैवं शुभकर्माणम्); T_1 एवमुत्तमकुर्वाणम्. — ^{b}) K_4 S अनुशास्य. — ^{c}) $D_{1.\,2}$ श्वेतं; D_5 वस्तुं (for अस्तं). B_2 (m as in text) अस्तंगिरिगते सूर्ये; S अस्तं गिरिमिवादित्यः (M_1 °साद्य). — ^{d}) $D_{1.\,2}$ प्रयातो.

C. 3. 11834
B. 3. 162. 32
K. 3. 163. 34

अस्तं गिरिवरश्रेष्ठं प्रययौ गुह्यकाधिपः ॥ २९
तं परिस्तोमसंकीर्णैर्नानारत्नविभूषितैः ।
यानैरनुययुर्यक्षा राक्षसाश्च सहस्रशः ॥ ३०
पक्षिणामिव निर्घोषः कुबेरसदनं प्रति ।
बभूव परमाश्वानामैरावतपथे यताम् ॥ ३१
ते जग्मुस्तूर्णमाकाशं धनाधिपतिवाजिनः ।
प्रकर्षन्त इवाभ्राणि पिबन्त इव मारुतम् ॥ ३२
ततस्तानि शरीराणि गतसत्त्वानि रक्षसाम् ।
अपाकृष्यन्त शैलाग्राद्धनाधिपतिशासनात् ॥ ३३
तेषां हि शापकालोऽसौ कृतोऽगस्त्येन धीमता ।
समरे निहतास्तस्मात्सर्वे मणिमता सह ॥ ३४
पाण्डवास्तु महात्मानस्तेषु वेश्मसु तां क्षपाम् ।
सुखमूषुर्गतोद्वेगाः पूजिताः सर्वराक्षसैः ॥ ३५

इति श्रीमहाभारते आरण्यकपर्वणि एकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥

१६०

वैशंपायन उवाच ।

ततः सूर्योदये धौम्यः कृत्वाह्निकमरिंदम ।
आर्ष्टिषेणेन सहितः पाण्डवानभ्यवर्तत ॥ १
तेऽभिवाद्यार्ष्टिषेणस्य पादौ धौम्यस्य चैव ह ।
ततः प्राञ्जलयः सर्वे ब्राह्मणांस्तानपूजयन् ॥ २
ततो युधिष्ठिरं धौम्यो गृहीत्वा दक्षिणे करे ।
प्राचीं दिशमभिप्रेक्ष्य महर्षिरिदमब्रवीत् ॥ ३
असौ सागरपर्यन्तां भूमिमावृत्य तिष्ठति ।

---

30 ^{a}) Ś$_1$ K$_{1-3.\,4}$ (marg. *sec. m.*) D$_{3.\,5}$ तं (Ś$_1$ K$_2$ ते) परिस्तोमसंस्तीर्णैर्; K$_4$ परिवृत्तोथ संकीर्णैर्; T$_1$ तं परिव्यो॰मसं°. — ^{b}) Ś$_1$ K D$_{1-3.\,5}$ नानारजत(K$_4$ नानाकनक-; K$_4$ marg. *sec. m.* महारजत)भूषितैः.

31 ^{c}) K$_4$ (marg. *sec. m.* as in text) °माश्चर्यम् (for °माश्वानाम्). — ^{d}) Ś$_1$ K D$_{3.\,5}$ ऐरावणपथे. K$_2$ B D (except D$_{1-3.\,5}$) T G$_{3.\,4}$ यथा (for यताम्).

33 ^{c}) Ś$_1$ K$_{1.\,2}$ D$_3$ ऽयपा°; K$_3$ अप°.

34 Before 34, T$_2$ G$_{2-4}$ ins. वैशं°. — ^{a}) Ś$_1$ K D$_{3.\,5}$ स (for हि). K$_{3.\,4}$ D$_{3.\,5}$ नाश° (for शाप°). Ś$_1$ K$_{1.\,2}$ [अ]पि; K$_{3.\,4}$ D$_5$ हि; B Dc Dn D$_{4.\,6}$ स (B$_1$ तु); D$_3$ [अ]यं (for [अ]सौ). D$_{1.\,2}$ तेषामयं शापकालः. — ^{d}) B D (except D$_{1-3.\,5}$) शापस्यांतोभवत्तदा.

35 ^{a}) K$_4$ पांडवापि; B D (except D$_{1-3.\,5}$) G$_1$ °वाश्च; T G$_{2-4}$ M °वाः सु-. — ^{b}) D$_{1.\,2.\,5}$ T$_2$ G$_{2-4}$ स्वेषु (for तेषु). N (except B$_{2.\,4}$) ताः क्षपाः. — ^{d}) K$_4$ S °ताः सह (K$_4$ T$_1$ M$_1$ °ता यक्ष-) राक्षसैः.

Colophon. — *Major parvan:* Ś$_1$ K$_{1.\,2}$ Dn$_2$ T$_2$ G$_{2-4}$ आरण्य. — *Sub-parvan:* K$_3$ D$_{1.\,2}$ (all om. sub-parvan name) mention only लोमशतीर्थयात्रा (followed by गंधमादनवास in K$_3$, and गंधमादनप्रवेश in D$_1$); B$_{1.\,4}$ Dn D$_{4-6}$ T$_2$ G$_3$, likewise, only गंधमादनप्रवेश (D$_5$ T$_2$ G$_3$ °निवास); and finally B$_{2.\,3}$ Dc, only गंधमादनवास. — *Adhy. name:* K$_4$ कुबेरसमागमः; D$_2$ धनदागमनं; D$_3$ M$_2$ वैश्रवणसमागमः; G$_1$ वैश्रवणनिवर्तनं. — *Adhy. no.* (figures, words or both): Dn 161 (Dn$_3$ 162); D$_1$ 167; S 163 (M$_2$ *sup. lin.* 165). — *Śloka no.:* Dn 38; D$_1$ 37.

160

1 ^{b}) K$_4$ पांचाली शुभदर्शना; K$_4$ (marg. *sec. m.*) D$_1$ T$_1$ M पांचाली सुहृदश्च ते (T$_1$ तान्); D$_2$ T$_2$ G पांचालीसहितांश्च तान् (D$_2$ °तश्च ते; G$_2$ °तश्च तान्). — ^{c}) B आर्ष्टिसेनेन. K$_{1.\,4}$ D$_{1.\,2}$ M सहिताः; D$_5$ °तं; T$_1$ °तान्.

2 ^{b}) K$_4$ Dc D$_{1.\,2.\,5}$ T$_1$ G$_{1.\,2}$ हि (for ह). — After 2, K$_4$ Dc D$_{1-3}$ S (except G$_1$) ins.:

825* आर्ष्टिषेणः परिष्वज्य पुत्रवद्भरतर्षभान् ।
[T$_2$ G$_{2.\,3}$ M भरतर्षभ.]

3 G$_1$ om. 3–4. — ^{ab}) K$_4$ D$_{1-3}$ S (G$_1$ om.) धर्मराजं स्पृशन्पाणौ पाणिना स महातपाः. — ^{c}) Ś$_1$ K$_{1.\,2}$ अथोदीक्ष्य (for अभिप्रेक्ष्य).

4 G$_1$ om. 4 (cf. v.l. 3). — ^{c}) Ś$_1$ K$_{1.\,2}$ महावीर्य

शैलराजो महाराज मन्दरोऽभिविराजते ॥ ४
इन्द्रवैश्रवणावेतां दिशं पाण्डव रक्षतः ।
पर्वतैश्च वनान्तैश्च काननैश्चोपशोभिताम् ॥ ५
एतदाहुर्महेन्द्रस्य राज्ञो वैश्रवणस्य च ।
ऋषयः सर्वधर्मज्ञाः सद्म तात मनीषिणः ॥ ६
अतश्चोद्यन्तमादित्यमुपतिष्ठन्ति वै प्रजाः ।
ऋषयश्चापि धर्मज्ञाः सिद्धाः साध्याश्च देवताः ॥ ७
यमस्तु राजा धर्मात्मा सर्वप्राणभृतां प्रभुः ।
प्रेतसत्त्वगतीमेतां दक्षिणामाश्रितो दिशम् ॥ ८
एतत्संयमनं पुण्यमतीवाद्भुतदर्शनम् ।
प्रेतराजस्य भवनमृद्ध्या परमया युतम् ॥ ९
यं प्राप्य सविता राजन्सत्येन प्रतितिष्ठति ।
अस्तं पर्वतराजानमेतमाहुर्मनीषिणः ॥ १०
एतं पर्वतराजानं समुद्रं च महोदधिम् ।
आवसन्वरुणो राजा भूतानि परिरक्षति ॥ ११
उदीचीं दीपयन्नेष दिशं तिष्ठति कीर्तिमान् ।
महामेरुर्महाभाग शिवो ब्रह्मविदां गतिः ॥ १२
यस्मिन्ब्रह्मसदश्चैव तिष्ठते च प्रजापतिः ।
भूतात्मा विसृजन्सर्वं यत्किंचिज्जङ्गमागमम् ॥ १३
यानाहुर्ब्रह्मणः पुत्रान्मानसान्दक्षसप्तमान् ।
तेषामपि महामेरुः स्थानं शिवमनामयम् ॥ १४
अत्रैव प्रतितिष्ठन्ति पुनरत्रोदयन्ति च ।
सप्त देवर्षयस्तात वसिष्ठप्रमुखाः सदा ॥ १५
देशं विरजसं पश्य मेरोः शिखरमुत्तमम् ।
यत्रात्मतृप्तैरध्यास्ते देवैः सह पितामहः ॥ १६
यमाहुः सर्वभूतानां प्रकृतेः प्रकृतिं ध्रुवम् ।

C. 3. 11657
B. 3. 163. 17
K. 3. 164. 16

(for °राज). — ^{d}) Ś$_1$ B Dc Dn D$_{4.6}$ [ऽ]तिविराजते (B$_2$ °ति); K$_3$ हि विराजते; S (G$_1$ om.) [ऽ]भि(T$_1$ M$_2$ हि)विराजयन्.

5 ^{a}) K$_{1.2}$ D$_2$ इंद्रवैश्रवणावेतौ; T$_1$ G$_{1.2}$ M$_1$ °णोपेतां; T$_2$ G$_3$ इंद्रो वैश्रवणोपेतो. — ^{b}) K$_1$ रक्षितः; Dc रक्षितां; D$_{1.4}$ T$_1$ रक्षत (D$_1$ °तं); T$_2$ G °ति. — ^{d}) K$_{1-3}$ om. च. B$_4$ Dn D$_{4.6}$ [ए]व (for [उ]प-). Some MSS. °शोभितं.

6 D$_5$ om. 6. — ^{a}) Ś$_1$ K$_{1.2}$ T$_1$ M एताम्; T$_2$ G$_{2.3}$ एतम्; G$_1$ एवम् (for एतद्). — ^{c}) Dc चापि; T$_2$ G$_{2-4}$ चैव (for सर्व-). — Ś$_1$ K$_{1.2}$ D$_2$ M$_2$ om. (hapl.) 6^{d}–7^{c}. — ^{d}) K$_4$ (marg. *sec. m.* as in text) S सर्वे (for सप्त). Dn$_2$ D$_1$ (*sup. lin.* as in text) संयुक्ताश्च मनी°.

7 Ś$_1$ K$_{1.2}$ D$_2$ M$_2$ om. 7^{abc} (cf. v.l. 6). — ^{b}) B$_1$ G$_1$ उपातिष्ठंत; T$_1$ उद्दतिष्ठंति. K$_{3.4}$ B$_4$ Dc D$_{1.3.5}$ M$_2$ द्विजाः (for प्रजाः). — ^{c}) D$_5$ चाथ; T$_2$ G चैव (G$_1$ सर्व-) (for चापि).

8 ^{a}) K$_3$ D$_5$ च (for तु). K$_4$ G$_4$ राजन्. Ś$_1$ B$_{1-3}$ D (except D$_{1-3.5}$) धर्मज्ञः (for धर्मात्मा). — ^{b}) Ś$_1$ K$_{1.2}$ B$_4$ D$_5$ G$_1$ वरः (for प्रभुः). — ^{c}) Ś$_1$ K$_3$ D$_{1-3.5}$ प्रेतसत्त्वैर्ग(D$_5$ °र्यु)ताम्; K$_{1.2}$ प्रेतैः सत्त्वैर्गतैर् (K$_2$ °ताम्); K$_4$ अगस्तिसेविताम्; B Dc Dn D$_{4.6}$ G$_4$ प्रेतसत्त्व(B$_4$ °सिद्ध)गतिम्; G$_1$ °गती. B Dc ह्येतां; Dn D$_{4.6}$ ह्येनां (for एतां). — ^{d}) K$_4$ transp. दक्षिणां and आश्रितो; D$_{1.2}$ transp. आश्रितः and दिशं. D$_{3.5}$ आस्थितो.

10 G$_1$ om. 10. — ^{a}) Dc Dn D$_4$ तं; D$_3$ सं-; D$_5$ स (for यं). — ^{d}) Ś$_1$ K$_{1.2}$ एतद् (for एतम्).

11 ^{a}) K$_2$ एवं; K$_4$ B$_{2.4}$ Dn$_1$. n$_3$ D$_{1.3.5}$ एनं; G$_1$ स तं (for एतं).

12 ^{b}) B Dc Dn D$_{4.6}$ वीर्यवान् (B$_4$ भानुमान्); D$_5$ मूर्तिमान्. — ^{c}) Ś$_1$ K$_{1-3.4}$ (marg. *sec. m.*) D$_{1-3}$ गिरिवरः; T$_1$ महाराज; T$_2$ G$_{2.3}$ महाभागः.

13 ^{a}) K$_{1.2}$ B$_3$ अस्मिन्. K$_4$ (marg *sec. m.* as in text) T$_1$ M$_1$ ब्रह्मविदश्चैव. T$_2$ G यस्मिन्ब्राह्मणसंवैश्च. — ^{b}) K$_3$ D$_6$ तिष्ठति. K$_3$ D$_6$ [ए]व; K$_4$ [अ]थ; T$_2$ G वै (for च). B$_{1-3}$ Dc Dn D$_{4.6}$ भूतात्मा चात्रतिष्ठते (B$_{2.3}$ D$_{4.6}$ °ति). — ^{c}) B$_4$ भूतानि. T$_1$ G$_1$ M$_2$ सर्गं; T$_2$ G$_{2-4}$ विश्वं; M$_1$ स्वर्गं (for सर्वं). B$_{1-3}$ D (except D$_{1-3.5}$) प्रजापतिः सृजन्सर्वं.

14 ^{b}) K$_{1.2}$ मानुषान्. K$_4$ D$_3$ (by corr.) ऋषिसत्तमान्; B$_{1.2}$ T$_1$ G$_{1.2}$ M$_2$ दक्षसत्तमान्. — ^{c}) Ś$_1$ K$_{1.2}$ महद्ध्येतत; K$_3$ महासेतुः; T$_1$ M महामेरोः (M$_1$ °रौ). — ^{d}) K$_4$ स्थानमेतद्; B$_{1-3}$ D (except D$_{1-3.5}$) शिवं स्थानम् (by transp.). T$_2$ G$_{2-4}$ अनुत्तमम्.

15 ^{b}) K$_3$ D$_5$ अभ्यु°; B$_{2-4}$ Dc Dn D$_{1.2}$ एवो° (for अत्रो°). — ^{c}) K$_3$ D$_{1-3}$ पार्थ (for तात). — ^{d}) Ś$_1$ K$_2$ B$_3$ G$_1$ तथा; K$_1$ ततः; B$_1$ Dn D$_{1.4.6}$ T G$_{2-4}$ M तदा.

16 ^{a}) Ś$_1$ K$_{1.2}$ D$_5$ एतद्; K$_{3.4}$ (marg. *sec. m.*) D$_3$ एतं; K$_4$ देवं; D$_{1.2}$ एवं (for देशं). — ^{c}) K$_4$ (marg. *sec. m.* as in text) यत्रास्ते भगवान्देवो; S आत्मतृप्तैर्यै(T$_1$ °श्च)तैर्यत्र. — ^{d}) T$_1$ M$_1$ नित्यमास्ते (for देवैः सह).

C. 3. 11857
B. 3. 163. 17
K. 3. 164. 16

अनादिनिधनं देवं प्रभुं नारायणं परम् ॥ १७
ब्रह्मणः सदनात्तस्य परं स्थानं प्रकाशते ।
देवाश्च यत्नात्पश्यन्ति दिव्यं तेजोमयं शिवम् ॥ १८
अत्यर्कानलदीप्तं तत्स्थानं विष्णोर्महात्मनः ।
स्वयैव प्रभया राजन्दुष्प्रेक्ष्यं देवदानवैः ॥ १९
तद्वै ज्योतींषि सर्वाणि प्राप्य भासन्ति नोऽपि च ।
स्वयं विभुरदीनात्मा तत्र ह्यभिविराजते ॥ २०
यतयस्तत्र गच्छन्ति भक्त्या नारायणं हरिम् ।
परेण तपसा युक्ता भाविताः कर्मभिः शुभैः ॥ २१
योगसिद्धा महात्मानस्तमोमोहविवर्जिताः ।
तत्र गत्वा पुनर्नेमं लोकमायान्ति भारत ॥ २२
स्थानमेतन्महाभाग ध्रुवमक्षयमव्ययम् ।

---

17 ^{b}) D$_4$ G$_{1.2}$ M$_2$ ध्रुवां. Ś$_1$ K$_{1.2.4}$ (marg. *sec. m.*) प्रवृत्तिं प्रकृतेः परां (K$_{1.2}$ °रं); K$_3$ D$_{1-3.5}$ प्रकृतिं (K$_3$ °तिः) प्रकृतेः परं; K$_4$ (corrupt) प्रवृत्तिं प्रकृतेर्भुजं; T$_1$ (by transp.) प्रकृतिं प्रकृतेर्ध्रुवं. — M om. 17^{c}–19^{d}, and ins. 826* after 17^{ab}. — ^{d}) Ś$_1$ K$_{1.2}$ G$_1$ प्रभुं; K$_{3.4}$ D$_{1-3}$ T$_1$ हरिं (for परम्).

18 K$_1$ M om. 18 (for M, cf. v.l. 17). — ^{c}) T$_2$ G$_{3.4}$ यज्ञात्; G$_1$ युक्तान् (for यत्नात्). Ś$_1$ K$_2$ अपि देवा न गच्छंति; K$_{3.4}$ D$_{1.2}$ देवा अपि न पश्यंति; B Dc Dn D$_{4.6}$ देवापि यं न पश्यंति; D$_{3.5}$ अपि देवा यं न यांति. — ^{d}) B D (except D$_{1-3.5}$) सर्व- (for दिव्यं). Ś$_1$ K$_2$ B Dn D$_{4.6}$ शुभं (for शिवम्). G$_1$ तत्र मायामयं शिवं.

19 M om. 19 (cf. v.l. 17). — K$_3$ B Dc Dn D$_{4.6}$ T G ins. after 19; K$_4$, after 22; D$_{1-3}$, after 24; M (which om. 17^{c}–19^{d}) ins. after 17^{ab}:

826* प्राच्यां नारायणस्थानं मेरावतिविराजते ।

[K$_4$ D$_{1-3}$ M नारायणस्तात (for °स्थानं). K$_4$ मेरोरथ; B$_1$ मेरावत्र; D$_{1-3}$ मेरावभि-; T$_1$ मम राजन् (for मेरावंति-).] — Thereafter T$_1$ reads 21–22 and 828*. K$_3$ B Dc Dn D$_{4.6}$ T$_2$ G (G$_1$ om. lines 3–4) M cont.: K$_4$ ins. line 1 after 826* and lines 2–4 after 19; T$_1$ ins. after 828*:

827* यत्र भूतेश्वरस्तात सर्वप्रकृतिरात्मभूः ।
भासयन्सर्वभूतानि सुश्रियाभिविराजते ।
नात्र ब्रह्मर्षयस्तात कुत एव महर्षयः ।
प्राप्नुवन्ति गतिं ह्येतां यतीनां कुरुसत्तम ।

[(L. 2) K$_3$ S (except T$_2$ G$_3$) भावयन्; K$_4$ स चाग्रं (for भासयन्). K$_{3.4}$ B$_{1.2}$ S स्व- (for सु-). — (L. 3) K$_4$ कुतो ब्रह्मर्षयस्तथा; T$_1$ नात्र देवर्षयः कुतः; T$_2$ G (G$_1$ om.) M कुतो देवर्षयस्तथा. — (L. 4) T$_1$ प्राप्स्यंति च (for प्राप्नु°). K$_4$ M$_1$ ह्येषां; T$_2$ G (G$_1$ om.) ह्येनां. T$_2$ G (G$_1$ om.) यतीनां भावितात्मनां.]

20 G$_1$ om. 20. — ^{a}) B$_1$ Dc न तज्; B$_{2-4}$ Dn D$_{4.6}$ न तं; S (G$_1$ om.) नात्र (for तद्वै). K$_4$ (marg. *sec. m.*) नात्र ज्योतींषि शास्त्राणि. — ^{b}) B Dc Dn D$_{4.6}$ पांडव; T$_1$ G$_{2.4}$ M$_1$ भारत (for नोऽपि च). K$_{3.4}$ D$_{1-3.5}$ प्राप्य नाभांति तेजसा (K$_4$ marg. *sec. m.* प्राप्य तिष्ठंति पांडव). — ^{c}) Ś$_1$ K$_{1.2}$ B$_{1-3}$ Dc Dn D$_{4-6}$ स्वयं प्रभु(Ś$_1$ K$_{1.2}$ विष्णु)रचिंत्यात्मा; K$_4$ (marg. *sec. m.*) अयं वीरः स भगवान्. — ^{d}) K$_{1.2}$ B D (except D$_{3.4.6}$) ह्यति-; T G (G$_1$ om.) [ए]वाभि- (for ह्यभि-). K$_4$ (marg. *sec. m.*) स्वयमत्र विराजते.

21 M$_2$ om. 21–22. For T$_1$ cf. v.l. 19. — ^{b}) Ś$_1$ K$_{1-3}$ D$_{1.2.5}$ M$_1$ भक्ता; T G देवं (for भक्त्या). Ś$_1$ विभुं; D$_3$ शुभं; D$_5$ प्रभुं (for हरिम्). K$_4$ भक्ता नारायणाश्रमं.

22 M$_2$ om. 22 (cf. v.l. 21). For T$_1$ cf. v.l. 19. — ^{a}) K$_{3.4}$ जिता°; D$_{1-3.5}$ यता° (for महा°). — ^{b}) T$_2$ G$_{3.4}$ ततो (for तमो-). — ^{cd}) T$_2$ G$_{3.4}$ अत्र (for तत्र). D$_{1.2}$ transp. नेमं and लोकं. — After 22, K$_3$ B D (except D$_{1-3.5}$) S (except M$_2$) ins.:

828* स्वयंभुवं महात्मानं देवदेवं सनातनम् ।

Thereafter T$_1$ reads 827*.

23 ^{a}) K$_{1.2}$ महाभाव; T$_1$ M$_1$ महाराज. — ^{c}) T$_1$ सदाप्यत्र (for सदा ह्येतत्). . — ^{d}) Ś$_1$ K$_{1.2.4}$ (marg. *sec. m.*) D$_5$ प्राणिकर्तुर्; K$_4$ (orig.) G$_{1.4}$ प्राणमात्रं; K$_4$ (also marg. *sec. m.*) Dc D$_{1-3}$ प्रणम त्वं; T$_1$ प्रणमाशु. — After 23, N ins.:

829* एनं त्वहरहर्मेरुं सूर्याचन्द्रमसौ ध्रुवम् ।
प्रदक्षिणमुपावृत्तौ कुरुतः कुरुसत्तम ।
ज्योतींषि चाप्यशेषेण सर्वाण्यनघ सर्वतः ।
परियान्ति महाराज गिरिराजं प्रदक्षिणम् ।

[(L. 2) B$_{2-4}$ Dn D$_{4.6}$ उपावृत्य. B$_2$ Dn D$_{4.6}$ कुरुनंदन. — (L. 3) K$_4$ (marg. *sec. m.* as above) ज्योतींष्यनेन मार्गेण. D$_5$ [अ]स्य च (for [अ]नघ). Ś$_1$ K$_4$ संघशः; D$_1$ संशयः (for सर्वतः). K$_{1.2}$ सर्वाण्यनाम (sic) संघशः; K$_4$ (marg. *sec. m.* as above) D$_3$ सर्वाण्येनमसंशयः; B$_4$ सर्वाण्येतानि नित्यतः. — K$_2$ om. (hapl.) from the posterior half of line 4 up to 25^{c}.]

ईश्वरस्य सदा ह्येतत्प्रणमात्र युधिष्ठिर ॥ २३
एतं ज्योतींषि सर्वाणि प्रकर्षन्भगवानपि ।
कुरुते वितमस्कर्मा आदित्योऽभिप्रदक्षिणम् ॥ २४
अस्तं प्राप्य ततः संध्यामतिक्रम्य दिवाकरः ।
उदीचीं भजते काष्ठां दिशमेष विभावसुः ॥ २५
स मेरुमनुवृत्तः सन्पुनर्गच्छति पाण्डव ।
प्राङ्मुखः सविता देवः सर्वभूतहिते रतः ॥ २६
स मासं विभजन्कालं बहुधा पर्वसंधिषु ।
तथैव भगवान्सोमो नक्षत्रैः सह गच्छति ॥ २७
एवमेष परिक्रम्य महामेरुमतन्द्रितः ।
भावयन्सर्वभूतानि पुनर्गच्छति मन्दरम् ॥ २८
तथा तमिस्रहा देवो मयूखैर्भावयञ्जगत् ।
मार्गमेतदसंबाधमादित्यः परिवर्तते ॥ २९
सिसृक्षुः शिशिराण्येष दक्षिणां भजते दिशम् ।
ततः सर्वाणि भूतानि कालः शिशिरमृच्छति ॥ ३०
स्थावराणां च भूतानां जङ्गमानां च तेजसा ।
तेजांसि समुपादत्ते निवृत्तः सन्विभावसुः ॥ ३१
ततः स्वेदः क्लमस्तन्द्री ग्लानिश्च भजते नरान् ।
प्राणिभिः सततं स्वप्नो ह्यभीक्ष्णं च निषेव्यते ॥ ३२
एवमेतदनिर्देश्यं मार्गमावृत्य भानुमान् ।

C. 3. 11878
B. 3. 163. 38
K. 3. 164. 37

---

24 Ś$_1$ K$_{1.2}$ D$_{1-3.5}$ om. 24 (for K$_2$ cf. v.l. 23); T$_2$ G$_3$ om. 24–25. — ^{a}) K$_4$ Dn$_1$ एनं; B$_1$ M एतज्; B$_4$ Dc$_2$ Dn$_3$ T$_1$ एवं; G (G$_3$ om.) एष (for एतं). — ^{c}) K$_4$ वितमः कर्ता; T$_1$ °मस्कत्वं; G$_1$ °मः कर्म; G$_{2.4}$ °मः कामं. — After 24, D$_{1-3}$ read 826*.

25 T$_2$ G$_3$ om. 25 (cf. v.l. 24); K$_2$ om. 25^{abc} (cf. v.l. 23). — ^{b}) Ś$_1$ K$_1$ युधिष्ठिर (for दिवा°). — ^{c}) Ś$_1$ K$_1$ D$_3$ राजन्; K$_3$ B$_3$ D$_{1.2.5}$ पूर्वं; K$_4$ B$_1$ Dc पूर्वां; M काले (for काष्ठां). — ^{d}) K$_4$ D$_{1.2}$ एव (for एष). B$_4$ बहुधायं विभावसुः; S (T$_2$ G$_3$ om.) बहुधा पर्वसंधिषु.

26 G$_1$ M$_1$ om. (hapl.) 26^{a}–27^{b}; M$_2$ om. 26–27. — ^{a}) Dn$_2$ सुमेरु°. Dn स (for सन्). Ś$_1$ K D$_{1-3.5}$ मेरुमेतमुपावृ(D$_3$ °श्रि)त्य; T$_1$ समेतामुपवृत्तः स. — ^{b}) T G (G$_1$ om.) उपा(T$_1$ °प)गच्छति (for पुनर्गच्छति). — ^{c}) B$_4$ स तदा; T$_1$ सहितं; T$_2$ G (G$_1$ om.) सततं (for सविता).

27 M$_2$ om. 27; G$_1$ M$_1$ om. 27^{ab} (cf. v.l. 26). — ^{a}) K$_4$ (marg. *sec. m.* as in text) समं सं-; Dn$_1$ स मासान्; T$_1$ सदा सं-; T$_2$ G (G$_1$ om.) स सम्यग् (for स मासं). K$_4$ (marg. *sec. m.*) Dn$_2$. n$_3$ D$_5$ काले; T$_2$ G$_{3.4}$ कालान् (for कालं). — ^{b}) Ś$_1$ विभजन् (for बहुधा). Ś$_1$ K$_{1.2}$ Dn$_2$ सर्व° (for पर्व°). — ^{c}) K$_{3.4}$ D$_{1.2}$ तमेव विभजन् (for तथैव भगवान्). K$_4$ (marg. *sec. m.*) S (M$_2$ om.) देवो (for सोमो).

28 G$_2$ om. 28^{ab}. — ^{a}) Ś$_1$ K B$_2$ एतं; D$_{1-3}$ एनं; T$_2$ G$_{3.4}$ एवं (for एष). Ś$_1$ K$_3$ D$_3$ T$_2$ G$_{3.4}$ अतिक्रम्य; B$_{1-3}$ Dc Dn$_2$. n$_3$ D$_{4.6}$ त्वतिक्रम्य; Dn$_1$ ह्यति°; T$_1$ परिक्रामन्. — After 28^{ab}, S (except G$_2$) ins.:

830* सोमश्च विभजन्कालं बहुधा पर्वसंधिषु ।

[Cf. 27^{ab}.]

— ^{c}) K$_4$ (marg. *sec. m.*) S भास° (for भाव°). — Ś$_1$ K$_{1.2}$ om. (hapl.) 28^{d}–30^{c}. — ^{d}) K$_4$ D$_3$ T$_1$ मंदिरं; T$_2$ G सागरं (for मन्दरम्).

29 Ś$_1$ K$_{1.2}$ om. 29 (cf. v.l. 28). — ^{a}) K$_4$ (marg. *sec. m.* as in text) तथा तस्मिन्प्रभा देवो. — ^{b}) K$_4$ B$_4$ Dc D$_{1.2}$ S (except T$_2$ G$_3$) भास° (for भाव°). — ^{c}) K$_{3.4}$ B$_{1.3}$ Dc D$_5$ T$_1$ M एतम्; B$_4$ D$_1$ एनम्; T$_2$ G एवम् (for एतद्).

30 K$_3$ om. from st. 30 up to 4^{a} of the next adhy.; Ś$_1$ K$_{1.2}$ om. 30^{abc} (cf. v.l. 28). — ^{a}) T$_1$ विसृजञ् (for सिसृक्षुः). K$_4$ S शिशिरं ह्येष (T$_1$ G$_1$ °षु); K$_4$ (marg. *sec. m.*) B$_4$ Dn D$_{2.4.5}$ शिशिराण्येव; Dc °ण्येषु; D$_1$ °यैव. — ^{b}) K$_4$ D$_{3.5}$ S transp. दक्षिणां and भजते. — ^{d}) K$_1$ काले; T$_2$ G कालं. D$_{1.2}$ शैशिरम्. K$_{1.2}$ D$_{1-3}$ अर्छति (for ऋच्छति). K$_4$ कालमर्छति शैशिरं; B Dc Dn D$_{4-6}$ कालोभ्यर्छति शैशिरः; T$_1$ M$_1$ कालः स्पृशति शैशिरः; M$_2$ कालस्त्वृच्छति वै शिरः.

31 K$_3$ om. 31 (cf. v.l. 30). — ^{c}) Ś$_1$ K$_{1.2}$ D$_{1-3}$ पुनराद(K$_{1.2}$ °ध)त्ते; Dc समुपादत्त. — ^{d}) K$_4$ B$_{2-4}$ Dn D$_{1.2.4-6}$ T$_2$ G स (for सन्).

32 K$_3$ om. 32 (cf. v.l. 30). — ^{a}) B Dc Dn D$_{4-6}$ स्वेदक्लमौ; D$_{1.2}$ G$_1$ M$_2$ स्वेदक्लमस्. — ^{cd}) K$_4$ S (except G$_4$) प्राणिनः (for °भिः). K$_4$ स्वप्ने (for स्वप्नो). Ś$_1$ स्वप्नेत्वभीष्टं; K$_{1.2}$ स्वप्ने स्वभीष्टं; B$_4$ स्वप्नमभीक्ष्णं. S स्वप्नानभीक्ष्णं समु(T$_2$ G$_{2-4}$ पर्यु)पासते.

33 K$_3$ om. 33 (cf. v.l. 30). — ^{a}) K$_4$ एवम्; D$_{1-3}$ T$_1$ G$_1$ M$_1$ एतम् (for एतद्). — Dc D$_2$ om. (hapl.) 33^{d}–35^{c}. — ^{d}) Ś$_1$ K$_{1.2}$ प्राव°; T$_1$ पाल° (for भाव°).

C. 3. 11878 B. 3. 163. 38 K. 3. 164. 37 पुनः सृजति वर्षाणि भगवान्भावयन्प्रजाः ॥ ३३
वृष्टिमारुतसंतापैः सुखैः स्थावरजङ्गमान् ।
वर्धयन्सुमहातेजाः पुनः प्रतिनिवर्तते ॥ ३४
एवमेष चरन्पार्थ कालचक्रमतन्द्रितः ।
प्रकर्षन्सर्वभूतानि सविता परिवर्तते ॥ ३५
संतता गतिरेतस्य नैष तिष्ठति पाण्डव ।
आदायैव तु भूतानां तेजो विसृजते पुनः ॥ ३६
विभजन्सर्वभूतानामायुः कर्म च भारत ।
अहोरात्रान्कलाः काष्ठाः सृजत्येष सदा विभुः ॥ ३७

इति श्रीमहाभारते आरण्यकपर्वणि षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥

१६१

वैशंपायन उवाच ।
तस्मिन्नगेन्द्रे वसतां तु तेषां
महात्मनां सद्व्रतमास्थितानाम् ।
रतिः प्रमोदश्च बभूव तेषा-
माकाङ्क्षतां दर्शनमर्जुनस्य ॥ १
तान्वीर्ययुक्तान्सुविशुद्धसत्त्वां-
स्तेजस्विनः सत्यधृतिप्रधानान् ।
संप्रीयमाणा बहवोऽभिजग्मु-
र्गन्धर्वसंघाश्च महर्षयश्च ॥ २
तं पादपैः पुष्पधरैरुपेतं
नगोत्तमं प्राप्य महारथानाम् ।
मनःप्रसादः परमो बभूव
यथा दिवं प्राप्य मरुद्गणानाम् ॥ ३
मयूरहंसस्वननादितानि

---

36 K$_3$ om. 36 (cf. v.l. 30). — D$_2$ om. 36^{c}–37^{b}. — ^{c}) Ś$_1$ K$_{1.2}$ आदधत्स(K$_1$ °न्स)र्वभूतानां; K$_4$ G$_1$ M$_2$ आदावेव तु भू°; K$_4$ (marg. *sec. m.*) D$_{1.3.5}$ आददत्स-(D$_{1.3}$ °न्स)र्वभू°; Dn$_1$. n$_2$ D$_6$ आदायैवं तु भू°. — ^{d}) Ś$_1$ K (K$_3$ om.) D$_{1.3.5}$ तेजांसि विसृजन्पुनः (D$_1$ °न्प्रभुः).

37 K$_3$ om. 37; D$_2$ om. 37^{ab} (cf. v.l. 30, 36). — ^{a}) B$_{1.2.4}$ Dc विसृजन्; G$_1$ भगवन् (for विभजन्). — ^{b}) K$_4$ S (except G$_1$) पांडव (for भारत). — ^{c}) K (K$_3$ om.) B Dc Dn D$_{4.6}$ M$_1$ अहोरात्रं; D$_{1.2.5}$ M$_2$ अहोरात्राः. — ^{d}) D$_{1.2}$ [ए]व (for [ए]ष). B$_2$ भवत्प्रभुः; D$_3$ विभावसुः (for सदा विभुः). K$_4$ D$_5$ S प्रभुः; Dc हरिः (for विभुः).

Colophon om. in K$_3$. — *Major parvan :* Ś$_1$ K$_{1.2}$ Dn$_2$ D$_6$ G$_{2.4}$ आरण्य. — *Sub-parvan :* B$_1$ Dn (both om. sub-parvan name) mention only गंधमादनप्रवेश; B$_{2.3}$ Dc D$_6$ M, likewise, only °मादनवास; B$_4$ D$_{3.5}$, only °मादननिवास; and finally D$_{1.2}$, only लोमशतीर्थयात्रा (followed by गंधमादनप्रवेश in D$_1$). — *Adhy. name :* K$_4$ पृथिवीदर्शनः; Dc धौम्यवाक्यं; D$_{1.2}$ आर्ष्टिषेणवाक्यं; G$_{1.2}$ कालचक्रवर्णनं. — *Adhy. no.* (figures, words or both): Dn 162 (Dn$_3$ 163); D$_1$ 168; S (M$_2$ *sup. lin.*) 164 (M$_2$ orig. 166). — *Śloka no.:* Dn 42; D$_1$ 39.

161

1 K$_3$ om. 1^{a}–4^{a} (cf. v.l. 3. 160. 30). — ^{b}) Ś$_1$ K$_{1.4}$ D$_{1-3}$ M$_2$ धर्मा° (for महा°). K$_4$ (marg. *sec. m.* as in text) सत्यव्रतां कुरूणां; B$_4$ भारत पांडवानां; S सद्व्रतमाश्रितानां. — ^{c}) K$_{1.2}$ B$_4$ D$_{3.5}$ S राजन् (for तेषाम्). — ^{d}) Ś$_1$ अच्युतस्य (for अर्जुनस्य).

2 K$_3$ om. 2 (cf. v.l. 1). — ^{a}) T$_1$ M सत्यसंधान् (for वीर्ययुक्तान्). D$_{1.2}$ G$_4$ स- (for सु-). Dn D$_{4.6}$ G$_1$ °कामान् (for °सत्त्वान्). D$_5$ वीर्यान्वितांस्तांश्च विशुद्ध°. — ^{b}) Ś$_1$ K$_{1.2}$ D$_3$ महौजसः पांडुसुतांस्तदानीं; D$_{1.2}$ तेजस्विनः साधुधृतिप्रधानान्; D$_5$ °नः सत्यविधिप्रमाणान्; S तेज(T$_1$ M तप)स्विनः शस्त्रभृतां वरिष्ठान्. — ^{c}) Ś$_1$ K$_{1.2}$ D$_3$ T$_2$ G$_{1-3}$ संप्रीयमाणान्. D$_{1.3}$ S (except M$_1$) बहुधा (for बहवो). — ^{d}) Ś$_1$ K$_{1.2}$ D$_{1-3.5}$ गंधर्वमुख्या°; T$_1$ ससिद्धसंघा°.

3 K$_3$ om. 3 (cf. v.l. 1). — ^{a}) K$_1$ D$_3$ पुष्पवरैर्; B$_4$ S °फलैर्; Dc °वनैर्. — Ś$_1$ om. 3^{cd}. — ^{c}) S प्रथमो (for परमो).

पुष्पोपकीर्णानि महाचलस्य ।
शृङ्गाणि सानूनि च पश्यमाना
गिरेः परं हर्षमवाप्य तस्थुः ॥ ४
साक्षात्कुबेरेण कृताश्च तस्मि-
न्नगोत्तमे संवृतकूलरोधसः ।
कादम्बकारण्डवहंसजुष्टाः
पद्माकुलाः पुष्करिणीरपश्यन् ॥ ५
क्रीडाप्रदेशांश्च समृद्धरूपा-
न्सुचित्रमाल्यावृतजातशोभान् ।
मणिप्रवेकान्सुमनोहरांश्च
यथा भवेयुर्धनदस्य राज्ञः ॥ ६
अनेकवर्णैश्च सुगन्धिभिश्च
महाद्रुमैः संततमभ्रमालिभिः ।
तपःप्रधानाः सततं चरन्तः
शृङ्गं गिरेश्चिन्तयितुं न शेकुः ॥ ७
स्वतेजसा तस्य नगोत्तमस्य
महौषधीनां च तथा प्रभावात् ।
विभक्तभावो न बभूव कश्चि-
दहर्निशानां पुरुषप्रवीर ॥ ८
यमास्थितः स्थावरजङ्गमानि
विभावसुर्भावयतेऽमितौजाः ।
तस्योदयं चास्तमयं च वीरा-
स्तत्र स्थितास्ते ददृशुर्नृसिंहाः ॥ ९
रवेस्तमिस्रागमनिर्गमांस्ते
तथोदयं चास्तमयं च वीराः ।
समावृताः प्रेक्ष्य तमोनुदस्य
गभस्तिजालैः प्रदिशो दिशश्च ॥ १०
स्वाध्यायवन्तः सततक्रियाश्च
धर्मप्रधानाश्च शुचिव्रताश्च ।
सत्ये स्थितास्तस्य महारथस्य
सत्यव्रतस्यागमनप्रतीक्षाः ॥ ११
इहैव हर्षोऽस्तु समागतानां

C. 3. 11694
B. 3. 164. 12
K. 3. 165. 12

---

4 K_3 om. 4^a (cf. v.l. 1). — ^{a}) K (K_3 om.) $D_{1.3.5}$ $G_{1.2}$ °स्वरनादितानि; B_4 °स्वनवंति तानि; T_1 M °प्रतिनादितानि. — ^{b}) K_4 पुष्पप्रकीर्णानि; Dc D_5 पुष्पोपकीर्णस्य; G_1 पुष्पावकीर्णानि. B_4 T_1 महाबलस्य; Dc °चलानि. — ^{d}) T गिरेरपारं परमाप्य तस्थुः.

5 ^{a}) Ś$_1$ K B_4 $D_{1-3.5}$ स्वयं (for साक्षात्). T_1 च सत्कृताश्च (for कृताश्च तस्मिन्). Ś$_1$ K_2 कृतार्था (for च तस्मिन्). — ^{b}) Ś$_1$ $K_{1.2.4}$ (marg. *sec. m.*) $D_{3.5}$ °कूलरोधाः; K_4 °कूटगुप्ताः; T_1 M °गूढगुल्माः; T_2 G °गूढगुप्ताः (G_1 °कूटगुल्माः) (for °कूलरोधसः). — ^{c}) K_4 $D_{1-3.5}$ कादंबकारंडवहंसयुक्ताः; T_2 G_{2-4} कारंडकादंबकहंसजुष्टाः. — ^{d}) B_1 पद्मान्विताः; B_4 समाकुलाः; T_2 G_{2-4} पद्माकराः.

6 ^{a}) D_4 om. (hapl.) from समृद्ध° up to 7^a. — ^{b}) K_4 (marg. *sec. m.* as in text) सदेविकांसोद्यतपत्रवेगान्; S सवेदिकांस्ते न्यवसन्सुवेशा(G_1 M_2 °वेश्मा; M_1 °गुप्ता)न्. — ^{c}) Ś$_1$ $K_{1-3.4}$ (marg. *sec. m.*) D_{1-3} मणिप्रवेकप्रगृहीतजालान् (Ś$_1$ K_1 °ला); K_4 मणिप्रवेणान्सुमनोहरांश्च; B Dc Dn D_6 मणिप्रकीर्णांश्च मनोरमांश्च; D_5 मणिप्रकीर्णान्सुमनोहरांश्च.

7 D_4 om. 7^a (cf. v.l. 6). — ^{b}) Ś$_1$ K_2 महाघनैः. Ś$_1$ K D_{1-3} संवृतम्; D_5 संगतम् (for संततम्). Ś$_1$ अभ्रमालिहन्; $K_{1.2.4}$ अभ्रमालिनं; K_3 B Dc Dn $D_{4.6}$ G_1 अभ्रजालैः; D_{1-3} अभ्रमालि (D_2 °ली); D_5 अभ्रवत्सु; T_2 G_{2-4} अभ्रलेहिभिः. — ^{c}) S °प्रभावात् (T_1 °वं) (for °प्रधानाः). — ^{d}) T_2 $G_{3.4}$ सर्वं; G_2 शृंगान्.

8 ^{c}) Ś$_1$ K_1 विभिन्नभावो. K_4 B_4 S विभ(T_2 G_{3-4} विवि)क्तरूपः सविता बभूव. — ^{d}) B Dn $D_{4.6}$ अहोनिशानां. K_4 S दिवानिशं प्राप्य नरर्षभाणां.

9 ^{a}) Ś$_1$ K D_3 यस्तेजसा; D_5 T_2 G_{2-4} समास्थितः. K_2 D_5 S (except G_1) °जंगमानां. — ^{b}) Ś$_1$ K_{1-3} भावयत्येव भा($K_{1.3}$ या)ति; K_4 भातिनिशा***; B_4 $D_{3.5}$ भावयते महौजाः (D_3 च यानि; D_5 महात्मा); $D_{1.2}$ भासयत्येव याति; S भावयिता हरीशः. — ^{c}) B D (except D_{1-3}) $G_{1.4}$ चास्तमनं; cf. v.l. 10. Ś$_1$ K D_{1-3} पार्थास्; D_5 वीर (for वीरास्). — ^{d}) T_1 M [आ]श्रिता°; T_2 G_{2-4} [उ]षिता° (for स्थिता°).

10 ^{a}) K_1 °निर्गमानां; $D_{1.2.5}$ S °निर्गमं ते (for °निर्गमांस्ते). Ś$_1$ $K_{2.3}$ Dc $D_{1-3.5}$ T_2 G च (for ते). — ^{b}) Ś$_1$ तस्योदयं. B D (except D_{1-3}) चास्तमनं; cf. v.l. 9. — ^{c}) Dc T_1 समागताः.

11 ^{c}) S रता° (for स्थिता°).

13 ^{a}) Ś$_1$ K $D_{1-3.5}$ T_2 G_{2-4} गिरेर् (for गिरौ).

C. 3. 11894
B. 3. 164. 12
K. 3. 165. 12

क्षिप्रं कृतास्त्रेण धनंजयेन ।
इति ब्रुवन्तः परमाशिषस्ते
पार्थास्तपोयोगपरा बभूवुः ॥ १२
दृष्ट्वा विचित्राणि गिरौ वनानि
किरीटिनं चिन्तयतामभीक्ष्णम् ।
बभूव रात्रिर्दिवसश्च तेषां
संवत्सरेणैव समानरूपः ॥ १३
यदैव धौम्यानुमते महात्मा
कृत्वा जटाः प्रव्रजितः स जिष्णुः ।
तदैव तेषां न बभूव हर्षः
कुतो रतिस्तद्गतमानसानाम् ॥ १४
भ्रातुर्नियोगात्तु युधिष्ठिरस्य
वनादसौ वारणमत्तगामी ।
यत्काम्यकात्प्रव्रजितः स जिष्णु-
स्तदैव ते शोकहता बभूवुः ॥ १५
तथा तु तं चिन्तयतां सिताश्व-
मस्त्रार्थिनं वासवमभ्युपेतम् ।
मासोऽथ कृच्छ्रेण तदा व्यतीत-
स्तस्मिन्नगे भारत भारतानाम् ॥ १६
ततः कदाचिद्धरिसंप्रयुक्तं
महेन्द्रवाहं सहसोपयातम् ।
विद्युत्प्रभं प्रेक्ष्य महारथानां
हर्षोऽर्जुनं चिन्तयतां बभूव ॥ १७
स दीप्यमानः सहसान्तरिक्षं
प्रकाशयन्मातलिसंगृहीतः ।
बभौ महोल्केव घनान्तरस्था
शिखेव चाग्नेर्ज्वलिता विधूमा ॥ १८
तमास्थितः संददृशे किरीटी

— ^{d}) Ś$_{1}$ K$_{2.3}$ T$_{2}$ G$_{3}$ M$_{2}$ [इ]व (for [ए]व). Ś$_{1}$ K$_{2}$ B$_{4}$ समानकल्पः.

14 D$_{5}$ om. 14. — ^{a}) T$_{1.2}$ (before corr.) G$_{2}$ यथैव (for यदैव). Ś$_{1}$ K$_{2}$ धौम्यानुमतो. — ^{b}) B$_{2-4}$ Dn D$_{4.6}$ G$_{1}$ जटां.

15 ^{a}) M निदेशात् (for नियोगात्). K$_{3}$ G$_{4}$ च; K$_{4}$ G$_{2}$ M$_{1}$ स (for तु). — ^{b}) Ś$_{1}$ जिष्णुर्वनाद्; K$_{1.2}$ वनाज्जिष्णुर्; K$_{4}$ वनादगाद् (for वनादसौ). S यदा वनान्मत्तगजेंद्रगामी. — ^{c}) S (except T$_{1}$) स (for यत्). Ś$_{1}$ K$_{2}$ D$_{5}$ स पार्थः; K$_{1.3}$ D$_{1.2}$ T$_{1.2}$ (after corr.) G$_{1}$ M तदैव; T$_{2}$ (before corr.) G$_{2-4}$ तथैव (for स जिष्णुस्). — ^{d}) K$_{1.3}$ D$_{1.2}$ पार्थाः सर्वे; K$_{4}$ पार्थाश्च ते; S पार्थास्तदा (for तदैव ते). K$_{1.3.4}$ D$_{1.2}$ S (except G$_{1}$) शोकपरा. Ś$_{1}$ K$_{2}$ तदैव शोको महतां बभूव; K$_{4}$ (marg. *sec. m.*) D$_{3.5}$ तदैव शोकोपहता बभूवुः. — After 15, T$_{1}$ ins.:

831* संत्यज्य कामान्प्रव्रजितास्तदैव
पार्थास्तदा शोकपरा बभूवुः ।

16 ^{a}) K$_{3.4}$ (marg. *sec. m.*) B$_{4}$ D$_{1-3.5}$ एवं (for तथा). K$_{4}$ (marg. *sec. m.* as in text) हि; B$_{1-3}$ Dc Dn D$_{4.6}$ एव (for तु). B$_{4}$ D$_{6}$ अभीक्ष्णम् (for सिताश्वम्). — ^{b}) B$_{4}$ अभ्युपैति. — ^{c}) Ś$_{1}$ K$_{1}$ व्यपेतस् (for व्यतीतस्). K$_{4}$ S कालः स कृच्छ्रेण महानतीतः; D$_{6}$ मासाश्च कृच्छ्रेण तथा व्यतीताः. — ^{d}) K$_{3}$ Dc$_{2}$ D$_{2.3}$ तस्मिन्वने; D$_{6}$ नगोत्तमं. — After 16, N (except D$_{4.5}$) ins. (a passage composed in *ślokas !*):

832* उषित्वा पञ्च वर्षाणि सहस्राक्षनिवेशने ।
अवाप्य दिव्यान्यस्त्राणि सर्वाणि विबुधेश्वरात् ।
आग्नेयं वारुणं सौम्यं वायव्यमथ वैष्णवम् ।
ऐन्द्रं पाशुपतं ब्राह्मं पारमेष्ठ्यं प्रजापतेः ।
यमस्य धातुः सवितुस्त्वष्टुर्वैश्रवणस्य च । [5]
तानि प्राप्य सहस्राक्षादभिवाद्य शतक्रतुम् ।
अनुज्ञातस्तदा तेन कृत्वा चापि प्रदक्षिणम् ।
आगच्छदर्जुनः प्रीतः प्रहृष्टो गन्धमादनम् ।

[(L. 1) K$_{1.2}$ वासवस्य (for सहस्राक्ष-). — (L. 2) D$_{6}$ अधीत्य सर्वशास्त्राणि दृष्ट्वा च विबुधेश्वरात्. — (L. 3) Ś$_{1}$ K$_{1.}$ वायव्यम(Ś$_{1}$ व्यं चा)स्त्रमायुधं. — (L. 7) Ś$_{1}$ K$_{2}$ चाभि- (for चापि). — (L. 8) Ś$_{1}$ K Dc$_{1}$ हृष्टो द्वैतवनं सरः (for the posterior half).]

— Thereafter, K$_{1.3.4}$ B D ins. an addl. colophon (*adhy. no.*: Dn$_{1}$ 163; Dn$_{3}$ 164; D$_{1}$ 169).

17 Before 17, N ins. वैशं° उ°. — ^{c}) K$_{4}$ S नरर्षभाणां (for महा°).

18 ^{a}) K$_{4}$ D$_{3}$ T$_{1}$ G$_{1}$ सं-; D$_{1}$ प्र- (for स).

19 ^{a}) K$_{4}$ S (except M$_{2}$) समा° (for तमा°). — ^{b}) Ś$_{1}$ K$_{1-3}$ B D नवान्या°; Dc समाल्या° (for वराण्या°). — ^{d}) Ś$_{1}$ K$_{1.2}$ D$_{5}$ पर्वतमाससाद; T$_{1}$ G$_{1}$ M

स्रग्वी वराण्याभरणानि बिभ्रत् ।
धनंजयो वज्रधरप्रभावः
श्रिया ज्वलन्पर्वतमाजगाम ॥ १९
स शैलमासाद्य किरीटमाली
महेन्द्रवाहादवरुह्य तस्मात् ।
धौम्यस्य पादावभिवाद्य पूर्व-
मजातशत्रोस्तदनन्तरं च ॥ २०
वृकोदरस्यापि ववन्द पादौ
माद्रीसुताभ्यामभिवादितश्च ।
समेत्य कृष्णां परिसान्त्व्य चैनां
प्रह्वोऽभवद्भ्रातुरुपह्वरे सः ॥ २१
बभूव तेषां परमः प्रहर्ष-
स्तेनाप्रमेयेण समागतानाम् ।
स चापि तान्प्रेक्ष्य किरीटमाली
ननन्द राजानमभिप्रशंसन् ॥ २२
यमास्थितः सप्त जघान पूगा-
न्दितेः सुतानां नमुचेर्निहन्ता ।
तमिन्द्रवाहं समुपेत्य पार्थाः
प्रदक्षिणं चक्रुरदीनसत्त्वाः ॥ २३
ते मातलेश्चक्रुरतीव हृष्टाः
सत्कारमग्र्यं सुरराजतुल्यम् ।
सर्वं यथावच्च दिवौकसस्ता-
न्पप्रच्छुरेनं कुरुराजपुत्राः ॥ २४
तानप्यसौ मातलिरभ्यनन्द-
त्पितेव पुत्राननुशिष्य चैनान् ।
ययौ रथेनाप्रतिमप्रभेण
पुनः सकाशं त्रिदिवेश्वरस्य ॥ २५
गते तु तस्मिन्वरदेववाहे
शक्रात्मजः सर्वरिपुप्रमाथी ।
शक्रेण दत्तानि ददौ महात्मा
महाधनान्युत्तमरूपवन्ति ।
दिवाकराभाणि विभूषणानि
प्रीतः प्रियायै सुतसोममात्रे ॥ २६
ततः स तेषां कुरुपुंगवानां
तेषां च सूर्याग्निसमप्रभाणाम् ।
विप्रर्षभाणामुपविश्य मध्ये
सर्वं यथावत्कथयांबभूव ॥ २७
एवं मयास्त्राण्युपशिक्षितानि

C. 3. 11914
B. 3. 165. 12
K. 3. 166. 13

मेरुमथाजगाम.

20 ^{c}) K$_{4}$ (marg. *sec. m.* as in text) विप्रर्षभाणाम् (for धौम्यस्य पादाव्). Ś$_{1}$ D$_{1}$ अभिनंद्य; K$_{1}$ D$_{2}$ अभिवंद्य. Ś$_{1}$ K$_{1-3}$ B D धीमान्; K$_{4}$ पादान् (for पूर्वम्).

21 ^{a}) Ś$_{1}$ K$_{1}$ [अ]भिननंद; K$_{2}$ D$_{1.2}$ [अ]भिववंद; T$_{1}$ [अ]थ ववंद (for [अ]पि ववन्द). B$_{2-4}$ Dn च वंद्य; D$_{3}$ [अ]भिवंद्य (for ववन्द). T$_{2}$ G$_{2-4}$ पादौ ववंदे (for ववन्द पादौ).

22 ^{a}) Ś$_{1}$ परमः प्रमोदस्; K$_{1.4}$ Dc T$_{1}$ G$_{1.2}$ M परम-प्रहर्षस्. — ^{b}) Ś$_{1}$ K Dc D$_{2.3}$ T$_{1}$ G$_{1.4}$ M$_{1}$ °येन (for °येण). S समेत्य तत्र (for समा°). — ^{c}) K$_{4}$ S सं- (for तान्). — ^{d}) K$_{4}$ T$_{1}$ इति; Dc अति- (for अभि-).

23 ^{a}) B$_{2}$ यमाश्रितः; T$_{2}$ G$_{2-4}$ यानास्थितः; G$_{1}$ M$_{2}$ समा°. Ś$_{1}$ सैन्यान् (for पूगान्). — ^{c}) T$_{2}$ G$_{2-4}$ तानिंद्र-वाहान्.

24 ^{a}) D$_{1.2}$ अदीनसत्वाः (for अतीव हृष्टाः); cf. 23^{d}. — ^{c}) Ś$_{1}$ K$_{3.4}$ D$_{3}$ सर्वे; B$_{1-3}$ Dc Dn D$_{4-6}$ सर्वान् (for सर्वं). K$_{4}$ S दिवौकसंघं (K$_{4}$ °घां; M$_{1}$ °घाः); D$_{1-3}$ दिवौकसां ते (for दिवौकसस्तान्). B Dc Dn D$_{4.6}$ ते (for तान्).

25 ^{b}) K$_{1.2}$ B$_{4}$ D$_{1}$ अनुशास्य. B$_{1}$ D$_{1-3}$ T$_{2}$ G$_{2.3}$ चैतान्; B$_{2-4}$ Dn D$_{4-6}$ पार्थान् (for चैनान्). — ^{d}) Dc D$_{2.5}$ T$_{2}$ G$_{3}$ त्रिदशेश्वरस्य.

26 ^{a}) Ś$_{1}$ K$_{1-3}$ B D नरदेववर्यः (Ś$_{1}$ K$_{2}$ °र्यं); K$_{4}$ T$_{1}$ नरदेववाहे. — ^{b}) Ś$_{1}$ K$_{1-3}$ B$_{2-4}$ Dn D$_{1-3.5}$ शक्र-; Dc तस्य (for सर्व-). — After 26^{ab}, S ins.:

833* साक्षात्सहस्राक्ष इव प्रतीतः
श्रीमान्स्वदेहादवमुच्य जिष्णुः ।

— ^{e}) Dc D$_{1-4}$ T$_{1}$ G$_{3}$ M$_{1}$ °कराभानि. — ^{f}) K$_{3}$ B$_{3}$ Dn D$_{4.6}$ प्रियः (for प्रीतः). K$_{4}$ प्रीतो यमाभ्यामथ याज्ञसेन्याः; B$_{4}$ प्रीतः प्रियायै शतशः प्रहृष्टः.

27 After 27, B$_{2-4}$ ins.:

834* देवैस्तु दत्ता हि यथास्त्रमुख्याः

C. 3. 11914
B. 3. 165. 12
K. 3. 166. 13

शक्राच्च वाताच्च शिवाच्च साक्षात् ।
तथैव शीलेन समाधिना च
प्रीताः सुरा मे सहिताः सहेन्द्राः ॥ २८
संक्षेपतो वै स विशुद्धकर्मा
तेभ्यः समाख्याय दिवि प्रवेशम् ।
माद्रीसुताभ्यां सहितः किरीटी
सुष्वाप तामावसतिं प्रतीतः ॥ २९

इति श्रीमहाभारते आरण्यकपर्वणि एकषष्ट्यधिकशततमोऽध्यायः ॥१६१॥

१६२

वैशंपायन उवाच ।
एतस्मिन्नेव काले तु सर्ववादित्रनिस्वनः ।
बभूव तुमुलः शब्दस्त्वन्तरिक्षे दिवौकसाम् ॥ १
रथनेमिस्वनश्चैव घण्टाशब्दश्च भारत ।
पृथग्व्यालमृगाणां च पक्षिणां चैव सर्वशः ॥ २
तं समन्तादनुययुर्गन्धर्वाप्सरसस्तथा ।
विमानैः सूर्यसंकाशैर्देवराजमरिंदमम् ॥ ३
ततः स हरिभिर्युक्तं जाम्बूनदपरिष्कृतम् ।
मेघनादिनमारुह्य श्रिया परमया ज्वलन् ॥ ४
पार्थानभ्याजगामाशु देवराजः पुरंदरः ।

प्रख्यापयद्वल्कलचीरवासाः ।

28 ^{a}) D$_{1.2}$ च शस्त्रा° (for मयास्त्रा°). — ^{b}) K$_3$ D$_{1-3}$ T$_2$ G वायोश्च (for वाताच्च). — ^{c}) B$_{2-4}$ Dc$_1$ Dn D$_{4.6}$ [अ]थ (for च). — ^{d}) K$_1$ मुदिताः (for सहिताः). Ś$_1$ K D$_{1.3.5}$ बभूवुः; Dn$_3$ T$_2$ G सुरेंद्राः (for सहेन्द्राः).

29 Before 29, Dc ins. वैशं° उ°. — ^{a}) K$_{1.2}$ D$_3$ सुविशुद्ध°; K$_3$ D$_{1.2}$ स (K$_3$ सु-) विशुद्धभावस्; T$_1$ स विशुद्धधर्मा. — ^{b}) K$_4$ T G$_{2.4}$ M$_1$ दिवः (for दिवि). K$_4$ B D (except D$_{1-3.5}$) प्रवासं (for प्रवेशम्). — ^{c}) B$_{1.3}$ Dc माद्र्याः सुताभ्यां. — ^{d}) K$_4$ सुखेन; T$_2$ G$_{2-4}$ प्रतीत्य (for प्रतीतः). Ś$_1$ K D$_{1-3.5}$ सुष्वाप तां वसतिं सु(D$_5$ रजनीं सं)प्रतीतः.

Colophon om. in K$_3$. — *Major parvan :* Ś$_1$ K$_{1.2}$ Dn$_2$ T$_2$ G$_{2-4}$ आरण्य. — *Sub-parvan :* B$_1$ D$_3$ (both om. sub-parvan name) mention only गंधमादनप्र(D$_3$ °नि-)वेश; B$_3$ Dc T$_2$ G$_{3.4}$ likewise, only, गंधमादनवास (T$_2$ G$_{3.4}$ °मादनप्रवास); and finally D$_{1.2}$, only लोमशतीर्थयात्रा (followed by गंधमादन in D$_1$). — *Adhy. name :* K$_4$ B$_{2-4}$ Dc Dn$_1$. n$_3$ D$_{4.6}$ G$_2$ अर्जुनसमागमः; D$_1$ अर्जुनसमागमे इंद्रवाक्यं; D$_{2.5}$ अर्जुनागमनं; T$_2$ G$_{1.3.4}$ M धनंजयसमागमः (G$_4$ °मं). — *Adhy. no.* (figures, words or both): Dn$_1$. n$_2$ 164; Dn$_3$ S (M$_2$ *sup. lin.*) 165 (M$_2$ orig. 167); D$_1$ 170. — *Śloka no.*: Dn D$_1$ 14.

162

1 After the ref., N ins. :

835* ततो रजन्यां व्युष्टायां धर्मराजं युधिष्ठिरम् ।
भ्रातृभिः सहितः सर्वैरवन्दत धनंजयः ।

[(L. 1) K$_{1.2.4}$ D$_{1.3.5}$ निशायां (for रजन्यां). — (L. 2) D$_5$ अभ्यर्चत (for अवन्दत).]

— ^{a}) K$_4$ ततः प्रभातसमये; G$_1$ एतेनैव तु कालेन. — ^{b}) N (except B$_{3.4}$ D$_2$) G$_4$ °निःस्वनः. — ^{c}) K$_4$ D$_2$ तुमलः. B$_{1.3}$ Dc D$_3$ भीमस् (for शब्दस्).

2 D$_1$ om. 2^{cd}. — ^{c}) K$_4$ तथा (for पृथग्). G$_1$ भुजंगव्याघ्रसिंहानां. — ^{d}) Ś$_1$ K$_{1-3}$ D$_{3.5}$ चापि; B$_{1.3}$ Dn D$_{4.6}$ इव (for चैव). B$_3$ नित्यशः; D$_2$ भारत (for सर्वशः). — After 2, S ins. :

836* रथोन्मुखास्ते संप्रेक्ष्य प्रीयमाणाः कुरूद्वहाः ।
मरुद्भिरन्वितं शक्रमापतन्तं विहायसा ।

[(L. 1) G$_2$ ददृशुः (for संप्रेक्ष्य).]

3 ^{a}) Dn$_3$ ते (for तं)! S (except G$_2$ M$_2$) अभि- (for अनु-). — ^{b}) B Dn D$_{3-6}$ °प्सरसां (for °प्सरसस्). Ś$_1$ K$_3$ G$_1$ तदा; B Dn D$_{3-6}$ गणाः (for तथा). — G$_1$ om. 3^c–5^d. — ^{c}) K$_2$ विमाने.

4 In G$_2$, the portion of the text from st. 4 up to st. 39 of the next adhy. is lost on a missing fol. — G$_1$ om. 4 (cf. v.l. 3). — ^{b}) Some N MSS. °परिस्कृतम्. — ^{c}) K$_2$ मेघस्यंदनम्; Dn$_3$ मेघमारुतम्; D$_2$ G$_4$ मेघना

आगत्य च सहस्राक्षो रथादवरुरोह वै ॥ ५
तं दृष्ट्वैव महात्मानं धर्मराजो युधिष्ठिरः ।
भ्रातृभिः सहितः श्रीमान्देवराजमुपागमत् ॥ ६
पूजयामास चैवाथ विधिवद्भूरिदक्षिणः ।
यथार्हममितात्मानं विधिदृष्टेन कर्मणा ॥ ७
धनंजयश्च तेजस्वी प्रणिपत्य पुरंदरम् ।
भृत्यवत्प्रणतस्तस्थौ देवराजसमीपतः ॥ ८
आप्यायत महातेजाः कुन्तीपुत्रो युधिष्ठिरः ।
धनंजयमभिप्रेक्ष्य विनीतं स्थितमन्तिके ॥ ९
जटिलं देवराजस्य तपोयुक्तमकल्मषम् ।
हर्षेण महताविष्टः फल्गुनस्याथ दर्शनात् ॥ १०
तं तथादीनमनसं राजानं हर्षसंप्लुतम् ।
उवाच वचनं धीमान्देवराजः पुरंदरः ॥ ११
त्वमिमां पृथिवीं राजन्प्रशासिष्यसि पाण्डव ।
स्वस्ति प्राप्नुहि कौन्तेय काम्यकं पुनराश्रमम् ॥ १२
अस्त्राणि लब्धानि च पाण्डवेन
सर्वाणि मत्तः प्रयतेन राजन् ।
कृतप्रियश्चास्मि धनंजयेन
जेतुं न शक्यस्त्रिभिरेष लोकैः ॥ १३
एवमुक्त्वा सहस्राक्षः कुन्तीपुत्रं युधिष्ठिरम् ।
जगाम त्रिदिवं हृष्टः स्तूयमानो महर्षिभिः ॥ १४
धनेश्वरगृहस्थानां पाण्डवानां समागमम् ।
शक्रेण य इमं विद्वानधीयीत समाहितः ॥ १५
संवत्सरं ब्रह्मचारी नियतः संशितव्रतः ।
स जीवेत निराबाधः सुसुखी शरदां शतम् ॥ १६

C. 3. 11934
B. 3. 166. 17
K. 3. 167. 18

इति श्रीमहाभारते आरण्यकपर्वणि द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥

दितम्.

5 G$_1$ om. 5 (cf. v.l. 3). G$_2$ missing (cf. v.l. 4). — ^{a}) B$_{2-4}$ Dn D$_{1.4}$ [अ]थ (for [आ]शु). — ^{c}) Ś$_1$ K$_{2.4}$ D$_8$ T G$_{2.4}$ आगम्य; D$_5$ (m as in text) सुगंधाच (for आगत्य). — ^{d}) K$_4$ स्यंदनादवरुह्य च.

6 G$_2$ missing (cf. v.l. 4). — ^{a}) T G$_{3.4}$ च (for [ए]व). — ^{b}) K$_4$ T$_1$ G$_1$ धर्मपुत्रो; G$_4$ देवराजं (for धर्मराजो).

9 G$_2$ missing (cf. v.l. 4). — ^{a}) K$_4$ B Dc Dn D$_{4.6}$ आघ्राय तं; D$_5$ मूर्ध्न्याघ्रातो; T$_1$ आहूय तं; T$_2$ G$_3$ आज्ञाय तं; G$_1$ आस्थाय तं; G$_4$ अजायत (for आप्यायत).

10 G$_2$ missing (cf. v.l. 4). — ^{d}) N (except Ś$_1$) फाल्गुनस्य. — After 10, B D (except D$_{1-3.5}$) ins.:

837* बभूव परमप्रीतो देवराजं च पूजयन् ।

11 G$_2$ missing (cf. v.l. 4). — ^{a}) T$_2$ G$_{3.4}$ °दीनवदनं. — ^{b}) K$_4$ हर्षगद्गदं; T G$_{1.3.4}$ °संयुतं. — ^{d}) K$_1$ देवराजं; K$_3$ प्रेक्ष्य राजा; T$_2$ G$_{1.3.4}$ धर्मराजं (for देव°).

12 G$_2$ missing (cf. v.l. 4). — Before 12, M$_1$ ins. इंद्रः. — ^{b}) K$_4$ भोक्षसे हतकंटकां. — ^{c}) Ś$_1$ K$_2$ T$_2$ G$_3$ चाप्नुहि (for प्राप्नुहि).

13 G$_2$ missing (cf. v.l. 4). — ^{a}) Ś$_1$ K$_{1-3}$ D$_{1-3.5}$ प्राप्तान्यथास्त्राणि; B$_4$ अस्त्राण्यवाप्तानि (for अस्त्राणि लब्धानि). T$_1$ धनंजयेन (for च पाण्डवेन). — ^{b}) D$_5$ प्रवरेण राजन्; T$_1$ M$_1$ गिरिशाच्च देवात् (for प्रयतेन राजन्). — ^{d}) K$_{3.4}$ D$_{1.5}$ एव (for एष).

15 G$_2$ missing (cf. v.l. 4). — ^{a}) K$_4$ धनेश्वरालयस्थानां. — ^{c}) B Dn D$_{4.6}$ इदं (for इमं). Dc D$_{1-3}$ धीमान् (for विद्वान्).

16 G$_2$ missing (cf. v.l. 4). — ^{b}) Ś$_1$ K$_{1-3}$ D$_{1-3}$ संयतेंद्रियः; K$_4$ Dn$_2$ शंसितव्रतः. — ^{c}) K$_{1.2}$ D$_6$ जीवते; B$_{1-3}$ Dc Dn D$_{4.6}$ जीवेद्धि; B$_4$ D$_3$ जीवति (for जीवेत). S (G$_2$ missing) स जीवेद्भरतश्रेष्ठ (T$_1$ G$_1$ °ष्ठः). — ^{d}) Ś$_1$ K$_{1.2}$ B$_2$ D$_{1.2}$ T$_2$ G$_{1.3}$ स सुखी; D$_3$ सुसुखं; T$_1$ स भूमौ (for सुसुखी).

Colophon. G$_2$ missing. — *Major parvan:* Ś$_1$ K$_{1.2}$ Dn$_2$ T$_2$ G$_{3.4}$ आरण्य. — *Sub-parvan:* Omitting sub-parvan name, K$_3$ Dc mention only गंधमादनवास; B$_1$ likewise, only °मादनपश्चाद्गमन; D$_{1.2}$, only लोमशतीर्थयात्रा (followed by गंधमादन in D$_1$); D$_3$ T$_2$ G$_3$, only गंधमादननिवास; and finally D$_6$, only गंधमादनप्रवेश (followed by समाप्त). — *Adhy. name:* K$_4$ B$_{2.3}$ Dn$_1$. n$_3$ D$_{4.6}$ इंद्रागमनं; B$_4$ Dc इंद्रसमागमः; D$_{1.2}$ अर्जुनसमागमे इंद्रवाक्यं. — *Adhy. no.* (figures, words or both): Dn$_1$. n$_2$ 165; Dn$_3$ S (G$_2$ missing; M$_2$ *sup. lin.*) 166 (M$_2$ orig. 168); D$_1$ 171. — *Śloka no.:* Dn$_1$. n$_2$ 17; Dn$_3$ 18; D$_1$ 16.

१६३

C. 3. 11935
B. 3. 167. 1
K. 3. 168. 1

वैशंपायन उवाच ।
यथागतं गते शक्रे भ्रातृभिः सह संगतः ।
कृष्णया चैव बीभत्सुर्धर्मपुत्रमपूजयत् ॥ १
अभिवादयमानं तु मूर्ध्न्युपाघ्राय पाण्डवम् ।
हर्षगद्गदया वाचा प्रहृष्टोऽर्जुनमब्रवीत् ॥ २
कथमर्जुन कालोऽयं स्वर्गे व्यतिगतस्तव ।
कथं चास्त्राण्यवाप्तानि देवराजश्च तोषितः ॥ ३
सम्यग्वा ते गृहीतानि कच्चिदस्त्राणि भारत ।
कच्चित्सुराधिपः प्रीतो रुद्रश्चास्त्राण्यदात्तव ॥ ४
यथा दृष्टश्च ते शक्रो भगवान्वा पिनाकधृक् ।
यथा चास्त्राण्यवाप्तानि यथा चाराधितश्च ते ॥ ५
यथोक्तवांस्त्वां भगवाञ्शतक्रतुररिंदम ।
कृतप्रियस्त्वयास्मीति तच्च ते किं प्रियं कृतम् ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण महाद्युते ॥ ६
यथा तुष्टो महादेवो देवराजश्च तेऽनघ ।
यच्चापि वज्रपाणेस्ते प्रियं कृतमरिंदम ।
एतदाख्याहि मे सर्वमखिलेन धनंजय ॥ ७
अर्जुन उवाच ।
शृणु हन्त महाराज विधिना येन दृष्टवान् ।
शतक्रतुमहं देवं भगवन्तं च शंकरम् ॥ ८
विद्यामधीत्य तां राजंस्त्वयोक्तामरिमर्दन ।
भवता च समादिष्टस्तपसे प्रस्थितो वनम् ॥ ९

163

1 In G_2, st. 1–39 are lost on a missing fol. (cf. v.l. 3. 162. 4). — ^{c}) Ś$_1$ $K_{1.2}$ T_2 $G_{3.4}$ सह; G_1 चापि (for चैव). — ^{d}) K_3 B_2 Dc $D_{1.3.5}$ G_1 धर्मराजम्; K_4 युधिष्ठिरम् (for धर्मपुत्रम्). T_1 M उपागमत् (for अपूजयत्).

2 G_2 missing (cf. v.l. 1). — ^{a}) K_4 D G_4 तं (for तु). — ^{b}) K_4 मूर्ध्यापघ्राय; G_4 मूर्धन्याघ्राय. K_3 B_2 Dn$_2$. n$_3$ D_{1-3} पांडवः; K_4 T_2 G_3 M_2 भारत; G_1 धर्मवित्; M_1 पार्थिवः (for पाण्डवम्). — ^{cd}) Ś$_1$ आसने समुपावेश्य पर्यपृच्छत धर्मराट्.

3 G_2 missing (cf. v.l. 1). — ^{b}) T_1 ह्यति°; T_2 G_3 M_2 [ऽ]प्यति°; $G_{1.4}$ प्रति° (for व्यति°). Ś$_1$ $K_{1.2}$ त्वया (for तव). — $D_{3.5}$ om. (hapl.) 3^{d}–5^{c}.

4 G_2 missing (cf. v.l. 1). $D_{2.5}$ om. 4 (cf. v.l. 3). — ^{b}) B D (except $D_{1-3.5}$) पांडव (for भारत). — ^{c}) B_4 श्रीमान् (for प्रीतो). — ^{d}) T_1 शक्रश् (for रुद्रश्). B_{1-3} D (except $D_{1-3.5}$) वा (for च). K_4 B_4 $D_{1.2}$ T_1 G_1 M_1 दत्तवान् (for [अ]दात्तव).

5 G_2 missing (cf. v.l. 1). $D_{3.5}$ om. 5^{abc} (cf. v.l. 3). — ^{b}) K_3 (*sup. lin.* as in text) Dc_2 च (for वा). Ś$_1$ $K_{1.2}$ पिनाकभृत्; Dn$_1$. n$_3$ °धृत्. — T_2 G_3 om. 5^{c}–6^{d}. — ^{c}) B_{1-3} Dc Dn $D_{4.6}$ [ए]व; D_2 वा (for च). K_4 शस्त्राणि (for चास्त्राणि). $K_{1.2}$ वाप्तानि (for [अ]वाप्तानि). — ^{d}) K_3 D_3 T_1 वा; B Dc Dn D_{4-6} [ए]व (for the first च). Ś$_1$ K_1 D_3 आराधिताश्. K_4 हरः; T_1 त्वया (for च ते).

6 G_2 missing (cf. v.l. 1). T_2 G_3 om. 6 (cf. v.l. 5). — ^{a}) K_3 Dc $D_{1.2}$ यच्चो° (for यथो°). M महाप्राज्ञ (for त्वां भगवाञ्). — ^{b}) K_{2-4} M अरिंदमः. — G_1 om. (hapl.) 6^{c}–7^{d}. — ^{c}) G_4 °प्रीतस् (for °प्रियस्). T_1 G_4 M तथा (for त्वया). — ^{d}) K_4 B_{1-3} D (except D_{1-3}) तस्य; M_2 यच्च (for तच्च). T_1 तेति (for ते किं). D_{1-3} transp. प्रियं and कृतम्. — ^{f}) K_4 D_5 धनंजय; B_2 महामते (for °द्युते).

7 G_2 missing (cf. v.l. 1). G_1 om. 7^{abcd} (cf. v.l. 6). — ^{a}) T G_3 M_1 हृष्टो (for तुष्टो). — ^{b}) T_2 $G_{3.4}$ सुर° (for देव°). B_{1-3} Dc Dn D_{4-6} तथा (for च ते). K_4 तथा तव; $D_{1.2}$ च तोषितः (for च ते ऽनघ). — ^{c}) T_1 यद्यच्च; M यश्चापि. D_5 transp. वज्रपाणेः and ते. $B_{1.2}$ Dc Dn $D_{4.6}$ तु; T_2 G_3 तत् (for ते). — ^{d}) Ś$_1$ $K_{1.2}$ M transp. प्रियं and कृतं. — ^{e}) S आचक्ष्व (for आख्याहि).

8 G_2 missing (cf. v.l. 1). D_5 धनंजय (for अर्जुन). — ^{a}) K_4 श्रूयतां मे; $D_{1.2}$ शृणु मत्तो; T_1 शृणु सर्वं; T_2 $G_{3.4}$ M शृणुष्व त्वं; G_1 शृणु त्वं हि (for शृणु हन्त). D_5 शृणुष्वावहितो राजन्. — ^{c}) K_4 सुरेशानं; D_3 M_1 महादेवं; D_6 देवराजं (for अहं देवं).

9 G_2 missing (cf. v.l. 1). — ^{b}) Ś$_1$ K_2 धौम्यो° (for त्वयो°). — T_2 G_3 om. 9^{cd}. — ^{c}) T_1 तपसा (for भवता).

भृगुतुङ्गमथो गत्वा काम्यकादास्थितस्तपः ।
एकरात्रोषितः कंचिदपश्यं ब्राह्मणं पथि ॥ १०
स मामपृच्छत्कौन्तेय क्वासि गन्ता ब्रवीहि मे ।
तस्मा अवितथं सर्वमब्रुवं कुरुनन्दन ॥ ११
स तथ्यं मम तच्छ्रुत्वा ब्राह्मणो राजसत्तम ।
अपूजयत मां राजन्प्रीतिमांश्चाभवन्मयि ॥ १२
ततो मामब्रवीत्प्रीतस्तप आतिष्ठ भारत ।
तपस्वी नचिरेण त्वं द्रक्ष्यसे विबुधाधिपम् ॥ १३
ततोऽहं वचनात्तस्य गिरिमारुह्य शैशिरम् ।
तपोऽतप्यं महाराज मासं मूलफलाशनः ॥ १४
द्वितीयश्चापि मे मासो जलं भक्षयतो गतः ।
निराहारस्तृतीयेऽथ मासे पाण्डवनन्दन ॥ १५
ऊर्ध्वबाहुश्चतुर्थं तु मासमस्मि स्थितस्तदा ।
न च मे हीयते प्राणस्तदद्भुतमिवाभवत् ॥ १६
चतुर्थे समभिक्रान्ते प्रथमे दिवसे गते ।
वराहसंस्थितं भूतं मत्समीपमुपागमत् ॥ १७
निघ्नन्प्रोथेन पृथिवीं विलिखंश्चरणैरपि ।
संमार्जञ्जठरेणोर्वीं विवर्तंश्च मुहुर्मुहुः ॥ १८
अनु तस्यापरं भूतं महत्कैरातसंस्थितम् ।
धनुर्बाणासिमत्प्राप्तं स्त्रीगणानुगतं तदा ॥ १९
ततोऽहं धनुरादाय तथाक्षय्यौ महेषुधी ।
अताडयं शरेणाथ तद्भूतं लोमहर्षणम् ॥ २०

C. 3. 11955
B. 3. 167. 21
K. 3. 166. 21

---

10 G$_2$ missing (cf. v.l. 1). — ^{a}) T$_2$ G$_{3.4}$ M भृगुतुंदम्. K$_3$ D$_2$ अहं (for अथो). — ^{b}) T G$_3$ transp. आस्थितः and तपः. Ś$_1$ K$_{2-4}$ D$_{1.2}$ काम्यकात्प्रस्थितस्ततः.

11 G$_2$ missing (cf. v.l. 1). — ^{b}) Ś$_1$ K$_{1.2}$ महीपते; K$_4$ D$_{1.2}$ T$_1$ M वदस्व मे (for ब्रवीहि मे). — ^{c}) Ś$_1$ K$_1$ Dn$_3$ तस्मायवितथं; K$_2$ तन्मयेवि°; K$_3$ तस्माच्चावि°; K$_4$ तस्मै ह्यवि°; D$_{1.2}$ M$_1$ तस्मादवि°; D$_5$ तस्मै यथोचितं; T$_1$ तस्मै चाविगमं; T$_2$ (before corr.) G$_4$ तस्मै नावितथं; G$_1$ M$_2$ तस्मै चापि तथा (for तस्मा अवितथं). — ^{d}) M$_1$ अब्रवं. Ś$_1$ K$_{1.2}$ कुरुसत्तम.

12 G$_2$ missing (cf. v.l. 1). — ^{b}) G$_4$ मुनिसत्तमः (for राज°). — ^{c}) T$_1$ मा (for मां).

13 G$_2$ missing (cf. v.l. 1). — ^{a}) T$_2$ G$_{3.4}$ M स तु (for ततो). — ^{b}) T$_2$ G$_{3.4}$ तप्यस्व; M$_2$ तप्यं हि (for आतिष्ठ). K$_4$ शृणु मत्तो कुलोद्वह; B$_{1.3}$ तपः कुरुकुलोद्वह; Dc D$_5$ T$_1$ M$_1$ ततः कुरुकुलोद्वह (T$_1$ °द्भव). — ^{c}) T$_2$ [ए]व; G$_4$ [इ]व (for त्वं). K$_{3.4}$ B$_{1-3}$ Dc Dn D$_4$ M$_2$ तपस्य(K$_4$ B$_1$ M$_2$ °स्वि)न्नचिरेण त्वं.

14 G$_2$ missing (cf. v.l. 1). — ^{c}) Ś$_1$ तपोतपं; K$_1$ तपोतपे; K$_2$ तपस्तपं; K$_4$ S (G$_2$ missing) तपस्तेपे (for तपोऽतप्यं). K$_4$ गिरौ तस्मिन्; T$_2$ G (G$_2$ missing) M$_2$ च कौरव्य (for महा°). — ^{d}) K$_4$ T$_2$ G$_{3.4}$ मासमेकं ज(K$_4$ फ)लाशनः.

15 G$_2$ missing (cf. v.l. 1). — ^{c}) Ś$_1$ K$_1$ D$_5$ तृतीयं च; K$_2$ °ये च; K$_{3.4}$ D$_{1-3}$ T$_2$ G$_3$ °यं तु; Dc T$_{1.2}$ (before corr.) °योथ (for °येऽथ). — ^{d}) Ś$_1$ K D$_{1-3.5}$ T$_2$ G$_3$ मासं; T$_1$ मासः (for मासे).

16 G$_2$ missing (cf. v.l. 1). — ^{a}) Ś$_1$ K$_{1.2}$ च (for तु). — ^{c}) Ś$_1$ K$_{1.2}$ ह्रियते (for ही°).

17 G$_2$ missing (cf. v.l. 1). — ^{a}) B Dc Dn D$_{4.6}$ G$_3$ पंचमे. K$_2$ समतिक्रांते; K$_{3.4}$ D$_{2.3.5}$ G$_1$ M त्वभ्यति°; B Dc Dn D$_{4.6}$ G$_3$ त्वथ संप्राप्ते; D$_1$ त्वप्यतिक्रांते; T$_1$ मास्यति°; T$_2$ G$_4$ ह्यतिनिष्क्रांते. — ^{c}) Ś$_1$ K$_2$ वाराहं संस्थितो; K$_1$ वाराहसंस्थितो; K$_4$ वाराहसंस्थितं. Ś$_1$ K$_{1.2}$ B$_4$ Dc रूपं; T$_1$ भीमं (for भूतं). D$_6$ वाराहं रूपमास्थाय. — D$_4$ om. (hapl.) 17^d–19^a. — ^{d}) B T$_2$ G$_{3.4}$ M$_2$ अथा(B$_1$ इहा)गमत्; Dc इहागतः; Dn D$_6$ समागमत् (for उपा°).

18 G$_2$ missing (cf. v.l. 1). D$_4$ om. 18 (cf. v.l. 17). — ^{a}) Dc D$_{1-3}$ M$_1$ पोत्रेण; D$_5$ रोथेण; D$_6$ (marg. *sec. m.*) ओष्ठेन (for प्रोथेन). T$_2$ G (G$_2$ missing) चरणैर् (for पृथिवीं); see below. — ^{b}) Ś$_1$ D$_{2.5}$ विकिरन्; K D$_3$ विकरन्; D$_1$ उत्किरन् (for विलिखन्). T$_2$ G (G$_2$ missing) विलिखन्नपि मेदिनीम्. — ^{c}) G$_4$ संमार्ज्य. Ś$_1$ K$_{1-3}$ D$_3$ [अ]पि (for [उ]र्वीं). D$_5$ समार्गमचिरेणापि. — ^{d}) Ś$_1$ D$_6$ (marg. *sec. m.*) निवर्तंश्च; K$_1$ निवर्तं च; K$_3$ विवर्तं स; K$_4$ विवर्तयन् (for विवर्तंश्च).

19 G$_2$ missing (cf. v.l. 1). D$_4$ om. 19^a (cf v.l. 17). — ^{b}) D$_{1.3}$ वपुः (for महत्). D$_{3.5}$ T$_1$ G$_1$ M कैरातमास्थितं; T$_2$ G$_3$ कैरातसंज्ञितं. — ^{c}) S धनुष्पाण्यसि°. — ^{d}) K$_4$ D$_{1.2}$ स्त्रिया चानु°.

20 G$_2$ missing (cf. v.l. 1). — ^{b}) =36^b. K$_4$ तच्च; G$_1$ तदा (for तथा). K$_2$ [अ]क्षय-; B$_{2-4}$ Dc$_1$ Dn D$_{4.6}$ [अ]क्षय्ये (for [अ]क्षय्यौ). — ^{d}) B$_4$ T G$_3$ M रोमहर्षणं.

21 G$_2$ missing (cf. v.l. 1). — ^{a}) Ś$_1$ D$_6$ युगपत्तु; B Dc Dn$_1$ D$_{1.4.6}$ युगपत्तं. K$_2$ B$_3$ किरातस्य; Dn D$_{4.6}$

C. 3. 11956
B. 3. 167. 22
K. 3. 168. 22

युगपत्तत्किरातश्च विकृष्य बलवद्धनुः ।
अभ्याजघ्ने दृढतरं कम्पयन्निव मे मनः ॥ २१
स तु मामब्रवीद्राजन्मम पूर्वपरिग्रहः ।
मृगयाधर्ममुत्सृज्य किमर्थं ताडितस्त्वया ॥ २२
एष ते निशितैर्बाणैर्दर्पं हन्मि स्थिरो भव ।
स वर्ष्मवान्महाकायस्ततो मामभ्यधावत ॥ २३
ततो गिरिमिवात्यर्थमावृणोन्मां महाशरैः ।
तं चाहं शरवर्षेण महता समवाकिरम् ॥ २४
ततः शरैर्दीप्तमुखैः पत्रितैरनुमन्त्रितैः ।
प्रत्यविध्यमहं तं तु वज्रैरिव शिलोच्चयम् ॥ २५
तस्य तच्छतधा रूपमभवच्च सहस्रधा ।
तानि चास्य शरीराणि शरैरहमताडयम् ॥ २६
पुनस्तानि शरीराणि एकीभूतानि भारत ।
अदृश्यन्त महाराज तान्यहं व्यधमं पुनः ॥ २७
अणुर्बृहच्छिरा भूत्वा बृहच्चाणुशिराः पुनः ।
एकीभूतस्तदा राजन्सोऽभ्यवर्तत मां युधि ॥ २८
यदाभिभवितुं बाणैर्नैव शक्नोमि तं रणे ।
ततोऽहमस्त्रमातिष्ठं वायव्यं भरतर्षभ ॥ २९
न चैनमशकं हन्तुं तदद्भुतमिवाभवत् ।
तस्मिन्प्रतिहते चास्त्रे विस्मयो मे महानभूत् ॥ ३०
भूयश्चैव महाराज सविशेषमहं ततः ।
अस्त्रपूगेन महता रणे भूतमवाकिरम् ॥ ३१
स्थूणाकर्णमयोजालं शरवर्षं शरोल्बणम् ।
शैलास्त्रमश्मवर्षं च समास्थायाहमभ्ययाम् ।

किरातस्तु. — ^{b}) G (G$_2$ missing) M सुमहद्धनुः. — ^{c}) Ś$_1$ K B$_4$ D$_{1-3.5}$ अभ्याहनद्; T$_2$ G$_3$ अभ्याजघ्नद्; M$_1$ अभ्यजघ्ने; M$_2$ अभिजघ्ने. — ^{d}) S (except T$_1$; G$_2$ missing) मेदिनीं (for मे मनः).

23 G$_2$ missing (cf. v.l. 1). — ^{c}) K$_3$ B (B$_1$ marg.) Dn D$_{3.4.6}$ धनुष्मान् (B$_1$ orig. धर्मवान्) (for वर्ष्मवान्). D$_5$ पार्वतीयो महामायस. — ^{d}) D$_5$ तथा माम्. Ś$_1$ K$_{1-3}$ Dn D$_{1.2.4.6}$ M$_1$ अभ्यभाषत; D$_5$ अभिभाष्य वै.

24 G$_2$ missing (cf. v.l. 1). — ^{a}) D$_5$ मेघैर् (for ततो). K$_3$ D$_{1.2.6}$ T$_2$ (before corr.) G$_1$ गिरिर् (for गिरिम्). — ^{b}) Ś$_1$ K$_{1.2}$ स (for मां). — ^{d}) K$_{1.2}$ सहसा (for महता).

25 G$_2$ missing (cf. v.l. 1). — ^{b}) Ś$_1$ K$_{1.2}$ सपत्रैर्; K$_{3.4}$ D$_{1-3}$ सुपत्रैर्; B Dn D$_{4.6}$ यंत्रितैर्; Dc प्रहितैर्; D$_5$ पातितैर्; T$_2$ G (G$_2$ missing) पतितैर्. T$_1$ M$_1$ नागैरिव विषोल्बणैः.

26 G$_2$ missing (cf. v.l. 1). — ^{c}) Ś$_1$ K$_{1.2}$ तस्य (for चास्य). — ^{d}) Ś$_1$ K D$_{1-3.5}$ अपीडयं (for अताडयम्).

27 G$_2$ missing (cf. v.l. 1). — ^{a}) K$_4$ D$_{1.2}$ तत° (for पुन°). — ^{b}) To avoid the hiatus, Ś$_1$ K$_{1.2}$ चैकीभूतानि; M स्वेकी°. — ^{c}) K$_{1.2}$ अभ्यपश्यन् (for अदृश्यन्त). — ^{d}) Ś$_1$ K D$_{1-3}$ शरैः (for पुनः).

28 G$_2$ missing (cf. v.l. 1). — ^{b}) S (G$_2$ missing) महान् (for बृहत्). B$_2$ तथा; T$_2$ G$_{3.4}$ ततः (for पुनः). — ^{c}) K$_{1.2}$ B$_2$ एकीभूतं; K$_{3.4}$ D$_{1.2}$ एकीभूत्वा. Ś$_1$ K$_{1.2}$ महानेकः; K$_{3.4}$ Dc D$_{1-3}$ तथानेकः (for तदा राजन्).

29 G$_2$ missing (cf. v.l. 1). — ^{b}) K$_{3.4}$ D$_{1-3}$ न वै; Dn न च (for नैव). T$_2$ G$_{3.4}$ [अ]हं (for तं). — ^{c}) B Dc Dn$_1$. n$_3$ D$_{4-6}$ महास्त्रम् (for ऽहमस्त्रम्). Dn$_2$ ततो ह्यस्त्रं समातिष्ठं.

30 G$_2$ missing (cf. v.l. 1). — ^{a}) Ś$_1$ K B$_4$ D$_{1-}$ तेनापि ना° (for न चैनम°). B$_4$ जेतुं; T$_1$ योद्धुं; T$_2$ G (G$_2$ missing) M वोढुं (for हन्तुं). — ^{b}) Epic tag! Cf. Hopkins, *Great Epic*, App. A (Parallel Phrases), No. 83. Ś$_1$ K D$_{1-3}$ तद्भूतमतिवीर्यवत् (K$_{1.4}$ °वान्).

31 G$_2$ missing (cf. v.l. 1). — ^{a}) K$_{3.4}$ D भूयश्चैनं; B Dc Dn D$_{4.6}$ भूय एव; S (G$_2$ missing तत्रापि च. — ^{c}) B$_4$ अस्त्रजालेन; D$_5$ °योगेन; T$_1$ °पूतेन T$_2$ G (G$_2$ missing) °वर्षेण.

32 G$_2$ missing (cf. v.l. 1). — ^{a}) Ś$_1$ K$_{3.4}$ D$_{1-}$ स्थूणाकर्णं च जालं च; K$_1$ °भूतं चराजालं; K$_2$ °कले य राजा च B Dc Dn D$_{4.6}$ °कर्णमथो जालं; D$_5$ °कर्णमथो बाणं; T °कर्णमिवाजालं; T$_2$ (before corr.) °कारं महोजालं. — ^{b}) Ś$_1$ शरवर्षं रणोद्भटं; K$_1$ °वर्षा रणोद्भवं; K$_2$ °वर्षरणोद्भवं; B Dc Dn D$_{4.6}$ °वर्षमथोल्बणं; D$_5$ M$_1$ °वर्षं महो°. — ^{c}) M तु (for च). Ś$_1$ K$_{1.2}$ शलभास्त्रं चाश्मवर्षं; K$_{3.4}$ B D शलभास्त्रमश्मवर्षं; T$_1$ शैलास्त्रेणाश्मवर्षं तु; G$_1$ शलभास्त्रमहाव — ^{d}) T$_1$ [अ]हमर्दयं; T$_2$ G$_{3.4}$ [अ]हमभ्यगां (for [अ]हम भ्ययाम्). Ś$_1$ K$_{1.2}$ समादायाहमभ्ययां; D$_3$ समास्थायाह मभ्ययां; D$_5$ वेगमास्थाय शस्त्रवित्. — ^{e}) Ś$_1$ K$_{1.2}$ D D$_{1-3.5}$ T G$_{1.3.4}$ M$_1$ जग्राह; K$_3$ संयामे (for जग्राह);

जग्रास प्रहसंस्तानि सर्वाण्यस्त्राणि मेऽनघ ॥ ३२
तेषु सर्वेषु शान्तेषु ब्रह्मास्त्रमहमादिशम् ।
ततः प्रज्वलितैर्बाणैः सर्वतः सोपचीयत ।
उपचीयमानश्च मया महास्त्रेण व्यवर्धत ॥ ३३
ततः संतापितो लोको मत्प्रसूतेन तेजसा ।
क्षणेन हि दिशः खं च सर्वतोऽभिविदीपितम् ॥ ३४
तदप्यस्त्रं महातेजाः क्षणेनैव व्यशातयत् ।
ब्रह्मास्त्रे तु हते राजन्भयं मां महदाविशत् ॥ ३५
ततोऽहं धनुरादाय तथाक्षय्यौ महेषुधी ।
सहसाभ्यहनं भूतं तान्यप्यस्त्राण्यभक्षयत् ॥ ३६
हतेष्वस्त्रेषु सर्वेषु भक्षितेष्वायुधेषु च ।
मम तस्य च भूतस्य बाहुयुद्धमवर्तत ॥ ३७
व्यायामं मुष्टिभिः कृत्वा तलैरपि समाहतौ ।
अपातयच्च तद्भूतं निश्चेष्टो ह्यगमं महीम् ॥ ३८
ततः प्रहस्य तद्भूतं तत्रैवान्तरधीयत ।
सह स्त्रीभिर्महाराज पश्यतो मेऽद्भुतोपमम् ॥ ३९
एवं कृत्वा स भगवांस्ततोऽन्यद्रूपमात्मनः ।
दिव्यमेव महाराज वसानोऽद्भुतमम्बरम् ॥ ४०

C. 3. 11976
B. 3. 167. 42
K. 3. 168. 42

---

cf. 36^d, 37^b. K$_3$ प्राग्रसत्; B D (except D$_{1-3.\,5}$) T$_2$ M$_2$ प्रसभं; G$_4$ प्रथमं (for प्रहसन्). — ^{f}) B D (except D$_{1-3}$) M मे नृप (B$_4$ शृणु); T$_1$ वै नृप; T$_2$ G$_{1.\,3.\,4}$ भारत (for मेऽनघ).

33 G$_2$ missing (cf. v.l. 1). — ^{a}) Ś$_1$ K$_{1-3}$ दग्धेषु; K$_4$ B Dc Dn D$_{4.\,6}$ जग्धे°; D$_5$ ग्रस्ते° (for शान्ते°). — ^{b}) Dn$_2$. n$_3$ T$_2$ G$_3$ महद् (for अहम्). — ^{d}) Ś$_1$ K$_{1.\,2}$ D$_5$ पर्वतः (for सर्वतः). Ś$_1$ K स्सोपचीयते; K$_{2.\,4}$ B D$_{1.\,2.\,4-6}$ सोपचीयते; D$_3$ T$_1$ G$_{1.\,4}$ चोपचीयते. M$_2$ सर्वैस्तैरूपचीयत. — ^{e}) Hypermetric! Ś$_1$ K$_{1.\,2}$ अपचीयमान°. T$_1$ M$_1$ तु (for च). D$_5$ T G$_{3.\,4}$ M तदा; G$_1$ तथा (for मया). — ^{f}) S (G$_2$ missing) सहा(M$_1$ मया)स्त्रेणाभ्यवर्तत.

34 G$_2$ missing (cf. v.l. 1). — ^{a}) B$_{1-3}$ Dc Dn D$_{4.\,6}$ ततः संतापिता लोका; D$_5$ ततः संदीपितं लोके. — ^{b}) Ś$_1$ K D$_{1-3}$ मद्विसृष्टैः सुतेजनैः (D$_{1.\,2}$ °सैः); D$_5$ तत्प्रसूतैः सुतेजनैः. — ^{c}) T$_2$ (before corr.) G$_4$ दिवं (for दिशः). — ^{d}) K$_3$ सुविदी°; B Dn D$_{4-6}$ G$_3$ हि विदी°; Dc M$_2$ दिवि दी°; T$_1$ G$_1$ [अ]भिविराजितं; G$_4$ [अ]पि विदी°.

35 G$_2$ missing (cf. v.l. 1). — After 35^a, D$_{1.\,2}$ ins.:

838* ततोऽहमपतं महीम् ।
ततः प्रहस्य तद्भूतं.

— ^{b}) Ś$_1$ K B$_4$ D$_{1-3.\,5}$ व्यनाशयत्; T$_2$ G$_{1.\,3.\,4}$ व्यशाम°. — K$_{2.\,4}$ om. 35^{cd}; K$_3$ om. 35^c–48^b. — ^{c}) Ś$_1$ K$_1$ D$_{2.\,3}$ च; T$_2$ G$_{1.\,3.\,4}$ नि- (for तु). D$_1$ ब्रह्मास्त्रेण च ते राजन्.

36 G$_2$ missing (cf. v.l. 1). K$_3$ om. 36 (cf. v.l. 35). — ^{b}) = 20^b. B$_{1.\,2.\,4}$ Dn D$_{4.\,6}$ तथाक्षय्ये; D$_1$ तावक्षय्यौ; T$_2$ G$_3$ तदाक्षय्यौ. — ^{d}) B$_1$ transp. अपि and अस्त्राणि. Ś$_1$ K$_{1.\,2}$ T$_1$ तत्तानि; G$_1$ तानि च (for तान्यपि).

37 G$_2$ missing (cf. v.l. 1). K$_3$ om. 37 (cf. v.l. 35). — ^{a}) D$_5$ तेष्वस्त्रेषु च सर्वेषु; T$_2$ G$_{1.\,3.\,4}$ एतेष्वस्त्रेषु भूतेन (G$_1$ सर्वेषु). — ^{b}) G$_1$ [अ]पि (for च). M$_2$ भक्षिते चायुधे तदा. — B$_2$ om. 37^{cd}. — ^{c}) T$_1$ धर्मतस्तस्य भू°.

38 G$_2$ missing (cf. v.l. 1). — K$_3$ om. 38 (cf. v.l. 35). — ^{b}) T$_2$ G$_{3.\,4}$ अभि- (for अपि). Ś$_1$ K$_{1.\,2}$ D$_{1.\,3}$ समाहनत्; K$_4$ °हरत्; B$_1$ Dn °गतः; B$_4$ D$_2$ °हनम्; D$_{4.\,6}$ °गतौ; T$_1$ °ततौ; G$_1$ °हितौ (for °हतौ). D$_5$ प्रहरंश्च तलैरपि. — D$_3$ om. 38^c–39^d. — ^{c}) B Dc D$_{1.\,2.\,4-6}$ अपारयन्. D$_{1.\,2}$ तु (for च). D$_{1.\,2}$ तद्रूपं; T$_1$ तं भूतं; G$_1$ मां भूतं (for तद्भूतं). — D$_{1.\,2}$ om. 38^d–39^a. — ^{d}) K$_4$ निश्चेष्टोभ्यगमन्; B Dc Dn D$_{4.\,6}$ निश्चेष्टमगमं (B$_4$ निश्चेष्टो न्यपतन्); T$_1$ निश्चेष्टश्चागमन्; T$_2$ G$_{3.\,4}$ अहं चापतयं; G$_1$ निश्चेष्टश्चापतं; M निश्चेष्टश्चागमं.

39 G$_2$ missing (cf. v.l. 1). — K$_3$ D$_3$ om. 39 (cf. v.l. 35. 38); D$_{1.\,2}$ om. 39^a (cf. v.l. 38). — After 39^{ab}, T$_2$ G$_{3.\,4}$ ins.:

839* ततश्चिन्तां समगमं पूजयिष्याम्यहं पुनः ।
इति पुष्पाणि संगृह्य सैकतं शंकरं प्रभुम् ।
पूजयिष्यंस्तमद्राक्षं किरातं पुष्पधारिणम् ।
ततश्चान्यानि पुष्पाणि पूजयिष्यन्पुनः पुनः ।
तानि सर्वाणि दृष्ट्वाहं किरातस्य च मूर्धनि ।
इति कृत्वा महादेवं प्रणतोऽस्मि पुनः पुनः ।
[Cf. 171*.]

— ^{c}) T$_2$ G$_{3.\,4}$ M$_2$ ततः (for सह). — ^{d}) Ś$_1$ K$_{1.\,3}$ पश्यतो मेऽद्भुतं महत्; K$_4$ D$_{1.\,2}$ तदद्भुतमिदं महत्; D$_5$ तदद्भुतमिवाभवत् (= 30^b).

40 K$_3$ om. 40 (cf. v.l. 35). G$_2$ resumes. — ^{a}) S मुख्यं (for एवं). — ^{b}) B D (except D$_{1-3.\,5}$) आस्थितः (for आत्मनः). — ^{c}) Ś$_1$ K$_{1.\,2}$ D$_{3.\,5}$ एकं; T$_2$ G M चैव

C. 3. 11977
B. 3. 167. 43
K. 3. 168. 43

हित्वा किरातरूपं च भगवांस्त्रिदशेश्वरः ।
स्वरूपं दिव्यमास्थाय तस्थौ तत्र महेश्वरः ॥ ४१
अदृश्यत ततः साक्षाद्भगवान्गोवृषध्वजः ।
उमासहायो हरिदृग्बहुरूपः पिनाकधृक् ॥ ४२
स मामभ्येत्य समरे तथैवाभिमुखं स्थितम् ।
शूलपाणिरथोवाच तुष्टोऽस्मीति परंतप ॥ ४३
ततस्तद्धनुरादाय तूणौ चाक्षय्यसायकौ ।
प्रादान्ममैव भगवान्वरयस्वेति चाब्रवीत् ॥ ४४
तुष्टोऽस्मि तव कौन्तेय ब्रूहि किं करवाणि ते ।
यत्ते मनोगतं वीर तद्ब्रूहि वितराम्यहम् ।
अमरत्वमपाहाय ब्रूहि यत्ते मनोगतम् ॥ ४५
ततः प्राञ्जलिरेवाहमस्त्रेषु गतमानसः ।
प्रणम्य शिरसा शर्वं ततो वचनमाददे ॥ ४६
भगवान्मे प्रसन्नश्चेदीप्सितोऽयं वरो मम ।
अस्त्राणीच्छाम्यहं ज्ञातुं यानि देवेषु कानिचित् ।
ददानीत्येव भगवानब्रवीत्त्र्यम्बकश्च माम् ॥ ४७
रौद्रमस्त्रं मदीयं त्वामुपस्थास्यति पाण्डव ।
प्रददौ च मम प्रीतः सोऽस्त्रं पाशुपतं प्रभुः ॥ ४८
उवाच च महादेवो दत्त्वा मेऽस्त्रं सनातनम् ।
न प्रयोज्यं भवेदेतन्मानुषेषु कथंचन ॥ ४९
पीड्यमानेन बलवत्प्रयोज्यं ते धनंजय ।
अस्त्राणां प्रतिघाते च सर्वथैव प्रयोजयेः ॥ ५०

(for एव). T$_1$ दिव्यमप्रतिमं चित्रं. — ^{d}) T$_1$ वसानोंबर-मुत्तमं.

41 K$_3$ om. 41 (cf. v.l. 35). — ^{a}) K$_4$ तद्रूपरूपं; S मृगतनुं (G$_{2.3}$ °युतां) तां (for किरातरूपं). Ś$_1$ K$_{1.2.4}$ तद्; D$_{1.2}$ स (for च). — M$_1$ om. 41^{cd}. — ^{c}) Ś$_1$ B$_{1.3}$ Dc D$_{5.6}$ G$_3$ M$_3$ स्वं रूपं. — ^{d}) K$_{1.2}$ transp. तस्थौ and तत्र.

42 K$_3$ om. 42 (cf. v.l. 35); K$_2$ om. 42^{a}–44^{b}. — ^{a}) S सोऽदृश्यत. — ^{b}) Ś$_1$ K$_1$ D$_6$ भगवान्वै (D$_5$ °न्मे) वृषध्वजः; T$_1$ भगवान्वृषभध्वजः. — ^{c}) K$_1$ वृषधृग; B व्याडधृग; Dc$_1$ D$_4$ व्यालधृद्; Dc$_2$ Dn D$_6$ व्यालधृग (for हरिदृग). S धनुर्गृह्य तथा पाणौ. — ^{d}) Ś$_1$ पिनाकधृत्.

43 K$_{2.3}$ om. 43 (cf. v.l. 35, 42). — ^{a}) T$_1$ भगवान् (for समरे). — ^{b}) T$_1$ च (for [ए]व). K$_4$ D$_1$ T$_1$ °मुखस्थितः; B$_4$ D$_3$ °मुखं स्थितः; D$_{2.5}$ °मुखः स्थितः.

44 K$_3$ om. 44 (cf. v.l. 35); K$_2$ om. 44^{ab} (cf. v.l. 42). — ^{a}) D$_{1.2}$ तु; D$_5$ स्वं (for तद्). — ^{b}) T G$_{1-3}$ तूणी (for तूणौ). Ś$_1$ तूणौ तौ चाक्षय्यौ तथा; K$_1$ D$_{1-3.5}$ तूणौ तौ चाक्षयौ शरैः (K$_1$ °रः); K$_4$ तूणौ तावेव चाक्षयौ. — ^{c}) Ś$_1$ K$_{1.2}$ प्राणान् (for प्रादान्). — ^{d}) Ś$_1$ K$_{1.2}$ T$_1$ G$_1$ धारय° (for वरय°).

45 K$_3$ om. 45 (cf. v.l. 35). — ^{c}) Ś$_1$ तात; T$_1$ वत्स (for वीर). B$_2$ Dn D$_{4.6}$ मनोगतं वीर यत्ते (by transp.). — ^{d}) T$_1$ transp. तद् and ब्रूहि. — K$_1$ om. 45^{e}–46^{b}. — ^{e}) Ś$_1$ K$_4$ D$_{1.2.5}$ °मपास्यैकं; K$_2$ °मपाशैकं; B$_4$ °मपास्याद्य; G$_1$ M °मपास्यान्यद्.

46 K$_3$ om. 46 (cf. v.l. 35); K$_1$ om. 46^{ab} (cf. v.l. 45). — ^{b}) S कृतमानसः. — ^{c}) Ś$_1$ K$_{1.2}$ सहसा; B D D$_{4.6}$ T$_2$ G$_3$ मनसा (for शिरसा). Ś$_1$ K$_4$ B$_{1.2}$ D$_{1.2}$ T$_1$ G$_2$ M$_3$ सर्वं; K$_2$ सर्वें; Dc$_1$ (? gloss) शंभुं; G$_1$ M$_1$ दे (for शर्वं). D$_5$ मूर्ध्ना प्रसाद्य वरदं. — ^{d}) Ś$_1$ Dc अब्रवी (corrupt); K$_{1.2}$ D$_{2.3}$ T$_1$ अब्रुवम्; K$_4$ D$_1$ अब्रुवन् (आददे). D$_5$ अस्त्रार्थं समनोदयं.

47 K$_3$ om. 47 (cf. v.l 35). — ^{a}) D$_{3.5}$ T$_1$ G भगवन् (for भगवान्). — ^{d}) Ś$_1$ संति हि; K$_{1.2.4}$ D$_1$- संति वै (for कानिचित्). — ^{e}) K$_4$ Dn$_2$ D$_{1-3}$ T$_1$ G$_1$ ददानी° (as in text); the rest ददामी°. — ^{f}) Ś$_1$ K$_4$ D$_{1-3.5}$ तदा; K$_{1.2}$ तथा (for च मां).

48 Before 48, K$_4$ D$_{1.2}$ ins. श्रीरुद्र उ°. — K$_3$ o 48^{a} (cf. v.l. 35). — ^{c}) S (except T$_2$ G$_{3.4}$) [अ] मे (for मम). B$_1$ प्रददौ परमप्रीतः; D$_5$ अथ प्रादान् प्रीतः. — ^{d}) K$_1$ (*sup. lin.* as in text) विभुः; B$_{1.3}$ Dn D$_{4.6}$ महत्; B$_2$ च तत्; D$_5$ तदा (for प्रभुः).

49 ^{b}) K$_2$ Dn D$_5$ दत्वा चास्त्रं; S (by transp.) दत्वा न्ने (T$_1$ रौद्रास्त्रं मे). — ^{d}) Ś$_1$ K$_{1.3}$ D$_5$ T$_1$ मा(D$_5$ म)नुष्येषु. — After 49, K$_3$ B Dc Dn D$_{4-6}$ ins.:

840* जगद्विनिर्दहेदेवमल्पतेजसि पातितम् ।
[K$_3$ B$_{1-3}$ एतद् (for एवम्).]

50 ^{a}) K$_2$ बलिना (for बलवत्). — ^{b}) B Dc D$_{4-6}$ प्रयोज्यं स्याद्; T$_2$ G प्रयोक्तव्यं (for प्रयोज्यं ते). परंतप (for धनं°). — ^{c}) Ś$_1$ K D$_{1-3}$ तु (K$_4$ ते) प्रती (for प्रतिघाते च). — ^{d}) B$_{1.2}$ Dc Dn D$_{4-6}$ M$_3$ प्रयो येत्; D$_3$ T$_1$ G$_1$ M$_1$ °जय.

51 ^{a}) Ś$_1$ तमप्रतिहतं; K$_2$ B$_3$ T$_3$ G$_{2-4}$ ततो°;

तदप्रतिहतं दिव्यं सर्वास्त्रप्रतिषेधनम् ।
मूर्तिमन्मे स्थितं पार्श्वे प्रसन्ने गोवृषध्वजे ॥ ५१
उत्सादनममित्राणां परसेनानिकर्तनम् ।
दुरासदं दुष्प्रहसं सुरदानवराक्षसैः ॥ ५२
अनुज्ञातस्त्वहं तेन तत्रैव समुपाविशम् ।
प्रेक्षतश्चैव मे देवस्तत्रैवान्तरधीयत ॥ ५३

इति श्रीमहाभारते आरण्यकपर्वणि त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

१६४

अर्जुन उवाच ।

ततस्तामवसं प्रीतो रजनीं तत्र भारत ।
प्रसादाद्देवदेवस्य त्र्यम्बकस्य महात्मनः ॥ १
व्युषितो रजनीं चाहं कृत्वा पूर्वाह्णिकक्रियाम् ।
अपश्यं तं द्विजश्रेष्ठं दृष्टवानस्मि यं पुरा ॥ २
तस्मै चाहं यथावृत्तं सर्वमेव न्यवेदयम् ।
भगवन्तं महादेवं समेतोऽस्मीति भारत ॥ ३
स मामुवाच राजेन्द्र प्रीयमाणो द्विजोत्तमः ।
दृष्टस्त्वया महादेवो यथा नान्येन केनचित् ॥ ४
समेत्य लोकपालैस्तु सर्वैर्वैवस्वतादिभिः ।
द्रष्टास्यनघ देवेन्द्रं स च तेऽस्त्राणि दास्यति ॥ ५
एवमुक्त्वा स मां राजन्नाश्लिष्य च पुनः पुनः । C. 3. 11997 B. 3. 168. 6 K. 3. 169. 6

B तदा°; G$_{1}$ ततः प्रीतियुतं. — ^{b}) Ś$_{1}$ K D$_{1.2}$ °वारणं; D$_{3}$ °बाधनं; M$_{1}$ °षेधकं. — ^{d}) D$_{3}$ G$_{1.2.4}$ °न्ने वृषभध्वजे.

52 ^{b}) Ś$_{1}$ K D$_{2.3}$ °विकर्षणं; B$_{2.4}$ Dc T$_{1}$ M °निकृंतनं; D$_{5}$ °विनाशनं; T$_{2}$ G °सैन्यविकर्तनं.

53 D$_{5}$ om. 53^{cd}. — ^{c}) K$_{3.4}$ D$_{1.3}$ प्रेक्ष्य(K$_{3}$ °क्ष)-माणस्य; B$_{4}$ T$_{2}$ G$_{2-4}$ M पश्यतश्चैव (for प्रेक्षतश्चैव). T$_{1}$ पश्यतश्च स मे देवस; G$_{1}$ स पश्यतश्च मे देवस.

Colophon. — *Major parvan:* Ś$_{1}$ K$_{1.2}$ T G आरण्य (G$_{1}$ श्रीमदारण्य). — *Sub-parvan:* Omitting sub-parvan name, K$_{1}$ B Dc Dn$_{2}$. n$_{3}$ D$_{6}$ T$_{2}$ G$_{3}$ mention only गंधमादनवास (followed by उत्तरकैरात in Dc); K$_{3}$ D$_{1}$ likewise, only लोमशतीर्थयात्रा (followed by गंधमादनवास in K$_{3}$); K$_{4}$ D$_{5}$, only उत्तरकैरात; and finally Dn$_{1}$ D$_{3.4}$, only गंधमादनप्रवेश (D$_{4}$ °प्रवास). — *Adhy. name:* D$_{1.2}$ अर्जुनप्रवासकथनं; G$_{1}$ अर्जुनास्त्रप्रदाने अर्जुनवाक्यं. — *Adhy. no.* (figures, words or both): Dn$_{1}$. n$_{3}$ 166; Dn$_{3}$ S 167 (M$_{2}$ 170 [*sup. lin.* 160]); D$_{1}$ 172. — *Śloka no.:* Dn D$_{6}$ 57; D$_{1}$ 56. — After the colophon, G$_{1}$ cont.: श्रीभगवतो महापुरुषस्य विष्णोरंशावतारम्भूः(? read भू)तेन सत्यवतीनन्दनेन श्रीपराशरात्मजेन शुकतातेन वेदव्यासनाम्ना कृष्णद्वैपायनेनोक्तं अष्टादशपर्वाद्यलंकृतं श्रीमहाभारताख्यं पंचमो वेदः । श्रुतौ आरण्यके पर्वणि पूर्वारण्याख्यं सप्तषष्ट्यधिकशततमाध्यायैर्निर्मितं सप्तषष्ट्यधिकद्विशततमषट्साहस्रैः श्लोकैरलंकृतं पूर्वारण्याख्यं । समाप्त्यधिकशततमा (sic) ।

164

1 ^{a}) T$_{2}$ G$_{3.4}$ अथ सं-; G$_{2}$ अथ सु- (for अवसं). D$_{5}$ रात्रिं (for प्रीतो). — ^{b}) D$_{5}$ प्रीतोहं (for रजनीं). — ^{c}) Ś$_{1}$ K D$_{1-3}$ प्रसादं देवदेवाद्वै. — ^{d}) Ś$_{1}$ K$_{1.2.4}$ D$_{1-3}$ तं प्राप्य विपुलं तदा.

2 ^{a}) Ś$_{1}$ K$_{2}$ व्युष्य तां; K$_{1.3}$ व्युषितां; K$_{4}$ D$_{1.2}$ उष्य तां; S (except T$_{2}$ G$_{3}$) उषित्वा (for व्युषितो). — ^{b}) Ś$_{1}$ पूर्वान्हिकक्रियां; K$_{1}$ पौर्वान्हिकीक्रियां; K$_{2}$ Dc D$_{5}$ G$_{1.2}$ पौर्वाह्णिकीं क्रियां; K$_{3.4}$ D$_{2}$ पूर्वान्हिकी(D$_{2}$ °कीं)क्रियां; B Dn D$_{4.6}$ M पौर्वाह्णि(D$_{6}$ °न्हि)कीः क्रियाः; D$_{1}$ पूर्वाह्णिकीं क्रियां; D$_{3}$ पूर्वान्हिकक्रियः; T$_{1}$ G$_{4}$ पूर्वाह्णिकक्रियं. — ^{c}) Ś$_{1}$ K$_{1.2}$ D$_{3.5}$ अथ तं विप्रं (for तं द्विजश्रेष्ठं). — ^{d}) Ś$_{1}$ K D$_{1-3}$ पथि (for पुरा).

3 ^{a}) Ś$_{1}$ K D$_{1.2}$ तस्याहं तद्; M तस्मादहं (for तस्मै चाहं). T$_{1}$ G$_{1}$ पुरा° (for यथा°). — ^{d}) Ś$_{1}$ K$_{1}$ समीतो (for समेतो). Ś$_{1}$ D$_{1.2}$ कौरव (for भारत).

5 ^{a}) S समेतं (T$_{1}$ °तैर्). Ś$_{1}$ K B$_{1.3.4}$ Dc D$_{1-3.5}$ त्वं (for तु). — ^{c}) K$_{3.4}$ D$_{1-3}$ पश्चाद् (for [अ]नघ).

6 ^{a}) Ś$_{1}$ K$_{1.3}$ D$_{6}$ तु; K$_{4}$ D$_{1}$ च (for स). K$_{2}$ T$_{1}$ महाराज (for स मां राजन्). — ^{b}) D$_{1.2}$ समाश्लिष्य (for

C. 3. 11997
B. 3. 168. 6
K. 3. 169. 6

अगच्छत्स यथाकामं ब्राह्मणः सूर्यसंनिभः ॥ ६
अथापराह्णे तस्याह्नः प्रावात्पुण्यः समीरणः ।
पुनर्नवमिमं लोकं कुर्वन्निव सपत्नहन् ॥ ७
दिव्यानि चैव माल्यानि सुगन्धीनि नवानि च ।
शैशिरस्य गिरेः पादे प्रादुरासन्समीपतः ॥ ८
वादित्राणि च दिव्यानि सुघोषाणि समन्ततः ।
स्तुतयश्चेन्द्रसंयुक्ता अश्रूयन्त मनोहराः ॥ ९
गणाश्चाप्सरसां तत्र गन्धर्वाणां तथैव च ।
पुरस्ताद्देवदेवस्य जगुर्गीतानि सर्वशः ॥ १०
मरुतां च गणास्तत्र देवयानैरुपागमन् ।
महेन्द्रानुचरा ये च देवसद्मनिवासिनः ॥ ११
ततो मरुत्वान्हरिभिर्युक्तैर्वाहैः स्वलंकृतैः ।
शचीसहायस्तत्रायात्सह सर्वैस्तदामरैः ॥ १२
एतस्मिन्नेव काले तु कुबेरो नरवाहनः ।
दर्शयामास मां राजँल्लक्ष्म्या परमया युतः ॥ १३
दक्षिणस्यां दिशि यमं प्रत्यपश्यं व्यवस्थितम् ।
वरुणं देवराजं च यथास्थानमवस्थितम् ॥ १४
ते मामूचुर्महाराज सान्त्वयित्वा सुरर्षभाः ।
सव्यसाचिन्समीक्षस्व लोकपालानवस्थितान् ॥ १५
सुरकार्यार्थसिद्ध्यर्थं दृष्टवानसि शंकरम् ।
अस्मत्तोऽपि गृहाण त्वमस्त्राणीति समन्ततः ॥ १६
ततोऽहं प्रयतो भूत्वा प्रणिपत्य सुरर्षभान् ।
प्रत्यगृह्णं तदास्त्राणि महान्ति विधिवत्प्रभो ॥ १७
गृहीतास्त्रस्ततो देवैरनुज्ञातोऽस्मि भारत ।
अथ देवा ययुः सर्वे यथागतमरिंदम ॥ १८
मघवानपि देवेशो रथमारुह्य सुप्रभम् ।

आश्लिष्य च). — ^{c}) Ś$_1$ स गच्छत; K$_{1.2}$ प्रत्यागच्छद् (for अगच्छत्स). T$_1$ G$_1$ च (for स). D$_5$ महाकायो (for यथा°).

7 ^{a}) A few MSS. अथापराह्ने. — ^{b}) Ś$_1$ K$_{1.2}$ प्रवात्; D$_3$ T G$_{1.3.4}$ M$_2$ प्रायात्. A few MSS. पुण्य- (for पुण्यः). — ^{c}) T$_2$ G$_{3.4}$ कुर्वन् (for लोकं). — ^{d}) Ś$_1$ K$_{1.2}$ कुर्वन्वितिमिरा दिशः; T$_2$ G$_{3.4}$ पुण्यगंधान्समुद्वहन्.

8 ^{b}) Ś$_1$ K D$_{1.2.5}$ बहूनि; Dc Dn$_3$ D$_3$ M$_2$ वनानि (for नवानि). — ^{d}) Ś$_1$ K D$_{1-3.5}$ न(K$_4$ सु)राधिप; T$_1$ G$_1$ M$_1$ समंततः (for समीपतः); cf. 9^b.

9 T$_1$ om. 9^{ab}. — ^{a}) G$_1$ M$_1$ सर्वाणि (for दिव्यानि). — ^{b}) K$_4$ B$_4$ Dn D$_{4.6}$ सुघोराणि. — ^{d}) Ś$_1$ K D$_{1-3.5}$ श्रूयंते स्म (for अश्रूयन्त).

10 ^{a}) Ś$_1$ K$_1$ गणै° (for गणा°). K$_2$ गणैश्चाप्सरसस्तस्य. — Ś$_1$ K$_{1-3}$ D$_5$ om. (? hapl.) 10^b–11^a; K$_4$ om. 10^{bcd}. — ^{c}) D$_{1-3}$ S पुरःसरा (G$_4$ परस्परं) देवपतेर्.

11 Ś$_1$ K$_{1-3}$ D$_5$ om. 11^a (cf. v.l. 10). — ^{b}) Ś$_1$ K D$_5$ स्वलंकृतैः (for उपागमन्). — Ś$_1$ K$_2$ om. 11^c–12^b; K$_1$ om. 11^{cd}. — ^{d}) Dn D$_{4.6}$ ये च (for देव-).

12 Ś$_1$ K$_3$ om. 12^{ab} (cf. v.l. 11). — ^{b}) K$_{1.3.4}$ D$_{1-3}$ वातयुक्तैः; Dc$_2$ दिव्यैर्वाहैः; T$_1$ युक्तवाहे; T$_2$ G$_{2-4}$ युक्तो वाहैः; M$_1$ युक्ते वाहे (for युक्तैर्वाहैः). K$_1$ T$_2$ G$_{2-4}$ M$_2$ अलंकृतैः; T$_1$ M$_1$ स्वलंकृतः. — ^{c}) Ś$_1$ K D$_5$ तत्रासीत्; T$_2$ G$_{3.4}$ M$_1$ तत्रागात् (for तत्रायात्). — ^{d}) Ś$_1$ K D$_{1-3.5}$ दिवालयैः; B$_4$ S सुरैस्तदा (for तदामरैः).

13 ^{c}) D$_5$ चात्मानं; G$_4$ तं कालं (for मां राजन्).

14 ^{a}) Ś$_1$ K D$_{1-3.5}$ अपर° (for दक्षिण°). — ^{b}) D$_5$ स्थितं यमं (for व्यव°). — ^{c}) Ś$_1$ K D$_{1-3.5}$ पावकं चैव; Dc देवराजानं (for देवराजं च). — ^{d}) Ś$_1$ K D$_{1-3.5}$ अवस्थितौ; B$_4$ Dc G$_1$ व्यवस्थितं (for अवस्थितम्).

15 ^{b}) B$_{1-3}$ Dc Dn D$_{4.6}$ नरर्षभ (for सुर°). — ^{c}) Ś$_1$ K D$_{1-3.5}$ समीक्षास्मान्; B Dc Dn D$_{4.6}$ निरीक्षास्मान् (for समीक्षस्व). — ^{d}) Dn$_3$ D$_5$ T$_1$ व्यवस्थितान्.

16 ^{a}) T$_1$ °कार्यप्रवृत्त्यर्थं; T$_2$ G °कार्यप्रसिद्ध्यर्थं. — ^{c}) Ś$_1$ तदस्मत्तो (for अस्मत्तोऽपि).

17 ^{a}) A few MSS. प्रणतो (for प्रय°). — ^{c}) Ś$_1$ K$_1$ तदस्त्राणि; T$_1$ महाराज; T$_2$ G महास्त्राणि (G$_1$ अहं राजन्). — ^{d}) T$_1$ शस्त्राणि; G$_1$ अस्त्राणि (for महान्ति). B Dn D$_{4-6}$ विधिवद्विभो; B$_2$m T G विविधानि च.

18 ^{c}) D$_5$ देवाश्चापि (for अथ देवा). Ś$_1$ K D$_{1-3.5}$ गताः (for ययुः). T$_1$ M केचिद् (for सर्वे).

19 ^{a}) Dc D$_5$ T$_2$ G$_{2-4}$ भगवान् (for मघवान्). Ś$_1$ K D$_{1-3.5}$ G$_1$ अथ (for अपि). S मां देवो (for देवेशो). — ^{b}) S (except M$_2$) आरोप्य (for आरुह्य). D$_5$ शोभनं; T$_1$ सुप्रभः (for सुप्रभम्). — ^{c}) B Dc Dn D$_{4.6}$ स्वर्गं; D$_{2.3}$ स्वर्गे (for वाक्यं). T$_1$ अवोचद्वाक्यं मधुरं; T$_2$ G M उवाच वाक्यं भगवान् (G$_1$ मधुरं). — ^{d}) S महायशाः (for सुरा°). B Dc Dn D$_{2-4.6}$ गंतव्यं फाल्गुन (D$_{2.3}$ पांडव) त्वया. — After 19, D$_{2.3}$ read 23 (for the first time), which in D$_2$ is followed by a *repetition* of 19^{cd}.

६९०
२८ज
१४२४६

उवाच भगवान्वाक्यं स्मयन्निव सुरारिहा ॥ १९
पुरैवागमनादस्माद्वेदाहं त्वां धनंजय ।
अतः परं त्वहं वै त्वां दर्शये भरतर्षभ ॥ २०
त्वया हि तीर्थेषु पुरा समाप्लावः कृतोऽसकृत् ।
तपश्चेदं पुरा तप्तं स्वर्गं गन्तासि पाण्डव ॥ २१
भूयश्चैव तु तप्तव्यं तपः परमदारुणम् ।
उवाच भगवान्सर्वं तपसश्चोपपादनम् ॥ २२
मातलिर्मन्नियोगात्त्वां त्रिदिवं प्रापयिष्यति ।
विदितस्त्वं हि देवानामृषीणां च महात्मनाम् ॥ २३
ततोऽहमब्रुवं शक्रं प्रसीद भगवन्मम ।
आचार्यं वरये त्वाहमस्त्रार्थं त्रिदशेश्वर ॥ २४

इन्द्र उवाच ।
क्रूरं कर्मास्त्रवित्तात करिष्यसि परंतप ।
यदर्थमस्त्राणीप्सुस्त्वं तं कामं पाण्डवाप्नुहि ॥ २५

अर्जुन उवाच ।
ततोऽहमब्रुवं नाहं दिव्यान्यस्त्राणि शत्रुहन् ।
मानुषेषु प्रयोक्ष्यामि विनास्त्रप्रतिघातनम् ॥ २६
तानि दिव्यानि मेऽस्त्राणि प्रयच्छ विबुधाधिप ।
लोकांश्चास्त्रजितान्पश्चाल्लभेयं सुरपुंगव ॥ २७

इन्द्र उवाच ।
परीक्षार्थं मयैतत्ते वाक्यमुक्तं धनंजय ।
ममात्मजस्य वचनं सूपपन्नमिदं तव ॥ २८

C. 3. 12019
B. 3. 168. 28
K. 3. 169. 29

---

20 ^{a}) T$_2$ G$_{2.3}$ M$_2$ गमनाद् (for [आ]गमनाद्). K$_4$ D$_1$ तात (for अस्माद्). — ^{b}) Ś$_1$ K$_{1.2}$ त्वा (for त्वां). — ^{c}) K$_4$ इतः; B$_2$ G$_2$ ततः (for अतः). Ś$_1$ K$_3$ च वेदाहं; K$_{1.2.4}$ D$_{1.2}$ च वेत्तास्मि; B$_1$ T$_1$ G$_1$ M$_2$ वै नाहं त्वां; B$_4$ चैवाहं त्वां (for त्वहं वै त्वां). — ^{d}) Ś$_1$ K$_3$ D$_5$ दर्शने; K$_{1.2.4}$ D$_{1-3}$ °नं; Dc$_2$ °येद् (for °ये).

21 ^{a}) K$_4$ D$_{1.2}$ त्वया तीर्थेषु सर्वेषु; T$_1$ G$_1$ त्वया हि पुण्य(G$_1$ हिरण्य)तीर्थेषु; T$_2$ G$_{2-4}$ त्वया तीर्थानि च पुरा. — ^{b}) K$_4$ D$_{1.2}$ कृतः पूर्वं समाप्लवः; D$_3$ सकृदाप्लवनं कृतं; T$_1$ G$_1$ सदा(G$_1$ °मा)क्रांतमिवासकृत्; T$_2$ G$_{2-4}$ समाक्रांतानि चासकृत्; M समाक्रांतमिहा(M$_2$ °मतो)सकृत्. — ^{c}) T$_1$ G$_{1.2}$ M$_2$ [ए]वं (for [इ]दं). Ś$_1$ पुनस्; B Dc Dn D$_{4.6}$ महत् (for पुरा). — ^{d}) S ततो (G$_1$ तपो) (for स्वर्गं). B$_1$ D$_5$ भारत (for पाण्डव).

22 ^{a}) B Dn D$_{4.6}$ च; D$_{1.2}$ T$_1$ G$_4$ हि; G$_1$ [अ]भि- (for तु). M$_1$ कर्तव्यं (for तप्तव्यं). — ^{b}) B Dc Dn D$_{4.6}$ S तपश्चरणमुत्तमं. — After 22^{ab}, S ins.:

841* दुश्चरं घोरमस्त्राणां तपसश्चोपदर्शनम् ।

[T$_1$ G$_1$ M$_1$ तपोबलकरं तव; M$_2$ तपसश्चोपपादनं (for the posterior half).]

— S cont.: B Dc Dn D$_{4.6}$ ins. after 22^{ab} (B$_3$, after 22):

842* स्वर्गस्त्ववश्यं गन्तव्यस्त्वया शत्रुनिषूदन ।

[G$_4$ M स्वर्गं (for स्वर्गस्). G$_2$ M गंतव्यं (for °व्यस्). B$_{1.3}$ M$_2$ °निसूदन; B$_4$ °निबर्हण.]

— B$_{1.2.4}$ Dn D$_{4.6}$ S om. 22^{cd}. — ^{c}) B$_3$ शत्रुस् (for सर्वं). — ^{d}) B$_3$ तपश्चरणमुत्तमं; D$_3$ देवानां च पुरंदरः.

23 ^{a}) K$_4$ D$_{1.2.5}$ च; M$_2$ त्वा (for त्वां). — ^{b}) K$_4$ D$_{1.2}$ दिवं त्वां; D$_5$ स्वर्गं त्वां (for त्रिदिवं). — ^{d}) N मुनीनां (for ऋषीणां). D$_5$ भावितात्मनां (for च महा°). — After 23, S ins.:

843* इहस्थः पाण्डवश्रेष्ठ तपः कुर्वन्सुदुष्करम् ।

24 ^{a}) M अब्रवं! — ^{c}) K$_{3.4}$ B$_1$ D$_{2.3.6}$ T$_2$ G$_{2-4}$ M वरयेहं त्वाम्; B$_{3.4}$ Dc Dn D$_{1.4.5}$ °यं त्वाम्. — ^{d}) K$_{1-3}$ D$_{1-3.5}$ S (except T$_2$ G$_{3.4}$) त्रिदिवे° (for त्रिदशे°).

25 ^{a}) K$_{3.4}$ B D T$_1$ G$_{1.4}$ क्रूर- (for क्रूरं). — ^{b}) K$_{3.4}$ B D T$_1$ G$_{1.4}$ भवि° (for करि°). K$_{3.4}$ D$_{1.2}$ न संशयः (for परं°). — ^{c}) B$_2$ G$_1$ M$_1$ यदस्त्रम् (for °र्थम्). Ś$_1$ अस्त्रलिप्सुस्त्वं; K$_{1.2}$ अर्थलिप्सुस्त्वं; G$_1$ अस्त्राणि परितः; G$_4$ अस्त्राणीहंतं. — ^{d}) D$_5$ तं कामं समवाप्स्यसि; T$_1$ तत्कामं समवाप्नुहि; G$_1$ त्वं तत्कामं समाप्नुहि.

26 B D$_{1.2}$ S om. the ref. — ^{a}) M अब्रवं! T$_1$ तमब्रुवं पुनरहं. — ^{d}) Ś$_1$ K D$_3$ विनास्त्र(Ś$_1$ K$_2$ °स्त्रं)प्रतिवारणं; B Dc Dn D$_{4.6}$ T$_1$ °प्रतिघातनात्; D$_1$ मुक्त्वास्त्रं प्रतिवारणं; D$_2$ (catalectic) विनास्त्रं निवारणं; T$_2$ G$_{3.4}$ °स्त्रप्रतिकृंतनं.

27 ^{a}) D$_5$ तेन (for तानि). K$_{1.2}$ T$_1$ transp. दिव्यानि and मेऽस्त्राणि. — ^{b}) T$_1$ ददस्व हि पुरंदर. — ^{c}) Ś$_1$ शक्रजितान्; K D$_{1.2}$ शस्त्रजितान्; B$_1$ अस्त्रजितान्; T$_1$ G$_2$ M$_1$ चास्त्रविदां (for चास्त्रजितान्). K$_{3.4}$ D$_{1.2}$ सर्वान् (for पश्चात्). — ^{d}) Ś$_1$ K B$_4$ D$_{1.2}$ कामयेहं सुरर्षभ; D$_5$ कर्मणा प्रतिपादये.

28 ^{b}) T$_2$ G$_{3.4}$ एवम् (for वाक्यम्). Ś$_1$ परंतप (for धनं°). — ^{d}) D$_{1.2}$ T$_1$ om. सु-.

29 ^{a}) Ś$_1$ K D$_{1-3.5}$ मद्- (for मे). — ^{b}) Ś$_1$ K

C. 3. 12020
B. 3. 168. 29
K. 3. 169. 30

शिक्ष मे भवनं गत्वा सर्वाण्यस्त्राणि भारत ।
वायोरग्नेर्वसुभ्योऽथ वरुणात्समरुद्गणात् ॥ २९
साध्यं पैतामहं चैव गन्धर्वोरगरक्षसाम् ।
वैष्णवानि च सर्वाणि नैर्ऋतानि तथैव च ।
मद्गतानि च यानीह सर्वास्त्राणि कुरूद्वह ॥ ३०

अर्जुन उवाच ।

एवमुक्त्वा तु मां शक्रस्तत्रैवान्तरधीयत ।
अथापश्यं हरियुजं रथमैन्द्रमुपस्थितम् ।
दिव्यं मायामयं पुण्यं यत्तं मातलिना नृप ॥ ३१
लोकपालेषु यातेषु मामुवाचाथ मातलिः ।
द्रष्टुमिच्छति शक्रस्त्वां देवराजो महाद्युते ॥ ३२
संसिद्धस्त्वं महाबाहो कुरु कार्यमनुत्तमम् ।
पश्य पुण्यकृतां लोकान्सशरीरो दिवं व्रज ॥ ३३

इत्युक्तोऽहं मातलिना गिरिमामन्त्र्य शैशिरम् ।
प्रदक्षिणमुपावृत्य समारोहं रथोत्तमम् ॥ ३४
चोदयामास स हयान्मनोमारुतरंहसः ।
मातलिर्हयशास्त्रज्ञो यथावद्भूरिदक्षिणः ॥ ३५
अवैक्षत च मे वक्त्रं स्थितस्याथ स सारथिः ।
तथा भ्रान्ते रथे राजन्विस्मितश्चेदमब्रवीत् ॥ ३६
अत्यद्भुतमिदं मेऽद्य विचित्रं प्रतिभाति माम् ।
यदास्थितो रथं दिव्यं पदा न चलितो भवान् ॥ ३७
देवराजोऽपि हि मया नित्यमत्रोपलक्षितः ।
विचलन्प्रथमोत्पाते हयानां भरतर्षभ ॥ ३८
त्वं पुनः स्थित एवात्र रथे भ्रान्ते कुरूद्वह ।
अतिशक्रमिदं सत्त्वं तवेति प्रतिभाति मे ॥ ३९
इत्युक्त्वाकाशमाविश्य मातलिर्विबुधालयान् ।

D1-3 दिव्यान्य° (for सर्वाण्य°). — c) B1. 3 Dn D4. 6 [अ]पि; D5 च (for [अ]थ). — d) T1 G2-4 मरुतां गणात् (for समरु°).

30 a) T2 G2-4 साध्यात्. T2 G2. 3 पैतामहाच्. Ś1 K2 दैवं; K3. 4 देवं (for चैव). — b) Ś1 K1 °राक्षसं; K2. 3 °राक्षसां; T1 °राक्षसान्. — c) D5 वैष्णवादीनि; T1 °न्यथ (for °नि च). — d) K2 नैऋत्यानि; T1 दैतेयानि. T1 G1 [अ]पराणि; M1 [आ]सुराणि (for तथैव). — e) K2 मरुद्गतानि; K3 मरुद्गणानि; K4 D2 मद्गणानीह; T1 मदीयानि च (for मद्गतानि च). K4 B4 Dn D1. 3. 4 जानीहि; G1. 2 याम्यानि (for यानीह). — f) Ś1 सर्वाण्यपि; K1. 2 °णीह; K3. 4 D1-3 °ण्येव (for °स्त्राणि). T1 G1 समाप्स्यसि (for कुरू°). T2 G2-4 M कौंतेयास्त्राण्यवाप्स्यसि.

31 All MSS. om. the ref.! — b) Ś1 D4 तथै° (for तत्रै°). — c) D1. 2 हरियुतं. — d) B1 उपागतं; T G2-4 अवस्थितं (for उपस्थितम्). — e) T G2. 3 मह्यं (for दिव्यं), and दिव्यं (for पुण्यं). — f) K4 D1 यंत्रा; D3 S युक्तं; D5 युतं (for यत्तं). Ś1 K D1. 2 तदा (for नृप).

32 T1 om. 32^{ab}. — a) Ś1 K D1-3 गतेषु लोकपालेषु. — b) Ś1 K D1-3 स (for [अ]थ). — d) Ś1 K B4 D1-3. 5 पुरंदरः; B1 S महाद्युतिः.

33 a) Ś1 संसिद्धस्त्वां; K1. 2 °द्धस्तु; B1. 3. 4 Dc Dn D4. 6 °ध्यस्व; D5 °द्धास्त्वं. — b) N T2 (by corr.) G3 अनंतरं (for अनुत्तमम्). — c) Most MSS. °कृताँल्लोकान्. — After 33, B Dc Dn D4. 6 ins.:

844* देवराजः सहस्राक्षस्त्वां दिदृक्षति भारत ।

35 a) K4 D1. 2. 5 नोदयामास. Ś1 K1. 2 Dc2 D T1 सहसा (for स हयान्). — c) B Dc Dn D4. 6 हयत स्त्वज्ञो. — d) Ś1 तत्र वाजिनः; K1 T1 भूरिदक्षिणं; Dc D1. 4. 6 °दक्षिण.

36 c) Ś1 K2 अत्रांतरे; K1 तत्र भ्रांते; S तत्राभ्रांतं.

37 a) Ś1 K1. 2 D3 मह्यं; B Dc Dn D4. 6 त्वद्य; T G1. 3 तेद्य; M1 नोद्य (for मेऽद्य). — b) Ś1 K D1. 2 च; B Dc Dn D4-6 T2 (before corr.) मे; D3 चै; T2 ते; G2- मा (for माम्). — c) B1 Dn2. n3 D5 T1 G1. 2 M2 यथा° D1 तथा° (for यदा°). — d) K1. 4 B Dc Dn T2 (before corr.) पदान्; T1 तदा (for पदा). B Dc Dn D4. 6 पदं (for भवान्).

38 a) T1 हि (for ऽपि). T1 मघवान्; T2 G3- भगवान् (for हि मया). — b) Ś1 K D1-3 एवो° (for अत्रो°).

39 a) T1 स्थिर (for स्थित). S [अ]द्य (for [अ]त्र). — b) Ś1 K1. 2 न वै (K नैव) भ्रांतः (for रथे भ्रान्ते). — c) B1. 3. 4 Dc Dn D4-6 सर्वं (for सत्त्वं). B2 अति सर्वमिदं कर्म.

40 a) Ś1 K1. 2 आरुह्य (for आविश्य). — After 40 B Dc Dn D2. 4. 6 ins.:

845* स रथो हरिभिर्युक्तो ह्यूर्ध्वमाचक्रमे ततः ।
ऋषयो देवताश्चैव पूजयन्ति नरोत्तम ।
ततः कामगमाँल्लोकानपश्यं वै सुरर्षिणाम् ।

दर्शयामास मे राजन्विमानानि च भारत ॥ ४०
नन्दनादीनि देवानां वनानि बहुलान्युत ।
दर्शयामास मे प्रीत्या मातलिः शक्रसारथिः ॥ ४१
ततः शक्रस्य भवनमपश्यममरावतीम् ।
दिव्यैः कामफलैर्वृक्षै रत्नैश्च समलंकृताम् ॥ ४२
न तां भासयते सूर्यो न शीतोष्णे न च क्लमः ।
रजः पङ्को न च तमस्तत्रास्ति न जरा नृप ॥ ४३
न तत्र शोको दैन्यं वा वैवर्ण्यं चोपलक्ष्यते ।
दिवौकसां महाराज न च ग्लानिररिंदम ॥ ४४
न क्रोधलोभौ तत्रास्तामशुभं च विशां पते ।
नित्यतुष्टाश्च हृष्टाश्च प्राणिनः सुरवेश्मनि ॥ ४५
नित्यपुष्पफलास्तत्र पादपा हरितच्छदाः ।
पुष्करिण्यश्च विविधाः पद्मसौगन्धिकायुताः ॥ ४६
शीतस्तत्र ववौ वायुः सुगन्धो जीवनः शुचिः ।
सर्वरत्नविचित्रा च भूमिः पुष्पविभूषिता ॥ ४७
मृगद्विजाश्च बहवो रुचिरा मधुरस्वराः ।
विमानयायिनश्चात्र दृश्यन्ते बहवोऽमराः ॥ ४८
ततोऽपश्यं वसून्रुद्रान्साध्यांश्च समरुद्गणान् ।
आदित्यानश्विनौ चैव तान्सर्वान्प्रत्यपूजयम् ॥ ४९
ते मां वीर्येण यशसा तेजसा च बलेन च ।
अस्त्रैश्चाप्यन्वजानन्त संग्रामविजयेन च ॥ ५०
प्रविश्य तां पुरीं रम्यां देवगन्धर्वसेविताम् ।
देवराजं सहस्राक्षमुपातिष्ठं कृताञ्जलिः ॥ ५१
ददावर्धासनं प्रीतः शक्रो मे ददतां वरः ।
बहुमानाच्च गात्राणि पस्पर्श मम वासवः ॥ ५२
तत्राहं देवगन्धर्वैः सहितो भूरिदक्षिण ।

C. 3. 12047
B. 3. 168. 56
K. 3. 169. 56

गन्धर्वाप्सरसां चैव प्रभावममितौजसाम् ।

41 ^{a}) T$_1$ G$_{1.2}$ दिव्यानि (for देवानां). — ^{b}) Ś$_1$ K$_1$ D$_3$ विविधानि; K$_2$ विबुधानि; B$_{2-4}$ Dn D$_{4-6}$ [उ]पवनानि; B$_1$ Dc विपुलानि; G$_2$ सुबहूनि (for बहुलानि). Ś$_1$ B Dc Dn D$_{4-6}$ च (for [उ]त). — ^{c}) Ś$_1$ राजन्; B Dc Dn D$_{4.6}$ शीघ्रं (for प्रीत्या). D$_5$ प्रेक्ष्यमाणान्समेत्याहं.

42 ^{c}) Ś$_1$ K$_{2.3}$ D$_{1.3}$ दिव्य-; K$_4$ सर्व- (for दिव्यैः). T$_1$ दिव्यैः कमलगंधैश्च; T$_2$ G$_{2-4}$ दिव्यैः कनकबद्धैश्च; G$_1$ M दिव्यैः कमलषंडैश्च. — ^{d}) S वृक्षैरन्यैरलंकृतां.

43 ^{a}) B Dc Dn D$_{4-6}$ न तत्र सूर्यस्तपति. — ^{b}) K$_1$ शीतोष्णी; D$_5$ °ष्णौ; S (except T$_2$ G$_3$ M$_2$) °ष्णो. — ^{c}) Ś$_1$ D$_2$ -पंकौ; G$_1$ -पंके (for पङ्को). B$_{1-3}$ Dc Dn D$_{4.6}$ न बाधते तत्र रजः.

44 ^{a}) D$_{1.3}$ G$_1$ च (for वा). — ^{b}) B Dc Dn D$_{4.6}$ दौर्बल्यं; T$_1$ वैवर्ण्यंश (for वैवर्ण्यं). Ś$_1$ वोप°; D$_{1.2}$ नोप°; T$_2$ (before corr.) G$_4$ चोपलक्षितं. — ^{d}) B$_{2-4}$ Dc Dn D$_{4.6}$ न ग्लानिररिमर्दन.

45 ^{b}) Ś$_1$ गतानां वै; K$_{1.2}$ गताधीनां; K$_{3.4}$ B Dc D$_{3.5}$ शुभ(Dc °भा)धीनां; Dn D$_{4.6}$ सुरादीनां; D$_{1.2}$ सुबुद्धीनां; T$_1$ G$_4$ अशुभंश्च (for अशुभं च). — ^{c}) Dc D$_{4.6}$ T$_1$ G$_1$ नित्यं (for नित्य-). Ś$_1$ K B$_4$ D$_{1-3}$ transp. तुष्टाः and हृष्टाः. M$_1$ प्र- (for the first च). Dc Dn D$_{4.6}$ ते राजन् (for हृष्टाश्च). — ^{d}) K$_2$ सुरवेश्मिनः.

46 ^{d}) B$_3$ पद्मसौगंधिकप्रभाः; D$_{1.2}$ °कस्तथा; D$_5$ °कैर्युताः.

47 K$_3$ om. 47. — ^{a}) S सुखो (for ववौ). B Dc D$_{4.6}$ शीतलश्च (B$_4$ °स्तत्र) सुखो वायुः. — ^{b}) K$_{1.2}$ B$_{2.4}$ Dc Dn D$_{4.6}$ सुगंधी. K$_{1.2}$ विरजाः (for जीवनः). D$_5$ सौगंधिजीवनः शुभः; S सुगंधो वीजते शुभः (G$_2$ सुखं; G$_4$ शुभं). — ^{d}) T$_2$ G$_{2-4}$ पद्म° (for पुष्प°).

48 ^{b}) Ś$_1$ K$_{1.2}$ T$_1$ मधुरस्वनाः. — B$_2$ om. 48^c–51^d. — ^{c}) B$_{1.3.4}$ Dc Dn D$_{4.6}$ विमानगामिनश्च. — ^{d}) Ś$_1$ K$_{1-3}$ D$_3$ च तथा (for बहवो). B$_{1-3}$ Dn D$_{4.6}$ [अ]वरे; Dc [अ]परे (for [अ]मराः).

49 B$_2$ om. 49 (cf. v.l. 48). — ^{b}) T$_1$ G$_1$ साध्यान्देवमरु°. — ^{c}) Ś$_1$ K$_1$ तत्र (for चैव). — ^{d}) T$_1$ corrupt.

50 B$_2$ om. 50 (cf. v.l. 48). — ^{a}) T$_1$ G$_{1.2}$ M$_2$ तेषां (for ते मां). — ^{b}) T$_1$ [अ]मलेन (for बलेन). — ^{c}) K$_2$ Dc D$_{4.6}$ [अ]नुजानंत; D$_5$ [अ]भ्यजानंत; S [अ]न्व(T$_1$ °नु)जानन्वै (for [अ]न्वजानन्त). — ^{d}) K$_{2.3}$ B$_{1.3.4}$ D (except D$_5$) संग्रामे (for संग्राम-).

51 B$_2$ om. 51 (cf. v.l. 48). — ^{a}) B$_{1.3.4}$ Dc Dn D$_{4.6}$ दिव्यां (for रम्यां). — ^{b}) B$_{1.3.4}$ D (except D$_{1.2}$) °पूजितां.

52 ^{b}) D$_{1.2}$ T$_1$ वदतां; M$_1$ गम° (for दद°). K$_3$ D$_{1.3.4}$ G$_4$ वर; D$_5$ °रं (for °रः).

53 ^{b}) Ś$_1$ K D$_{1-3.5}$ संस्तुतो (for सहितो). K$_{3.4}$ S (except G$_4$) भूरिदक्षिणः; K$_3$ B Dc Dn D$_{2.4-6}$ G$_4$ °दक्षिणैः. — ^{d}) B Dc Dn D$_{4.6}$ शिक्षाणो (for कुर्वाणो).

54 ^{a}) K$_{3.4}$ D$_{1.2}$ transp. मे and पुत्रः. B Dc$_1$ Dn

C. 3. 12048
B. 3. 168. 57
K. 3. 169. 56

अस्त्रार्थमवसं स्वर्गे कुर्वाणोऽस्त्राणि भारत ॥ ५३
विश्वावसोश्च मे पुत्रश्चित्रसेनोऽभवत्सखा ।
स च गान्धर्वमखिलं ग्राहयामास मां नृप ॥ ५४
ततोऽहमवसं राजन्गृहीतास्त्रः सुपूजितः ।
सुखं शक्रस्य भवने सर्वकामसमन्वितः ॥ ५५
शृण्वन्वै गीतशब्दं च तूर्यशब्दं च पुष्कलम् ।
पश्यंश्चाप्सरसः श्रेष्ठा नृत्यमानाः परंतप ॥ ५६
तत्सर्वमनवज्ञाय तथ्यं विज्ञाय भारत ।
अत्यर्थं प्रतिगृह्याहमस्त्रेष्वेव व्यवस्थितः ॥ ५७
ततोऽतुष्यत्सहस्राक्षस्तेन कामेन मे विभुः ।
एवं मे वसतो राजन्नेष कालोऽत्यगाद्दिवि ॥ ५८

इति श्रीमहाभारते आरण्यकपर्वणि चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

१६५

अर्जुन उवाच ।

कृतास्त्रमभिविश्वस्तमथ मां हरिवाहनः ।
संस्पृश्य मूर्ध्नि पाणिभ्यामिदं वचनमब्रवीत् ॥ १
न त्वमद्य युधा जेतुं शक्यः सुरगणैरपि ।
किं पुनर्मानुषे लोके मानुषैरकृतात्मभिः ।
अप्रमेयोऽप्रधृष्यश्च युद्धेष्वप्रतिमस्तथा ॥ २
अथाब्रवीत्पुनर्देवः संप्रहृष्टतनूरुहः ।
अस्त्रयुद्धे समो वीर न ते कश्चिद्भविष्यति ॥ ३
अप्रमत्तः सदा दक्षः सत्यवादी जितेन्द्रियः ।
ब्रह्मण्यश्चास्त्रविच्चासि शूरश्चासि कुरूद्वह ॥ ४
अस्त्राणि समवाप्तानि त्वया दश च पञ्च च ।
पञ्चभिर्विधिभिः पार्थ न त्वया विद्यते समः ॥ ५
प्रयोगमुपसंहारमावृत्तिं च धनंजय ।
प्रायश्चित्तं च वेत्थ त्वं प्रतिघातं च सर्वशः ॥ ६

D$_{4.6}$ वै ; Dc$_2$ [ए]व (for मे).

55 T$_2$ G$_3$ om. 55^{ab}. — ^{a}) B$_{2-4}$ D (except D$_{2.3.5}$) तत्रा° (for ततो°).

56 ^{a}) B$_4$ अश्रौषं (for शृण्वन्वै). Ś$_1$ K D$_{1-3.5}$ शृण्वन्गीतस्वनं पुण्यं. — ^{c}) S (except G$_{3.4}$) [अ]प्सरसां. — ^{d}) B$_{1-3}$ D (except D$_{1-3.5}$) नृत्यंतीर्भरतर्षभ.

57 ^{c}) Ś$_1$ K B$_{1.3}$ D$_{1-3}$ परि° (for प्रति°).

58 ^{b}) Dc T$_1$ वै (for मे). K$_4$ D$_2$ G$_2$ प्रभुः; B$_1$ Dc विभो (for विभुः). — ^{c}) Ś$_1$ एव गतो (for मे वसतो). — ^{d}) K$_{1.3.4}$ [ऽ]भ्यगाद्; D$_5$ ह्यगाद् (for ऽत्यगाद्). Dc D$_1$ S इति (for दिवि).

Colophon om. in Dn$_2$. n$_3$ D$_{4.6}$. B$_1$ reads it in marg. — *Major parvan :* Ś$_1$ K$_{1.2}$ T$_2$ G$_{2-4}$ आरण्य. — *Sub-parvan :* K$_3$ D$_{1.2.5}$ (all om. sub-parvan name) mention only लोमशतीर्थयात्रा (followed by गंधमादनवास in K$_3$ D$_5$, and अर्जुनोक्तमुत्तरकैरात in D$_{1.2}$); K$_4$ likewise, only उत्तरकैरात; B$_2$ Dc, only गंधमादनवास (followed by उत्तरकैरात in Dc); and finally B$_{1.4}$ D$_3$, only गंधमादनप्रवेश (B$_4$ °प्रवास; D$_3$ °निवास). — *Adl* *name :* G$_1$ अर्जुनस्वर्गप्रवेशकथनं. — *Adhy. no.* (figur words or both) : Dn$_1$ 167 ; D$_1$ 173 ; S (M$_2$ *sup. li* 168 (M$_2$ orig. 170). — *Śloka no. :* Dn$_1$ D$_1$ 61.

165

1 ^{a}) Ś$_1$ K$_{1.2}$ D$_5$ अभितिष्ठंतम्; B Dc Dn D$_{3.4}$ अतिविश्वस्तम्; S अथ विश्वस्तम्. — ^{b}) T$_2$ G$_3$ मघवान्; तदा मां (for अथ मां). — ^{c}) Ś$_1$ K$_{1.2.4}$ Dc$_1$ D संस्पृशन्.

2 After 2, S ins. :

846* अजेयस्त्वं हि संग्रामे सर्वैरपि सुरासुरैः ।

4 ^{c}) K$_{1.2}$ D$_1$ शा(D$_1$ श)स्त्रविच्; T$_1$ मंत्रविच (चास्त्रविच्). K$_3$ D$_5$ T$_1$ M$_1$ चापि (for चासि). — ^{d}) K D$_1$ T$_1$ G$_1$ चापि (for चासि). K$_{3.4}$ D$_{1.2.5}$ कुलोद्वह.

5 ^{b}) B$_1$ तु दश; T$_1$ G$_4$ (by transp.) च दश. — B$_{2-4}$ Dn D$_{2.4.6}$ विद्यते न त्वया समः (by transp.).

6 ^{a}) T$_1$ चापि (for उप-). — ^{b}) T$_1$ वृत्तिश्चापि (अवृत्ति च). — ^{d}) B$_{2-4}$ D (except D$_{3.5}$) प्रतीघातं.

तव गुर्वर्थकालोऽयमुपपन्नः परंतप ।
प्रतिजानीष्व तं कर्तुमतो वेत्स्याम्यहं परम् ॥ ७
ततोऽहमब्रुवं राजन्देवराजमिदं वचः ।
विषह्यं चेन्मया कर्तुं कृतमेव निबोध तत् ॥ ८
ततो मामब्रवीद्राजन्प्रहस्य बलवृत्रहा ।
नाविषह्यं तवाद्यास्ति त्रिषु लोकेषु किंचन ॥ ९
निवातकवचा नाम दानवा मम शत्रवः ।
समुद्रकुक्षिमाश्रित्य दुर्गे प्रतिवसन्त्युत ॥ १०
तिस्रः कोट्यः समाख्यातास्तुल्यरूपबलप्रभाः ।
तांस्तत्र जहि कौन्तेय गुर्वर्थस्ते भविष्यति ॥ ११
ततो मातलिसंयुक्तं मयूरसमरोमभिः ।
हयैरुपेतं प्रादान्मे रथं दिव्यं महाप्रभम् ॥ १२
बबन्ध चैव मे मूर्ध्नि किरीटमिदमुत्तमम् ।
स्वरूपसदृशं चैव प्रादादङ्गविभूषणम् ॥ १३
अभेद्यं कवचं चेदं स्पर्शरूपवदुत्तमम् ।
अजरां ज्यामिमां चापि गाण्डीवे समयोजयत् ॥ १४
ततः प्रायामहं तेन स्यन्दनेन विराजता ।
येनाजयद्देवपतिर्बलिं वैरोचनिं पुरा ॥ १५
ततो देवाः सर्वे एव तेन घोषेण बोधिताः ।
मन्वाना देवराजं मां समाजग्मुर्विशां पते ।
दृष्ट्वा च मामपृच्छन्त किं करिष्यसि फल्गुन ॥ १६
तानब्रुवं यथाभूतमिदं कर्तास्मि संयुगे ।
निवातकवचानां तु प्रस्थितं मां वधैषिणम् ।
निबोधत महाभागाः शिवं चाशास्त मेऽनघाः ॥ १७
तुष्टुवुर्मां प्रसन्नास्ते यथा देवं पुरंदरम् ।
रथेनानेन मघवा जितवाञ्शम्बरं युधि ।
नमुचिं बलवृत्रौ च प्रह्लादनरकावपि ॥ १८
बहूनि च सहस्राणि प्रयुतान्यर्बुदानि च । C. 3. 12073 B. 3. 168. 82 K. 3. 170. 22

---

7 ^{a}) B$_{2-4}$ D (except D$_{1-3.5}$) ततो (for तव). — ^{b}) B D (except D$_{1-3.5}$) समुत्पन्नः (for उपपन्नः). — ^{c}) Ś$_{1}$ K D$_{1-3}$ प्रतिजानीहि. Ś$_{1}$ K G$_{1}$ तत् (for तं). — ^{d}) G$_{2}$ वक्ष्या° (for वेत्स्या°). Ś$_{1}$ K D$_{1-3.5}$ अथ वक्ष्याम्यहं परं.

8 ^{a}) M अब्रवं! — ^{c}) K$_{4}$ ते; B D (except D$_{1-3.5}$) यन् (for चेन्).

9 ^{a}) T$_{1}$ देवः (for राजन्). — ^{b}) B D (except D$_{3.5}$) प्रहसन्. G$_{1.2}$ M$_{1}$ वलवृत्रहा. — ^{c}) Ś$_{1}$ K D$_{1-3.5}$ [अ]स्तीति; Dn$_{3}$ ह्यस्ति (for [अ]द्यास्ति).

10 ^{b}) Ś$_{1}$ K D$_{1-3.5}$ देव-; B$_{4}$ सुर- (for मम). — ^{c}) Ś$_{1}$ K$_{1.2}$ आवृत्य; D$_{5}$ आगत्य; T$_{2}$ G$_{2-4}$ M आसाद्य (for आश्रित्य). T$_{1}$ समुद्रमासाद्य सदा. — ^{d}) G$_{2.4}$ स्वर्गे (for दुर्गे).

11 ^{c}) Ś$_{1}$ K$_{1-3}$ ताः (for तान्). Ś$_{1}$ K D$_{1-3.5}$ पुत्र; G$_{1}$ तु त्वं (for तत्र). Ś$_{1}$ K D$_{1-3.5}$ पार्थैवं (K$_{4}$ पार्थ त्वं) (for कौन्तेय). — ^{d}) M गुर्वर्थं ते.

13 Ś$_{1}$ om. (hapl.) 13^{c}–14^{b}. — ^{c}) T$_{2}$ G$_{2-4}$ वीर (for चैव). — ^{d}) S राजन् (for अङ्ग-).

14 Ś$_{1}$ om. 14^{ab} (cf. v.l. 13). — ^{a}) T$_{2}$ G$_{3}$ अभेद्य- (for अभेद्यं). Ś$_{1}$ B$_{2}$ G$_{1}$ चैव; K$_{1.2}$ T$_{2}$ G$_{2-4}$ दिव्यं (for चेदं). — ^{b}) K$_{4}$ °रूपमनुत्तमं; D$_{3}$ °रूपं तदद्भुतं. — ^{c}) Ś$_{1}$ K D$_{1-3.5}$ चैव (for चापि).

15 ^{a}) Ś$_{1}$ K$_{1.2}$ देव (for तेन). — ^{c}) K$_{2}$ बलिं देव; T$_{1}$ देवराजो; T$_{2}$ G$_{2-4}$ स देवेंद्रो (for देवपतिर्). — ^{d}) K$_{2}$ पतिर् (for बलिं).

16 ^{a}) S सगंधर्वाः (for सर्वे एव). — ^{b}) Ś$_{1}$ K D$_{1-3}$ शब्देन (for घोषेण). K$_{3}$ D$_{5}$ कोपिताः; D$_{3}$ मोहिताः (for बोधिताः). — ^{d}) K$_{1.2}$ कुरूद्वह (for विशां पते). — ^{f}) Ś$_{1}$ फल्गुण; K$_{1.3.4}$ B$_{1-3}$ Dc Dn D$_{4-6}$ फाल्गुन; B$_{4}$ D$_{1-3}$ पांडव; T$_{1}$ G$_{1}$ फल्गुनः.

17 ^{a}) M अब्रवं! B$_{1}$ Dc तथाभूतम्; S तथा भूतान् (for यथाभूतम्). — ^{d}) Ś$_{1}$ K D$_{1-3.5}$ जयैषिणं (for वधै°). — After 17, S ins.:

847* ततो वाग्भिः प्रशस्ताभिस्त्रिदशाः पृथिवीपते ।

18 D$_{6}$ om. (hapl.) 18^{c}–19^{b}. — ^{c}) K$_{1-3}$ T$_{1}$ G$_{1}$ मघवान्; K$_{4}$ D$_{3}$ भगवान्; T$_{2}$ G$_{2-4}$ जितवान् (for मघवा). — ^{d}) Ś$_{1}$ K$_{1.2}$ हत°; T$_{2}$ G$_{2-4}$ मघ° (for जित°). B$_{4}$ असुरं; D$_{4}$ नमुचिं (for शम्बरं). — K$_{2}$ om. (hapl.) 18^{e}–19^{d}. — ^{e}) D$_{4}$ शंबरं (for नमुचिं). G$_{2}$ M वलवृत्रौ. — ^{f}) K$_{3.4}$ B Dc Dn$_{2.}$ n$_{3}$ D$_{4}$ प्रह्लाद°.

19 K$_{2}$ om. 19; Ś$_{1}$ D$_{6}$ om. 19^{ab} (for K$_{2}$ D$_{6}$ cf. v.l. 18). — ^{b}) T$_{1}$ [अ]युतानि (for [अ]र्बुदानि). B$_{1.4}$ Dc$_{1}$ Dn D$_{4}$ [अ]पि (for च). — D$_{2}$ om. 19^{c}–21^{b}. — ^{c}) T$_{1}$ वै दैत्यान् (for दैत्यानां). — ^{d}) N (Ś$_{1}$ K$_{2}$ D$_{2}$ om.) मघवा; T$_{1}$ मखवान् (for मघवान्).

C. 3. 12074 B. 3. 168. 82 K. 3. 170. 22 रथेनानेन दैत्यानां जितवान्मघवान्युधि ॥ १९
त्वमप्येतेन कौन्तेय निवातकवचान्रणे ।
विजेता युधि विक्रम्य पुरेव मघवान्वशी ॥ २०
अयं च शङ्खप्रवरो येन जेतासि दानवान् ।
अनेन विजिता लोकाः शक्रेणापि महात्मना ॥ २१
प्रदीयमानं दैवैस्तु देवदत्तं जलोद्भवम् ।
प्रत्यगृह्णं जयायैनं स्तूयमानस्तदामरैः ॥ २२
स शङ्खी कवची बाणी प्रगृहीतशरासनः ।
दानवालयमत्युग्रं प्रयातोऽस्मि युयुत्सया ॥ २३

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

१६६

अर्जुन उवाच ।
ततोऽहं स्तूयमानस्तु तत्र तत्र महर्षिभिः ।
अपश्यमुदधिं भीममपांपतिमथाव्ययम् ॥ १
फेनवत्यः प्रकीर्णाश्च संहताश्च समुच्छ्रिताः ।
ऊर्मयश्चात्र दृश्यन्ते चलन्त इव पर्वताः ।
नावः सहस्रशस्तत्र रत्नपूर्णाः समन्ततः ॥ २
तिमिंगिलाः कच्छपाश्च तथा तिमितिमिंगिलाः ।
मकराश्चात्र दृश्यन्ते जले मग्ना इवाद्रयः ॥ ३
शङ्खानां च सहस्राणि मग्नान्यप्सु समन्ततः ।
दृश्यन्ते स्म यथा रात्रौ तारास्तन्वभ्रसंवृताः ॥ ४
तथा सहस्रशस्तत्र रत्नसंघाः प्लवन्त्युत ।
वायुश्च घूर्णते भीमस्तदद्भुतमिवाभवत् ॥ ५

---

20 D$_2$ om. 20 (cf. v.l. 19). — a) K$_{1.4}$ B$_{1-3}$ Dc Dn D$_{4.6}$ T$_2$ G$_{3.4}$ [अ]नेन (for [ए]तेन). — b) T$_2$ (before corr.) जितवान्मघवान् (for निवातकवचान्). Ś$_1$ K$_{1.2}$ युधि (for रणे). Cf. 19^d. — c) B$_1$ विजितान् (for विजेता). — d) Ś$_1$ K$_{1.2}$ B$_1$ Dn D$_6$ मघवा (for मघवान्). K$_{1.2}$ बली (for वशी). T$_1$ पुरत्रयमिवेश्वरः.

22 a) B Dc Dn D$_{4.6}$ G$_2$ तं (B$_1$ च) (for तु). — c) Ś$_1$ K$_{1.2}$ B$_1$ Dc$_1$ T$_1$ G$_{1.2}$ °गृह्णां; Dc$_2$ M$_2$ °गृह्णन् (for °गृह्णं). Ś$_1$ K$_{1.2}$ [ए]त्र; K$_{3.4}$ D$_{1-3}$ [इ]मं; T$_2$ G$_3$ [ए]तं (for [ए]नं). — d) K$_4$ D$_1$ तथामरैः; D$_6$ यथासुरैः; G$_1$ सदामरैः (for तदा°).

23 a) Ś$_1$ K$_{3.4}$ B D$_{1-3.5}$ T$_2$ G$_{3.4}$ सशंखः (for स शङ्खी). K$_4$ D$_{1.2.5}$ T$_1$ G$_1$ खड्गी; G$_2$ बाणैः (for बाणी).

Colophon om. in K$_{3.4}$ D$_5$. — *Major parvan :* Ś$_1$ K$_{1.2}$ Dn$_2$ T G$_{2-4}$ आरण्य. — *Sub-parvan :* Omitting sub-parvan name, B$_{1-3}$ D (D$_6$ om.) G$_1$ M mention only निवातकवचवध (B$_1$ om. वध) (preceded by लोमशतीर्थयात्रा). — *Adhy. no.* (figures, words or both): Dn 168 (Dn$_2$ 167); D$_1$ 174; S 169. — *Śloka no.:* Dn$_1$ D$_1$ 25; Dn$_{2.}$n$_3$ 86.

166

1 K$_{3.4}$ D$_5$ om. the ref. — a) Ś$_1$ K$_{1.2}$ B$_{2.3}$ च K$_4$ वै (for तु). — b) G$_1$ सुर° (for मह°). — d) Ś$_1$ K D$_{2.5}$ G$_{2.4}$ °निधिम् (for °पतिम्).

2 a) Ś$_1$ K D$_{1-3.5}$ °वंतः (for °वत्यः). — b) Ś चलंतश्च; K$_4$ D$_{1.2}$ सहित्य°; T$_1$ सभीता°; T$_2$ G$_{2-4}$ संगता°. B D (except D$_{1-3}$) समुत्थिताः. — c) Ś K$_{2-4}$ तत्र (for चात्र). S अदृश्यंतोर्मयस्तत्र. — d) B Dn$_1$. n$_3$ D$_{1.3.4.6}$ वल्गंत (for चलन्त). Dn$_2$ जले मग्न इवाद्रयः. — e) T$_2$ (before corr.) G$_{2.4}$ समंतत° (f सहस्रश°). — M$_1$ om. (hapl.) 2^f–5^a. — After 2, (M$_1$ om.) ins.:

848* नभसीव विमानानि विचरन्त्यो विरेजिरे ।

3 M$_1$ om. 3 (cf. v.l. 2). — b) Ś$_1$ चाति°; D$_1$ ह्यति° D$_6$ [अ]प्यति° (for तिमि°). B$_4$ तिमितिमिंगिलास्तथा; D तिमिंगिलगिलास्तथा. — c) Ś$_1$ K D$_{1.2.5}$ T$_1$ चापि; D चानु- (for चात्र). — d) K$_4$ D$_{1.2}$ तोय-; D$_3$ जल- (for जले)

4 M$_1$ om. 4 (cf. v.l. 2). — b) D$_3$ G$_1$ सहस्रशः (for समन्ततः). — c) D$_6$ च; T$_1$ [ऽ]प्सु; T$_2$ G$_{3.4}$ [ऽ] G$_2$ [ऽ]त्र (for स्म). — d) D$_3$ T$_2$ G$_{2-4}$ °युताः (for °वृता

तमतीत्य महावेगं सर्वाम्भोनिधिमुत्तमम् ।
अपश्यं दानवाकीर्णं तद्दैत्यपुरमन्तिकात् ॥ ६
तत्रैव मातलिस्तूर्णं निपत्य पृथिवीतले ।
नादयन्रथघोषेण तत्पुरं समुपाद्रवत् ॥ ७
रथघोषं तु तं श्रुत्वा स्तनयित्नोरिवाम्बरे ।
मन्वाना देवराजं मां संविग्ना दानवाभवन् ॥ ८
सर्वे संभ्रान्तमनसः शरचापधराः स्थिताः ।
तथा शूलासिपरशुगदामुसलपाणयः ॥ ९
ततो द्वाराणि पिदधुर्दानवास्त्रस्तचेतसः ।
संविधाय पुरे रक्षां न स्म कश्चन दृश्यते ॥ १०
ततः शङ्खमुपादाय देवदत्तं महास्वनम् ।
पुरमासुरमाश्लिष्य प्राधमं तं शनैरहम् ॥ ११
स तु शब्दो दिवं स्तब्ध्वा प्रतिशब्दमजीजनत् ।
वित्रेसुश्च निलिल्युश्च भूतानि सुमहान्त्यपि ॥ १२
ततो निवातकवचाः सर्व एव समन्ततः ।
दंशिता विविधैस्त्राणैर्विविधायुधपाणयः ॥ १३
आयसैश्च महाशूलैर्गदाभिर्मुसलैरपि ।
पट्टिशैः करवालैश्च रथचक्रैश्च भारत ॥ १४
शतघ्नीभिर्भुशुण्डीभिः खड्गैश्चित्रैः स्वलंकृतैः ।
प्रगृहीतैर्दितेः पुत्राः प्रादुरासन्सहस्रशः ॥ १५
ततो विचार्य बहुधा रथमार्गेषु तान्हयान् ।
प्राचोदयत्समे देशे मातलिर्भरतर्षभ ॥ १६

C. 3. 12095
B. 3. 169. 17
K. 3. 171. 17

---

5 M$_1$ om. 5^a (cf. v.l. 2). — ^{b}) D$_2$ रत्नपूर्णाः. T G$_{3.4}$ फलंत्युत. — ^{c}) K$_{3.4}$ D$_1$ [आ]घूर्णंते (for घूर्णंते). S वीर (for भीमस्).

6 D$_2$ om. (? hapl.) 6. — ^{a}) Ś$_1$ K$_{1.2}$ D$_{1.3}$ समुदी- (K$_1$ °द्वी)क्ष्य; B Dc Dn D$_{4-6}$ तमुदीक्ष्य (for तमतीत्य). Ś$_1$ K D$_{1.3}$ महाभीमं; B$_4$ तथा भीमं (for महावेगं). — ^{b}) Ś$_1$ अथांभो° (for सर्वाम्भो°).

7 T$_1$ om. 7^{ab}. — ^{a}) K$_{3.4}$ B$_{1.3}$ Dc D$_{2-6}$ तत्र वै (for तत्रैव). — ^{b}) Dc T$_2$ G$_{1-3}$ M$_1$ निपात्य. B$_2$ M$_2$ पृथिवीपते; T$_2$ G धरणीतले. D$_5$ निन्ये पृथ्वीतले रथं. — Ś$_1$ K$_{1.2}$ B$_4$ Dc Dn D$_{2.4-6}$ ins. after 7^{ab}: B$_2$, after 7:

849* रथं तं तु समाश्लिष्य प्राद्रवद्रथयोगवित् ।

[Ś$_1$ K$_1$ तु तं; Dc तत्र (for तं तु). B$_4$ Dn$_1$ °लक्ष्य (for °श्लिष्य). Cnp आश्लिष्य. D$_5$ तां समाश्लिष्य पृथिवीं (for the prior half).]

— Dc om. 7^{cd}. — ^{c}) B$_4$ Dn D$_{2.4.6}$ त्रासयन्; T$_2$ G$_{2-4}$ दानवान् (for नादयन्). — ^{d}) D$_5$ सहसा बली; T$_1$ समुपाद्रवं.

8 ^{a}) K$_{3.4}$ D$_{1.3}$ ते; T$_1$ तत् (for तं). — ^{c}) D$_5$ मां देवराजं (by transp.). — ^{d}) Ś$_1$ विविग्ना; K B D (except D$_3$) T$_2$ G$_3$ आविग्ना (B$_1$ उद्विग्ना) (for संविग्ना). K$_1$ D$_5$ स्थिताः (for [अ]भवन्).

9 ^{b}) D$_5$ खड्ग° (for शर°). Ś$_1$ K$_{1.2}$ तथा (for स्थिताः). — ^{c}) K$_4$ शूलार्ष्टि°; B D (except D$_{1-3.5}$) [अ]सिशूल° (by transp.). — ^{d}) Dc -परिघ- (for -मुसल-). Ś$_1$ K B$_4$ D$_{1-3.5}$ -प्रगृहीतशरासनाः.

10 ^{a}) K$_{3.4}$ D$_{2.3}$ T$_1$ G$_{2.4}$ M [अ]पिदधुः (M$_2$ °धन्). — ^{c}) Ś$_1$ ते; K$_{1.2}$ तां (for सं-). — ^{d}) Ś$_1$ K$_{1.2}$ किंचन; D$_1$ M$_1$ कश्चिन्न (for कश्चन). T$_1$ विद्यते (for दृश्यते).

11 ^{a}) D$_6$ M$_2$ उपाध्माय (for उपादाय). — ^{b}) B$_3$ D$_5$ °रवं (for °स्वनम्). — ^{c}) Ś$_1$ आविश्य; B$_3$ M$_1$ आश्रित्य; G$_1$ आसाद्य (for आश्लिष्य). Dn D$_{3.4.6}$ परमां मुदमाश्रित्य; D$_5$ पुरमाश्लिष्य राजेंद्र; T$_2$ G$_{2-4}$ आपूरयन्त(G$_{2.4}$ °न्स)माश्लिष्य. — ^{d}) K$_2$ प्रादाशं (sic) तं; Dc D$_4$ प्राधमत्तं; T$_1$ प्रदध्मं तं; G$_1$ प्रधमं तं; G$_2$ प्रभावंतं; G$_4$ प्रभवंतं (for प्राधमं तं). D$_6$ शनकैर् (for तं शनैर्). Ś$_1$ transp. शनैः and अहम्.

12 ^{a}) D$_{1-3}$ च (for तु). K$_4$ विद्धः; D$_3$ प्राप्य; T$_1$ गत्वा (for स्तब्ध्वा). — ^{c}) T$_1$ G$_{2.4}$ निलीयु° (for निलिल्यु°). K$_3$ वित्रेसुर्ये च तत्रासन्. — ^{d}) S च (for सु-).

13 ^{b}) B$_{1-3}$ D (except D$_{1-3.5}$) T$_1$ स्वलंकृताः (for समन्ततः). — ^{c}) Some S MSS. दंसिता. D$_1$ अस्त्रैर्; T$_2$ G$_{3.4}$ बाणैर् (for त्राणैर्). — ^{d}) B D (except D$_{1.2}$) S (except T$_1$ G$_1$) विचित्रायुध°.

14 ^{b}) T$_1$ G$_1$ M गदासि- (for गदाभिर्). Some MSS. मुशलैर्, मुषलैर्. — ^{c}) S (except T$_2$ G$_3$) पट्टसैः. K$_3$ मुद्गरैश्चैव; B$_4$ D$_5$ च त्रिशूलैश्च (for कर°). — ^{d}) K$_3$ करवालै°; D$_5$ G$_2$ तथा चक्रै° (for रथचक्रै°).

15 ^{a}) Ś$_1$ K$_1$ भुसुंडीभिः; K$_{3.4}$ D$_5$ भुशंडी°; B$_{1-3}$ भुपुंडी°; Dc भुशुंठी°; D$_1$ भृशंडी°; D$_2$ मुसंडी°; D$_3$ भुसंडी°; T$_1$ G$_{1.2.4}$ मुसंठी°; T$_2$ G$_3$ मुसुंठी°; M मुसृंठी°. — ^{b}) T$_2$ G$_{2-4}$ अलं° (for स्वलं°). — ^{cd}) D$_5$ transp. प्रगृहीतैः and प्रादुरासन्.

16 ^{a}) Ś$_1$ K D$_{1-3.5}$ विदार्य वसुधां; B Dc Dn D$_{4.6}$ विचार्य बहुशो. — ^{b}) G$_1$ रथान् (for हयान्). B$_2$ रथमार्गेण तस्थिवान्. — ^{c}) K$_{3.4}$ D$_{2.5}$ T$_1$ G$_{2.4}$ प्रचो(K$_4$

C. 3. 12096
B. 3. 169. 18
K. 3. 171. 18

तेन तेषां प्रणुन्नानामाशुत्वाच्छीघ्रगामिनाम् ।
नान्वपश्यं तदा किंचित्तन्मेऽद्भुतमिवाभवत् ॥ १७
ततस्ते दानवास्तत्र योधव्रातान्यनेकशः ।
विकृतस्वररूपाणि भृशं सर्वाण्यचोदयन् ॥ १८
तेन शब्देन महता समुद्रे पर्वतोपमाः ।
आप्लवन्त गतैः सत्त्वैर्मत्स्याः शतसहस्रशः ॥ १९
ततो वेगेन महता दानवा मामुपाद्रवन् ।
विमुञ्चन्तः शितान्बाणाञ्शतशोऽथ सहस्रशः ॥ २०
स संप्रहारस्तुमुलस्तेषां मम च भारत ।
अवर्तत महाघोरो निवातकवचान्तकः ॥ २१
ततो देवर्षयश्चैव दानवर्षिगणाश्च ये ।
ब्रह्मर्षयश्च सिद्धाश्च समाजग्मुर्महामृधे ॥ २२
ते वै मामनुरूपाभिर्मधुराभिर्जयैषिणः ।
अस्तुवन्मुनयो वाग्भिर्यथेन्द्रं तारकामये ॥ २३

इति श्रीमहाभारते आरण्यकपर्वणि षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

१६७

अर्जुन उवाच ।

ततो निवातकवचाः सर्वे वेगेन भारत ।
अभ्यद्रवन्मां सहिताः प्रगृहीतायुधा रणे ॥ १
आच्छिद्य रथपन्थानमुत्क्रोशन्तो महारथाः ।

$D_{2.5}$ °नो)दयत् (for प्राचोदयत्).

17 D_5 om. 17–19. — ^{a}) T G ए(T_1 नै-; G_1 न)- तेषां तत्- (for तेन तेषां). — ^{b}) T_1 मार्गमत्युग्रगामिनां; T_2 G_{2-4} मार्गं चतुरगामिनां. — ^{c}) $Ś_1$ नादृश्यत; K_1 $D_{1.4}$ T_2 G_{2-4} नान्वपश्यत्; K_3 नानुपश्यन्; B_3 (m as in text) पार्थ पश्यं; B_4 न चापश्यं; T_1 G_1 अनपद्यन् (G_1 °द्यत्). $Ś_1$ ततो; G_1 तथा (for तदा). K_4 B_4 किं तत्; T G कश्चित् (for किंचित्). — ^{d}) K_3 B_4 तदद्भुतम्; K_4 $D_{1.2}$ तमोभूतम् (for तन्मेऽद्भुतम्). $Ś_1$ $K_{1.2}$ D_3 तमोभूतमभूज्जगत्.

18 D_5 om. 18 (cf. v.l. 17). — ^{a}) Dn_2 तावद् (for तत्र). — ^{b}) N वादित्राणि सहस्रशः. — $Ś_1$ $K_{1.2}$ read 20^{ab} for 18^{cd}, $K_{1.2}$ *repeating* it (20^{ab}) in its proper place. — ^{c}) K_3 विकृतस्वन°; T_1 विकृतं घोर°. — ^{d}) $K_{3.4}$ B D (D_5 om.) °वादयन् (for °चोदयन्).

19 D_5 om. 19 (cf. v.l. 17). — ^{a}) $K_{1.3.4}$ B D (except $D_{2.5}$) सहसा (for महता). — ^{b}) S पर्वता इव (for °तोपमाः). — ^{c}) $Ś_1$ Dn_1 आप्लवंतो; $K_{1.2}$ °वंते; T_2 G_{2-4} °वंति. $Ś_1$ $K_{1.2}$ गताः; T G_{2-4} हताः (for गतैः).

20 $Ś_1$ $K_{1.2}$ read 20^{ab} for 18^{cd}; $K_{1.2}$ *repeat* it here. — ^{a}) K_2 (second time) तेन (for ततो). D_5 सहसा (for महता). — ^{b}) $K_{1.2}$ (first time) समुपा° (for मामुपा°). — $Ś_1$ om. 20^{cd}. — ^{c}) Dc_2 विमुंचंति; D_5 °चंतं; M_2 °चंत. K_1 शतान् (for शितान्).

21 ^{a}) K_4 Dc_2 तुमलस्. — ^{b}) $K_{1.2}$ B_2 Dn D_6 च मम (by transp.); T_1 अपि च. — ^{c}) K_{1-3} B_1 D (except $D_{4.5}$) T_2 $G_{3.4}$ आवर्तत; K_4 प्राव°.

22 ^{b}) $Ś_1$ D_3 तथा (for च ये). $D_{1.2}$ तथान्ये च महर्षयः. — ^{c}) B_4 मह° (for ब्रह्म°). — ^{d}) D_5 सहस्रश (for महा°).

23 ^{a}) S (except G_1 M_1) मानुष° (for मामनु°) — ^{c}) S (except T_2 G_3) ऋषयो (for मुनयो). — ^{d}) T °वधे; T_2 $G_{3.4}$ °मृधे (for °मये).

Colophon. — *Major parvan:* $Ś_1$ $K_{1.2}$ T_2 G_{2-} आरण्य. — *Sub-parvan:* Omitting sub-parvan name K B_{1-3} Dc $Dn_{1.}$ n_3 D_{1-6} G_1 mention only निवातकवच वध (B_1 G_1 om. वध) (preceded by लोमशतीर्थयात्रा in K_3 D_1). — *Adhy. no.* (figures, words or both) Dn 169 (Dn_2 168); D_1 175; S 170 (M_2 172) — *Śloka no.:* Dn D_1 24.

167

1 ^{b}) B_4 सर्वभावेन; Dc Dn_3 D_4 सर्ववेगेन. T_1 G संगताः (for भारत). — ^{c}) K_2 अभिद्रवन्. M मा (for मां). B_2 वेगेन (for सहिताः).

2 ^{a}) B_{2-4} D (except $D_{1.5}$) T_2 $G_{1.3}$ आच्छाद्य — ^{b}) S आक्रो° (for उत्क्रो°). $Ś_1$ K B_4 महारवान्. —

आवृत्य सर्वतस्ते मां शरवर्षैरवाकिरन् ॥ २
ततोऽपरे महावीर्याः शूलपट्टिशपाणयः ।
शूलानि च भुशुण्डीश्च मुमुचुर्दानवा मयि ॥ ३
तच्छूलवर्षं सुमहद्गदाशक्तिसमाकुलम् ।
अनिशं सृज्यमानं तैरपतन्मद्रथोपरि ॥ ४
अन्ये मामभ्यधावन्त निवातकवचा युधि ।
शितशस्त्रायुधा रौद्राः कालरूपाः प्रहारिणः ॥ ५
तानहं विविधैर्बाणैर्वेगवद्भिरजिह्मगैः ।
गाण्डीवमुक्तैरभ्यघ्नमेकैकं दशभिर्मृधे ।
ते कृता विमुखाः सर्वे मत्प्रयुक्तैः शिलाशितैः ॥ ६
ततो मातलिना तूर्णं हयास्ते संप्रचोदिताः ।
रथमार्गान्बहूंस्तत्र विचेरुर्वातरंहसः ।
सुसंयता मातलिना प्रामथ्नन्त दितेः सुतान् ॥ ७
शतं शतास्ते हरयस्तस्मिन्युक्ता महारथे ।
तदा मातलिना यत्ता व्यचरन्नल्पका इव ॥ ८
तेषां चरणपातेन रथनेमिस्वनेन च ।
मम बाणनिपातैश्च हतास्ते शतशोऽसुराः ॥ ९
गतासवस्तथा चान्ये प्रगृहीतशरासनाः ।
हतसारथयस्तत्र व्यकृष्यन्त तुरंगमैः ॥ १०
ते दिशो विदिशः सर्वाः प्रतिरुध्य प्रहारिणः ।
निघ्नन्ति विविधैः शस्त्रैस्ततो मे व्यथितं मनः ॥ ११
ततोऽहं मातलेर्वीर्यमपश्यं परमाद्भुतम् ।

C. 3. 12115
B. 3. 170. 13
K. 3. 172. 13

K Dc D$_{1.3.5}$ सर्वशस्. Ś$_1$ तेषां (for ते मां). — ^{d}) Ś$_1$ K$_{1.2}$ °वर्षम् (for °वर्षैर्).

3 ^{b}) S °पट्टस° (for °पट्टिश°). — ^{c}) T$_1$ G$_1$ गदाश्चैव (for शूलानि च). K$_1$ भुसुंडीश्च; K$_4$ मुशंडी°; D$_1$ भृशुंडी°; D$_2$ सुघंडी°; T$_1$ मुसंख्य°; T$_2$ G$_{3.4}$ मुसुंठी°; G$_{1.2}$ मुसंठी°; M मुसंख्य°. Cf. v.l. 3. 166. 15^{a}. — ^{d}) M$_2$ युधि (for मयि).

4 ^{a}) K$_{1.2}$ तं; D$_1$ ते (for तच्). S सुमहत्तुमुलं वर्षं. — ^{c}) K$_2$ अभिसं- (for अनिशं). Ś$_1$ K$_{1.2}$ °मानं वै; D$_5$ °मानाश्च. — ^{d}) Ś$_1$ D$_5$ न्यपतन्; K$_{1.2}$ त्वपतन् (for अपतन्). G$_4$ मे रथोपरि.

5 ^{a}) K$_3$ D$_3$ G$_1$ अन्योन्यम्; T$_1$ अथ माम् (for अन्ये माम्). K$_4$ D$_3$ अभि°; D$_5$ सम°; G$_1$ अप्य° (for अभ्य°). — ^{c}) B$_{2.4}$ Dn D$_{4.6}$ जित- (D$_{6m}$ धृत-) (for शित-). B$_2$ वीराः (for रौद्राः). K$_{3.4}$ D$_{1-3}$ श(K$_4$ D$_3$ शि)तशस्त्रधरा रौद्राः.

6 ^{a}) K$_4$ D$_{1-3.5}$ G$_1$ निशितैर् (for विविधैर्). — ^{c}) K$_4$ D$_{1.2}$ आविध्यम्; G$_1$ अहनम् (for अभ्यघ्नम्). — ^{d}) Ś$_1$ K$_{1.2}$ B$_4$ शितैः; K$_4$ D$_{1-3.5}$ शरैः (for मृधे). — ^{e}) B$_1$ त्रासिता; B$_4$ अथान्ये; T$_1$ निकृत्ता; T$_2$ G$_{2-4}$ ते कृत्ता; M$_2$ ते कृत्वा (for ते कृता). D$_5$ अथ तेभिमुखाः सर्वे. — ^{f}) S (except M$_1$) मंत्रयुक्तैः (for मत्प्र°). B$_2$ शिलीमुखैः (for शिला°). B$_4$ D$_5$ वित्रस्तास्तत्र (D$_5$ सर्वे-) दानवाः.

7 ^{b}) K$_{3.4}$ D$_5$ संप्रनो(D$_5$ °णो)दिताः; Dn$_2$ संप्रयोजिताः. — ^{c}) T$_2$ G$_3$ अथ (for रथ-). B D (except D$_{1-3}$) मार्गान्बहुविधांस्तत्र. — ^{d}) S व्यचरन् (T$_1$ व्यधमन्; G$_1$ ह्यचरन्) (for विचेरुर्). — ^{e}) K$_3$ D$_3$ सुसंयुता; T$_1$ सुसंयुक्ता. — ^{f}) K$_{1.2.4}$ प्रमथ्नंत; B$_1$ Dc D$_{1.3}$ G$_4$ M प्रामथंत; B$_4$ प्रामथंस्ते; Dn$_2$. n$_3$ प्राभ्य(Dn$_3$ °भ)घ्नंत; D$_5$ प्रामथ्नंतो; T$_1$ प्रपद्यंत; G$_2$ प्रामृद्नंत.

8 ^{a}) D$_5$ च हयास् (for हरयस्). — ^{b}) K$_{1.2}$ तस्मिन्युक्ते; T$_2$ G$_{2-4}$ ते नियुक्ता. — ^{c}) Ś$_1$ K D$_{1-3}$ ततो; Dn शांता (!); D$_5$ T$_1$ M तथा (for तदा). K$_3$ T$_2$ G$_{1.3.4}$ यंत्रा (for यत्ता). — ^{d}) K$_{2.4}$ विचरन्. Dc उल्मुका इव; T$_2$ G$_{3.4}$ अल्पवद्रथं; G$_1$ एकवद् दृढं; G$_2$ M एकवद्रथं (for अल्पका इव). T$_1$ चारयंतः प्रवं दृढं.

9 K$_3$ om. 9. — ^{c}) D$_5$ मम बाणाभि°. — ^{d}) T$_1$ G$_{2.4}$ M$_2$ च (for ते). D$_{1.2}$ बहवो (for शतशो).

10 K$_2$ om. (hapl.) 10^{ab}. — ^{a}) Ś$_1$ K$_1$ [अ]न्ये च (by transp.). B D (except D$_{1-3.5}$) [ए]व (for च). — ^{b}) Ś$_1$ हताश्च शतशोसुराः (cf. 9^{d}); K$_1$ D$_3$ S दानवाः पांडवर्षभ (G$_1$ °भाः). — ^{c}) T$_2$ (before corr.) G$_4$ अथ; G$_1$ ततः; G$_3$ हताः (for हत-). — ^{d}) K$_4$ D$_{2.3}$ विकृष्यंत; B$_2$ G$_1$ व्यकर्षंत; B$_3$ प्रादृश्यंत. D$_5$ विकृष्यंस्ते हयोत्तमैः.

11 ^{a}) B D (except D$_{1.3}$) T$_2$ (after corr.) सर्वे (for सर्वाः). — ^{b}) Ś$_1$ K$_2$ प्रतिगृह्य; B$_4$ सर्वे युद्ध-; T$_2$ G$_{3.4}$ प्रत्यनीक-; G$_2$ प्रारुध्यंत (for प्रतिरुध्य). — ^{c}) K$_{2-4}$ B$_4$ D$_{1-3}$ निघ्नंतो; B$_{1-3}$ Dn D$_{4.6}$ अभ्यघ्नन्; S घ्नंति स्म (T$_1$ व्यघ्नंति). D$_6$ निशितैः (for विविधैः). — ^{d}) Ś$_1$ K B$_4$ D$_{1-3.5}$ ततो मां व्यथयंति च (K$_4$ °त्विव; B$_4$ °ति ते).

12 ^{b}) S अद्भुतं समदर्शयं (G$_1$ अत्यद्भुतमदर्शयं). — ^{c}) Ś$_1$ K D$_{1-3.5}$ तथा (Ś$_1$ K$_{1.2}$ ततो) वेगवतो वाहान् (K$_3$ वाजीन्). — ^{d}) Ś$_1$ K D$_{1-3}$ अयतो य(K$_4$ D$_{1-3}$ °ताय)दधारयत; D$_5$ यद्बलादन्वधार°; T$_1$ G$_1$ यद्रथं (G$_1$ °थान्)

C. 3. 12115
B. 3. 170. 13
K. 3. 172. 13

अश्वांस्तथा वेगवतो यदयत्नादधारयत् ॥ १२
ततोऽहं लघुभिश्चित्रैरस्त्रैस्तानसुरात्रणे ।
सायुधानच्छिनं राजञ्शतशोऽथ सहस्रशः ॥ १३
एवं मे चरतस्तत्र सर्वयत्नेन शत्रुहन् ।
प्रीतिमानभवद्वीरो मातलिः शक्रसारथिः ॥ १४
वध्यमानास्ततस्ते तु हयैस्तेन रथेन च ।
अगमन्प्रक्षयं केचिन्न्यवर्तन्त तथापरे ॥ १५
स्पर्धमाना इवास्माभिर्निवातकवचा रणे ।
शरवर्षैर्महद्भिर्मां समन्तात्प्रत्यवारयन् ॥ १६
ततोऽहं लघुभिश्चित्रैर्ब्रह्मास्त्रपरिमन्त्रितैः ।
व्यधमं सायकैराशु शतशोऽथ सहस्रशः ॥ १७
ततः संपीड्यमानास्ते क्रोधाविष्टा महासुराः ।
अपीडयन्मां सहिताः शरशूलासिवृष्टिभिः ॥ १८
ततोऽहमस्त्रमातिष्ठं परमं तिग्मतेजसम् ।
दयितं देवराजस्य माधवं नाम भारत ॥ १९
ततः खड्गांस्त्रिशूलांश्च तोमरांश्च सहस्रशः ।
अस्त्रवीर्येण शतधा तैर्मुक्तानहमच्छिनम् ॥ २०
छित्त्वा प्रहरणान्येषां ततस्तानपि सर्वशः ।
प्रत्यविध्यमहं रोषाद्दशभिर्दशभिः शरैः ॥ २१
गाण्डीवाद्धि तदा संख्ये यथा भ्रमरपङ्क्तयः ।
निष्पतन्ति तथा बाणास्तन्मातलिरपूजयत् ॥ २२
तेषामपि तु बाणास्ते बहुत्वाच्छलभा इव ।

नावधार°; T$_2$ G$_{2-4}$ यथा यत्ना(G$_2$ युक्ता-; G$_4$ -वर्ता)न्व्यवार°; M ह्ययत्नाद्यदधार°.

13 ^{a}) B$_1$ विविधैश् (for लघुभिश्). — ^{c}) Cf. 20 and v.l. K$_3$ चिच्छिदं; K$_4$ D$_{2.3}$ T$_1$ अच्छिदं; D$_5$ T$_2$ G M चिच्छिदे (for अच्छिनं). B Dc Dn D$_{4.6}$ चिच्छेद सायुधान् (B$_4$ राक्षसांश्चिच्छेद) राजन्. — $13^d=17^d$.

14 ^{a}) D$_3$ वि-; T$_2$ G$_{2-4}$ आ- (for मे). — ^{c}) T$_1$ G$_{1.2}$ राजन्; T$_2$ G$_{3.4}$ प्रीतो; M चापि (for वीरो).

15 ^{a}) D$_6$ हयैस् (for ततस्). B$_4$ Dn D$_{2.4-6}$ तैस् (for ते). — ^{b}) T$_1$ शरैस् (for हयैस्). D$_5$ रथेन च महासुराः. — ^{c}) K$_1$ प्राक्षयं; K$_2$ M$_2$ प्रेक्षयं; T$_1$ प्रत्ययं; G$_4$ वै क्षयं (for प्र°). K$_3$ यमक्षयं गताः केचित्. — ^{d}) K$_{2.3}$ D$_{3.5}$ प्रवर्तंत; K$_4$ G$_4$ व्यवर्तंत; D$_1$ अवर्तंत.

16 K$_3$ om. 16. — ^{c}) Ś$_1$ K$_{1.4}$ D$_{1.3}$ शरानस्तान्; K$_2$ महानस्त्रान्; B Dc Dn D$_{2.4-6}$ शरार्ता (B$_{2.4}$ Dn$_2$ °र्तं) मां; T$_1$ समग्रैर्मां (for महद्भिर्मां). — ^{d}) N (K$_3$ om.) महद्भिः (K$_2$ °द्यः) (for समन्तात्). T$_2$ G$_{2-4}$ पर्य° (for प्रत्य°). — After 16, S ins.:

850* शरवेगैर्निहत्याहमस्त्रैः शरविघातिभिः ।
ज्वलद्भिः परमैः शीघ्रैस्तानविध्यं सहस्रशः ।

[(L. 1) T$_1$ शस्त्रैः (for अस्त्रैः). — (L. 2) T$_1$ अवध्यं; T$_2$ G$_3$ अवीर्यान् (for अविध्यं).]

17 D$_6$ om. 17^{ab}; S om. 17. — $17^a=13^a$. — ^{b}) Ś$_1$ K$_{2-4}$ D$_{1-3}$ °प्रति-; Dc °पर- (for °परि-). K$_1$ अस्त्रैस्तानसुरात्रणे. — ^{c}) K$_3$ अवधं; D$_{1.6}$ व्यधमत् (for व्यधमं). Ś$_1$ K D$_{1.6}$ सायु(K$_2$ °व)धानेव; Dc सायकेनाशु. — $17^d=13^d$.

18 ^{b}) Dn$_2$ °रथाः (for °सुराः). — ^{c}) B$_2$ प्रापीड° Dn (not adopted in old printed ed.!) D$_6$ आपीड° (fo अपीड°). K$_1$ M मा (for मां). — ^{d}) B$_{2.3}$ Dn D$_4$. T$_2$ G$_3$ शक्ति- (for शर-). G$_1$ -जालासि- (for -शूलासि-) K$_3$ -पट्टिशैः (for -वृष्टिभिः).

19 ^{a}) D$_{1.2}$ आविष्टं; S प्रायुंजं (for आतिष्ठं). — ^{b} Ś$_1$ K$_2$ तिग्मतेजनं; B$_4$ Dn$_2$ D$_{3.6}$ °तैजसं. S माधवं (G गांधर्वं; M$_1$ वासवं) नाम भारत (=19^d). — ^{c}) G$_1$ दधीचि (for दयितं). — ^{d}) D$_{1-3}$ गांधर्वं (for माधवं). S ब्रह्मदंड समं रणे.

20 K$_3$ om. from 20 up to 3. 168. 17. — ^{a}) Ś K$_{1.2}$ B$_{2-4}$ D$_{5.6}$ T$_1$ Cnp खड्गांश्च शूलांश्च; B$_1$ Dn खड्ग त्रिशूलेन; D$_{1-3}$ खड्गांस्त्रिशूलानि; D$_4$ खड्गस्त्रिशूलश्च; G$_4$ खड्गा सिशूलांश्च. — ^{b}) Ś$_1$ K (K$_3$ om.) D$_{1-3.5}$ शरांश्चैव (fo तोम°). — ^{c}) Ś$_1$ K (K$_3$ om.) D$_{1-3.5}$ महता; T$_2$ G$_{3-}$ सहसा (for शतधा). — ^{d}) Ś$_1$ अस्तान्; Dc युक्तान् (fo मुक्तान्). Ś$_1$ आच्छिनं; B$_1$ Dn D$_{3-6}$ T G अछिदं (fo अच्छिनम्); cf. 13 and v.l. B$_4$ चिच्छिदेहं रणे तदा.

21 K$_3$ om. 21 (cf. v.l. 20). — ^{a}) S भित्वा (G हित्वा) (for छित्त्वा). — ^{b}) Ś$_1$ तैरस्तान्; K$_{1.2}$ ततस्तानि (for ततस्तान्). — ^{c}) Ś$_1$ प्रति° (for प्रत्य°). — ^{d}) दृढमुष्टिकृतैः शरैः.

22 K$_3$ om. 22 (cf. v.l. 20). — ^{a}) K$_4$ G$_4$ वित तान्; D$_{1-3}$ हि तताः; T$_1$ हि ततः; T$_2$ G$_{1-3}$ वितताः; M हि तथा (for हि तदा). Ś$_1$ K$_{1.2}$ गांडीवनिःसृताः संख्ये; D गांडीवेनांकिताः सर्वे. — ^{c}) D$_{1.2}$ T$_1$ निपतंति; D$_{4.6}$ निष्प तंत. B D (except D$_{1-3.5}$) महा- (for तथा). —

अवाकिरन्मां बलवत्तानहं व्यधमं शरैः ॥ २३
वध्यमानास्ततस्ते तु निवातकवचाः पुनः ।
शरवर्षैर्महद्भिर्मां समन्तात्पर्यवारयन् ॥ २४
शरवेगान्निहत्याहमस्त्रैः शरविघातिभिः ।
ज्वलद्भिः परमैः शीघ्रैस्तानविध्यं सहस्रशः ॥ २५
तेषां छिन्नानि गात्राणि विसृजन्ति स्म शोणितम् ।
प्रावृषीवातिवृष्टानि शृङ्गाणीव धराभृताम् ॥ २६
इन्द्राशनिसमस्पर्शैर्वेगवद्भिरजिह्मगैः ।
मद्बाणैर्वध्यमानास्ते समुद्विग्नाः स्म दानवाः ॥ २७
शतधा भिन्नदेहान्त्राः क्षीणप्रहरणौजसः ।
ततो निवातकवचा मामयुध्यन्त मायया ॥ २८

इति श्रीमहाभारते आरण्यकपर्वणि सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

१६८

अर्जुन उवाच ।
ततोऽश्मवर्षं सुमहत्प्रादुरासीत्समन्ततः ।
नगमात्रैर्महाघोरैस्तन्मां दृढमपीडयत् ॥ १
तदहं वज्रसंकाशैः शरैरिन्द्रास्त्रचोदितैः ।

C. 3. 12133
B. 3. 171. 2
K. 3. 173. 2

K$_4$ D$_{1.3.4}$ G$_2$ तान् (for तन्).

23 K$_3$ om. 23 (cf. v.l. 20). — ^{a}) Ś$_1$ D$_5$ च (for तु). B$_{2.4}$ ते बाणा (by transp.); T$_1$ बाणास्तु. — ^{b}) Dn D$_{4.6}$ तन्मातलिरपूजयत् (= 22^d)! — ^{c}) G$_3$ M मा (for मां)! — ^{d}) Ś$_1$ M$_2$ व्यधमत्; T$_1$ बलवत् (for व्यधमं).

24 K$_3$ om. 24 (cf. v.l. 20). — ^{a}) D$_5$ विध्य°; S (except T$_1$ G$_1$) युध्य° (for वध्य°). Dc तदा (for ततस्). — ^{b}) Ś$_1$ K$_{1.2}$ ततः (for पुनः). — ^{c}) M मा (for मां)!

25 K$_3$ om. 25 (cf. v.l. 20). — ^{a}) Ś$_1$ K$_1$ °वर्षान् (for °वेगान्). Ś$_1$ K$_{1.2}$ [आ]शु; D$_5$ [अ]स्त्रम् (for [अ]हम्). — ^{b}) Ś$_1$ ह्यस्त्रैः; K$_2$ Dc$_2$ शस्त्रैः (for अस्त्रैः). K$_{1.2}$ अपि; B Dc Dn D$_{4.6}$ G$_4$ अस्त्र- (for शर-). D$_5$ शरैर्विद्याभिमंत्रितैः. — ^{c}) Ś$_1$ K (K$_3$ om.) D$_{1.3}$ खगमैः; M$_1$ च शरैः (for परमैः). Ś$_1$ K$_{1.2}$ D$_{3.5}$ शस्त्रैस् (for शीघ्रैस्). — ^{d}) D$_2$ सहस्रधा.

26 K$_3$ om. 26 (cf. v.l. 20). — ^{a}) T$_1$ छिन्नाग्र-; T$_2$ G$_{2-4}$ जीर्णानि (for छिन्नानि). — ^{b}) B$_4$ विसृजन्नथ (for °न्ति स्म). — ^{c}) N (K$_3$ om.) [अ]भिवृष्टानि; T$_2$ G$_{2-4}$ [अ]तिवृष्ट्या हि. — ^{d}) Ś$_1$ K (K$_3$ om.) D$_{1.2.5}$ [उ]त; B$_{2.3}$ Dc Dn D$_{3.4.6}$ M$_2$ [अ]थ (for [इ]व). T$_2$ G$_{2-4}$ मही° (for धरा°).

27 K$_3$ om. 27 (cf. v.l. 20). — ^{a}) M$_2$ °युध° (for °शनि°). — ^{c}) T$_1$ बाणैश्च (for मद्बाणैर्). Dc विध्य° (for वध्य°). — ^{d}) Ś$_1$ K (K$_3$ om.) D$_{1.3}$ च; D$_5$ T$_2$ G$_{2-4}$ तु (for स्म). B$_4$ सुरद्विपः (for स्म दानवाः).

28 K$_3$ om. 28 (cf. v.l. 20). — ^{a}) B$_{2.4}$ T$_1$ G$_{2.4}$ M छिन्न- (for भिन्न-). Ś$_1$ K$_{1.2}$ D$_3$ -देहांताः; B Dn D$_{1.4-6}$ T$_1$ -देहास्ते; T$_2$ G M$_2$ -देहास्त्राः (for -देहान्त्राः). — ^{b}) T$_2$ G$_{2-4}$ क्षिप्त- (for क्षीण-). Ś$_1$ -प्राणगती°; K$_1$ -प्राणा मही°; K$_2$ -प्राणमही° (for -प्रहरणौ°).

Colophon om. in K$_{3.4}$. — *Major parvan :* Ś$_1$ K$_{1.2}$ Dn$_2$ T$_2$ G$_{2-4}$ आरण्य. — *Sub-parvan :* Omitting sub-parvan name, B$_{1-3}$ D G$_1$ mention only निवातकवचवध (D$_3$ om. वध) (preceded by लोमशतीर्थयात्रा in D$_1$). — *Adhy. no.* (figures, words or both): Dn 170 (Dn$_2$ 169); D$_1$ 176; S (M$_2$ *inf. lin.*) 171 (M$_2$ orig. 173). — *Śloka no. :* Dn D$_1$ 29.

168

1 K$_3$ om. up to 3. 168. 17 (cf. v.l. 3. 167. 20). — ^{c}) K$_4$ D$_1$ T$_1$ G$_{1.4}$ M नगमात्रं; D$_3$ नागमात्रैर्; T$_2$ G$_{2.3}$ ना(G$_2$ न)गमस्त्रं (for नगमात्रैर्); cf. 4^c. K$_4$ D$_{1.3}$ S महाघोरं; B Dc Dn D$_{4.6}$ शिलाखंडैस् (B$_2$ °ध्वस्तैस्) (for महाघोरैस्). — ^{d}) Ś$_1$ K$_{1.2}$ D$_5$ ते (for तन्). K$_2$ D$_{3.5}$ G$_1$ (after corr.) अपीडयन्.

2 K$_3$ om. 2 (cf. v.l. 1). — ^{a}) D$_3$ तमहं; D$_5$ T$_1$ M$_2$ तानहं. — ^{b}) Ś$_1$ K$_{1.2.4}$ D$_{1-3.5}$ दिव्यै(K$_4$ D$_5$ शरै)-रिंद्रास्त्रमंत्रितैः; B$_{1-3}$ Dc Dn D$_{4.6}$ महेंद्रास्त्रप्रचोदितैः. — ^{c}) D$_1$ आचूर्णयं; T$_2$ G$_{3.4}$ अचूर्णयं. — ^{d}) N (K$_3$ om.) शरवर्षै(B$_{1.4}$ Dn D$_{4.6}$ शरजालै-; D$_5$ शितधारै)र्महाहवे

C. 3. 12133
B. 3. 171. 2
K. 3. 173. 2

अचूर्णयं वेगवद्भिः शतधैकैकमाहवे ॥ २
चूर्ण्यमानेऽश्मवर्षे तु पावकः समजायत ।
तत्राश्मचूर्णमपतत्पावकप्रकरा इव ॥ ३
ततोऽश्मवर्षे निहते जलवर्षं महत्तरम् ।
धाराभिरक्षमात्राभिः प्रादुरासीन्ममान्तिके ॥ ४
नभसः प्रच्युता धारास्तिग्मवीर्याः सहस्रशः ।
आवृण्वन्सर्वतो व्योम दिशश्चोपदिशस्तथा ॥ ५
धाराणां च निपातेन वायोर्विस्फूर्जितेन च ।
गर्जितेन च दैत्यानां न प्राज्ञायत किंचन ॥ ६
धारा दिवि च संबद्धा वसुधायां च सर्वशः ।
व्यामोहयन्त मां तत्र निपतन्त्योऽनिशं भुवि ॥ ७
तत्रोपदिष्टमिन्द्रेण दिव्यमस्त्रं विशोषणम् ।
दीप्तं प्राहिणवं घोरमशुष्यत्तेन तज्जलम् ॥ ८
हतेऽश्मवर्षे तु मया जलवर्षे च शोषिते ।
मुमुचुर्दानवा मायामग्निं वायुं च मानद ॥ ९
ततोऽहमग्निं व्यधमं सलिलास्त्रेण सर्वशः ।
शैलेन च महास्त्रेण वायोर्वेगमधारयम् ॥ १०
तस्यां प्रतिहतायां तु दानवा युद्धदुर्मदाः ।
प्राकुर्वन्विविधा माया यौगपद्येन भारत ॥ ११
ततो वर्षं प्रादुरभूत्सुमहल्लोमहर्षणम् ।
अस्त्राणां घोररूपाणामग्नेर्वायोस्तथाश्मनाम् ॥ १२
सा तु मायामयी वृष्टिः पीडयामास मां युधि ।
अथ घोरं तमस्तीव्रं प्रादुरासीत्समन्ततः ॥ १३
तमसा संवृते लोके घोरेण परुषेण च ।

(D$_{1-3}$ °मृधे); T$_1$ शतधैवैकमा°; T$_2$ G$_{2-4}$ शरैरेकैकमा°.

3 K$_3$ om. 3 (cf. v.l. 1). — ^{a}) Ś$_1$ K$_1$ D$_1$ T$_1$ चूर्णं°; T$_2$ G$_{2-4}$ घूर्णं° (for चूर्ण्यं°). — G$_1$ om. (hapl.) 3^{bc}. — ^{b}) B$_3$ D$_{4.6}$ समपद्यत. — ^{c}) D$_5$ ततो (for तत्र). T$_2$ G$_3$ °वर्षम् (for °चूर्णम्). B D (except D$_{1-3.5}$) तत्राश्म- (B$_2$ °स्य)चूर्णान्यपतन्; T$_1$ G$_{2.4}$ M तत्र (T$_1$ G$_2$ स च) तत्रापि तच्चूर्णं. — ^{d}) B$_4$ °प्रवाहा इव; D$_{3.5}$ °प्रकरो यथा; T G$_{3.4}$ पावकः (T$_2$ G$_3$ °कं) प्रबलोज्वलत्; G$_2$ प्रकुर्वन्सिकतानिव; M प्रा(M$_2$ अ)कुर्वं सिकता इव. — G$_2$ *repeats* 3^{cd} as in T$_1$ above! — After 3, K$_2$ ins.:

851* ततोऽहं वारुणास्त्रेण अश्मवर्षं विशातवान् ।

4 K$_3$ om. 4 (cf. v.l. 1). — ^{a}) B$_{1-3}$ Dc Dn$_1$ D$_{4-6}$ विहते; B$_4$ D$_3$ T G [ऽ]भिहते; Dn$_2$ [ऽ]पहते; Dn$_3$ D$_1$ विहिते. — ^{b}) Ś$_1$ K (K$_3$ om.) D$_{1-3.5}$ अनंतरं (for मह°).

5 K$_3$ om. 5 (cf. v.l. 1). — ^{b}) Ś$_1$ K (K$_3$ om.) D$_{1-3.5}$ °वेगाः (for °वीर्याः). Ś$_1$ T$_1$ G$_1$ समंततः (for सह°). — ^{d}) Ś$_1$ K$_{1.2}$ प्र-; Dn$_3$ D$_6$ वि- (for [उ]प-). T$_1$ [अ]पि च; T$_2$ G$_{2-4}$ [अ]पि वा (for तथा). M दिशः सोपदिशोपि च (M$_2$ °शो नृप).

6 K$_3$ om. 6 (cf. v.l. 1). — ^{a}) D$_3$ वि- (for च). — ^{b}) Some S MSS. विष्फूर्जितेन. — ^{c}) S मेघानां (for दैत्या°). — ^{d}) K$_{1.2}$ D$_{1-3}$ G$_{1.2}$ M प्रज्ञायत; T$_1$ प्रायतत.

7 K$_3$ om. 7 (cf. v.l. 1). — ^{a}) K$_4$ धारा दिवीव; B$_2$ धाराश्च दिवि; T$_1$ धारा दिशि च; T$_2$ G$_{3.4}$ धारादिभिश्च. Dn$_{2.}$ n$_3$ संवृद्धा; D$_5$ संबंधाद्; T G$_{3.4}$ संबाधा (for संबद्धा). — ^{c}) K$_4$ विमोहयति; B$_1$ व्यालोडयंत; S मोहयंति स्म (G$_2$ च). T$_1$ तास्; M$_2$ मा (for मां). — ^{d}) Ś$_1$ K$_1$ D$_3$ निष्क्रू°) तंत्यो. T$_1$ G$_1$ युधि (for भुवि). B$_4$ पतमाना दिवानिशं

8 K$_3$ om. 8 (cf. v.l. 1). — ^{a}) K$_2$ Dc$_2$ G$_{1.4}$ ततो K$_4$ D$_1$ अथो° (for तत्रो°). Ś$_1$ मित्रेण; K$_{1.2}$ मंत्रेण (इन्द्रेण). — ^{b}) D$_2$ om. 8^b. Ś$_1$ K$_{1.2}$ सुशोभनं (f विशो°). — ^{c}) D$_5$ ज्वलन् (m दीप्तं as in text). ज्वलितं प्रक्षिपं घोरम्. — ^{d}) Dc वै (for तज्).

9 K$_3$ om. 9 (cf. v.l. 1). — ^{a}) Ś$_1$ B$_2$ Dn T$_1$ (for तु). S तदा (for मया). — ^{b}) D$_2$ om. 9^b. K$_1$ B$_4$ D$_{1.3}$ T$_2$ G$_{3.4}$ M तु (for च). — ^{d}) Ś$_1$ K$_{1.2}$ मेनद B D (except D$_{1-3.5}$) M$_1$ भारत (for मानद).

10 K$_3$ om. 10 (cf. v.l. 1). — ^{b}) K$_{1.2}$ भारत (f सर्वशः). — ^{c}) D$_{1.2}$ महता° (for च महा°). — ^{d}) K$_{1.2.4}$ B$_{2.3}$ Dc D$_3$ G$_4$ अवारयं; D$_1$ न्यवा°; D$_2$ निवा (for अधा°).

11 K$_3$ om. 11 (cf. v.l. 1). — ^{a}) B$_{1.3.4}$ D D$_{4.6}$ ते (for तु). — ^{c}) K$_4$ B D (except D$_3$) T$_2$ G$_3$ विविधां मायां.

12 K$_3$ om. 12 (cf. v.l. 1). — ^{a}) K$_1$ वर्षां. T$_2$ G प्रादुरासीत्. — ^{b}) S (as usual) रोम° (for लोम — ^{c}) T$_1$ G$_1$ M$_1$ शस्त्राणां (for अ°). — ^{d}) Ś$_1$ K$_{1.2}$ मह स्मनां; D$_3$ यथाश्मनां; T$_1$ G$_2$ तदाश्मनां.

13 K$_3$ om. 13 (cf. v.l. 1). — ^{a}) Ś$_1$ K$_{1.2}$ बा मयी; D$_1$ मायावती. — ^{c}) Ś$_1$ तपस् (for तमस्).

14 K$_3$ om. 14 (cf. v.l. 1). — ^{a}) G$_4$ संवृतो लो — ^{b}) Ś$_1$ K$_{1.2.4}$ D$_5$ परमेण; T$_2$ G$_{2-4}$ [आ]वरणेन

तुरगा विमुखाश्चासन्प्रास्खलच्चापि मातलिः ॥ १४
हस्ताद्धिरण्मयश्चास्य प्रतोदः प्रापतद्भुवि ।
असकृच्चाह मां भीतः क्वासीति भरतर्षभ ॥ १५
मां च भीराविशत्तीव्रा तस्मिन्विगतचेतसि ।
स च मां विगतज्ञानः संत्रस्त इदमब्रवीत् ॥ १६
सुराणामसुराणां च संग्रामः सुमहानभूत् ।
अमृतार्थे पुरा पार्थ स च दृष्टो मयानघ ॥ १७
म्बरस्य वधे चापि संग्रामः सुमहानभूत् ।
रथ्यं देवराजस्य तत्रापि कृतवानहम् ॥ १८
थैव वृत्रस्य वधे संगृहीता हया मया ।
रोचनेर्मया युद्धं दृष्टं चापि सुदारुणम् ॥ १९
ते मया महाघोराः संग्रामाः पर्युपासिताः ।
न चापि विगतज्ञानो भूतपूर्वोऽस्मि पाण्डव ॥ २०
पितामहेन संहारः प्रजानां विहितो ध्रुवम् ।
न हि युद्धमिदं युक्तमन्यत्र जगतः क्षयात् ॥ २१
तस्य तद्वचनं श्रुत्वा संस्तभ्यात्मानमात्मना ।
मोहयिष्यन्दानवानामहं मायामयं बलम् ॥ २२
अब्रुवं मातलिं भीतं पश्य मे भुजयोर्बलम् ।
अस्त्राणां च प्रभावं मे धनुषो गाण्डिवस्य च ॥ २३
अद्यास्त्रमाययैतेषां मायामेतां सुदारुणाम् ।
विनिहन्मि तमश्चोग्रं मा भैः सूत स्थिरो भव ॥ २४
एवमुक्त्वाहमसृजमस्त्रमायां नराधिप ।
मोहनीं सर्वशत्रूणां हिताय त्रिदिवौकसाम् ॥ २५
पीड्यमानासु मायासु तासु तास्वसुरेश्वराः ।

C. 3. 12157
B. 3. 171. 26
K. 3. 173. 26

निष्क्र°). — ^{c}) B D (except D_{1-3}) हरयो (for तुरगा). $_5$ विषमाश् (for विमुखाश्). $Ś_1$ $K_{1.2}$ om. च. — ^{d}) $_6$ प्रास्रव° (for प्रास्खल°).

15 K_3 om. 15 (cf. v.l. 1). — ^{a}) D_5 हि रश्मयश्; $_1$ हि रज्वायश् (sic) (for हिरण्मयश्). — ^{b}) $K_{1.2}$ T_1 पतद्; D_5 न्यपतद्. — $Ś_1$ K_2 om. 15^{c}–16^{b}; G_1 om. 5^{cd}. — ^{c}) T_2 G_{2-4} M चापि (for चाह). M आह (for तः). — ^{d}) S (G_1 om.) किं करिष्याव (T_2 G_3 °म) त्यपि (M इत्युत).

16 K_3 om. 16 (cf. v.l. 1); $Ś_1$ K_2 om. 16^{ab} (cf. l. 15). — ^{b}) D_5 विकल° (for विगत°). — ^{c}) $Ś_1$ $_{1.2}$ D_5 तु (for च).. K_1 विगतज्ञानं; T_2 (before corr.) $_{2.4}$ संगत°. — ^{d}) $Ś_1$ $K_{1.2}$ संतप्त; B D (except D_{1-3}) त्रस्तम् (for °स्त).

17 K_3 om. 17 (cf. v.l. 1). — ^{c}) B D (except $_{1.3}$) अमृतार्थं. $Ś_1$ $K_{1.2.4}$ Dc $D_{2.3.5}$ तात (for पार्थ). — ^{d}) $Ś_1$ $K_{1.2.4}$ $D_{1.3.5}$ वै; S मे (M_1 नो) (for च). सुदारुणः (for मया°).

18 K_3 resumes! — ^{a}) B Dn $D_{4.6}$ घोरः; D_1 ास्य; D_6 घोरे (for चापि). — ^{b}) Dc संग्रामस्तारकामयः.

19 ^{a}) K_3 तत्रैव (for तथैव). — ^{b}) $D_{3.5}$ T_2 G_{2-4} मया हयाः (by transp.). T_1 संगृह्णीयामहं हयान्. — ^{c}) Dn $D_{1.4.6}$ T_1 $G_{1.2}$ महा- (B_4 T_1 महद्-) (for मया). — ^{d}) G_1 चासीत् (for चापि). — After 19, B_4 ins.:

852* बलप्रज्ञादयश्चापि तथान्येषां च पाण्डव ।

20 ^{b}) B_4 G_1 समु° (for पर्यु°). — ^{c}) $K_{1.2}$ चास्मि (for चापि). — ^{d}) T_2 $G_{3.4}$ [ऽ]पि (for ऽस्मि). $Ś_1$ K_2 D_3 भारत (for पाण्डव).

21 ^{b}) $K_{2.3}$ विहतो; T_2 (before corr.) $G_{2.4}$ आहितो. G_1 ध्रुवः. — ^{c}) $Ś_1$ K $D_{1-3.5}$ दृष्टम् (for युक्तम्). — ^{d}) T_2 G_{2-4} जगतां (for °तः).

22 ^{b}) = Gītā (Vulg.) 3. 43^{b}. $G_{1.2}$ M संस्तंभ्या°. — ^{c}) $Ś_1$ $K_{1.2}$ अमोहयं दान°; S मोहयन् (T_1 मोहयं; G_1 अमोघं) दानवेंद्राणाम्. — ^{d}) Dc अयं (for अहं). B D (except $D_{1-3.5}$) मायाबलं महत्; T_2 $G_{3.4}$ मायां महद् (G_4 महा)-बलां.

23 ^{a}) M अब्रवं! K_4 सूतं; D_5 तत्र (for भीतं). — ^{b}) T_1 विजयं (for भुजयोर्). — ^{c}) N वै ($Ś_1$ D_5 च) (for मे).

24 ^{a}) D_1 अथा°; T_2 $G_{2.3}$ तथा° (for अद्या°). K_4 T_2 G_3 तेषां (for [ए]तेषां). G_1 अस्त्रमायां च वै तेषां. — ^{b}) B_1 एनां; D_2 एषां (for एतां). — ^{c}) T_2 (before corr.) $G_{1.4}$ ततश्चोग्रां (for तम°).

25 ^{c}) $D_{2.3.5}$ T_1 G_1 मोहिनीं. Dn $D_{4.6}$ सर्वभूतानां.

26 ^{a}) K_4 पीड्यमानास्तु. $K_{3.4}$ मायाभिः. — ^{b}) $K_{3.4}$ ताभिस्तेपि (K_4 °स्ते वै); B_4 मया तासु (for तासु तासु). K_1 B_4 T_1 सुरेश्वराः; $K_{3.4}$ सुरेतराः; B_1 सुरोत्तमाः; $B_{2.3}$ D (except $D_{1.3.5}$) [अ]सुरोत्तमाः (for [अ]सुरेश्वराः). — ^{c}) K_4 बहुविधां मायां. — ^{d}) $Ś_1$ $K_{1.2}$ D_5 प्रकुर्वंति; $K_{3.4}$ B_3 S (except G_1) प्राकुर्वंत; B_1 प्राकुर्वंस्ते (for प्राकुर्वन्). $K_{3.4}$ महौ° (for अमितौ°).

27 ^{a}) K_4 प्राकाश्यम् (for प्रकाशम्). S अगमत् (for अभवत्). — ^{b}) D_5 तमसश्चास्यते; T_1 तमसा गृह्यते. — ^{c}

C. 3. 12157
B. 3. 171. 26
K. 3. 173. 26

पुनर्बहुविधा मायाः प्राकुर्वन्नमितौजसः ॥ २६
पुनः प्रकाशमभवत्तमसा ग्रस्यते पुनः ।
व्रजत्यदर्शनं लोकः पुनरप्सु निमज्जति ॥ २७
सुसंगृहीतैर्हरिभिः प्रकाशे सति मातलिः ।
व्यचरत्स्यन्दनाग्र्येण संग्रामे लोमहर्षणे ॥ २८
ततः पर्यपतन्नुग्रा निवातकवचा मयि ।
तानहं विवरं दृष्ट्वा प्राहिण्वं यमसादनम् ॥ २९
वर्तमाने तथा युद्धे निवातकवचान्तके ।
नापश्यं सहसा सर्वान्दानवान्माययावृतान् ॥ ३०

इति श्रीमहाभारते आरण्यकपर्वणि अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

१६९

अर्जुन उवाच ।
अदृश्यमानास्ते दैत्या योधयन्ति स्म मायया ।
अदृश्यानस्त्रवीर्येण तानप्यहमयोधयम् ॥ १
गाण्डीवमुक्ता विशिखाः सम्यगस्त्रप्रचोदिताः ।
अच्छिन्दन्नुत्तमाङ्गानि यत्र यत्र स्म तेऽभवन् ॥ २
ततो निवातकवचा वध्यमाना मया युधि ।
संहृत्य मायां सहसा प्राविशन्पुरमात्मनः ॥ ३
व्यपयातेषु दैत्येषु प्रादुर्भूते च दर्शने ।
अपश्यं दानवांस्तत्र हताञ्शतसहस्रशः ॥ ४
विनिष्पिष्टानि तत्रैषां शस्त्राण्याभरणानि च ।

B D (except D$_{1-3}$) भवत्यदर्शनो.

28 ^{a}) Ś$_{1}$ K$_{1.2}$ असं° (for सुसं°). — ^{b}) K$_{1}$ °शेन स (for °शे सति). — ^{c}) Ś$_{1}$ व्यरोचत्; D$_{4.6}$ प्रचरत्; T G$_{3}$ व्यचरन्. Ś$_{1}$ K Dn$_{1}$. n$_{2}$ D$_{1-3.5.6}$ G$_{1}$ M$_{2}$ °ग्रेण; T$_{2}$ G$_{3.4}$ °ग्रेषु (for °ग्र्येण). — ^{d}) S (as usual) रोम° (for लोम°).

29 ^{a}) T$_{1}$ °चरन्; M$_{1}$ °तपन् (for °पतन्). B$_{1}$ अग्रे (for उग्रा). T$_{2}$ G$_{2-4}$ ततः पतंत्युपर्युग्रा. — ^{b}) Ś$_{1}$ K$_{1.2}$ युधि (for मयि). — ^{c}) K$_{4}$ D$_{1.2}$ विवशान्; B$_{2}$ विवरान्; Dc G$_{2}$ विचरन्; D$_{3}$ चरतो; T$_{1}$ विविधं (for विवरं). — ^{d}) K$_{4}$ प्रापयं (for प्राहिण्वं).

30 ^{a}) D$_{5}$ T$_{2}$ G$_{3}$ वर्ध° (for वर्त°). D$_{1.2}$ T G$_{2-4}$ M$_{1}$ तदा (for तथा). — ^{b}) Ś$_{1}$ K$_{1.2}$ °चान्युधि; K$_{3}$ D$_{5}$ M$_{1}$ °चांतिके. — ^{c}) K$_{4}$ मातलिं (for सहसा). — ^{d}) B$_{4}$ मायया युतान्.

Colophon om. in K$_{3}$. — *Major parvan:* Ś$_{1}$ K$_{1.2}$ Dn$_{2}$ T$_{2}$ G$_{2-4}$ आरण्य. — *Sub-parvan:* Omitting sub-parvan name, K$_{4}$ B$_{1-3}$ D G$_{1}$ mention only निवातकवचवध (B$_{1}$ om. वध) (preceded by गंधमादनवास in B$_{2}$, and by लोमशतीर्थयात्रा in D$_{1}$). — *Adhy. name:* G$_{1}$ M मायायुद्धं. — *Adhy. no.* (figures, words or both): Dn 171 (Dn$_{2}$ 170); D$_{1}$ 177; S (M$_{2}$ *sup. lin.*) (M$_{2}$ orig. 174). — *Śloka no.:* Dn D$_{1}$ 30.

169

1 ^{a}) Ś$_{1}$ K$_{2.4}$ D$_{1-3}$ दैत्या मां; K$_{1}$ दैत्यास्ते (by trans — ^{b}) D$_{5}$ हि (for स्म). S मां युधि (for मायया). — B D (except D$_{1.2.5}$) अदृश्येनास्त्र°.

2 ^{a}) S °मुक्तैर्विशिखैः. — ^{b}) K$_{3}$ D$_{2}$ °नोदिताः; D$_{1}$ °योजिताः; S °चोदितैः. — ^{c}) K$_{2}$ अवच्छिन्; D$_{2.5.6}$ अच्छिदन्; D$_{3}$ आछिदं; T G$_{1.3}$ अच्छिदं; G अच्छिदं; M अच्छिनं (for अच्छिन्दन्). M ह्युत्तमांगानि.

3 ^{b}) T$_{1}$ युध्य° (for वध्य°). Ś$_{1}$ K$_{1.2}$ मया भुवि G$_{2-4}$ महारणे (for मया युधि). — ^{c}) K$_{3}$ D$_{3}$ G$_{1}$ म (for मायां). S (except G$_{1}$) तरसा (for सहसा).

4 ^{c}) K$_{4}$ अदृश्यं. — ^{d}) Ś$_{1}$ तत्र (for शत-).

5 ^{a}) K$_{3.4}$ विनिपिष्टानि; T$_{2}$ G$_{1.3}$ विनिर्वि°. — K$_{1.2}$ [अ]पि; D$_{1.2}$ G$_{3}$ [उ]त (for च). T$_{1.2}$ (be corr.) G$_{1.2.4}$ M सहस्राभरणान्युत. — ^{c}) K$_{1}$ D कोटिशः; B$_{1-3}$ Dc Dn D$_{4.6}$ शतशः; T G$_{2-4}$ कूटवत् कूटशः). K$_{1}$ च प्र-; K$_{2.4}$ संप्र-; T G$_{2-4}$ प्रति- (for स — ^{d}) K$_{3}$ शस्त्राणि (for गात्राणि). K$_{3}$ G$_{1}$ विविधानि

कूटशः स्म प्रदृश्यन्ते गात्राणि कवचानि च ॥ ५
हयानां नान्तरं ह्यासीत्पदाद्विचलितुं पदम् ।
उत्पत्य सहसा तस्थुरन्तरिक्षगमास्ततः ॥ ६
ततो निवातकवचा व्योम संछाद्य केवलम् ।
अदृश्या ह्यभ्यवर्तन्त विसृजन्तः शिलोच्चयान् ॥ ७
अन्तर्भूमिगताश्चान्ये हयानां चरणान्यथ ।
न्यगृह्णन्दानवा घोरा रथचक्रे च भारत ॥ ८
विनिगृह्य हरीनश्वान्रथं च मम युध्यतः ।
सर्वतो मामचिन्वन्त सरथं धरणीधरैः ॥ ९
पर्वतैरुपचीयद्भिः पतमानैस्तथापरैः ।
स देशो यत्र वर्ताम गुहेव समपद्यत ॥ १०
पर्वतैश्छाद्यमानोऽहं निगृहीतैश्च वाजिभिः ।
अगच्छं परमामार्तिं मातलिस्तदलक्षयत् ॥ ११
लक्षयित्वा तु मां भीतमिदं वचनमब्रवीत् ।
अर्जुनार्जुन मा भैस्त्वं वज्रमस्त्रमुदीरय ॥ १२
ततोऽहं तस्य तद्वाक्यं श्रुत्वा वज्रमुदीरयम् ।
देवराजस्य दयितं वज्रमस्त्रं नराधिप ॥ १३
अचलं स्थानमासाद्य गाण्डीवमनुमन्त्र्य च ।
अमुञ्चं वज्रसंस्पर्शानायसान्निशिताञ्शरान् ॥ १४
ततो मायाश्च ताः सर्वा निवातकवचांश्च तान् ।
ते वज्रचोदिता बाणा वज्रभूताः समाविशन् ॥ १५
ते वज्रवेगाभिहता दानवाः पर्वतोपमाः ।
इतरेतरमाश्लिष्य न्यपतन्पृथिवीतले ॥ १६
अन्तर्भूमौ तु येऽगृह्णन्दानवा रथवाजिनः ।
अनुप्रविश्य तान्बाणाः प्राहिण्वन्यमसादनम् ॥ १७
हतैर्निवातकवचैर्निरस्तैः पर्वतोपमैः । C. 3. 12179 B. 3. 172. 18 K. 3. 174. 18

G$_{2-4}$ च शिरांसि (for कव°).

6 ^{a}) D$_1$ T$_1$ अंतरं (for नान्तरं). B$_2$ D$_1$ च (for हि). — ^{b}) = 3. 63. 6^{b}. D$_1$ प्रच°; M हि च° (for विच°). — ^{c}) D$_5$ उत्पेतुः (for उत्पत्य). D$_6$ सहसोत्तस्थुः; T$_{1.2}$ (before corr.) G$_{1.2.4}$ M सममातस्थुः. — ^{d}) B$_{1-3}$ अंतरीक्ष-. Ś$_1$ K$_{1.2}$ B$_4$ -चरास्; K$_{3.4}$ Dc$_2$ D$_{1-3.5}$ S -गतास् (for -गमास्). D$_1$ T$_2$ G$_{2-4}$ तदा; D$_5$ तथा (for ततः).

7 ^{ab}) T$_1$ तथा (for ततो). D$_3$ निवातकवचा व्योम ते समासाद्य केवलं. — ^{c}) Ś$_1$ K$_{1.2}$ B$_{1-3}$ Dn D$_{4-6}$ ह्यत्यव°; T$_1$ ह्यत्र व° (for ह्यभ्यव°). B$_4$ अदृश्यं तेभ्यवर्तंत.

8 ^{a}) Ś$_1$ K$_{1.3.4}$ D$_{1-3}$ तु (for च). — ^{b}) K$_4$ B$_2$ Dn$_1$ D$_{2-4.6}$ T$_2$ G$_3$ M चरणानथ; Dc$_2$ G$_1$ °णान्यथा. D$_5$ [अ]पि (for [अ]थ). — ^{c}) Ś$_1$ अगृ°; K$_1$ B$_{1-3}$ Dc Dn D$_{1.4.6}$ व्य(Dn$_2$ वि)गृ°; K$_2$ D$_2$ निगृ°; D$_5$ निगृह्य. — ^{d}) B$_1$ रथं; D$_5$ तथा (for रथ-). K$_{2.3}$ -चक्रं च; B$_4$ -चक्राणि; G$_1$ -चक्रैश्च (for -चक्रे च). Dn$_3$ रथं च मम भारत.

9 ^{a}) D$_1$ तान्निगृह्य. Ś$_1$ रथान्; K$_{1.2}$ शरान्; K$_4$ Dc D$_2$ S हयान् (for हरीन्). K$_4$ D$_2$ अश्यान्; Dc चाथ; S चान्ये (for अश्वान्). — ^{b}) K$_1$ शरान् (for रथं). — ^{c}) Ś$_1$ K$_{1.2}$ अयुध्यंत; Dn D$_{4.6}$ अविध्यंत; Cnp अचिन्वन्त (as in text).

10 ^{a}) K$_4$ D$_{2.5}$ उपचिन्वद्भिः; Dc अपचीयद्भिः. — ^{b}) S पतद्भिश्च (for पतमानैस्). — ^{c}) K$_{1-3}$ B$_1$ D$_{2.3.5}$ वर्तामो; B$_4$ T$_2$ G$_{2-4}$ °मि (for °म). T$_1$ M प्राप्ताः स्म संशयं तत्र. — ^{d}) K$_1$ गुहैव; T$_1$ इहैव (for गुहेव).

11 ^{a}) T$_1$ हि (for ऽहं). — ^{c}) K$_3$ M$_2$ अगच्छत्; K$_4$ D$_2$ अगच्छन्; Dc$_2$ D$_{3.6}$ आगच्छं. B$_4$ D$_5$ परमार्तिं समापन्नो. — ^{d}) T$_1$ मातलिं तु न लक्षयं.

12 K$_3$ om. 12. — ^{a}) N (except D$_{1-3}$; K$_3$ om.) च (for तु). — ^{c}) D$_5$ मा भैषीर्.

13 ^{a}) S (except G$_4$) अस्य (for तस्य). — ^{b}) Ś$_1$ D$_{2.6}$ G$_{2.4}$ उदैरयं; K$_1$ उदैरयन्; K$_2$ D$_1$ उदीरयन्. — ^{d}) K B D T$_2$ G$_{1.3}$ भीम° (D$_5$ दिव्य°) (for वज्र°).

14 ^{a}) Ś$_1$ K$_{1.2}$ अचल-. — ^{b}) D$_5$ अभि° (for अनु°). — ^{c}) Ś$_1$ K D$_{1.3}$ °संकाशान् (for °संस्पर्शान्). — ^{d}) Ś$_1$ K D (except D$_{1-3.5}$) सायकान्; T$_2$ G आयतान् (for आयसान्). D$_5$ आयसान्त्र् (for निशितान्). Ś$_1$ K Dc Dn D$_{4.6}$ बहून्; D$_5$ शितान् (for शरान्).

15 ^{a}) B$_4$ शुभाः (for च ताः). — ^{b}) T$_2$ G$_{2-4}$ तथा (for च तान्). — ^{c}) Ś$_1$ K$_4$ D$_{1.5}$ °नोदिता; K$_2$ °शादिता (for °चोदिता).

16 ^{a}) B Dc Dn D$_{4.6}$ -वि-; D$_{1.5}$ -नि- (for -[अ]भि-). — ^{c}) T$_1$ आश्लिष्यन्. — ^{d}) Ś$_1$ धरणी° (for पृथिवी°).

17 ^{a}) K$_4$ B$_{2-4}$ D (except D$_3$) च (for तु). — ^{c}) Ś$_1$ °प्रवेश्य तान्; K$_1$ °प्रवेशितान्. Ś$_1$ K$_1$ D$_5$ बाणान्. — ^{d}) K$_{1.2}$ प्राहिण्वं (for °ण्वन्).

18 ^{a}) T$_1$ तैस्तैर् (for हतैर्). — ^{c}) B$_1$ समासाद्य दिशः सर्वा. — ^{d}) D$_5$ पर्वतैरिव (by transp.); T$_1$ पर्वतोपमैः (cf. ^{b}).

19 ^{a}) D$_3$ तैर् (for न). K$_1$ D$_{1-3}$ G$_1$ क्षितिः; K$_2$

C. 3. 12179
B. 3. 172. 18
K. 3. 174. 18

समाच्छाद्यत देशः स विकीर्णैरिव पर्वतैः ॥ १८
न हयानां क्षतिः काचिन्न रथस्य न मातलेः ।
मम चादृश्यत तदा तदद्भुतमिवाभवत् ॥ १९
ततो मां प्रहसन्राजन्मातलिः प्रत्यभाषत ।
नैतदर्जुन देवेषु त्वयि वीर्यं यदीक्ष्यते ॥ २०
हतेष्वसुरसंघेषु दारास्तेषां तु सर्वशः ।
प्राक्रोशन्नगरे तस्मिन्यथा शरदि लक्ष्मणाः ॥ २१
ततो मातलिना सार्धमहं तत्पुरमभ्ययाम् ।
त्रासयन्रथघोषेण निवातकवचस्त्रियः ॥ २२
तान्दृष्ट्वा दशसाहस्रान्मयूरसदृशान्हयान् ।
रथं च रविसंकाशं प्राद्रवन्गणशः स्त्रियः ॥ २३
ताभिराभरणैः शब्दस्त्रासिताभिः समीरितः ।
शिलानामिव शैलेषु पतन्तीनामभूत्तदा ॥ २४
वित्रस्ता दैत्यनार्यस्ताः स्वानि वेश्मान्यथाविशन् ।
बहुरत्नविचित्राणि शातकुम्भमयानि च ॥ २५
तदद्भुताकारमहं दृष्ट्वा नगरमुत्तमम् ।
विशिष्टं देवनगरादपृच्छं मातलिं ततः ॥ २६
इदमेवंविधं कस्माद्देवता नाविशन्त्युत ।
पुरंदरपुराद्धीदं विशिष्टमिति लक्षये ॥ २७

मातलिरुवाच ।

आसीदिदं पुरा पार्थ देवराजस्य नः पुरम् ।
ततो निवातकवचैरितः प्रच्याविताः सुराः ॥ २८
तपस्तप्त्वा महत्तीव्रं प्रसाद्य च पितामहम् ।
इदं वृतं निवासाय देवेभ्यश्चाभयं युधि ॥ २९
ततः शक्रेण भगवान्स्वयंभूरभिचोदितः ।
विधत्तां भगवानत्रेत्यात्मनो हितकाम्यया ॥ ३०

कृतिः; B$_{2-4}$ Dc गतिः; T$_1$ क्षताः (for क्षतिः). T$_1$ केचिन्. D$_5$ तस्मिन्देशे गतिस्तात. — ^{b}) D$_5$ पर° (for रथ°). — ^{c}) Ś$_1$ Dc D$_{1.5}$ G$_{1.2}$ M$_2$ वादृश्यत; K$_2$ वारुच्यत.

20 ^{a}) T$_1$ प्रहसद्. — ^{b}) T$_2$ G$_{2-4}$ सम° (for प्रत्य°). — ^{c}) Dc देवेशे (for °षु). — ^{d}) Ś$_1$ K$_{1.2}$ D$_5$ अच्युत; K$_{3.4}$ D$_{1.3}$ T$_1$ M इष्यते (for ईक्ष्यते).

21 D$_4$ om. 21^{b}–22^{c}. — ^{b}) Dc T G च (for तु). D$_1$ संघशः (for सर्वशः). — ^{c}) D$_3$ आक्रोशन्. B$_4$ तत्र (for तस्मिन्). — ^{d}) B$_4$ सरसि (for शरदि). Ś$_1$ K$_{1.2}$ पक्षिणः; B (B$_{1.2m}$ as in text) Dn D$_6$ सारसाः; Cnp लक्ष्मणाः (as in text). K$_3$ कुरर्य इव भारत.

22 D$_4$ om. 22^{abc} (cf. v.l. 21). — ^{a}) Ś$_1$ K$_1$ ततो मातलिमासाद्य. — ^{b}) Ś$_1$ K$_1$ त्वहं (for अहं). S अभ्यगां (for अभ्ययाम्). — ^{c}) K$_3$ वज्र° (for रथ°).

23 ^{a}) B$_1$ शत°; T$_1$ रथ° (for दश°). — ^{d}) K$_3$ क्षणशः; S शतशः (for गणशः).

24 ^{a}) K$_4$ D$_{1.2}$ आकरुणः (for आभरणैः). K$_1$ शब्दैस्. — ^{c}) Ś$_1$ K$_{1.2}$ शिलाभिर् (for शिलानाम्). Dc शैलेंद्रे (for शैलेषु). — ^{d}) Ś$_1$ K$_{1.2}$ पतंतीभिर्; G$_1$ पतितानाम् (for पतन्तीनाम्).

25 ^{a}) Ś$_1$ K$_2$ D$_3$ विध्वस्ता (for वित्रस्ता). — ^{b}) D$_5$ S तानि (for स्वानि). — D$_5$ om. 25^{c}–26^{b}. — ^{d}) Ś$_1$ K$_{2-4}$ D$_{1-3}$ °कौंभ° (for °कुम्भ°).

26 D$_5$ om. 26^{ab} (cf. v.l. 25). — ^{a}) Dc °ताकारमयं; T$_1$ °तागारमहं; T$_2$ G$_{3.4}$ °तं महारंभं; G$_1$ °ताकारतमं. — After 26^{ab}, the sequence in D$_3$ is 29^{cd}, 30, 28, 29^{ab}, 26^{cd}, 27, 31, etc. — ^{d}) K$_{3.4}$ D$_1$ तदा (for ततः).

27 D$_5$ om. 27^{ab}. — ^{b}) Ś$_1$ K$_{1.2}$ देवानामिव संमतं K$_3$ B D (D$_5$ om.) देवा ना(K$_3$ नो)वासयंत्युत. — ^{c}) K च (for हि). Dn$_1$ पुरंदरस्य माहात्म्याद्. — ^{d}) Dn$_1$ आदिष्टम् (for विशिष्टम्). Ś$_1$ K$_{1.2.4}$ D$_5$ उप-; K$_3$ D$_1$. T G$_{2-4}$ इव (for इति). K$_2$ लक्ष्यते.

28 T$_2$ G$_3$ om. the ref. For sequence in D$_3$ cf. v.l. 26. — ^{a}) Ś$_1$ K$_{1.2}$ पुरं (for पुरा). — ^{b}) D$_5$ T$_2$ G$_{2-4}$ वै (for नः). Ś$_1$ K$_{1.2}$ पुरा (for पुरम्). T$_1$ देवराजनिवेशनं. — ^{d}) K B$_{2.3}$ D$_5$ प्राच्या(K$_3$ °द्रा)विताः. G पुरात् (for सुराः).

29 For sequence in D$_3$ cf. v.l. 26. — ^{a}) Dn$_1$ दुःखं प्राप्य (for तपस्तप्त्वा). B$_2$ तपश्चात्र महत्तप्त्वा. — ^{c}) K$_{1.3}$ वृत्तं; Dn$_1$ D$_{2.3}$ दत्तं (for वृतं.). — ^{d}) K$_1$ चायुधं T$_1$ चावृतं (for चाभयं). — After 29, D$_6$ (marg. *sec. m.*) ins.:

853* तथा देवैरवध्यत्वं पुरस्याभेद्यत्वमेव तु ।
मनुष्याणां दुर्बलत्वादुपेक्ष्यैव महासुरैः ।

30 For sequence of D$_3$ cf. v.l. 26. — ^{b}) B$_{1-}$ D (except D$_{1-3.5}$) इति; T$_2$ G$_{2-4}$ अपि (for अभि-). K$_4$ D$_{1-3.5}$ -नोदितः (for -चोदितः). — ^{cd}) Ś$_1$ विदत्तां D$_3$ व्यधत्त; D$_5$ विधत्स्व; D$_6$ विधात्रा; T$_1$ विधत्त; T$_2$ G$_{2-}$ दत्तवान् (for विधत्तां). Ś$_1$ K$_{1.2}$ B$_2$ Dn$_2$. n$_3$ D$_{1-4}$ अंतम्; Dn$_1$ एतद्; D$_5$ अद्य; T$_2$ G$_{2-4}$ अस्त्रम् (for अत्र

तत उक्तो भगवता दिष्टमत्रेति वासवः ।
भवितान्तस्त्वमेवैषां देहेनान्येन वृत्रहन् ॥ ३१
तत एषां वधार्थाय शक्रोऽस्त्राणि ददौ तव ।
न हि शक्याः सुरैर्हन्तुं य एते निहतास्त्वया ॥ ३२
कालस्य परिणामेन ततस्त्वमिह भारत ।
एषामन्तकरः प्राप्तस्तत्त्वया च कृतं तथा ॥ ३३
दानवानां विनाशार्थं महास्त्राणां महद्बलम् ।
ग्राहितस्त्वं महेन्द्रेण पुरुषेन्द्र तदुत्तमम् ॥ ३४

अर्जुन उवाच ।

ततः प्रविश्य नगरं दानवांश्च निहत्य तान् ।
पुनर्मातलिना सार्धमगच्छं देवसद्म तत् ॥ ३५

इति श्रीमहाभारते आरण्यकपर्वणि एकोनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

१७०

अर्जुन उवाच ।

निवर्तमानेन मया महद्दृष्टं ततोऽपरम् ।
पुरं कामचरं दिव्यं पावकार्कसमप्रभम् ॥ १
द्रुमै रत्नमयैश्चित्रैर्भास्वरैश्च पतत्रिभिः ।
पौलोमैः कालकेयैश्च नित्यहृष्टैरधिष्ठितम् ॥ २
गोपुराट्टालकोपेतं चतुर्द्वारं दुरासदम् । C. 3. 12199 B. 3. 173. 3 K. 3. 175. 3

Ś$_1$ K$_{1.2.4}$ D$_{1-3}$ अस्माकं; B$_{1.2}$ Dn D$_{4-6}$ T$_3$ G$_{2-4}$ आत्मनो; B$_{3.4}$ Dc चात्मनो (for [इ]त्यात्मनो). T$_2$ G$_{2-4}$ हितमुत्तमं (for °काम्यया).

31 ^{b}) K$_2$ D$_1$ M$_1$ °मात्रेति; T$_2$ G$_{2-4}$ °मास्तेति (for °मत्रेति). B D (except D$_{1-3.5}$) भारत (for वासवः). T$_1$ दिष्टमत्र पुरंदर. — ^{c}) Dn D$_{4.6}$ अप्येषां; D$_3$ T$_2$ G$_{2-4}$ एतेषां (for एवैषां). Ś$_1$ K$_{1.2}$ त्वमेवैषां भवस्यंतो; B$_3$ भविता त्वंत एतेषां; B$_4$ त्वमप्येषां भवस्वांतो; D$_5$ त्वमेषां भवितास्यंतो; T$_1$ भवता तं तमेवैषां. — ^{d}) N (except K$_4$ D$_{1-3}$) शत्रु° (for वृत्र°).

32 ^{a}) Ś$_1$ K$_{1.2}$ त्वेषां; K$_{3.4}$ B$_4$ D$_5$ तेषां (for एषां). — ^{d}) T$_2$ G$_{2-4}$ यतस्ते (for य एते). Ś$_1$ K$_{1.2}$ [ऽ]त्र (for नि-).

33 ^{b}) G$_1$ गत° (for तत°). — ^{c}) Ś$_1$ K$_{1.2}$ D$_{1.2}$ तेषाम् (for एषाम्). S पार्थ (for प्राप्तस्). — ^{d}) K$_3$ यत् (for तत्). G$_1$ [अ]पि (for च). Ś$_1$ तथा तच्च कृतं त्वया; D$_5$ त्वया तच्च कृतं तथा; T$_2$ G$_{3.4}$ त्वयेत्युपकृतं तथा; G$_2$ संप्रत्युपकृतं तथा.

34 ^{a}) B$_{1-3}$ D (except D$_{1-3.5}$) विनाशाय. — ^{b}) B D (except D$_{1-3.5}$) अस्त्राणां परमं बलं. — ^{c}) Ś$_1$ K$_{1.2}$ प्रहितस्त्वं; T$_1$ आहित°; G$_1$ गृहीत°. G$_{3.4}$ सुरेंद्रेण. — ^{d}) B$_1$ M$_1$ पुरुषेण (for °षेन्द्र). Ś$_1$ K$_{1.2.4}$ D$_1$ M [ए]तद्; T G [इ]दम् (for तद्). Ś$_1$ K$_{1.2}$ उच्यतां; D$_1$ अद्भुतं (for उत्तमम्). D$_5$ पुरुषेंद्रैरनुत्तमैः.

35 S om. the ref.! — ^{a}) B$_{1.2}$ D (except D$_{1-3.5}$) प्रशाम्य; B$_3$ °शास्य (for °विश्य). — ^{b}) K$_2$ [अ]भिभाव्य; B$_1$ निहन्य (for निहत्य). — ^{d}) K$_{3.4}$ D$_3$ आगच्छं; S (except G$_4$) अगमं. K$_3$ ह (for तत्).

Colophon. — *Major parvan:* Ś$_1$ K$_{1.2}$ Dn$_2$ D$_3$ T$_1$ G$_{2.4}$ आरण्य. — *Sub-parvan:* Omitting sub-parvan name, K$_{3.4}$ B$_{1-3}$ D G$_1$ M$_1$, mention only निवातकवचवध (B$_1$ om. वध) (preceded by लोमशतीर्थयात्रा in K$_3$ D$_1$, and by गंधमादनवास in B$_3$). — *Adhy. no.* (figures, words or both): Dn 172 (Dn$_2$ 171); D$_1$ 178; S (M$_2$ *sup. lin.*) 173 (M$_2$ orig. 175). — *Śloka no.:* Dn D$_1$ 35.

170

1 ^{ab}) Ś$_1$ K$_{1.2}$ transp. मया and महत्. T$_2$ G तदा (for मया). D$_2$ सह; G$_4$ मया (for महद्). K$_2$ पुरं; M$_1$ परं (for [अ]परम्). — ^{c}) K$_2$ परं (for पुरं). K$_{3.4}$ D$_{1.3.5}$ T$_2$ G M °गमं (for °चरं). T$_1$ तत्पुरं कामगं दिव्यं. — ^{d}) D$_5$ पावकार्चि°.

2 ^{a}) B Dc Dn D$_{4.6}$ रत्नद्रुम(B$_4$ द्रुमरत्न)मयैश्च. K$_3$ Dc D$_{3.5}$ T$_1$ G$_1$ M चित्रं (for चित्रैर्). — ^{b}) Ś$_1$ K$_{1.2}$ Dc भासुरैश्च; B$_{2.3}$ Dn D$_{4.6}$ सुस्वरैश्च. — ^{c}) Ś$_1$ K D$_{1-3.5}$ कालखंजै°; B$_{2-4}$ Dc Dn D$_{4.6}$ °कंजै°. — ^{d}) Ś$_1$ K D$_{1-3.5}$ मुदा युतैः; S दुरासदं (for अधिष्ठितम्); cf. 3^b.

3 ^{b}) T$_1$ अनुत्तमं (for दुरा°). — K$_4$ om. 3^c–5^b; T$_1$

C. 3. 12199
B. 3. 173. 3
K. 3. 175. 3

सर्वरत्नमयं दिव्यमद्भुतोपमदर्शनम् ।
द्रुमैः पुष्पफलोपेतैर्दिव्यरत्नमयैर्वृतम् ॥ ३
तथा पतत्रिभिर्दिव्यैरुपेतं सुमनोहरैः ।
असुरैर्नित्यमुदितैः शूलर्ष्टिमुसलायुधैः ।
चापमुद्गरहस्तैश्च स्रग्विभिः सर्वतो वृतम् ॥ ४
तदहं प्रेक्ष्य दैत्यानां पुरमद्भुतदर्शनम् ।
अपृच्छं मातलिं राजन्किमिदं दृश्यतेति वै ॥ ५

मातलिरुवाच ।

पुलोमा नाम दैतेयी कालका च महासुरी ।
दिव्यं वर्षसहस्रं ते चेरतुः परमं तपः ।
तपसोऽन्ते ततस्ताभ्यां स्वयंभूरददाद्वरम् ॥ ६
अगृह्णीतां वरं ते तु सुतानामल्पदुःखताम् ।
अवध्यतां च राजेन्द्र सुरराक्षसपन्नगैः ॥ ७
रमणीयं पुरं चेदं खचरं सुकृतप्रभम् ।
सर्वरत्नैः समुदितं दुर्धर्षममरैरपि ।
सयक्षगन्धर्वगणैः पन्नगासुरराक्षसैः ॥ ८
सर्वकामगुणोपेतं वीतशोकमनामयम् ।
ब्रह्मणा भरतश्रेष्ठ कालकेयकृते कृतम् ॥ ९
तदेतत्खचरं दिव्यं चरत्यमरवर्जितम् ।
पौलोमाध्युषितं वीर कालकेयैश्च दानवैः ॥ १०
हिरण्यपुरमित्येतत्ख्यायते नगरं महत् ।
रक्षितं कालकेयैश्च पौलोमैश्च महासुरैः ॥ ११
त एते मुदिता नित्यमवध्याः सर्वदैवतैः ।
निवसन्त्यत्र राजेन्द्र गतोद्वेगा निरुत्सुकाः ।
मानुषो मृत्युरेतेषां निर्दिष्टो ब्रह्मणा पुरा ॥ १२

अर्जुन उवाच ।

सुरासुरैरवध्यांस्तानहं ज्ञात्वा ततः प्रभो ।
अब्रुवं मातलिं हृष्टो याह्येतत्पुरमञ्जसा ॥ १३

M_1 om. 3^{e}–4^{b}; K_3 om. 3^{f}–4^{c}. — ^{f}) B D (except $D_{1-3.5}$) सर्व° (for दिव्य°).

4 K_4 om. 4; K_3 om. 4^{abc}; T_1 M_1 om. 4^{ab} (cf. v.l. 3). — ^{b}) Ś$_1$ B_4 °रमं; $K_{1.2}$ D_5 °हरं; B_3 °रमैः (for °हरैः). — ^{d}) Ś$_1$ शूलांधू-; $D_{1.2}$ शूलासि-; T_1 $G_{1.2.4}$ शूलेष्टि- (for शूलर्ष्टि-). K_3 D (except D_6) -मुशलायुधैः; $B_{1.2}$ -मुषला°.

5 K_4 om. 5^{ab} (cf. v.l. 3). — ^{b}) Dc पुनर् (for पुरम्). — ^{d}) Ś$_1$ $K_{1.2.4}$ $D_{1.2}$ [अ]त्र वै; D_5 T_1 पुरं (for [इ]ति वै). B Dc Dn $D_{4.6}$ किमिदं वर्ततेद्भुतं.

6 ^{a}) D_2 पौलोमी (for पुलोमा). $K_{1.2}$ दैत्येया; K_3 G_1 दैत्येयी (for दैतेयी). — ^{b}) $K_{3.4}$ Dc_2 D_{1-3} कालिका; T_1 तन्नामा; T_2 G_{2-4} M काळका (for कालका). $D_{1.2}$ चापि दानवी (for च महासुरी). — ^{c}) K_{1-3} D_6 T_1 तु (for ते). G_2 °सहस्रांते. — ^{d}) K_2 तप उत्तमं (for परमं तपः). — ^{f}) B D (except D_3) अददद्वरं.

7 ^{a}) S (except T_1) वरौ (for वरं). Dn तं; T_1 तौ (for ते). — ^{b}) Ś$_1$ $K_{1.2}$ B_{1-3} Dc $D_{2.4.6}$ °दुःखितां. — ^{d}) D_6 सुरदानवराक्षसैः.

8 ^{a}) B D (except D_{1-3}) पुरं सुरमणीयं च. — ^{b}) Ś$_1$ K B_1 Dc $D_{1-3.5}$ खेचरं. K_2 सुकृतं प्रभो; B D (except D_{1-3}) सुमहाप्रभं; M_2 सुकृतप्रदं. — ^{c}) $D_{1.2}$ सर्वकामैः. Ś$_1$ $K_{1.2}$ समुचितं; K_3 प्रमुदितं. — ^{d}) K_1 दुर्धर्षैर्; K_4 दुर्दर्शम्. M_1 अपरैरपि. — ^{e}) B_{1-3} D (except $D_{1-3.5}$) महर्षियक्षगंधर्व-. — ^{f}) D_1 T_2 G_{2-4} पन्नगोरग°.

9 ^{a}) D_5 °कामफलो°; G_4 °कर्मगुणो°. — ^{c}) B_4 D[illegible]ान् ((except M_1) ब्रह्मणो. S भवनात् (G_1 M_1 °नं) श्रेष्ठं (भरतश्रेष्ठ). — ^{d}) T_1 G_1 M_1 °कृतं विभो; $G_{2.4}$ °कृतं प्र

10 ^{a}) B_1 Dc इदं (for एतत्). K_4 D_1 खेचरं; B_1 तु पुरं; B_2 खेचरे; $B_{3.4}$ Dn $D_{2.4.6}$ स्वपुरं; T_2 G_{1-3} स्वचरं (for खचरं). — ^{c}) K_4 पौलोम्याध्युषितं. K_3 वी B_4 रम्यं. — ^{d}) $K_{1.2}$ $D_{1.3}$ कालिकेयैश्च; B_{2-4} Dc Dn_1 $D_{2.4-6}$ कालकं($D_{2.5}$ °खं)जै°.

11 ^{a}) B D (except $D_{1.3.5}$) [ए]वं (B_1 [ए]व) ([ए]तत्). — ^{b}) D_5 आख्यातं; T_1 श्रूयते (for ख्याय — T_1 om. 11^{cd}. — ^{c}) B_2 रहितं; D_2 रक्ष्यते. K_2 D कालिकेयैश्च; B_4 कालकंजै°. — ^{d}) K_4 D_1 पौलोम्यैश्च.

12 ^{a}) T_2 G_{2-4} तदा ते (for त एते). B_{1-3} (except $D_{2.3.5}$) राजन् (for नित्यम्). — ^{b}) Ś$_1$ K G सर्वदेवतैः. — ^{c}) Ś$_1$ K कौंतेय (for राजेन्द्र). — ^{d}) गतदोषाः (for गतोद्वेगा). Ś$_1$ K सदो°; B_2 निरामयाः निरु°). — After 12^{cd}, S ins.:

854* सुरासुरैरवध्यानां दानवानां धनंजय ।

— ^{e}) K_4 B_4 Dn $D_{1-4.6}$ मानुषान्; T_2 $G_{3.4}$ मानु — ^{f}) Ś$_1$ K D_{1-3} निसृष्टो (for निर्दिष्टो). — After B (B_1 marg.) D (except $D_{1.3.5}$) ins.:

855* एतानपि रणे पार्थ कालकञ्जान्दुरासदान् ।
वज्रास्त्रेण नयस्वाशु विनाशं सुमहाबलान् ।

त्रेदशेशद्विषो यावत्क्षयमस्त्रैर्नयाम्यहम् ।
कथंचिद्धि मे पापा न वध्या ये सुरद्विषः ॥ १४
वाह मां ततः शीघ्रं हिरण्यपुरमन्तिकात् ।
थेन तेन दिव्येन हरियुक्तेन मातलिः ॥ १५
मामालक्ष्य दैतेया विचित्राभरणाम्बराः ।
मुत्पेतुर्महावेगा रथानास्थाय दंशिताः ॥ १६
तो नालीकनाराचैर्भल्लशक्त्यृष्टितोमरैः ।
भ्यघ्नन्दानवेन्द्रा मां क्रुद्धास्तीव्रपराक्रमाः ॥ १७
दहं चास्त्रवर्षेण महता प्रत्यवारयम् ।
स्त्रवर्षं महद्राजन्विद्याबलमुपाश्रितः ॥ १८
पामोहयं च तान्सर्वान्निथमार्गैश्चरन्रणे ।
तेऽन्योन्यमभिसंमूढाः पातयन्ति स्म दानवाः ॥ १९
तेषामहं विमूढानामन्योन्यमभिधावताम् ।
शिरांसि विशिखैर्दीप्तैर्व्यहरं शतसंघशः ॥ २०
ते वध्यमाना दैतेयाः पुरमास्थाय तत्पुनः ।
खमुत्पेतुः सनगरा मायामास्थाय दानवीम् ॥ २१
ततोऽहं शरवर्षेण महता प्रत्यवारयम् ।
मार्गमावृत्य दैत्यानां गतिं चैषामवारयम् ॥ २२
तत्पुरं खचरं दिव्यं कामगं दिव्यवर्चसम् ।
दैतेयैर्वरदानेन धार्यते स्म यथासुखम् ॥ २३
अन्तर्भूमौ निपतितं पुनरूर्ध्वं प्रतिष्ठते ।
पुनस्तिर्यक्प्रयात्याशु पुनरप्सु निमज्जति ॥ २४

C. 3. 12224
B. 3. 173. 27
K. 3. 175. 28

[(L. 1) B_1 सुदारुणान् (for दुरासदान्). — (L. 2) Dc]नयति (for नयस्व). B_1 विरामं (for विनाशं).]

13 S om. the ref. — Dc om. 13^a–15^b. — ^{a}) B n $D_{4.6}$ अवध्यं तद् (for अवध्यांस्तान्). $G_{2.4}$ सुरैरवध्यां न्सर्वान्. — ^{b}) B Dn $D_{4.6}$ विशां पते; T_1 G_1 महा ान् (for ततः प्रभो). — ^{c}) D_2 M (as usual) अब्रवं. K $D_{1-3.5}$ तत्र (for हृष्टो).

14 Dc om. 14 (cf. v.l. 13). — ^{c}) K_4 D_2 T_1 G_1 ; D_5 विशेत् (for हि मे). D_5 पापं (for पापा). — ^{d}) M_1 अवध्या; T_2 G [illegible]वध्या (for न वध्या). $\acute{S}_1$ $K_{1.2}$; K_3 च (for ये).

15 Dc om. 15^{ab} (cf. v.l. 13). — ^{a}) G_1 तत्र (for :). M क्षिप्रं (for शीघ्रं). — ^{b}) T_2 G_{2-4} अंतिकं (for न्तिकात्).

16 ^{a}) $\acute{S}_1$ मामलक्ष्य; K_1 ममालक्ष्य; K_3 न मालक्ष्य. [illegible] दैत्येया. K_3 तेषामलक्ष्य दैत्येया. — ^{b}) B_1 °भरणायुधाः. [illegible]) K_3 °भागा (for °वेगा). — ^{d}) $\acute{S}_1$ K_1 D_6 रथम् (for रथान्). $\acute{S}_1$ $K_{1.2}$ आदाय (for आस्थाय). $K_{1.3}$ S सिताः.

17 ^{a}) Many S MSS. नाळीक-. $\acute{S}_1$ K $D_{1.3}$ °नाराच- (for °नाराचैर्). — ^{b}) K_4 B Dc Dn D_{4-6} T_1 भल्लैः (for ल्ल-). — ^{c}) B_{1-3} D (except $D_{1.3}$) प्रत्य° (for अभ्य°). M_2 मा (for मां).

18 ^{a}) $K_{3.4}$ $B_{3.4}$ $D_{3.5}$ T_1 $G_{1.2.4}$ M_1 तान् (for). $K_{3.4}$ B Dc Dn $D_{1-4.6}$ शर°; D_5 S शस्त्र° (for स्त्र°). — ^{b}) S समवारयं (G_1 °वाकिरं). — ^{c}) $B_{3.4}$ स्त्रवर्षं; Dc शरवर्षं. K_4 D_1 अहं राजन्; B_4 अभूद्राजन्; S हाराज. — ^{d}) = 1. 38. 39^d. $K_{3.4}$ D_4 M_2 °बलमपा°; B_2 °बलसमा°.

19 ^{a}) $K_{1.3.4}$ Dc Dn_2 D_5 T $G_{2.3}$ M_1 व्या(K_1 Dc Dn_2 व्य)मोहयन्; K_2 विमोहयं; B_1 व्यापोहयं; Dn_1. n_3 $D_{2.6}$ G_1 M_3 व्यमोहयं. — ^{b}) K_4 °मार्गान्; T $G_{3.4}$ °मार्गे (for °मार्गैश्च). — ^{c}) K_3 अभिसंरूढाः; $D_{1.5}$ अतिसंमूढाः. K_2 तेन्योन्येभ्यश्च सं°. — ^{d}) B_2 Dn $D_{4.6}$ दानवान्.

20 ^{a}) B D (except $D_{1-3.5}$) एवं (for अहं). — ^{b}) D_5 अत्यंतम् (for अन्योन्यम्). — ^{c}) T_2 $G_{2.3}$ विविधैर् (for विशिखैर्). $\acute{S}_1$ $K_{1.2}$ तीक्ष्णैर् (for दीप्तैर्). D_6 शिरांसि पेतुर्विशिखैर्. — ^{d}) B Dc Dn $D_{4.6}$ न्यहनं (B_1 °रं); T_1 व्याहनं; T_2 G अच्छिदं (G_1 अहरं); M_3 व्याहरं (for व्यहरं). D_5 दीप्तैः कृत्तानि संघशः.

21 ^{a}) D_5 हन्य° (for वध्य°). K_2 दैत्येयाः. — ^{c}) Dn_2 स्वनगरान् (for सनगरा).

22 ^{a}) K $D_{1-3.5}$ तानहं (for ततोऽहं). — ^{b}) B D (except $D_{1-3.5}$) कुरुनंदन (B_2 °सत्तम); T_2 G_{2-4} पर्यवारयं; M_3 सम° (for प्रत्य°). — M_3 om. 22^{cd}. — ^{c}) D_3 आश्रित्य (for आवृत्य). — ^{d}) $\acute{S}_1$ तेषाम् (for चैषाम्). B_4 न्यवारयं.

23 ^{a}) G_1 खेचरं. — ^{b}) B D (except $D_{1-3.5}$) सूर्यसप्रभं (B_2 °संनिभं; B_4 °वर्चसं); T_1 M दीप्तवर्चसं; G_1 दीप्ततेजसं. — ^{c}) K_{1-3} दैत्येयैर्. — ^{d}) $\acute{S}_1$ K_3 चार्यते स्म; K_2 धारयंते; D_2 वार्यते स्म; T_1 नीयते स्म.

24 ^{a}) $\acute{S}_1$ $K_{1.2}$ अधो भूमौ; $K_{3.4}$ $D_{1-3.5}$ पुनर्भूमौ. B_{1-3} Dn_2 $D_{1-3.5}$ निपतति. — ^{b}) $\acute{S}_1$ $K_{1.2}$ च गच्छति; B_{2-4} Dc Dn_2 T G प्रतिष्ठितं; M प्रतिष्ठति. — ^{c}) D_3 पपाताशु; T_1 प्रधान्याशु.

25 ^{a}) Dc अमरावतीव संकाशं (hypermetric!); D_6

C. 3. 12224
B. 3. 173. 28
K. 3. 175. 29

अमरावतिसंकाशं पुरं कामगमं तु तत् ।
अहमस्त्रैर्बहुविधैः प्रत्यगृह्णं नराधिप ॥ २५
ततोऽहं शरजालेन दिव्यास्त्रमुदितेन च ।
न्यगृह्णं सह दैतेयैस्तत्पुरं भरतर्षभ ॥ २६
विक्षतं चायसैर्बाणैर्मत्प्रयुक्तैरजिह्मगैः ।
महीमभ्यपतद्राजन्प्रभग्नं पुरमासुरम् ॥ २७
ते वध्यमाना मद्बाणैर्वज्रवेगैरयस्मयैः ।
पर्यभ्रमन्त वै राजन्नसुराः कालचोदिताः ॥ २८
ततो मातलिरप्याशु पुरस्तान्निपतन्निव ।
महीमवातरत्क्षिप्रं रथेनादित्यवर्चसा ॥ २९
ततो रथसहस्राणि षष्टिस्तेषाममर्षिणाम् ।
युयुत्सूनां मया सार्धं पर्यवर्तन्त भारत ॥ ३०
तानहं निशितैर्बाणैर्व्यधमं गार्ध्रवाजितैः ।
ते युद्धे संन्यवर्तन्त समुद्रस्य यथोर्मयः ॥ ३१
नेमे शक्या मानुषेण युद्धेनेति प्रचिन्त्य वै ।
ततोऽहमानुपूर्व्येण सर्वाण्यस्त्राण्ययोजयम् ॥ ३२
ततस्तानि सहस्राणि रथानां चित्रयोधिनाम् ।
अस्त्राणि मम दिव्यानि प्रत्यघ्नञ्शनकैरिव ॥ ३
रथमार्गान्विचित्रांस्ते विचरन्तो महारथाः ।
प्रत्यदृश्यन्त संग्रामे शतशोऽथ सहस्रशः ॥ ३४
विचित्रमुकुटापीडा विचित्रकवचध्वजाः ।
विचित्राभरणाश्चैव नन्दयन्तीव मे मनः ॥ ३५

तस्य सर्वस्य संप्राप्तः कालः परमदारुणः ॥ २८
नौश्च कारयितव्या ते दृढा युक्तवटाकरा ।
तत्र सप्तर्षिभिः सार्धमारुहेथा महामुने ॥ २९
बीजानि चैव सर्वाणि यथोक्तानि मया पुरा ।
तस्यामारोहयेर्नावि सुसंगुप्तानि भागशः ॥ ३०
नौस्थश्च मां प्रतीक्षेथास्तदा मुनिजनप्रिय ।
आगमिष्याम्यहं शृङ्गी विज्ञेयस्तेन तापस ॥
एवमेतत्त्वया कार्यमापृष्टोऽसि व्रजाम्यहम् ।
नातिशङ्क्यमिदं चापि वचनं ते ममाभि
एवं करिष्य इति तं स मत्स्यं प्रत्यभाषत ।
जग्मतुश्च यथाकाममनुज्ञाप्य परस्परम् ॥ ३
ततो मनुर्महाराज यथोक्तं मत्स्यकेन ह ।
बीजान्यादाय सर्वाणि सागरं पुप्लुवे तदा ।
नावा तु शुभया वीर महोर्मिणमरिंदम ॥ ३
चिन्तयामास च मनुस्तं मत्स्यं पृथिवीपते
स च तच्चिन्तितं ज्ञात्वा मत्स्यः परपुरंजय
शृङ्गी तत्राजगामाशु तदा भरतसत्तम ॥ ३

---

26 ^{a}) G_1 M_1 लोकम् (for भौमम्). — ^{b}) $\acute{S}_1$ $K_{1.2}$ सर्वं; D_3 जगत्; $G_{1.2}$ इमं (for इदं). — ^{d}) D_5 च (for वै).

27 K_1 om. 27^a–28^b. — ^{a}) G_4 स (for सं-). — K_3 om. from समुप° (in 27^c) up to नेङ्गति (in 28^b).

28 $K_{1.3}$ om. 28^{ab} (cf. v.l. 27). — ^{a}) $\acute{S}_1$ $K_{2.4}$ D_1 M_1 चराणां; T_1 भूतानां; T_2 G_3 त्रासनं; G_1 जंगम- (for त्रसानां). D_5 जंगमानां स्थावराणां. — ^{b}) $=49^d$. K_4 यच्चैंगं; D_4 यत्त्वेंगं; G_1 M_1 यच्चेंगद्. $B_{2.3}$ Dc_2 नेंगते; T_1 G_2 नेंगितं (for नेङ्गति).

29 ^{b}) K_4 दृढ-; G_1 यथा (for दृढा). K_3 D_3 मुक्त-; K_4 $D_{1.2}$ युक्ता; D_6 रज्जु- (for युक्त-). K_4 B Dc_1 Dn $D_{1.2.4-6}$ -वटारका; T $G_{3.4}$ -कवाटिका; G_2 M -पटाकरा (for -वटाकरा); cf. v.l. 37. — ^{d}) $K_{3.4}$ $D_{1.2}$ T_1 G_1 M आरोहेथा; D_5 आरुहेस्त्वं; T_2 G_{2-4} आरोहाथ (for आरुहेथा).

30 ^{a}) B_2 Dc बीजानां. D_1 कर्माणि (for सर्वाणि). — ^{b}) B D (except $D_{1-3.5}$) द्विजैः पुरा (B_4 पुरा मया). — ^{c}) $\acute{S}_1$ $K_{1.2.4}$ $D_{1-3.5}$ आरोपयेद् (for °हयेद्). — ^{d}) $\acute{S}_1$ K $D_{1-3.5}$ सुगुप्तायां विभागशः ($\acute{S}_1$ विशेषतः; K_2 विभावसुः).

31 ^{a}) $\acute{S}_1$ तस्थुश्च; K D_{1-3} तत्स्थश्च; D_5 तत्रस्थो (for नौस्थश्च). $\acute{S}_1$ तां; $G_{2.4}$ मा (for मां). $\acute{S}_1$ उपे° (for प्रती°). — ^{b}) Dn $D_{4.6}$ ततो; $D_{1-3.5}$ सदा; $T_{1.2}$ (before corr.) $G_{1.2.4}$ तथा (for तदा). K_2 Dn_1 T_1 G_4 °प्रियः. — ^{d}) $K_{3.4}$ $D_{3.5}$ तेन वै मुने; B_1 स्वेन तेजसा (m तेन तापस as in text).

32 ^{a}) B_{1-3} $D_{2.3}$ T G_{2-4} एव (for एतत्). — ^{b}) D_5 त्वां पृष्ट्वा हि; G_4 त्वामापृष्टो (for आपृष्टोऽसि). — After 32^{ab}, B_3 D (except $D_{1-3.5}$) ins.:

917* ता न शक्या महत्यो वै आपस्ततुं मया वि

[B_3 न च शक्यमिदं वारि (for the prior half) (for आपस्).]

— ^{c}) $\acute{S}_1$ $B_{2.3}$ Dc Dn $D_{3m.4.6}$ नाभिशंक्य नाति(B_1 °भि)क्रम्यम्; B_4 D_5 न च (D_5 वि-) श नातिशङ्क्यम्). B_4 वारि (for चापि). — ^{d}) D_{1-3} ममांतिके; K_3 D_5 T_1 महामुने (for ममाभि वचनं मम चांतिके; B_4 त्वया ततुं मया विना (c B_{1-3} Dc Dn $D_{4.6}$ वचनं मे त्वया विभो.

33 ^{a}) B_4 करिष्यामि (for करिष्ये). Ś (for तं). — ^{b}) $\acute{S}_1$ B_4 T_1 मत्स्यं स (by transp K_4 D_3 तौ (for च). Dc °कालम् (for °कामम्

34 ^{b}) D_6 T_1 हि (for ह). — ^{d}) D_5 tra and पुप्लुवे. T_1 G_1 समुद्रं (for सागरं). — ^{e}) Ś Dc Dn $D_{4.6}$ नौकया; K_3 नावाया (sic); K_4 ° (for नावा तु). B_2 प्रभया (for शु°). Dc_2 भावी (for वीर). — ^{f}) D_3 T_1 °दमं (for °दम

35 ^{a}) T G_{2-4} स (for च). T_2 G_3 मु मनुस्). — ^{c}) $=1. 216. 2^a$: 4. 41. 4^c: 5. 41 तु (for च). D_5 G_4 तं (for तच्). — ^{d}) =3 Dc $D_{2.5.6}$ T_2 (before corr.) M_1 °जयः. — (hapl.) 35^e–40^d. — ^{e}) $\acute{S}_1$ K_{1-3} Dc तदा°; K तथा° (for तत्रा°). T_2 $G_{2.4}$ सुग्रीवस्तं जगाम D_5 T_2 (before corr.) G_1 तथा (for तदा).

36 T_1 om. 36 (cf. v.l. 35). — ^{a}) Ś मनुजेंद्रेंद्रो; B Dn $D_{4.6}$ मनुजव्याघ्र (B_1 मनु

मनुजेन्द्रेन्द्र मनुर्मत्स्यं जलार्णवे ।
तं यथोक्तेन रूपेणाद्रिमिवोच्छ्रितम् ॥ ३६
मयं पाशमथ मत्स्यस्य मूर्धनि ।
जशार्दूल तस्मिञ्श्रृङ्गे न्यवेशयत् ॥ ३७
न पाशेन मत्स्यः परपुरंजय ।
हता नावं प्राकर्षल्लवणाम्भसि ॥ ३८
तया नावा समुद्रं मनुजेश्वर ।
मिवोर्मीभिर्गर्जमानमिवाम्भसा ॥ ३९
णा महावातैः सा नौस्तस्मिन्महोदधौ ।
चपलेव स्त्री मत्ता परपुरंजय ॥ ४०
मिर्न च दिशः प्रदिशो वा चकाशिरे ।
सर्वमाम्भसमेवासीत्खं द्यौश्च नरपुंगव ॥ ४१
एवंभूते तदा लोके संकुले भरतर्षभ ।
अदृश्यन्त सप्तर्षयो मनुर्मत्स्यः सहैव ह ॥ ४२
एवं बहून्वर्षगणांस्तां नावं सोऽथ मत्स्यकः ।
चकर्षातन्द्रितो राजंस्तस्मिन्सलिलसंचये ॥ ४३
ततो हिमवतः श्रृङ्गं यत्परं पुरुषर्षभ ।
तत्राकर्षत्ततो नावं स मत्स्यः कुरुनन्दन ॥ ४४
ततोऽब्रवीत्तदा मत्स्यस्तानृषीन्प्रहसञ्शनैः ।
अस्मिन्हिमवतः श्रृङ्गे नावं बध्नीत माचिरम् ॥ ४५
सा बद्धा तत्र तैस्तूर्णमृषिभिर्भरतर्षभ ।
नौर्मत्स्यस्य वचः श्रुत्वा श्रृङ्गे हिमवतस्तदा ॥ ४६ C. 3. 12795 B. 3. 187. 50 K. 3. 190. 48

---

corr.) G_{4} °जेंद्रेण; G_{2} °जेंद्रोथ. — ^{b}) B_{1} स तु मत्स्यं मनुर् (by transp.). $Ś_{1}$ K_{1} B_{2} $D_{1-3.5}$ हार्णवे; Dc M_{1} जलाशये. — ^{c}) $K_{3.4}$ $D_{1-3.5}$ च; T_{1} om.) तु (for तं). K_{4} तथोक्तेन. — ^{d}) B_{1} तं; B_{3} D_{1} °मिवोत्थितं; T_{2} G_{2-4} °मिवोन्नतं.

T_{1} om. 37 (cf. v.l. 35). — ^{a}) K_{1} D_{5} वटाकार°; Dc Dn $D_{1.2.4.6}$ वटारक°; T_{2} G पटाकार°; M (cf. v.l. 29). $K_{1.2}$ पाशैर् (for पाशम्). — ^{b}) पश्यन् (D_{1} अपश्यन्) मत्स्यमूर्धनि. — ^{d}) Dc तस्य स्मिन्). $Ś_{1}$ K B_{1} (m as in text) Dn $D_{1-3.5}$ श्रृङ्गे). K_{1} न्यवेशयेत्; M_{2} °दयत्.

T_{1} om. 38 (cf. v.l. 35). — ^{a}) K_{3} संगत°; K_{4} G_{1} M_{2} स(B_{1} M_{2} सं)सित°; T_{2} G_{2-4} M_{1} संसक्त° तं°). $Ś_{1}$ $K_{1.2}$ स शिरस्थेन पाशेन. — ^{b}) $=35^{d}$. $n_{2}.n_{3}$ $D_{2.6}$ °जयः. — D_{1} om. (hapl.) 38^{c}–40^{d}. $Ś_{1}$ $K_{1.2}$ योगेन (for वे°).

T_{1} D_{1} om. 39 (cf. v.l. 35, 38). — ^{a}) $Ś_{1}$ K_{1-3} Dn $D_{4.6}$ स च तान् ($K_{1.2}$ स तया) तारयन्नावा Dc_{2} °यामास). — ^{b}) $K_{2.3}$ °श्वरं; D_{3} °श्वरः. =(var.) 3. 102. 21^{c}. B_{2} गर्जं° (for नृत्य°). र्म्यो वै; D_{5} [उ]चैश्च (for ऊर्मीभिर्). — ^{d}) K_{3} D_{2} °; K_{4} वल्गमान°; B_{2} तर्जयान°. $Ś_{1}$ $K_{1.2}$ गच्छन्नि-व तदांभसि.

T_{1} D_{1} om. 40 (cf. v.l. 35, 38). — ^{a}) T_{2} G_{1} for °माणा). — ^{c}) $D_{2.3}$ घूर्णितैश्; S (T_{1} om.) for घूर्णते).

K_{2} om. 41^{ab}. — ^{a}) $G_{2.4}$ न वै (for नैव). T G च (for वा). — D_{5} om. 41^{c}–42^{d}. — ^{c}) B_{3} सर्वदा (for सर्वम्). K_{2} अंभसम्; S सलिलम् (for आम्भसम्). D_{1} सर्वमंभोमयं चासीत्. — ^{d}) T_{1} नद्यश्च (for खं द्यौश्च).

42 D_{5} om. 42 (cf. v.l. 41). G_{4} om. 42^{a}–44^{b}. — ^{a}) $D_{1.2}$ काले (for लोके). — ^{b}) T_{2} $G_{2.3}$ °ले नरपुंगव. — ^{c}) Sporadic prior pāda! $Ś_{1}$ $K_{1.2}$ अदृश्यन्सप्तऋषयो; Dc D_{5} अदृश्यन्नृषयः सप्त; $D_{1.2}$ G_{1} अदृश्यंतर्षयः सप्त; M_{1} सप्तर्षयो मनुर्मत्स्यो. — ^{d}) M_{1} [ऽ]प्यदृश्यंत (for मनुर्मत्स्यः). $Ś_{1}$ सदैव; $K_{1.2.4}$ D_{1-3} स चैव; K_{3} B Dc Dn $D_{4.6}$ तथैव (for सहैव). K_{2} $D_{1.2}$ T_{1} हि; K_{3} B Dn_{1} D_{4} M_{2} च (for ह).

43 G_{4} om. 43 (cf. v.l. 42). — ^{b}) D_{5} नावं तां (by transp.). K_{4} स स्म; $D_{1.2}$ स तु; D_{3} स च; D_{6} स्म स; T $G_{2.3}$ सोपि; M सोस्य (for सोऽथ).

44 G_{4} om. 44^{ab} (cf. v.l. 42). — ^{a}) K_{2} हिमवते श्रृंगे. — ^{b}) K_{3} B D (except D_{1-3}) भरतर्षभ. — B_{2} om. (hapl.) 44^{c}–47^{d}. — ^{c}) D_{6} G_{2} °र्षत तां. M_{1} °र्षत्तदा (for °र्षत्ततो). K_{1} तात्रं; K_{3} नावि (for नावं). — ^{d}) M_{2} मत्स्यकः (for स मत्स्यः). $Ś_{1}$ K $D_{1-3.5}$ M_{2} कुंति° (for कुरु°). T_{1} $G_{1.2.4}$ M_{2} मत्स्यः कौरव(G_{4} M_{2} कौंतेय)-नंदन.

45 B_{2} om. 45 (cf. v.l. 44). — ^{a}) B (B_{2} om.) D (except $D_{1-3.5}$) T_{2} G_{3} अथा°; M_{1} तदा° (for ततो°). K_{4} D_{2} महा- (for तदा). — ^{b}) B_{1} (m as in text) T_{1} इव (for शनैः). — ^{c}) $K_{1.2}$ T_{1} तस्मिन् (for अस्मिन्).

46 B_{2} om. 46 (cf. v.l. 44). — ^{a}) $Ś_{1}$ K $D_{2.3.5}$ वै तूर्णम्; T_{1} तस्थौ नाव् (for तैस्तूर्णम्). — D_{1} om. (hapl.) 46^{c}–47^{d}; G_{4} M_{2} om. 46^{cd}. — ^{c}) K_{4} D_{2} तैर्; T_{2} ते

C. 3. 12795
B. 3. 187. 50
K. 3. 190. 49

तच्च नौबन्धनं नाम शृङ्गं हिमवतः परम् ।
ख्यातमद्यापि कौन्तेय तद्विद्धि भरतर्षभ ॥ ४७
अथाब्रवीदनिमिषस्तानृषीन्सहितांस्तदा ।
अहं प्रजापतिर्ब्रह्मा मत्परं नाधिगम्यते ।
मत्स्यरूपेण यूयं च मयास्मान्मोक्षिता भयात् ॥ ४८
मनुना च प्रजाः सर्वाः सदेवासुरमानवाः ।
स्रष्टव्याः सर्वलोकाश्च यच्चेङ्गं यच्च नेङ्गति ॥ ४९
तपसा चातितीव्रेण प्रतिभास्य भविष्यति ।
मत्प्रसादात्प्रजासर्गे न च मोहं गमिष्यति ॥ ५०
इत्युक्त्वा वचनं मत्स्यः क्षणेनादर्शनं गतः
स्रष्टुकामः प्रजाश्चापि मनुर्वैवस्वतः स्वयम् ।
प्रमूढोऽभूत्प्रजासर्गे तपस्तेपे महत्ततः ॥ ५
तपसा महता युक्तः सोऽथ स्रष्टुं प्रचक्रमे
सर्वाः प्रजा मनुः साक्षाद्यथावद्भरतर्षभ ॥
इत्येतन्मात्स्यकं नाम पुराणं परिकीर्तितम्
आख्यानमिदमाख्यातं सर्वपापहरं मया ॥
य इदं शृणुयान्नित्यं मनोश्चरितमादितः ।
स सुखी सर्वसिद्धार्थः स्वर्गलोकमियान्नरः

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

(for नौर्). K$_2$ मनुर्मत्स्य- (for नौर्मत्स्यस्य). K$_4$ B$_1$ Dc D$_3$ मत्स्यवचनं (for मत्स्यस्य वचः). — K$_1$ om. (hapl.) 46^d–47^a.

47 B$_2$ D$_1$ om. 47 (cf. v.l. 44, 46); K$_1$ om. 47^a (cf. v.l. 46); K$_4$ om. (hapl.) 47^a–48^b. — ^{a}) K$_3$ तेद्य (for तच्च). — ^{d}) T$_2$ (before corr.) G$_4$ तद्धि तं (for तद्विद्धि). K$_3$ D$_5$ मनुजर्षभ; B$_4$ मनुजाधिप; D$_3$ मनुजेश्वर; T$_2$ G$_{1.3}$ पुरुषर्षभ.

48 K$_4$ om. 48^{ab} (cf. v.l. 47). — ^{a}) D$_3$ तथा° (for अथा°). — ^{b}) Ś$_1$ B D (except D$_{2.3.5.6}$) सहितः (for सहितान्). B$_3$ तथा (for तदा). — ^{d}) Ś$_1$ K$_{1.2}$ तत्परं; D$_6$ नापरं (for मत्परं). K$_3$ नाव-; G$_1$ नाभि- (for नाधि-). Ś$_1$ K$_{1.2}$ -गच्छति (for -गम्यते). — ^{e}) Ś$_1$ K$_{1.2}$ वै (for च). — ^{f}) K$_{1.2.4}$ D$_5$ मोचिता (for मोक्षिता).

49 ^{b}) Ś$_1$ K$_{1.2}$ B D (except D$_{1.3}$) -मानुषाः (for -मानवाः). — ^{d}) = 28^b. B$_3$ G$_{2.4}$ M$_2$ नेंगते; D$_5$ T$_1$ नेंगितं (for नेङ्गति).

50 ^{a}) B$_{2-4}$ Dn D$_{4.6}$ [अ]पि (for [अ]ति-). — ^{b}) Ś$_1$ K$_1$ प्रतिभात्र; K$_2$ G$_1$ °भास्यं; K$_4$ Dc °भाष्य; D$_1$ °भास्यो; T$_1$ °भावं; T$_2$ G$_{2-4}$ शक्तिश्चास्य. — ^{c}) B$_1$ सर्वा (for -सर्गे). — Ś$_1$ K$_1$ M$_2$ om. (hapl.) 50^d–51^e. — ^{d}) D$_3$ न त्वं (for न च). B$_2$ D$_3$ T$_1$ गमिष्यसि.

51 Ś$_1$ K$_1$ M$_2$ om. 51^a–51^e (cf. v.l. 50). — ^{b}) B$_1$ क्रमेण (m क्षणेन as in text). — ^{c}) T$_1$ चैव (for चापि). — ^{d}) K$_2$ स्वायंभुवः (for वैव°). — ^{e}) K$_2$ स भूयो वै; K$_{3.4}$ D$_{1-3.5}$ संमूढोभूत्. — ^{f}) S (except T$_1$ G$_4$) ततस् (for तपस्). Ś$_1$ K$_{2.4}$ B$_2$ D$_{1-3.5}$ तदा; K$_{1.3}$ B$_{3.4}$ Dn$_1$ S तपः (for ततः). B$_1$ महातपाः (for महत्ततः).

52 ^{a}) Ś$_1$ K D$_{1-3.5}$ transp. तपसा and महता. — ^{b}) Ś$_1$ K$_{1.3.4}$ D$_{1-3.5}$ ततः (for सोऽथ) transp. सोऽथ and स्रष्टुं.

53 ^{a}) D$_5$ एतत्ते; T$_1$ इत्येवं (for इत्येतन् D$_{1.5}$ मत्स्यकं (for मा°). — ^{b}) K$_3$ पुराण-; K$_4$ M$_1$ पुराणे; B$_1$ प्रधाने (m पुराणं as in text). G$_{2-4}$ transp. आख्यानं and आख्यातं.

54 ^{a}) D$_5$ इदं यः (by transp.); G$_2$ य इ D$_5$ आद्दतः; M$_2$ आत्मनः (for आदितः). — (for सुखी). B D (except D$_{1-3.5}$) सर्व °युः); S पूर्णकामा(M °सर्वा)र्थः. — ^{d}) B$_1$ D$_{1-3.5}$) G$_4$ सर्व° (for स्वर्ग°). B$_1$ व्रजेन् G$_2$ सर्वान्कामानवाप्नुयात्.

Colophon. — *Major parvan:* Ś$_1$ K$_1$. G$_{2-4}$ आरण्य. — *Sub-parvan:* G$_1$ मार्कंडेयस (both om. sub-parvan name) mention पुराण (sic); K$_{3.4}$ B Dc Dn$_3$ D$_{1-6}$ M$_1$, only म(D$_3$ मा)त्स्योपाख्यान. — *Adhy. no* words or both): Dn 186 (Dn$_3$ 187); (M$_2$ *inf. lin.*) 189 (M$_2$ orig. 192). — Dn 57; D$_1$ 54.

186

1 ^{a}) T$_1$ [आ]ह (for [अ]थ). — ^{b}) T यश°).

2 ^{a}) T$_1$ एते; M$_1$ नैते (for नैकें). — ^{b}) K$_1$ °मुने). — ^{d}) Ś$_1$ तव दृश्यते; B$_1$ G$_1$ वि transp.). B$_{2.3}$ D (except D$_{1-3.5}$)

१८६

वैशंपायन उवाच ।

स पुनरेवाथ मार्कण्डेयं यशस्विनम् ।
विनयोपेतो धर्मराजो युधिष्ठिरः ॥ १
युगसहस्रान्तास्त्वया दृष्टा महामुने ।
पीह समः कश्चिदायुषा तव विद्यते ।
त्वा महात्मानं ब्रह्माणं परमेष्ठिनम् ॥ २
रिक्षे लोकेऽस्मिन्देवदानववर्जिते ।
प्रलये विप्र ब्रह्माणमुपतिष्ठसि ॥ ३
चापि निर्वृत्ते प्रबुद्धे च पितामहे ।
सृज्यमानानि भूतानीह प्रपश्यसि ॥ ४
धानि विप्रर्षे यथावत्परमेष्ठिना ।
वायुभूता दिशः कृत्वा विक्षिप्यापस्ततस्ततः ॥ ५
त्वया लोकगुरुः साक्षात्सर्वलोकपितामहः ।
आराधितो द्विजश्रेष्ठ तत्परेण समाधिना ॥ ६
तस्मात्सर्वान्तको मृत्युर्जरा वा देहनाशिनी ।
न त्वा विशति विप्रर्षे प्रसादात्परमेष्ठिनः ॥ ७
यदा नैव रविर्नाग्निर्न वायुर्न च चन्द्रमाः ।
नैवान्तरिक्षं नैवोर्वी शेषं भवति किंचन ॥ ८
तस्मिन्नेकार्णवे लोके नष्टे स्थावरजङ्गमे ।
नष्टे देवासुरगणे समुत्सन्नमहोरगे ॥ ९
शयानममितात्मानं पद्मे पद्मनिकेतनम् ।
त्वमेकः सर्वभूतेशं ब्रह्माणमुपतिष्ठसि ॥ १०

C. 3. 12818
B. 3. 188. 14
K. 3. 191. 14

°न्विद्यते) तव; B_4 T_2 $G_{3.4}$ आयुष्मांस्तात (B_4 विद्यते. — After 2, B D (except $D_{1-3.5}$) S

8* न तेऽस्ति सदृशः कश्चिदायुषा ब्रह्मवित्तम ।

T_1 G_1 ब्रह्मसत्तम; M ब्राह्मणोत्तम (for ब्रह्मवित्तम).]

$Ś_1$ K_2 Dn_3 D_5 om. 3^{ab}. — ^{a}) $B_{1.3}$ T G अंतरि- $B_{1.3}$ °क्षे च) लोके°. — ^{c}) T G नित्यं (for विप्र).) = 10^d. $Ś_1$ $K_{1.2}$ $B_{2.3}$ D (except D_{1-3}) M_1 ; M_2 °तिष्ठति.

D_4 om. (? hapl.) from पि of चापि (in 4^a) up of वायुभूता (in 5^c). — ^{a}) B_1 महति (for निर्वृत्ते). निवृत्ते प्रलये चापि. — ^{b}) T_1 प्रयुद्धे; G_1 प्रवृद्धे. — ^{c}) D (except $D_{1-3.5}$; D_4 om.) M एकः (for एव). भूतानि (for सृज्य°). — ^{d}) K_3 Dc G_4 प्रपश्यति. ज्यमानानि पश्यसि.

D_4 om. up to वा of वायुभूता (cf. v.l. 4). — ^{b}) सादात्परमेष्ठिनः. — K_4 om. (? hapl.) 5^c–6^d. After 5^{ab}, $D_{1.2}$ read 8. — ^{c}) T_2 (before corr.) °भूतां दिशं. $Ś_1$ K_{1-3} B_2 $D_{3.5}$ सर्वा (for कृत्वा). M_2 निक्षिप्य. T_1 [अ]थ (for [आ]पः). K_4 om. 6 (cf. v.l. 5). — After 6, K_3 B D (except $D_{1.2}$; $D_{3.5}$ both marg. *sec. m.*) ins.:

19* स्वप्रमाणमथो विप्र त्वया कृतमनेकशः ।
घोरेणाविश्य तपसा वेधसो निर्जितास्त्वया ।
नारायणाङ्कप्रख्यस्त्वं सांपरायेऽतिपठ्यसे ।
भगवानेकशः कृत्वा त्वया विष्णोश्च विश्वकृत् ।
कर्णिकोद्धरणं दिव्यं ब्रह्मणः कामरूपिणः । [5]
रत्नालंकारयोगाभ्यां दृग्भ्यां दृष्टस्त्वया पुरा ।

[(L. 1) B_2 इदं (for अथो). — (L. 2) B_2 °सोंतर्हितास् (for °सो निर्जितास्). — (L. 3) D_3 °णांश° (for °णाङ्क°). B_2 स पठ्यसे; Dc_2 D_3 [ऽ]तिपठ्यते. — (L. 4) D_4 विष्णुश्च. — (L. 5) K_3 कार्णिकोद्धारिणां; D_5 कटकोद्धरणं. — (L. 6) $D_{3.5}$ °योग्याभ्यां]

7 ^{a}) $Ś_1$ देहांतको; K $D_{1-3.5}$ सर्वांतगो; B Dc Dn $D_{4.6}$ तवांतको. $Ś_1$ विष्णुर् (for मृत्युर्). — ^{b}) K_3 B_4 Dc $D_{2.4}$ देहनाशनी; $B_{1.3}$ S °घातिनी. — ^{c}) B D (except $D_{3.5}$) त्वां (for त्वा). D_5 ब्रह्मर्षे (for विप्रर्षे).

8 $D_{1.2}$ read 8 after 5^{ab}. — ^{a}) K_3 G_1 यथा (for यदा). S वै न (for नैव). — ^{c}) K_1 न वांतरिक्षं.

9 ^{a}) T_1 तस्माद् (for तस्मिन्). D_1 T_2 G_3 M_1 घोरे; D_5 काले (for लोके). — ^{b}) $Ś_1$ $K_{1.2}$ नष्ट-. — G_1 om. 9^{cd}. — ^{c}) $Ś_1$ $K_{1.3}$ D_3 G_4 M_1 नष्ट-. — ^{d}) $Ś_1$ $G_{2.4}$ समुत्पन्न-; B_1 समुत्सन्ने.

10 ^{a}) $Ś_1$ संशिता°; $K_{1.2}$ संश्रिता°; D_5 अपि चा° (for अमिता°). — ^{b}) $B_{1.2}$ Dn D_4 पद्मोत्पल- (for पद्मे पद्म-). B_4 G_1 M_2 -निभेक्षणं (for -निकेतनम्). — ^{c}) D_1 एव (for एकः). — ^{d}) = 3^d. $Ś_1$ °तिष्ठति; Dc D_5 °तिष्ठसे.

11 ^{a}) $Ś_1$ $K_{1.4}$ $D_{1.2}$ एतां; K_2 एवं; D_4 यत्तत् (for

C. 3. 12819
B. 3. 188. 15
K. 3. 191. 15

एतत्प्रत्यक्षतः सर्वं पूर्ववृत्तं द्विजोत्तम ।
तस्मादिच्छामहे श्रोतुं सर्वहेत्वात्मिकां कथाम् ॥ ११
अनुभूतं हि बहुशस्त्वयैकेन द्विजोत्तम ।
न तेऽस्त्यविदितं किंचित्सर्वलोकेषु नित्यदा ॥ १२

मार्कण्डेय उवाच ।

हन्त ते कथयिष्यामि नमस्कृत्वा स्वयंभुवे ।
पुरुषाय पुराणाय शाश्वतायाव्ययाय च ॥ १३
य एष पृथुदीर्घाक्षः पीतवासा जनार्दनः ।
एष कर्ता विकर्ता च सर्वभावनभूतकृत् ॥ १४
अचिन्त्यं महदाश्चर्यं पवित्रमपि चोत्तमम् ।
अनादिनिधनं भूतं विश्वमक्षयमव्ययम् ॥ १५

एष कर्ता न क्रियते कारणं चापि पौरुषे ।
यो ह्येनं पुरुषं वेत्ति देवा अपि न तं विदुः
सर्वमाश्चर्यमेवैतन्निर्वृत्तं राजसत्तम ।
आदितो मनुजव्याघ्र कृत्स्नस्य जगतः क्षये
चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम्
तस्य तावच्छती संध्या संध्यांशश्च ततः परम्
त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यते ।
तस्य तावच्छती संध्या संध्यांशश्च ततः परम्
तथा वर्षसहस्रे द्वे द्वापरं परिमाणतः ।
तस्यापि द्विशती संध्या संध्यांशश्च ततः परम्
सहस्रमेकं वर्षाणां ततः कलियुगं स्मृतम् ।

एतत्). D_3 प्रत्यक्षतां; T_2 G प्रत्यक्षितं. Ś$_1$ K D_{1-3} सर्वां (K_3 पूर्वं); M_1 दृष्टं (for सर्वं). — ^{b}) Ś$_1$ $K_{1.2.4}$ $D_{1.3}$ पूर्ववृत्तां; $B_{2.4}$ D_6 पूर्वं वृत्तं. — Ś$_1$ K_1 om. (hapl.) 11^{c}–12^{b}. — ^{c}) K_3 B D (except D_{1-3}) T_2 G_3 °म्यहं (for °महे). — ^{d}) S (except T_1 M_1) सर्वां (for सर्व-). $K_{2.3}$ D_5 T_2 $G_{2.3}$ -हेत्वात्मिकीं (K_2 एवात्मि°; K_3 -हेत्वात्म°). G_4 क्रियां (for कथाम्).

12 Ś$_1$ K_1 om. 12^{ab} (cf. v.l. 11). — ^{a}) B_3 अंतर्भूतं (for अनुभूतं). D_2 सु- (for हि). — ^{b}) K_{2-4} $D_{1-3.5}$ S त्वयैतद् (D_1 °च) द्विजसत्तम. — 12^{c} = 1. 57. 12^{c}: 5. 16. 7^{c}.

13 ^{a}) $K_{3.4}$ B_{2-4} D वर्त(K_4 °र्ण)यिष्यामि (Dc संप्रवक्ष्यामि). — ^{b}) Ś$_1$ $K_{1.2}$ $D_{1-3.5}$ $G_{2.4}$ नमस्कृत्य. — After 13^{ab}, $K_{3.4}$ B D ins.:

920* अव्यक्ताय सुसूक्ष्माय निर्गुणाय गुणात्मने ।

[B_1 अध्यक्षाय (for अव्यक्ताय). D_3 महा° (for गुणा°).]

14 ^{a}) B_3m Dc_1 Dn_1. n_3 D_3 $G_{2.4}$ M_2 स एष; Dn_2 $D_{4.6}$ स एव; T_1 य एव (for य एष). K_3 B D (except $D_{1-3.5}$) पुरुषव्याघ्र (for पृथु°). — ^{d}) K_4 $D_{3.5}$ सर्वभावेन; B_4 S (except G_2 M_1) भूतभावन-. B_{1-3} Dc Dn $D_{4.6}$ भूतात्मा भूतकृत्प्रभुः.

15 ^{b}) B_4 इह; Dc_1 Dn D_4 इति (for अपि). B D (except $D_{1-3.5}$) चोच्यते (B_4 विद्यते) (for चोत्तमम्). — ^{c}) K_1 भूत्वा (for भूतं). — ^{d}) K_4 B_1 Dn $D_{2.4}$ M_2 transp. अक्षयम् and अव्ययम्. T_1 -रक्षकम्; G_4 अक्षरम् (for अक्षयम्).

16 ^{b}) G_4 कारणादपि; M_2 शरणं चापि (for कारणं चापि).

K_3 D_5 पौरुषम्. — ^{c}) Ś$_1$ K $D_{2.3.5}$ य एष; B
(B_1 यत्क्षेत्रं); Dc $D_{4.6}$ यं ह्येष; D_1 यदेवं; T_1 य
G_{2-4} को ह्येनं; M_1 य एनं (for यो ह्येनं). N
पुरुषं). B D (except $D_{1-3.5}$) वेद (for वेत्ति
B_{2-4} Dn $D_{3.4.6}$ T_1 वेदा (for देवा). Ś$_1$
$D_{1-3.5}$ तद् (for तं).

17 ^{a}) T_1 °भूतं हि; T_2 G_{2-4} °मेतस्मिन्
°मेतद्धि; M_1 °मेतस्मान् (for °मेवैतन्). — ^{b}) Ś
S (except G_1) निवृत्तं; $B_{2.4}$ Dn_1 निर्वृतं.

18 ^{b}) $K_{1.2}$ वर्षाणि (for °णां). — 18^{cd} = 1
20^{cd}, 21^{cd}. — ^{c}) $K_{1.2}$ अस्य; B_4 कृते; T_2 (be
$G_{2.4}$ तच्च (for तस्य). B_4 चतुःशती; G_4 ता
तावच्छती). Ś$_1$ $K_{1.2}$ संख्या (for संध्या). —
G_1 तथापरः; K_4 $B_{2.4}$ Dn D_{1-6} T_1 तथाविधः; G

19 G_1 om. (hapl.) 19. — ^{b}) K_3 D_1
(for इहो°). S (G_1 om.) त्रेता स्यात्परिमाणत
— For 19^{cd}, cf. v.l. 18^{cd}. — ^{c}) T_1 तस्यास्;
(for तस्य). $K_{1.2}$ संख्या (for संध्या). — ^{d})
K_{1-3} B_4 तथापरः; B_2 Dc $D_{1.2.5}$ तथाविधः.

20 T_1 om. (hapl.) 20^{a}–21^{d}. — ^{a}) B
ततो; T_2 G अथ (for तथा). — B_2 om. 20^{cd}.
G_{2-4} तत्रा° (for तस्या°). $D_{1.2}$ द्वे (for द्वि
संख्या (for संध्या). — ^{d}) Ś$_1$ G_4 ततः परः; K
तथापरः; Dc_2 $D_{1.2.4.6}$ तथाविधः; D_3 ततः परे.

21 T_1 om. 21^{abcd} (cf. v.l. 20). — ^{a})
(for °णां). — ^{b}) $K_{1.2}$ B_2 Dc Dn_1. n_3 D_6 S
तथा (for ततः). — ^{c}) G_1 M_1 °शती (for

शतं संध्या संध्यांशश्च ततः परम् ।
ध्यांशयोस्तुल्यं प्रमाणमुपधारय ॥ २१
लियुगे चैव प्रवर्तति कृतं युगम् ।
दशसाहस्री युगाख्या परिकीर्तिता ॥ २२
पर्यन्तमहो ब्राह्ममुदाहृतम् ।
ब्रह्मभवने सर्वशः परिवर्तते ।
मनुजव्याघ्र प्रलयं तं विदुर्बुधाः ॥ २३
शिष्टे तु तदा युगान्ते भरतर्षभ ।
ते नराः सर्वे प्रायशोऽनृतवादिनः ॥ २४
निधिः पार्थ दानप्रतिनिधिस्तथा ।
निधिश्चैव तस्मिन्काले प्रवर्तते ॥ २५

ब्राह्मणाः शूद्रकर्माणस्तथा शूद्रा धनार्जकाः ।
क्षत्रधर्मेण वाप्यत्र वर्तयन्ति गते युगे ॥ २६
निवृत्तयज्ञस्वाध्यायाः पिण्डोदकविवर्जिताः ।
ब्राह्मणाः सर्वभक्षाश्च भविष्यन्ति कलौ युगे ॥ २७
अजपा ब्राह्मणास्तात शूद्रा जपपरायणाः ।
विपरीते तदा लोके पूर्वरूपं क्षयस्य तत् ॥ २८
बहवो म्लेच्छराजानः पृथिव्यां मनुजाधिप ।
मिथ्यानुशासिनः पापा मृषावादपरायणाः ॥ २९
आन्ध्राः शकाः पुलिन्दाश्च यवनाश्च नराधिपाः ।
काम्बोजा और्णिकाः शूद्रास्तथाभीरा नरोत्तम ॥ ३०
न तदा ब्राह्मणः कश्चित्स्वधर्ममुपजीवति ।
C. 3. 12840
B. 3. 188. 36
K. 3. 191. 36

D M$_2$ संधिः (B$_1$ विद्धि) (for संध्या). — ^{d}) Ś$_1$
रः; K$_{1.2}$ तथा परं; K$_4$ ततः परः. — ^{e}) Ś$_1$ K B$_{2.3}$
pt D$_1$) संधि- (for संध्या-). — ^{f}) T$_2$ G अव°;
(for उप°).
^{b}) K$_{1-3}$ D$_5$ प्रवर्तेत; K$_4$ D$_{2.3}$ M$_1$ प्रावर्तत; Dc
D$_1$ प्रवर्तत. K$_2$ कृतं युगे; B$_2$ पुनः कृतं; B$_4$ कृतं पुनः.
वर्तते युगं. — ^{c}) D$_{1.2}$ G$_{1.2.4}$ एष; T$_1$ एवं (for
— ^{d}) G$_1$ युगसंख्या प्रकीर्तिता.
^{b}) Ś$_1$ अहर्ब्रह्मम्; K$_1$ महद्ब्राह्मम्; K$_2$ D$_5$ अहर्ब्राह्मम्;
ब्राह्मम्; K$_4$ D$_{1-3}$ अहर्ब्राह्मयम्; T$_2$ G$_3$ अथो ब्राह्मम्.
K$_4$ °भुवने; D$_1$ °दिवसे; T$_2$ G °सदने (for °भवने).
B$_{1.3}$ D (except D$_{1-3.5}$) M$_1$ सर्वतः; B$_2$ सर्वत्र.
^{a}) Ś$_1$ K$_{1-3}$ अल्पावशिष्टं; B$_1$ पुण्यावशिष्टे; D$_5$
K$_4$ T$_2$ G$_{2-4}$ च (for तु). Ś$_1$ K$_{1.2}$ D$_{1-3.5}$ T$_1$
(for तदा).
^{a}) D$_1$ G$_{1.2.4}$ यज्ञः (for यज्ञ-). B$_4$ -प्रतिविधिः.
; T$_2$ G$_3$ तात (for पार्थ). — ^{b}) Ś$_1$ धर्म- (for
B$_1$ T$_2$ G$_{1-3}$ तदा (for तथा). — ^{c}) B$_1$ तत्र; B$_3$
for व्रत-).
^{b}) K$_4$ T G धनार्जनाः. D$_3$ (marg. *sec. m.*) तथा
ोजिनः. — ^{c}) B$_4$ क्षात्र° (for क्षत्र°). Ś$_1$ K$_2$ B$_4$
$_{.5}$ G$_4$ M चा° (for वा°). — ^{d}) T$_1$ G$_1$ M वर्तते
वर्तयन्ति). K$_{1.2}$ कृते गते; K$_4$ Dc D$_{1-3}$ युगे युगे;
as in text). $_2$ कृते युगे; T$_1$ G$_1$ M कलौ युगे; T$_2$
गक्षये (for गते युगे).
T$_1$ om. 27–28; M$_2$ om. (hapl.) 27. — ^{b}) K$_3$
ोदक°; K$_4$ D$_{3.5}$ स्थालीपाक°; B$_{2.3}$ Dc Dn D$_{4.6}$
न°. — ^{c}) A few MSS. °भक्ष्या°. — ^{d}) Ś$_1$ K

D$_{1-3.5}$ M$_1$ भवंतीह; B$_4$ भवंति हि (for भविष्यन्ति). Ś$_1$ K$_{1.2}$ B$_4$ D$_{2.3}$ (marg. *sec. m.* as in text). $_5$ गते युगे; K$_4$ D$_1$ युगे युगे; G$_1$ (*sup. lin.* as in text) युगक्षये (for कलौ युगे).

28 T$_1$ om. 28 (cf. v.l. 27). — ^{a}) Ś$_1$ K D$_{1-3.5}$ चापि; G$_1$ चैव; M$_2$ तत्र (for तात). — ^{b}) Ś$_1$ K$_3$ D$_{1.2}$ M जप्य°; K$_4$ D$_5$ जाप्य°; G$_{2.4}$ (*inf. lin.* जप° as in text) जीव°. G$_1$ नित्यं शूद्रप°. — ^{c}) B$_4$ विपरीतं; M °रीतस्. T$_2$ G$_{2-4}$ तथा (for तदा). Ś$_1$ K$_{1.2}$ काले; G$_1$ रूपे; M लोकः (for लोके). — ^{d}) K$_4$ पूर्वं यद्यस्य तस्य तत्; G$_1$ °रूपे क्षये नृप; G$_2$ °रूपं गमिष्यति.

29 ^{b}) Ś$_1$ K$_{1.2}$ भरतर्षभ; K$_{3.4}$ D$_{1-3.5}$ मनुजर्षभ. — ^{c}) B$_{1-3}$ D (except D$_{1-3}$) मृषा° (for मिथ्या°). — ^{d}) Ś$_1$ मिथ्या-; D$_5$ नृपा (for मृषा-).

30 ^{a}) K$_{1.2.4}$ B Dc$_2$ D$_{2.3}$ M अंध्राः. D$_5$ सुह्माः (for शकाः). — ^{b}) Ś$_1$ K D$_{1-3.5}$ T$_1$ G$_{1.2}$ °धिप (for °धिपाः). — G$_4$ om. 30^{cd}. — ^{c}) Ś$_1$ K$_{1.2}$ कांभोजाः. B Dc Dn D$_{4.6}$ T$_2$ (after corr.) G$_3$ बाह्लिकाः; D$_5$ उंध्रकाः; T$_1$ G$_1$ कुणिकाः; T$_2$ (before corr.) G$_2$ सिणिकाः; M$_1$ औदकाः; M$_2$ दौर्णिकाः (for और्णिकाः). Ś$_1$ K$_1$ शुद्रास्; B D (except D$_{1-3.5}$) T$_2$ (after corr.) G$_3$ शूरास् (for शूद्रास्). — ^{d}) Ś$_1$ K$_{1.2.4}$ B$_1$ D$_5$ चीना; B$_2$ भुवि; T$_1$ वीरा; T$_2$ (before corr.) G$_2$ हीना (for [आ]भीरा). B$_1$ T$_2$ (before corr.) G$_2$ नरोत्तमाः; D$_5$ नराधिप. — After 30, B$_3$ ins.:

921* युगान्ते मनुजव्याघ्र तथाकाराश्च भारत ।

31 ^{a}) G$_4$ दाता (for तदा). — ^{b}) K$_3$ सुधर्मम्; D$_{1.2}$ स्वधर्मान् (for स्वधर्मम्). Ś$_1$ K$_{1.2.4}$ D$_{1.3.5}$ अनु° (for

C. 3. 12841
B. 3. 188. 37
K. 3. 191. 36

क्षत्रिया अपि वैश्याश्च विकर्मस्था नराधिप ॥ ३१
अल्पायुषः स्वल्पबला अल्पतेजःपराक्रमाः ।
अल्पदेहाल्पसाराश्च तथा सत्याल्पभाषिणः ॥ ३२
बहुशून्या जनपदा मृगव्यालावृता दिशः ।
युगान्ते समनुप्राप्ते वृथा च ब्रह्मचारिणः ।
भोवादिनस्तथा शूद्रा ब्राह्मणाश्चार्यवादिनः ॥ ३३
युगान्ते मनुजव्याघ्र भवन्ति बहुजन्तवः ।
न तथा घ्राणयुक्ताश्च सर्वगन्धा विशां पते ।
रसाश्च मनुजव्याघ्र न तथा स्वादुयोगिनः ॥ ३४
बहुप्रजा ह्रस्वदेहाः शीलाचारविवर्जिताः ।
मुखेभगाः स्त्रियो राजन्भविष्यन्ति युगक्षये
अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः ।
केशशूलाः स्त्रियो राजन्भविष्यन्ति युगक्षये
अल्पक्षीरास्तथा गावो भविष्यन्ति जनाधि
अल्पपुष्पफलाश्चापि पादपा बहुवायसाः ॥
ब्रह्मवध्यावलिप्तानां तथा मिथ्याभिशंसिना
नृपाणां पृथिवीपाल प्रतिगृह्णन्ति वै द्विजा
लोभमोहपरीताश्च मिथ्याधर्मध्वजावृताः ।
भिक्षार्थं पृथिवीपाल चञ्चूर्यन्ते द्विजैर्दिशः
करभारभयात्पुंसो गृहस्थाः परिमोषकाः ।

उप°). — ^{c}) G$_{1.4}$ क्षत्रियाणि (for क्षत्रियाः). K$_{1.4}$ B Dc Dn D$_{1.2.4-6}$ चापि; K$_3$ D$_3$ T G$_{2.3}$ M ह्यपि (for अपि). T G$_{2-4}$ शूद्रा°; G$_1$ शूरा° (for वैश्या°).

32 ^{a}) K$_3$ D$_{2.3}$ G$_{2.4}$ M त्वल्प° (for स्वल्प°). — ^{b}) Ś$_1$ K$_3$ स्वल्पतेजाः प°; K$_{1.2.4}$ D$_{1-3.5}$ स्वल्पतेजः प°; B$_{1-3}$ Dc Dn D$_{4.6}$ स्व(Dc$_2$ अ)ल्पवीर्यपराक्रमाः (B$_3$ °यणाः). — ^{c}) K$_4$ B Dn D$_{4.6}$ अल्पसाराल्पदेहाश्च; Dc °साराश्च देहाश्च. — ^{d}) Dc अल्पसत्त्वाल्प°; G$_1$ अल्पसत्याल्प°.

33 K$_2$ om. 33^{abcd}. — ^{a}) G$_{1.2}$ M$_1$ रत्न- (for बहु-). B$_4$ D$_4$ -मूल्या (for -शून्या). — ^{b}) G$_{2.4}$ बहु- (for मृग-). Ś$_1$ K (K$_2$ om.) D$_{2.3}$ °र्दिता; D$_5$ °न्विता (for °वृता). — T$_1$ om. 33^{cdef}. — ^{c}) S (T$_1$ om.) मनुजव्याघ्र (for सम°). — ^{d}) =41^{d}. Dn D$_{4.6}$ ब्रह्मवादिनः. — ^{f}) K$_{1.2}$ चौर्य°; D$_2$ स्वार्थ°; D$_3$ त्वर्थ°; T$_2$ G$_{2-4}$ नार्य° (for चार्य°).

34 Ś$_1$ K$_1$ D$_1$ om. (hapl.) 34^{bcde}. — ^{c}) T$_2$ (after corr.) तदा (for तथा). K$_4$ ब्राह्मणा युक्ताः (for घ्राणयुक्ताश्च). D$_3$ तु (for च). — ^{d}) D$_2$ सर्वे; G$_1$ बहु- (for सर्व-). B$_2$ वनस्पतौ (for विशां पते). G$_4$ *repeats* here 32^{d} (for 34^{d}). — ^{f}) Ś$_1$ K$_{1.2}$ साधु- (for स्वादु-). S बीजं च परिहीयते.

35 ^{a}) K$_4$ तथा लोकाः; D$_3$ M$_1$ स्वल्पदेहाः (for ह्रस्वदेहाः). — ^{c}) K$_{2.3}$ भगमुख्याः; D$_{1.2}$ सुखे रताः (for मुखेभगाः). Ś$_1$ K$_1$ भोगमोक्षाक्षयो राजन्; T$_2$ G$_3$ सुखक्षीरास्तथा गावो. — ^{d}) Ś$_1$ K$_{1.2}$ भवंतीह (for भवि°). T$_2$ G$_3$ जनाधिप (for युग°).

36 =(var.) 3. 188. 51. — T$_2$ G$_3$ om. (hapl.) 36^{a}–37^{b}. — ^{a}) Ś$_1$ K$_1$ °शीला (for °शूला). — ^{b}) Ś$_1$ K$_{1.2}$ शि(Ś$_1$ श)वशीला°. — ^{c}) G$_{1.2.4}$ सर्वा; M$_2$ चैव (for राजन्). Ś$_1$ K Dc$_2$ D$_{1-3.5}$ T$_1$ प्रमदाः (T$_1$ योषितः) केशशूलाश्च (Ś$_1$ °शीलाश्च; K$_{1.4}$ D$_5$ °शूलिन्यो;
न्यो). — ^{d}) G$_{2.4}$ कलौ युगे (for युग°). Ś$_1$
युगसंक्षये. — After 36, G$_1$ ins. (the gloss

922* अट्टमन्नमिति प्राहुः शूलं विक्रयमुच्यते ।
वेदः शिवमिति प्रोक्तं ब्राह्मणाश्च चतुष्पथ
केशो भग इति प्रोक्तस्तं विक्रीयैव भुञ्ज

These lines occur (with v.l.) in Nīlakaṇṭh
tary!

37 G$_1$ om. 37–38; T$_2$ G$_3$ om. 37^{ab} (
— ^{b}) Ś$_1$ K$_{1.2}$ भवंतीह (for भवि°). Ś$_1$
नराधिप; B$_4$ युगक्षये (for जना°). — ^{c}) Ś$_1$
चैव (for चापि). — ^{d}) S (G$_1$ om.) बहुशा

38 G$_1$ om. 38 (cf. v.l. 37). —
°हत्याव°; B Dc Dn D$_{1.4.6}$ °वध्यानु° (B$_1$
D$_2$ °हत्याभि°; T$_1$ °वध्योत्र°; T$_2$ G$_{2-4}$ °विद्योप°
(for °वध्याव°). — ^{b}) K$_{1.3}$ D$_5$ °भिशासिनां;
°नुशा(T$_2$ G$_3$ °नुशं)सिनां. — ^{c}) M$_2$ नृपशार्दूल
— ^{d}) K$_{3.4}$ D$_{2.3}$ M च; T$_1$ ते (for वै).

39 ^{b}) T$_1$ °ध्वजव्रताः. — ^{c}) K$_2$ भक्ष्यार्थं
K$_4$ पृथिवीं सर्वां; D$_4$ पृथिवीपालं. — ^{d}) B$_1$
चञ्चूर्यन्ते as in text). K B$_1$ (m as in te
(before corr.) G M द्विजा दिशः; D$_5$
द्विजातयः.

40 ^{a}) G$_{1.2}$ °हार- (for °भार-). T$_2$
G$_{2.4}$ -भयाः (for -भयात्). K$_3$ D$_5$ पुंभिः
D$_{1.4.6}$ T$_2$ (after corr.) G$_3$ भीता; D$_3$ पुंसां
— ^{b}) K$_{1-3}$ D$_3$ गृहस्थ-; D$_5$ M गार्हस्थ्य-.
षकाः; K$_2$ B$_3$ °मोचकाः; K$_3$ °मोषकैः; B$_1$ °शोध
काः; D$_3$ °मोहकैः; D$_5$ °पोषकैः; S °मोक्षकाः

च्छद्माकृतिच्छन्ना वाणिज्यमुपजीवते ॥ ४०
पा च नखरोमाणि धारयन्ति नरास्तदा ।
ोभान्नरव्याघ्र वृथा च ब्रह्मचारिणः ॥ ४१
मेषु वृथाचाराः पानपा गुरुतल्पगाः ।
ौकिकमीहन्ते मांसशोणितवर्धनम् ॥ ४२
ापण्डसंकीर्णाः परान्नगुणवादिनः ।
मा मनुजव्याघ्र न भवन्ति युगक्षये ॥ ४३
ुवर्षी भगवान्न तथा पाकशासनः ।
दा सर्वबीजानि सम्यग्रोहन्ति भारत ।
फलमत्यर्थं तदा भवति चानघ ॥ ४४

तथा च पृथिवीपाल यो भवेद्धर्मसंयुतः ।
अल्पायुः स हि मन्तव्यो न हि धर्मोऽस्ति कश्चन ॥ ४५
भूयिष्ठं कूटमानैश्च पण्यं विक्रीणते जनाः ।
वणिजश्च नरव्याघ्र बहुमाया भवन्त्युत ॥ ४६
धर्मिष्ठाः परिहीयन्ते पापीयान्वर्धते जनः ।
धर्मस्य बलहानिः स्यादधर्मश्च बली तथा ॥ ४७
अल्पायुषो दरिद्राश्च धर्मिष्ठा मानवास्तदा ।
दीर्घायुषः समृद्धाश्च विधर्माणो युगक्षये ॥ ४८
अधर्मिष्ठैरुपायैश्च प्रजा व्यवहरन्त्युत ।
संचयेनापि चाल्पेन भवन्त्याढ्या मदान्विताः ॥ ४९ C. 3. 12861 B. 3. 188. 57 K. 3. 191. 57

मुनिच्छद्मानुसंछन्ना. — ^{d}) K$_{1.3}$ D$_5$ °जीव्यते; K$_4$ s in text) D$_{2.3}$ °सेव्यते; B Dc Dn D$_{1.4.6}$ °जी- ; T$_1$ G$_1$ °युज्यते; T$_2$ G$_{2-4}$ °भुंजते; M$_1$ °सेवते.

1 ^{b}) N तदा (Ś$_1$ K$_{1.2}$ Dc$_2$ D$_{3.5}$ तथा; D$_6$ सदा) ; T$_1$ M$_1$ नरास्तथा; G$_{2.4}$ नराः सदा. — ^{c}) Ś$_1$ अल्प- ुज्ञतान्; K$_3$ अर्थलाभान्; B$_{1.2}$m S अन्नलोभान्. — ^{d}) Ś$_1$ D$_5$ मिथ्या च; K$_{1.2}$ B$_{2.3}$ Dc Dn D$_{1.4.6}$ च; B$_4$ चरंति (for वृथा च). Ś$_1$ K$_{1.2}$ ब्रह्मवादिनः.

2 ^{a}) K$_2$ व्रता°; T$_1$ दुरा° (for वृथा°). — ^{b}) T$_1$; T$_2$ G$_{2-4}$ मानवा; M$_2$ पानगा (for पानपा). — ^{c}) D (except D$_{1-3}$) T$_2$ (after corr.) G$_3$ इह° ऐह°). B$_1$ ईहंति; D$_{1.2}$ -कर्मांते; T$_1$ ईयंते (for). — ^{d}) B$_2$ °वर्धनाः. — After 42, D$_{1.2}$ S (except M$_2$) ins.:

23* पारलौकिककार्येषु प्रमत्ता भृशनास्तिकाः ।

[D$_{1.2}$ प्रसुप्ता (for प्रमत्ता). G$_4$ भृशमास्थिताः.]

13 ^{a}) Ś$_1$ K$_{1.2}$ °पाषांड°; G$_2$ °पाषाण°. — ^{b}) K$_{1.2}$ गुण°; T$_2$ G$_{2-4}$ परान्ना (G$_2$ °न्न-) बहु°. — ^{d}) Ś$_1$ K$_{1.2}$ ंति; K$_4$ B Dc Dn D$_{1.2.4.6}$ T$_2$ G$_3$ भविष्यंति (for वन्ति). K$_3$ D$_{3.5}$ T$_1$ G$_1$ M भवंति युगसंक्षये.

14 ^{a}) T$_1$ अकालवर्षी. — ^{b}) Ś$_1$ K$_{1-3}$ D$_{1.2}$ T$_2$ G$_{1-3}$ तदा (for तथा). — ^{c}) K$_4$ T$_1$ M$_2$ तथा; B Dc$_1$ Dn $_{2.4.6}$ चापि (for तदा). — ^{d}) K$_4$ समारोहंति; M रो°. — After 44^{cd}, N (except Ś$_1$ K$_{1.2}$) ins.:

हिंसाभिरामश्च जनस्तथा संपद्यतेऽशुचिः ।

D$_{1-3.5}$ तदा (D$_5$ मुदा) भवति भारत (for the erior half).]

On the other hand S ins. after 14:

25* फलं धर्मस्य राजेन्द्र सर्वत्र परिहीयते ।

[T$_1$ सफलं धर्मराजेंद्र (for the prior half). M$_2$ सर्वतः (for सर्वत्र).]

— ^{e}) K$_2$ इत्यर्थं; D$_5$ G$_{1.2}$ अत्यंतं (for अत्यर्थं). — ^{f}) K$_4$ T$_2$ G$_{3.4}$ M$_1$ तथा (for तदा). D$_{1.2}$ भारत (for चानघ).

45 ^{a}) B$_{1.3.4}$ D (except D$_{3.5}$) T G$_{3.4}$ M$_2$ तदा (for तथा). — ^{b}) Ś$_1$ K$_{1.2}$ °संहितः (for °संयुतः). — ^{c}) K$_2$ G$_1$ ह; D$_5$ च; M$_2$ तु (for हि).

46 ^{a}) T$_1$ गूढ° (for कूट°). — D$_2$ reads 46^{b}–47^{b} after 50^{a}. — ^{b}) K$_{1-3}$ G$_4$ M$_1$ पुण्यं; D$_3$ पण्यान्. K$_3$ Dc T$_2$ G$_3$ विक्रीयते; B$_2$ विक्रीडते. Dc Dn T$_1$ G$_1$ M$_1$ जनः; D$_1$ द्विजाः. — Ś$_1$ K$_1$ om. (hapl.) 46^{c}–47^{b}. — ^{d}) T$_1$ छद्म° (for बहु°). K$_3$ [अ]तः; G$_1$ च (for [उ]त).

47 Ś$_1$ K$_1$ om. 47^{ab} (cf. v.l. 46). For D$_2$, cf. v.l. 46. — ^{a}) T$_1$ विशिष्टाः (for धर्मिष्ठाः). — ^{b}) D$_3$ पापिष्ठो (for पापीयान्). — ^{c}) Ś$_1$ K$_{2.3}$ G$_1$ M$_2$ धर्मश्च (for °स्य). K$_{1-3}$ B$_1$ Dc D$_{3.5}$ S (except G$_1$ M$_1$) च (for स्याद्). — ^{d}) Ś$_1$ अधर्मी च; K$_{1.2}$ [अ]प्यधर्मी च; K$_3$ B$_1$ D$_{3.5}$ T$_2$ G$_3$ M$_2$ [अ]प्यधर्मश्च; Dc G$_{2.4}$ [अ]प्यधर्मस्य; T$_1$ ह्यधर्मस्य (for अधर्मश्च). B$_2$ D$_{1.2}$ बली तदा; Dc बलीयसा; T G$_{2-4}$ बलायतिः; G$_1$ M बलायते. B$_4$ अधर्मः प्रबलस्तदा.

48 B$_4$ transp. 48^{ab} and 48^{cd}. — ^{b}) K$_{1.2}$ B$_3$ D (except D$_{1-3.5}$) T$_1$ तथा (for तदा). — D$_4$ om. 48^{cd}. — ^{d}) B$_1$ अधर्माणां (for विध°). D$_5$ दिनक्षये. — After 48, B$_3$ Dn D$_{4.6}$ ins. (cf. 51^{c}, 48^{d}):

926* नगराणां विहारेषु विधर्माणो युगक्षये ।

49 B$_{2.4}$ om. (hapl.) 49^{a}–51^{b}. — ^{a}) Dc$_1$ अपायै° (for उपायै°). D$_3$ तु (for च). — ^{b}) Dc व्यवहरति; T$_1$ चान्वचरंति (for व्यवहरन्ति). Ś$_1$ M$_2$ च (for [उ]त).

81

C. 3. 12862
B. 3. 188. 57
K. 3. 191. 57

धनं विश्वासतो न्यस्तं मिथो भूयिष्ठशो नराः ।
हर्तुं व्यवसिता राजन्मायाचारसमन्विताः ॥ ५०
पुरुषादानि सत्त्वानि पक्षिणोऽथ मृगास्तथा ।
नगराणां विहारेषु चैत्येष्वपि च शेरते ॥ ५१
सप्तवर्षाष्टवर्षाश्च स्त्रियो गर्भधरा नृप ।
दशद्वादशवर्षाणां पुंसां पुत्रः प्रजायते ॥ ५२
भवन्ति षोडशे वर्षे नराः पलितिनस्तथा ।
आयुःक्षयो मनुष्याणां क्षिप्रमेव प्रपद्यते ॥ ५३
क्षीणे युगे महाराज तरुणा वृद्धशीलिनः ।
तरुणानां च यच्छीलं तद्वृद्धेषु प्रजायते ॥ ५४

विपरीतास्तदा नार्यो वञ्चयित्वा रहः पती
व्युच्चरन्त्यपि दुःशीला दासैः पशुभिरेव
तस्मिन्युगसहस्रान्ते संप्राप्ते चायुषः क्षये
अनावृष्टिर्महाराज जायते बहुवार्षिकी ॥
ततस्तान्यल्पसाराणि सत्त्वानि क्षुधितानि
प्रलयं यान्ति भूयिष्ठं पृथिव्यां पृथिवीप
ततो दिनकरैर्दीप्तैः सप्तभिर्मनुजाधिप ।
पीयते सलिलं सर्वं समुद्रेषु सरित्सु च ॥
यच्च काष्ठं तृणं चापि शुष्कं चार्द्रं च भ
सर्वं तद्भस्मसाद्भूतं दृश्यते भरतर्षभ ॥

—. D$_{5}$ om. 49^{c}–50^{b}. — ^{c}) K$_{1.4}$ B$_{1.3}$ D (except D$_{3}$; D$_{5}$ om.) तथा; G$_{1.4}$ [अ]सि च (for [अ]पि च). — ^{d}) K$_{1.4}$ B$_{1.3}$ Dn D$_{1.2.4.6}$ आढ्य- (for आढ्या).

50 B$_{2.4}$ om. 50; D$_{5}$ om. 50^{ab} (cf. v.l. 49). — After 50^{a}, D$_{2}$ reads 46^{b}–47^{b}. — ^{b}) Ś$_{1}$ K$_{1.2}$ इतो; B$_{1}$ S मिथ्या (for मिथो). D$_{1}$ M$_{2}$ °शोभनाः (for °शो नराः). — ^{c}) Dc$_{1}$ D$_{3}$ हंतुं (for हर्तुं). Ś$_{1}$ K$_{1-3}$ D$_{1-3.5}$ व्यवस्यंति तदा (for व्यवसिता राजन्). — ^{d}) Ś$_{1}$ मायामद-; K$_{2.4}$ B$_{3}$ D (except D$_{2.3.5}$) T$_{2}$ G$_{2-4}$ पापाचार- (for मायाचार-). D$_{5}$ समेधिताः (for -समन्विताः). — After 50, B$_{3}$ D (except D$_{1-3.5}$) ins.:

927* नैतदस्तीति मनुजा वर्तन्ति निरपत्रपाः ।

[B$_{3}$ Dn$_{1}$ वर्तंते (for वर्तन्ति). B$_{3}$ Dc निरुपद्रवाः (for निरप°).]

51 B$_{2.4}$ om. 51^{ab} (cf. v.l. 49). — ^{b}) G$_{2}$ [ऽ]थ ग्रहास्; G$_{4}$ [ऽ]धिग्रहास् (for ऽथ मृगास्). Ś$_{1}$ तदा (for तथा). — D$_{2}$ om. (? hapl.) from विहारेषु (in 51^{c}) up to °वर्षाणां (in 52^{c}). — ^{d}) K$_{3}$ न चैत्येष्वपि शेरते.

52 D$_{2}$ om. 52^{abc} (cf. v.l. 51). — ^{b}) B$_{4}$ °घृता (for °धरा). — ^{d}) T$_{2}$ G$_{2-4}$ प्रसू° (for प्रजा°). Ś$_{1}$ K B$_{4}$ D$_{1-3.5}$ पुंसां पुत्रा भवंति च.

53 ^{b}) T$_{2}$ G$_{2-4}$ पुत्राश् (for नराः). S च पलिता° (for पलितिन°). B$_{3}$ नराः पलितयौवनाः. — ^{c}) Ś$_{1}$ K$_{1.2}$ °क्षयं; M$_{1}$ °क्षये. — ^{d}) B$_{2}$ G$_{1}$ प्रजायते; Dc प्रवर्तते (for प्रप°).

54 Ś$_{1}$ K$_{1}$ om. (hapl.) 54. — ^{a}) K$_{4}$ B$_{1-3}$ D (except D$_{2.3.5}$) क्षीणायुषो (for क्षीणे युगे). — ^{b}) G$_{4}$ वृद्धशालिनः. — ^{c}) T$_{1}$ तच्छीलं; G$_{1}$ यद्वृत्तं. — ^{d}) K$_{2.3}$ B$_{1}$ Dc D$_{2.3}$ T$_{1}$ G$_{1}$ M [उ]प-; T$_{2}$ G$_{2-4}$ [अ]पि (for प्र-).

55 ^{a}) Ś$_{1}$ K$_{2.3}$ Dc D$_{2.3.5}$ G$_{1.2.4}$ M$_{2}$ तथा; M$_{1}$ ततो (for तदा). — Ś$_{1}$ K$_{1.2.4}$ D$_{1.2.5}$ 55^{bcd} and the prior half of line 1 of 928 the same in marg. *sec. m.* — ^{b}) K$_{4}$ om.) [अ]र्हतः (for रहः). G$_{1}$ परान् (for D$_{3}$ दुर्वाचश्च; T$_{1}$ विचरंति (for व्युच्चरन्ति). M$_{1}$) च (for [अ]पि). T$_{1}$ राजेंद्र (for दुःशील 55, N (Ś$_{1}$ K$_{1.2.4}$ D$_{1.2.5}$ om. the prior 1; D$_{5}$ reading the same in marg. *sec. m.*

928* वीरपत्न्यस्तथा नार्यः संश्रयन्ति नरान्
भर्तारमपि जीवन्तमन्यान्व्यभिचरन्त्यु

[(L. 1) K$_{3}$ D$_{3}$ तदा (for तथा). Ś$_{1}$ K$_{1}$ ंति; K$_{1}$ संगृह्यंति; Dc श्रयिष्यंति (for संश्रयन्ति B$_{1}$ (m as above) Dc नराधिप; B$_{4}$ तथा नरान् — (L. 2) Ś$_{1}$ K$_{1.2}$ उप- (for अपि). अन्यान्).]

56 ^{b}) K$_{3}$ D$_{5}$ T$_{2}$ G$_{2-4}$ च युग- (for चा T$_{1}$ G$_{1}$ M$_{1}$ शत° (for बहु°).

57 ^{a}) D$_{5}$ तद् (for तानि). — ^{b}) G क्षुधि°). K$_{4}$ B Dn$_{2}$. n$_{3}$ D$_{4.6}$ G$_{2}$ M$_{2}$ वै (f

58 ^{d}) D$_{2.5}$ सरःसु; M नदीषु (for सरित्

59 ^{a}) Ś$_{1}$ K$_{2.3}$ B$_{4}$ Dc D$_{1.2.5.6}$ T$_{1}$ चापि). — Ś$_{1}$ K$_{1}$ om. (hapl.) 59^{c}–60^{b}; — ^{c}) G$_{2}$ तत्सर्वं (by transp.). — ^{d}) M

☞ 3. 186. 60–77, 122^{cd}–129^{cd}; agree almost verbatim (barring some with Brahma Purāṇa (Ānandāśrama ed 53. 1^{ab}–14^{ab}; 56. 4–57.

60 Ś$_{1}$ K$_{1}$ om. 60^{ab} (cf. v.l. 59). — D$_{1-3.5}$ S वायुरग्निना (for वह्निर्वायुना).

संवर्तको वह्निर्वायुना सह भारत ।
माविशते पूर्वमादित्यैरुपशोषितम् ॥ ६०
स पृथिवीं भित्त्वा समाविश्य रसातलम् ।
दानवयक्षाणां भयं जनयते महत् ॥ ६१
हन्नागलोकं च यच्च किंचित्क्षिताविह ।
स्तात्पृथिवीपाल सर्वं नाशयते क्षणात् ॥ ६२
योजनविंशानां सहस्राणि शतानि च ।
हत्यशिवो वायुः स च संवर्तकोऽनलः ॥ ६३
वासुरगन्धर्वं सयक्षोरगराक्षसम् ।
दहति दीप्तः स सर्वमेव जगद्विभुः ॥ ६४
ततो गजकुलप्रख्यास्तडिन्मालाविभूषिताः ।
उत्तिष्ठन्ति महामेघा नभस्यद्भुतदर्शनाः ॥ ६५
केचिन्नीलोत्पलश्यामाः केचित्कुमुदसंनिभाः ।
केचित्किञ्जल्कसंकाशाः केचित्पीताः पयोधराः ॥ ६६
केचिद्धारिद्रसंकाशाः काकाण्डकनिभास्तथा ।
केचित्कमलपत्राभाः केचिद्धिङ्गुलकप्रभाः ॥ ६७
केचित्पुरवराकाराः केचिद्गजकुलोपमाः ।
केचिदञ्जनसंकाशाः केचिन्मकरसंस्थिताः ।
विद्युन्मालापिनद्धाङ्गाः समुत्तिष्ठन्ति वै घनाः ॥ ६८
घोररूपा महाराज घोरस्वननिनादिताः । C. 3. 12883 B. 3. 188. 78 K. 3. 191. 78

सह भारत). — ^{c}) T$_1$ वर्षशते (for आविशते). — ^{d}) K$_{1.2}$ भास्करैर् (for आदित्यैर्). Ś$_1$ K B$_2$ (m as in) D$_{1-3}$ उपतापितं; B$_3$ Dc T$_1$ G$_2$ M$_2$ उपशोभितं; B$_4$ शोधितं; D$_5$ परिवारितं.

61 ^{a}) Ś$_1$ K$_{1.2}$ च (for स). Ś$_1$ K$_2$ पृथिवी सर्वा पृथिवीं भित्त्वा). — ^{b}) K$_4$ B D (except D$_{1-3.5}$) श्य च (for समा°). — ^{c}) T$_1$ °मानुष° (for °दानव°). — ^{d}) K$_1$ B$_4$ महान् (for महत्).

62 ^{a}) D$_5$ यद् (for च). — ^{b}) D$_{1.2}$ कृता° (for ता°). — ^{c}) D$_5$ पृथिवीनाथ; S पृथिवीं राजन्. — ^{d}) G$_{2.3}$ सर्वान् (for सर्वं). S नाश(T$_1$ राज)यति.

63 ^{a}) K$_4$ D$_{1-3}$ °कोटीनां (for °विंशानां). Ś$_1$ K$_{1-3}$ योजनानां (K$_3$ येन नावां) समंताद्धि. — ^{c}) T G अशिरैः (for अशिवो वायुः). M निर्दह्यंतेशिवैर्घोरैः. — ^{d}) G$_{1.4}$ तथा; T$_2$ G$_{2.3}$ M तदा (for स च). Ś$_1$ K$_{1.2}$ र्तकोनलः; T G संवर्तकादिभिः (G$_1$ °कोंशुभिः); M ग्निभिः.

64 ^{a}) K$_3$ D$_{3.5}$ °गंधर्वं-. — ^{b}) D$_5$ °मानुषं. — ^{c}) $_3$ गर्जन्; M$_2$ जगद् (for ततो). B$_1$ D$_{1.2}$ दीप्तांशुः; Dc$_2$ T G दीप्तः सन्. B$_2$ ततः स दहते दीप्तः. — ^{d}) सर्वानेव दिवौकसः (G$_1$ विभावसुः).

65 ^{b}) K$_{3.4}$ D$_{1-3.5}$ तडिद्गुण-; T$_2$ G$_{2-4}$ विद्युज्ज्वाला- (for तडिन्माला-). Ś$_1$ K$_{1.2}$ -समन्विताः; B$_2$ -विभूषणाः (for -विभूषिताः). — ^{c}) Ś$_1$ K$_{1.2}$ उत्तिष्ठंते. Ś$_1$ K D$_{2.3.5}$ ा (Ś$_1$ गणा) राजन् (for महामेघा).

66 After 66^{ab}, T$_2$ ins.:

929* कारण्डकनिभाः केचित्केचिदिङ्गुलिकप्रभाः ।
[Cf. 67^{b} and 67^{d}.]

T$_1$ reads 66^{cd} after 68^{cd}. — ^{c}) B$_4$ हारिद्र°; T G कुंजर° (for किञ्जल्क°). — Ś$_1$ K$_2$ om. (hapl.) 66^{d}–67^{a}. — ^{d}) B$_{1-3}$ D$_2$ पीनाः; D$_3$ पीत- (for पीताः). D$_5$ केचिद्विमलवत्प्रभाः; M$_2$ केचिन्मकरसंस्थिताः (=68^{d}).

67 T$_1$ reads 66^{c}–67^{d} after 68^{cd}. Ś$_1$ K$_3$ om. 67^{a} (cf. v.l. 66); B$_1$ G$_4$ om. 67^{ab}; D$_6$ om. 67. — ^{a}) T$_2$ G$_{2.3}$ द्विरदसंकाशाः; M$_1$ हरिद्रासदृशाः; M$_2$ कुंजरसंकाशाः. — ^{b}) T$_1$ om. 67^{b}. B$_2$ Dc$_2$ D$_{2.3}$ T$_2$ G$_{2.3}$ कारंडवनिभास्. B$_4$ परे; T$_2$ G$_3$ तदा (for तथा). G$_1$ केचिन्मकरसंनिभाः; M$_1$ केचित्काकनिभास्तथा; M$_2$ केचित्कारंडवप्रभाः. — After 67^{ab}, M$_2$ ins.:

930* केचिद्दारिद्र्यसंकाशाः केचित्पीताः पयोधराः ।
[= (var.) 66^{cd}.]

— ^{c}) G$_1$ कुरंदकनिभाः केचित्. — ^{d}) T$_1$ om. 67^{d}. K$_4$ B$_{3.4}$ Dc Dn D$_{4.6}$ हिंगुलसप्रभाः; B$_1$ किंशुकसप्रभाः; B$_2$ D$_1$ हिंगुलसंनिभाः; T$_2$ G$_{2-4}$ अंकुरितप्रभाः; G$_1$ M$_1$ हिंगुलिकप्रभाः; M$_2$ हि स्फटिकप्रभाः.

68 B$_1$ G$_4$ om. 68^{ab} (cf. v.l. 67). — ^{a}) B$_2$ केचित्केचित्प्लवाकाराः; D$_5$ केचिच्च तुहिनाकाराः. — ^{b}) Ś$_1$ अलिकुलो°; K$_2$ कूलोपमास्तथा; M$_2$ मरकतप्रभाः (for गजकुलो°). — M$_2$ om. 68^{cd}. — ^{c}) B$_4$ कुंजर° (for अञ्जन°). — ^{d}) Ś$_1$ K D$_{1-3.5}$ °वर्चसः (K$_3$ °धूसराः); B Dc Dn D$_{4.6}$ T$_2$ (by corr.) G$_3$ °संनिभाः (for °संस्थिताः). — After 68^{cd}, T$_1$ reads 66^{cd}, followed by 67. — G$_4$ om. 68^{ef}. — ^{e}) K$_3$ °निबद्धांगाः; K$_4$ °वदद्धांगाः; D$_3$ M$_1$ °विन(D$_3$ °विनि)-द्धांगाः. — ^{f}) B$_4$ तोयदाः; D$_5$ ते घनाः.

69 ^{a}) Ś$_1$ K$_{1-3}$ महत्तोयं (for महा°). — ^{b}) Dc$_2$ D$_3$ S (except T$_1$) °स्वर-; D$_5$ °रूप- (for °स्वन-). B Dc -निनादिनः; D$_{2.3}$ S -विनादिनः (G$_1$ °ताः). Ś$_1$ K$_{1-3}$ विमुंचंति नभोगताः. — ^{c}) D$_2$ S सर्वं (for सर्वे). — ^{d})

C. 3. 12883
B. 3. 188. 78
K. 3. 191. 79

ततो जलधराः सर्वे व्याप्नुवन्ति नभस्तलम् ॥ ६९
तैरियं पृथिवी सर्वा सपर्वतवनाकरा ।
आपूर्यते महाराज सलिलौघपरिप्लुता ॥ ७०
ततस्ते जलदा घोरा राविणः पुरुषर्षभ ।
सर्वतः प्लावयन्त्याशु चोदिताः परमेष्ठिना ॥ ७१
वर्षमाणा महत्तोयं पूरयन्तो वसुंधराम् ।
सुघोरमशिवं रौद्रं नाशयन्ति च पावकम् ॥ ७२
ततो द्वादश वर्षाणि पयोदास्त उपप्लवे ।
धाराभिः पूरयन्तो वै चोद्यमाना महात्मना ॥ ७३
ततः समुद्रः स्वां वेलामतिक्रामति भारत ।
पर्वताश्च विशीर्यन्ते मही चापि विशीर्यते ॥ ७४
सर्वतः सहसा भ्रान्तास्ते पयोदा नभस्तलम् ।
संवेष्टयित्वा नश्यन्ति वायुवेगपराहताः ॥ ७५
ततस्तं मारुतं घोरं स्वयंभूर्मनुजाधिप ।
आदिपद्मालयो देवः पीत्वा स्वपिति भार
तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
नष्टे देवासुरगणे यक्षराक्षसवर्जिते ॥ ७७
निर्मनुष्ये महीपाल निःश्वापदमहीरुहे ।
अनन्तरिक्षे लोकेऽस्मिन्भ्रमाम्येकोऽहमा
एकार्णवे जले घोरे विचरन्पार्थिवोत्तम ।
अपश्यन्सर्वभूतानि वैक्लव्यमगमं परम् ॥
ततः सुदीर्घं गत्वा तु प्लवमानो नराधिप
श्रान्तः क्वचिन्न शरणं लभाम्यहमतन्द्रित
ततः कदाचित्पश्यामि तस्मिन्सलिलसंप्लवे
न्यग्रोधं सुमहान्तं वै विशालं पृथिवीपते
शाखायां तस्य वृक्षस्य विस्तीर्णायां नरा

Ś$_1$ K$_3$ D$_{1-3.5}$ पूरयंति; Dn$_3$ D$_4$ व्यामुंचंति (for व्याप्नु°). G$_4$ नभस्थलं. — After 69, S ins.:

931* गर्जन्तः पृथिवीपाल पृथिवीधरसंनिभाः ।

70 ^{b}) T$_1$ सपत्तन°; G$_2$ °वनांतरा. — ^{c}) B$_1$ Dc आपूर्यत.

71 ^{b}) D$_5$ भरतर्षभ. B$_4$ घोरारावविराविणः. — ^{cd}) T$_2$ G पर्वतान् (for सर्वतः). B$_3$ प्लावयंतस्ते; D$_5$ प्रचरंत्याशु (for प्लाव°). D$_{2.5}$ नोदि° (for चोदि°). B$_1$ परुषाः सर्वतस्त्यक्ताः प्लावयंत्याशु चोदिताः (cf. v.l. 71^{cd}).

72 ^{a}) M महातोयं (for महत्तोयं). B$_1$ परमेष्ठिना वर्षमाणाः (hypermetric!). — ^{c}) B$_4$ अघोरम् (for सु°). Dc शीघ्रं (for रौद्रं).

73 ^{b}) Ś$_1$ K$_{1.2}$ तद्; G$_2$ तु (for ते). M$_2$ उपप्लुतां. B$_4$ पयोदास्तस्तरुर्महीं. — ^{c}) T$_2$ (before corr.) G$_{2.4}$ सूद° (for पूर°). — ^{d}) D$_2$ नोद्य° (for चोद्य°). Ś$_1$ K$_{1-3}$ B$_4$ द्योतमाना महास्वनाः.

74 ^{a}) Ś$_1$ K$_{1.2}$ समुद्राः. B$_4$ T$_2$ (before corr.) G$_{2.4}$ तां (for स्वां). — ^{b}) Ś$_1$ K$_{1.2}$ अतिक्रामंति. — ^{c}) B D (except D$_{1-3.5}$) विदी°; M [अ]पि दी° (for विशी°). — ^{d}) K$_4$ चापि विलीयते; B Dc Dn D$_{4.6}$ चाप्सु निमज्जति; D$_{1.2}$ च प्रतिशीर्यंते; D$_3$ चापि व्यलीयत; D$_5$ चापि व्यशीर्यत; G$_3$ M चापि विदीर्यंते.

75 ^{a}) S (except T$_2$ G$_3$) सह संभ्रांतास्. — ^{b}) D$_5$ transp. ते and पयोदाः. — ^{c}) D$_5$ संवेष्ट्य सद्यो नश्यंति. — ^{d}) Ś$_1$ K D (except D$_{1-3.5}$) °समाहृ(K$_2$ समाहि)ताः.

76 ^{a}) T$_2$ G$_{2-4}$ तत्सलिलं (for तं मारुतं
(for घोरं). — ^{b}) Ś$_1$ भूयो भूयो नराधिप. —
(except D$_{1-3.5}$) T$_2$ G$_{3.4}$ आदिः (for आदि°
T$_1$ सपदि; G$_2$ M$_1$ स्वपति. (for स्वपिति).

77 Ś$_1$ K$_{1.2}$ om. 77^{bc}. — ^{c}) K$_3$ Dc$_1$
(for नष्टे). K$_3$ D$_{1.3}$ T$_1$ G$_1$ °नरे (for °गणे).
K D$_{1-3.5}$ प्रण(K$_3$ D$_{1.3}$ °न)ष्टोरगराक्षसे.

78 Ś$_1$ K D$_{1-3.5}$ G$_1$ महाराज (for मही°
B$_2$ निःस्वाध्याय°. — ^{c}) B$_1$ T$_1$ अंतरिक्षे च; G
(for अनन्तरिक्षे). — ^{d}) K$_2$ भ्रमाम; K$_3$ भ्रा
क्रमामि; T$_1$ भ्राम्याम (for भ्रमामि). K$_{3.4}$ B$_1$
M आदितः; B$_{2.4}$ Dn D$_{4.6}$ आहतः; T G
आहृतः).

79 ^{a}) D$_4$ T$_2$ G$_{2-4}$ एकार्णव°. T$_1$ महा°
B$_1$ तत एकार्णवजले. — ^{d}) B$_1$ वैकृत्यम् (for वैक्ल
B D ततः (B$_1$ D$_2$ तदा; D$_5$ as in text) (for

80 ^{a}) B Dc Dn D$_{4.6}$ T G [अ]हं (for
B$_2$ नरोत्तम; Dc$_2$ रसाधिप (for नरा°). — ^{c})
T$_2$ G$_{2-4}$ क्लांतः (for श्रान्तः). — ^{d}) B$_4$ अरिंदम
न्द्रितः). S लब्धवानस्म्यनिंदित (T$_2$ [by corr.] G
G$_1$ °निंदितः).

81 ^{b}) B$_{1-3}$ D (except D$_{1-3.5}$) °संचये
°संनिधौ. — ^{c}) T$_2$ G$_{2-4}$ तु (for सु°). B$_2$ च

82 ^{b}) T$_1$ विस्तीर्णस्य. — ^{d}) K$_{2.4}$ °संभृते;
in text) °सेविते; B$_{2.4}$ D$_1$ G$_2$ M °संवृते. Ś$_1$ श

पृथिवीपाल दिव्यास्तरणसंस्तृते ॥ ८२
वेष्टं महाराज पूर्णेन्दुसदृशाननम् ।
पद्मविशालाक्षं बालं पश्यामि भारत ॥ ८३
मे पृथिवीपाल विस्मयः सुमहानभूत् ।
त्वयं शिशुः शेते लोके नाशमुपागते ॥ ८४
चिन्तयंश्चापि तं शिशुं नोपलक्षये ।
भव्यं भविष्यच्च जानन्नपि नराधिप ॥ ८५
पुष्पवर्णाभः श्रीवत्सकृतलक्षणः ।
ल्लक्ष्म्या इवावासः स तदा प्रतिभाति मे ॥ ८६
मामब्रवीद्बालः स पद्मनिभलोचनः ।
त्सधारी द्युतिमान्वाक्यं श्रुतिसुखावहम् ॥ ८७
मि त्वा परिश्रान्तं तात विश्रामकाङ्क्षिणम् ।
ण्डेय इहास्स्व त्वं यावदिच्छसि भार्गव ॥ ८८
अभ्यन्तरं शरीरं मे प्रविश्य मुनिसत्तम ।
आस्स्व भो विहितो वासः प्रसादस्ते कृतो मया ॥ ८९
ततो बालेन तेनैवमुक्तस्यासीत्तदा मम ।
निर्वेदो जीविते दीर्घे मनुष्यत्वे च भारत ॥ ९०
ततो बालेन तेनास्यं सहसा विवृतं कृतम् ।
तस्याहमवशो वक्त्रं दैवयोगात्प्रवेशितः ॥ ९१
ततः प्रविष्टस्तत्कुक्षिं सहसा मनुजाधिप ।
सराष्ट्रनगराकीर्णां कृत्स्नां पश्यामि मेदिनीम् ॥ ९२
गङ्गां शतद्रुं सीतां च यमुनामथ कौशिकीम् ।
चर्मण्वतीं वेत्रवतीं चन्द्रभागां सरस्वतीम् ॥ ९३
सिन्धुं चैव विपाशां च नदीं गोदावरीमपि ।
वस्वोकसारां नलिनीं नर्मदां चैव भारत ॥ ९४
नदीं ताम्रां च वेण्णां च पुण्यतोयां शुभावहाम् ।

C. 3. 12909
B. 3. 188. 104
K. 3. 191. 105

---

3 Ś$_1$ om. 83. — ^{a}) B$_2$ महीपाल (for महा°).) B D (except D$_{1-3.5}$) T$_2$ G$_3$ पद्मेंदु°. — ^{c}) B$_4$ शाक्षं; Dc$_2$ G$_1$ M$_1$ -पलाशाक्षं. K$_3$ प्रफुल्लपद्मशालाक्षं. T$_1$ om. 83^d–86^a.

4 T$_1$ om. 84 (cf. v.l. 83). — ^{a}) Ś$_1$ तं दृष्ट्वा मे ज. — ^{b}) B$_1$ °यः समपद्यत. — ^{c}) B$_1$ T$_2$ G$_{2-4}$ चायं त्व°). — ^{d}) Dc लोकनाश उपागते.

5 T$_1$ om. 85 (cf. v.l. 83). — ^{a}) Ś$_1$ तमसा. D$_2$ ानोपि; T$_2$ G$_{2-4}$ चिंतितश्चापि. — ^{c}) K$_{3.4}$ B D ept D$_{2.3.6}$) T$_1$ भविष्यं च. — ^{d}) B$_4$ महामते (for).

5 T$_1$ om. 86^a (cf. v.l. 83). — ^{a}) K$_3$ °वर्णांगः; G$_{1.3}$ M$_1$ °संकाशः; Dc °वर्णाभं; D$_2$ G$_{2.4}$ M$_2$ °संकाशं.) K$_2$ Dc D$_2$ G$_{2.4}$ M$_2$ °लक्षणं; K$_4$ B$_{2-4}$ Dn D$_{1.3-6}$ ः. — ^{c}) D$_2$ स्वयं (for साक्षाल्ल्). — ^{d}) D$_2$ तदा- भाति मे.

3 Before 88, B$_2$ ins. देवदेव उ°; D$_{1.2}$ ins. श्रीभ- वाच. — ^{a}) N (except Ś$_1$ D$_4$) T$_1$ त्वां (for त्वा).) B Dn D$_{4.6}$ ततो; D$_{1.2}$ तथा (for तात). — ^{c}) .2 Dc इहास त्वं; T$_2$ G$_{2-4}$ महासत्व (for इहास्स्व त्वं). Ś$_1$ इच्छामि (for इच्छसि).

^{a}) K$_4$ अनंतरं; B$_4$ अभ्यंतरे; Dc D$_4$ अभ्यंतर-. .6 M$_2$ शरीरे. D$_2$ शरीराभ्यंतरं मे त्वं. — ^{b}) B$_4$ निपुंगव. — ^{c}) Ś$_1$ K$_{1.2}$ त्वदर्थे; B$_4$ आस्यतां; D$_2$ शाश्वतो; T$_2$ G$_{2-4}$ आस्वेह; M$_1$ आस्व त्वं (for आस्स्व भो). T$_1$ G$_1$ M$_2$ विहितं वासं.

90 ^{a}) Ś$_1$ K$_{1.2}$ ततस्तनैव वालेन. — ^{c}) D$_{1.2}$ निर्वेदो (D$_1$ °दं) जीविताद्दीर्घान्. — ^{d}) Ś$_1$ मानुषत्वे च; K$_{1.2}$ मनुष्यत्वे च; D$_{1.2}$ मानुष्याच्चैव; M$_2$ मनुष्यत्वेन.

91 ^{a}) Ś$_1$ K$_{1.2}$ अथ (for आस्यं); see below. — ^{b}) K$_3$ Dn$_2$. n$_3$ T$_2$ (before corr.) G$_{2.4}$ विकृतं; B$_2$ संविदं; Dn$_3$m D$_4$ विस्तृतं (for विवृतं). Ś$_1$ K$_{1.2}$ महदास्यं विकासितं (see above). — ^{c}) K$_4$ B$_1$ अविशं (for अवशो). B D (except D$_{1-3.5}$) वक्त्रे. — ^{d}) B$_1$ वायुवेगात् (for दैवयोगात्). D$_{1.2}$ M मायया संप्र°.

92 ^{a}) B$_2$ प्रविष्टे. Ś$_1$ K D$_{2.3.5}$ तत्कुक्षौ; D$_1$ G$_4$ M$_2$ तं कुक्षिं. — ^{c}) K$_3$ D$_{1.2}$ सराष्ट्रां (for °ष्ट्र-).

93 ^{a}) K$_4$ शतह्रदां; D$_{2-4}$ शतद्रुतां (for शतद्रुं); see below. Ś$_1$ K$_2$ B$_1$ Dc D$_{3-6}$ शीतां; T$_2$ G$_3$ (see below) असितां (for सीतां). K$_4$ D$_{2-4}$ T$_2$ G$_3$ om. च. — ^{b}) Ś$_1$ K$_{1.2}$ चाथ (for अथ).

94 ^{b}) D$_{1.2}$ तथा (for अपि). — ^{c}) K$_2$ वशोकसारां; K$_3$ B$_1$ D$_3$ G$_1$ M$_1$ वस्वौक°; B$_3$ कांबोजमालां; D$_{1.2}$ विश्वौकसारां; M$_2$ वस्वेक°. — ^{d}) G$_1$ कावेरीं नर्मदां तथा; M$_2$ नर्मगां सुभगामथ.

95 D$_5$ om. 95^{ab}. — ^{a}) M$_1$ तापीं; M$_2$ वापीं (for ताम्रां). K B$_3$ Dc Dn D$_{3.4.6}$ T$_2$ (by corr.) G$_3$ वेणां; B$_1$ मुंडां; B$_{2.4}$ वेण्वां (for वेण्णां). D$_{1.2}$ ताम्रां च कृष्णवेणां च; T$_1$ नदीं वापीं च बण्णां च; T$_2$ (before corr.) G$_{2.4}$

C. 3. 12909
B. 3. 188. 104
K. 3. 191. 105

सुवेणां कृष्णवेणां च इरामां च महानदीम् ।
शोणं च पुरुषव्याघ्र विशल्यां कंपुनामपि ॥ ९५
एताश्चान्याश्च नद्योऽहं पृथिव्यां या नरोत्तम ।
परिक्रामन्प्रपश्यामि तस्य कुक्षौ महात्मनः ॥ ९६
ततः समुद्रं पश्यामि यादोगणनिषेवितम् ।
रत्नाकरममित्रघ्न निधानं पयसो महत् ॥ ९७
ततः पश्यामि गगनं चन्द्रसूर्यविराजितम् ।
जाज्वल्यमानं तेजोभिः पावकार्कसमप्रभैः ।
पश्यामि च महीं राजन्काननैरुपशोभिता
यजन्ते हि तदा राजन्ब्राह्मणा बहुभिः स
क्षत्रियाश्च प्रवर्तन्ते सर्ववर्णानुरञ्जने ॥ ९
वैश्याः कृषिं यथान्यायं कारयन्ति नरा
शुश्रूषायां च निरता द्विजानां वृषलास्तथा
ततः परिपतन्राजंस्तस्य कुक्षौ महात्मनः ।
हिमवन्तं च पश्यामि हेमकूटं च पर्वतम् ।
निषधं चापि पश्यामि श्वेतं च रजताचित

नदीं तां ताम्रपर्णीं (T$_2$ °र्णां) च; G$_1$ नदीं तापीं च पेण्णां च. — D$_{1.2}$ om. 95^{bc}. — ^{b}) Ś$_1$ K B$_{2.4}$ Dc D$_3$ वेत्रा(Dc मद्रा)-मपि च भारत; T$_1$ पद्मामपि च पांडव; T$_2$ G M$_1$ प(G$_1$ स)-रमामपि (M$_1$ °थ) पांडव; M$_2$ तुंगां पद्मावतीमपि. — ^{c}) Ś$_1$ तुवेण्णां; K$_1$ तुवेणां; K$_2$ तु[वे]ष्णां; K$_3$ तुयेणां; B$_1$ कु (m सु)-वेणां; B$_2$ सुवेण्वां; B$_4$ सुवर्णां; Dc सुवेमां; D$_3$ सुवेष्णां; D$_5$ भूवेष्णां (for सुवेणां). Ś$_1$ कृष्णवेण्णां च; B$_{1.4}$ °वर्णां च; B$_2$ °वेण्वां च (for °वेणां च). T$_1$ तुंगबण्णां कृष्णबण्णां; T$_2$ G M$_1$ तुंगभद्रां कृष्णवेर्णीं (M$_1$ °ण्यां); M$_2$ तुंगवेण्णां कृष्णवेणां. — ^{d}) Ś$_1$ K$_{1.2}$ M$_2$ कयि(K$_2$ °य)मां च; K$_{3.4}$ D$_3$ कपिशां (K$_3$ °सां) च; B$_2$ इरां चैव; D$_5$ T$_2$ (by corr.) G$_3$ कपिलां च; T$_1$ G$_1$ कल(G$_1$ °लि)मां च; T$_2$ (before corr.) G$_{2.4}$ कमलां च (for इरामां च). M$_2$ शरावतीं (for महा°). D$_{1.2}$ M$_1$ कपिशा(M$_1$ कयिमा)मथ भारत. — After 95^{cd}, N (except K$_4$ Dc) T$_2$ (marg. *sec. m.*) M$_1$ ins.:

932* वितस्तां च महाराज कावेरीं च महानदीम् ।

[Ś$_1$ K$_{1.2}$ D$_{3.5}$ M$_1$ नरव्याघ्र; K$_3$ D$_2$ महाभाग (for महाराज). M$_1$ om. (hapl.) the posterior half and 95^{e}. T$_2$ सरितां वरां (for च महानदीम्).]

— M$_1$ om. 95^{e} (see above). — ^{e}) T$_1$ G$_{1.2.4}$ शोणां च. Dc$_2$ शोणं चैव नरव्याघ्र. — ^{f}) K$_2$ D$_{3.5}$ विशालां; B$_1$ वैशाल्यां (for विशल्यां). Ś$_1$ K$_{1.2}$ T$_1$ कंपनामपि; K$_3$ T$_2$ G M$_2$ कंबुना° (G$_4$ कंबुनी°); K$_4$ B Dc Dn D$_{1.4.6}$ किंपुना°; D$_2$ यमुना°; D$_5$ कर्बुरा°.

96 ^{a}) Ś$_1$ K D$_{1-3}$ नद्यो वै; B$_1$ या नद्यः; D$_5$ सरितः (for नद्योऽहं). — ^{b}) Ś$_1$ K D$_{1-3.5}$ राजसत्तम; B$_2$ मानवोत्तम; B$_4$ Dc$_2$ या नराधिप; T$_1$ G$_{2.4}$ वा नरोत्तम. — ^{c}) Ś$_1$ परिक्राम्यत्; G$_4$ °क्रमान्; M °क्रमन्. — ^{d}) Ś$_1$ K D$_{1-3.5}$ transp. तस्य and कुक्षौ.

97 ^{ab}) Ś$_1$ K B$_4$ D$_{1-3.5}$ समुद्रं पुरुष(Ś$_1$ K$_{1.2}$ च नर-; B$_4$ मनुज)व्याघ्र भीमनक्रसमाकुलं. — G$_4$ om. 97^{cd}. — ^{d}) Ś$_1$ K$_{1-3}$ D$_5$ पयसां (for पयसो). B Dc Dn D$_{1.2.4.6}$ पयसो (D$_{1.2}$ °सां) निधिमुत्तमं.

98 ^{a}) B$_{2-4}$ Dc$_1$ Dn$_1$. n$_2$ D$_4$ तत्र (for तत D$_{1.3}$ नगरं (for गगनं). — ^{b}) D$_5$ transp. चंद्र — After 98^{ab}, K$_3$ *repeats* 96^{cd}. — ^{d}) B$_4$ °कार्क-). B$_{1-3}$ D (except D$_{2.3.5}$) T$_1$ G$_{3.4}$ -समप्रभं. — ^{e}) Ś$_1$ K$_2$ D$_3$ T$_1$ महा — ^{f}) Ś$_1$ D$_3$ °शोभितं. — After 98, S ins.:

933* सपर्वतवनद्वीपां निम्नगाशतसंकुलाम् ।

[T$_1$ °वनोद्देशां (for °वनद्वीपां), and °कुल° (for

99 ^{a}) D$_5$ च (for हि). Ś$_1$ K$_4$ D$_3$ T$_1$ मह D$_5$ सदा राजन्; T$_2$ G$_3$ M$_1$ तथा रा°; G$_{1.2.4}$ ततो G$_1$ पशुभिः (for बहु°). B D (except D$_{1-3}$ G$_1$ सह (for सर्वैः). — ^{d}) G$_1$ M$_2$ सर्वै (for स (except D$_{1-3.5}$) °रंजनैः.

100 ^{a}) G$_1$ महाराज (for यथा°). — णायां; T$_1$ शुश्रूषणे च. — ^{d}) B$_{2-4}$ Dn D$_{4.6}$ तदा

101 ^{a}) K$_4$ परिपतद्; B$_1$ स पर्यटन् (m as Dn$_3$m परिभ्रमन्. — ^{b}) Ś$_1$ K D$_{1-3.5}$ trans कुक्षौ. — ^{c}) D$_3$ प्र- (for च). — Ś$_1$ B$_2$ o 101^{d}–102^{a}. The sequence in D$_{1.2}$ (afte as follows: 104^{d}–106^{b}, 103^{c}–104^{c}, 101^{d}–10 — ^{d}) B$_4$ भारत (for पर्वतम्). T$_1$ विंध्यं च

पतिव्रताया माहात्म्यं ब्राह्मणस्य च सत्तम ।
मातापित्रोश्च शुश्रूषा व्याधे धर्मश्च कीर्तितः ॥ ३२

युधिष्ठिर उवाच ।

अत्यद्भुतमिदं ब्रह्मन्धर्माख्यानमनुत्तमम् ।
सर्वधर्मभृतां श्रेष्ठ कथितं द्विजसत्तम ॥ ३३
सुखश्रव्यतया विद्वन्मुहूर्तमिव मे गतम् ।
न हि तृप्तोऽस्मि भगवञ्शृण्वानो धर्ममुत्तमम् ॥ ३४

C. 3. 14099
B. 3. 216. 37
K. 3. 219. 38

इति श्रीमहाभारते आरण्यकपर्वणि षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥

शोचामि). T_2 $G_{1.2.4}$ M_2 पापान्निवृत्तश्च सदा. — ^{d}) K_3 ज्ञानतुष्टो°; B_3 °दृष्टो°; T_2 $G_{2.4}$ °वृद्धो°; G_1 अज्ञानाप्तो°. $Ś_1$ $K_{1.4}$ D_2 धर्मतः (for °वित्).

28 ^{a}) $Ś_1$ आपृच्छेद्वा. $K_{1.2}$ G_4 M त्वा (for त्वां). — ^{b}) B Dn $D_{1.4.6}$ $G_{1.3}$ त्वां (for त्वा). $Ś_1$ K Dc Dn_3 $D_{1-3.5}$ अभि° (for परि°). — ^{c}) K_3m न प्रमाद°. $Ś_1$ $K_{1.2.4}$ Dc Dn_3 D_{1-3} च (for तु).

29 ^{a}) K_3 $D_{1.3}$ विप्रं (for व्याधः). — ^{b}) $Ś_1$ K B_4 $D_{1-3.5}$ अभाषत (for उवाच ह). — ^{c}) M_1 तु तं (for अथो). K_4 $D_{2.3}$ प्रदक्षिणीकृतस्तेन. — ^{d}) $Ś_1$ $K_{1.2}$ प्रस्थितं. $Ś_1$ $K_{1.2}$ $D_{4.5}$ द्विजसत्तमं; K_3 D_1 °म.

30 ^{a}) K_3 D_2 सर्व-; B_{1-3} Dc Dn_3 सर्वाः; D_3 तेषां; D_5 सर्वं (for सर्वां). G_1 गत्वा गृहं द्विजश्रेष्ठः. — ^{b}) $B_{2.3}$ Dc Dn_3 शुश्रूषाः. $D_{1.3.5}$ सदा; G_1 तु सः (for तदा). — ^{c}) T $G_{2.4}$ M_2 अंधाभ्यां; G_1 धर्माभ्यां; M_1 धर्मात्मा (for वृद्धा°). — ^{d}) K_1 यथान्याय्यं. $Ś_1$ $K_{1.2}$ महामतिः; K_3 Dn_1. n_3 (after corr.) $D_{2.6}$ सुशंसितः; K_4 B_3 Dn_2 D_3 सुसंयतः; B_4 G_1 (before corr.) °स्थितः; T °श्रितः; G_2 °हितः; M_1 समाहितः. D_1 सर्वैरप्यभिनंदितः.

31 G_1 om. 31–32. — ^{c}) $Ś_1$ K_{1-3} $B_{3.4}$ Dc Dn_3 $D_{1-3.5}$ T $G_{2.4}$ यत् (for यं). B_1 तावद् (for तात). — ^{d}) M सर्व- (for धर्मं). Dc D_4 वरः (for वर).

32 G_1 om. 32 (cf. v.l. 31). — ^{c}) T_1 °पितृभ्यां (for °पित्रोश्च). Dc Dn_3 तु (for च). — ^{d}) N G_3 धर्मव्याधेन ($B_{1.4}$ °धस्य) कीर्तिता.

33 ^{b}) T_2 धर्मज्ञानम् (for धर्माख्यानम्). $Ś_1$ $K_{1.2}$ धर्मव्याधेन भार्गव; B_3 G_1 धर्ममाख्यानमुत्तमं. — ^{c}) B D (except $D_{1-3.5}$) G_3 °विदां (for °भृतां). — ^{d}) $K_{2.4}$ B D (except $D_{1.3}$) G_3 मुनिसत्तम; M ते द्विजोत्तम.

34 K_2 om. 34. — ^{a}) K_4 Dn_2 $D_{1.5}$ T $G_{1.2.4}$ M सुख(B_4 °खं)श्राव्यतया (T_2 °व्यं त्वया). $Ś_1$ $K_{1.3.4}$ $B_{1.2}$ Dc $D_{1-3.5}$ G_1 ब्रह्मन्; B_4 विप्र (for विद्वन्). — ^{b}) B Dn_1. n_2 $D_{4.6}$ G_3 M मुहूर्त इव मे गतः.

Colophon. — *Major parvan:* K_2 T_2 $G_{2.4}$ आरण्य. — *Sub-parvan:* G_1 मार्कंडेयसमस्या. N T_1 G_3 M (all om. sub-parvan name) mention only पतिव्रतो(D_5 धर्मव्याधो)पाख्यान; to it K B_4 D T_1 G_3 M add समाप्त. — *Adhy. name:* G_1 धर्मव्याधकौशिकसंवादः; G_2 कौशिकव्याधसंवादे पतिव्रतामाहात्म्यकथनं. — *Adhy. no.* (figures, words or both): Dn_1 215; Dn_2 D_1 214; T G_1 M (M_2 *inf. lin.*) 209: $G_{2.4}$ M_2 (orig.) 211. — *Śloka no.:* Dn_1. n_2 37; D_1 36.

☞ After adhy. 206, $K_{1.4}$ D_{1-3} ins. (with transposition) a passage given in App. I (No. 21), which is ins. in some other MSS. after adhy. 190 (q. v.).

207

1 M om. 1. — ^{b}) D_2 शुभां कथां (by transp.). — ^{d}) $Ś_1$ K $D_{1-3.5}$ G_3 यशस्विनं; B_{1-3} Dn_1. n_2 $D_{4.6}$ इदं तदा (for तपस्विनम्).

२०७

C. 3. 14100
B. 3. 217. 1
K. 3. 220. 1

वैशंपायन उवाच।

श्रुत्वेमां धर्मसंयुक्तां धर्मराजः कथां शुभाम्।
पुनः पप्रच्छ तमृषिं मार्कण्डेयं तपस्विनम् ॥ १

युधिष्ठिर उवाच।

कथमग्निर्वनं यातः कथं चाप्यङ्गिराः पुरा।
नष्टेऽग्नौ हव्यमवहदग्निर्भूत्वा महानृषिः ॥ २
अग्निर्यदा त्वेक एव बहुत्वं चास्य कर्मसु।
दृश्यते भगवन्सर्वमेतदिच्छामि वेदितुम् ॥ ३
कुमारश्च यथोत्पन्नो यथा चाग्नेः सुतोऽभवत्।
यथा रुद्राच्च संभूतो गङ्गायां कृत्तिकासु च ॥ ४
एतदिच्छाम्यहं त्वत्तः श्रोतुं भार्गवनन्दन।
कौतूहलसमाविष्टो यथातथ्यं महामुने ॥ ५

मार्कण्डेय उवाच।

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
यथा क्रुद्धो हुतवहस्तपस्तप्तुं वनं गतः ॥ ६
यथा च भगवानग्निः स्वयमेवाङ्गिराभवत्।
संतापयन्स्वप्रभया नाशयंस्तिमिराणि च ॥ ७
आश्रमस्थो महाभागो हव्यवाहं विशेषयन्।
तथा स भूत्वा तु तदा जगत्सर्वं प्रकाशयन् ॥ ८
तपश्चरंश्च हुतभुक्संतप्तस्तस्य तेजसा।
भृशं ग्लानश्च तेजस्वी न स किंचित्प्रजज्ञिवान् ॥ ९
अथ संचिन्तयामास भगवान्हव्यवाहनः।
अन्योऽग्निरिह लोकानां ब्रह्मणा संप्रवर्तितः।
अग्नित्वं विप्रनष्टं हि तप्यमानस्य मे तपः ॥ १०
कथमग्निः पुनरहं भवेयमिति चिन्त्य सः।
अपश्यदग्निवल्लोकांस्तापयन्तं महामुनिम् ॥ ११
सोपासर्पच्छनैर्भीतस्तमुवाच तदाङ्गिराः।
शीघ्रमेव भवस्वाग्निस्त्वं पुनर्लोकभावनः।

---

2 ^{b}) Ś$_1$ K$_2$ om. च. K$_3$ Dc D$_5$ G$_1$ वा° (for चा°). Ś$_1$ तथा (for पुरा). — ^{d}) B$_{1-3}$ Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ °द्युतिः; B$_4$ T G$_{1.2.4}$ M °मुनिः (for °नृषिः).

3 ^{a}) S (except T$_1$ G$_3$) यथा (for यदा). B$_4$ G$_1$ एक; T$_2$ G$_{2.4}$ M चैक (for त्वेक). T$_1$ अग्निर्यदा हि चैवैको. — ^{c}) G$_4$ त्वत्त (for सर्वम्).

4 ^{b}) D$_2$ वा° (for चा°). — ^{c}) D$_2$ तथा (for यथा). — ^{d}) Dc कृत्तिकासुतः (for °सु च).

5 ^{ab}) Ś$_1$ K Dc Dn$_3$ D$_{1-3.5}$ transp. त्वत्तः and श्रोतुं. B Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ °सत्तम (for °नन्दन). — ^{c}) Ś$_1$ K$_{1.2}$ कौतूहलं संप्रविष्टो. — ^{d}) K$_{1.2}$ या(K$_2$ य)थातथ्यान्; K$_4$ B$_{1.2.4}$ Dc$_1$ Dn$_1$. n$_3$ D$_{2-4.6}$ T$_1$ G$_3$ M$_2$ याथातथ्यं; T$_2$ G$_{1.2.4}$ य(G$_1$ या)थातत्वं. — After 5, B$_2$ Dc Dn$_3$ ins.:

1047* वक्तुमर्हसि मे ब्रह्मन्नितिहासमिमं शुभम्।

7 ^{a}) K$_3$ D$_5$ तथा च; B$_3$ यथोक्तो; T$_2$ G$_2$ यथा हि (for यथा च). — ^{c}) B Dn D$_{1.4.6}$ G$_3$ च (for स्व-). — ^{d}) G$_{2.4}$ तिमिरावलिं (for °राणि च). — After 7, N (except B$_{2.3}$) G$_3$ ins.:

1048* पुराङ्गिरा महाबाहो चचार तप उत्तमम्।

[K$_3$ D$_5$ व्रतम् (for तप).]

8 ^{a}) S (except G$_3$) आश्रमस्थं. Ś$_1$ K$_2$ Dc ° (for °भागो). — ^{b}) Dc$_2$ Dn$_2$ D$_6$ G$_{1.3}$ विशेषयत् °यन्). — ^{c}) B$_2$ T$_2$ G$_2$ यथा; D$_3$ तदा; G$_4$ यदा तथा). K$_4$ B$_4$ भूत्वा तु स; G$_1$ तु भूत्वा स; G$_{2.4}$ [अ भूत्वा तु (for स भूत्वा तु). T$_1$ तथा भूत्वा तथा चा — ^{d}) B Dn$_1$. n$_2$ D$_{1.4.6}$ G$_3$ M$_1$ व्यकाशयत् (Dn$_2$ °यन्) (for प्रका°).

9 ^{a}) K$_{3.4}$ B$_{3.4}$ Dn D$_{1.3-6}$ G$_3$ तु; D$_2$ T$_1$ (for च). Dc तपश्चरन्हुतवहः. — ^{b}) T$_1$ सप्तार्चिश संतप्तस्). T$_1$ G$_4$ च सु-; T$_2$ G$_1$ M$_2$ च स्व- (for तस्य). — Ś$_1$ K Dc D$_{1-3.5}$ कृशो (for भृशं). K$_3$ लीनस्तु सानश्च (for ग्लान°). — ^{d}) K$_4$ B$_2$ Dn D$_{1-4.6}$ G$_3$ च स). T G$_{1.2.4}$ M न किंचित्प्रतिजज्ञिवान्.

10 ^{c}) Ś$_1$ K D$_{2.3}$ कोन्यो (for अन्यो). G$_{1.2}$ (for इह). — ^{d}) T G$_{2.4}$ ब्राह्मणः. B$_{1.2.4}$ Dn D$_{4.6}$ G$_3$ संप्रकल्पितः; Dc Dn$_3$ °कीर्तितः. — ^{e}) प्रविनष्टं; a few MSS. विप्रणष्टं. — ^{f}) K$_3$ T$_1$ ते (for D$_3$ तेजसा (for मे तपः).

11 ^{b}) K$_{3.4}$ Dc Dn$_3$ D$_{2.3.5}$ चिंतयन् (for

विज्ञातश्चासि लोकेषु त्रिषु संस्थानचारिषु ॥ १२
त्वमग्ने प्रथमः सृष्टो ब्रह्मणा तिमिरापहः ।
स्वस्थानं प्रतिपद्यस्व शीघ्रमेव तमोनुद ॥ १३
अग्निरुवाच ।
नष्टकीर्तिरहं लोके भवाञ्जातो हुताशनः ।
भवन्तमेव ज्ञास्यन्ति पावकं न तु मां जनाः ॥ १४
निक्षिपाम्यहमग्नित्वं त्वमग्निः प्रथमो भव ।
भविष्यामि द्वितीयोऽहं प्राजापत्यक एव च ॥ १५
आङ्गिरा उवाच ।
कुरु पुण्यं प्रजास्वर्ग्यं भवाग्निस्तिमिरापहः ।
मां च देव कुरुष्वाग्रे प्रथमं पुत्रमञ्जसा ॥ १६
मार्कण्डेय उवाच ।
तच्छ्रुत्वाङ्गिरसो वाक्यं जातवेदास्तथाकरोत् ।
राजन्बृहस्पतिर्नाम तस्याप्यङ्गिरसः सुतः ॥ १७
ज्ञात्वा प्रथमजं तं तु वह्नेराङ्गिरसं सुतम् ।
उपेत्य देवाः पप्रच्छुः कारणं तत्र भारत ॥ १८
स तु पृष्टस्तदा देवैस्ततः कारणमब्रवीत् ।
प्रत्यगृह्णंस्तु देवाश्च तद्वचोऽङ्गिरसस्तदा ॥ १९
अत्र नानाविधानग्नीन्प्रवक्ष्यामि महाप्रभान् ।
कर्मभिर्बहुभिः ख्यातान्नानात्वं ब्राह्मणेष्विह ॥ २०

C. 3. 14121
B. 3. 217. 21
K. 3. 220. 21

इति श्रीमहाभारते आरण्यकपर्वणि सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥

सः). — ^{c}) K$_3$ Dc D$_5$ सोपश्य° (for अपश्य°).

12 ^{a}) Dc T$_2$ G$_4$ M$_2$ सोपसर्पत्; T$_1$ सोपश्यत. Ś$_1$ ततो; K$_2$ तु तं; K$_3$ क्षणे (for शनैर्). — ^{b}) Ś$_1$ K$_{1.2}$ T$_3$ G$_1$ ततो° (for तदा°). — ^{d}) K$_2$ D$_{2.4}$ °भावन. — ^{e}) K$_{1.2}$ D$_5$ T$_2$ G$_{2.4}$ [अ]पि (for [अ]सि). — ^{f}) = 1. 179. 11^{d}. K$_{1.2}$ स(K$_2$ सं)स्थानुचारिषु; K$_3$ corrupt; K$_4$ M$_2$ सस्थाणु°; D$_{2.3.6}$ संस्थाणु°; G$_{2.4}$ स्थावर°; M$_1$ सस्थास्नु°. G$_1$ त्रिसंस्थानप्रचारिषु. Cf. B. 7. 10. 68; and P W *s.v.* संस्थानचारिन्.

13 ^{ab}) B Dn$_1$. n$_2$ D$_{4-6}$ G$_3$ अग्निः (for अग्ने). Ś$_1$ transp. प्रथमः and ब्रह्मणा. K$_4$ B Dn D$_{4.6}$ G$_{1.3}$ M$_1$ प्रथमं (for °मः). K$_2$ D$_4$ तिमिरापह. — After 13^{ab}, Dc reads 16^{cd}, *repeating* it in its proper place. — ^{c}) K$_{1.2}$ D$_6$ T M स्वं स्थानं; K$_{3.4}$ Dn$_2$ D$_2$ संस्थानं. — ^{d}) K$_2$ T$_2$ तमोनुदः.

15 ^{a}) K$_{1.2}$ विक्षेप्स्या° (for निक्षिपा°). — ^{d}) Ś$_1$ K$_{1.2}$ °पत्याग्निरेव च; B$_2$ °पत्यस्तथैव च; B$_4$ T G$_{1.2.4}$ M °पत्यस् (B$_4$ T$_2$ °पत्यं) तथैकतः.

16 K$_3$ om. 16^{ab}. — ^{a}) K$_{1.2}$ D$_6$ T$_1$ M$_2$ प्रजास्वग्र्यं; K$_4$ D$_{1.5}$ °सर्गं; D$_3$ °स्वर्गं; T$_2$ °सु त्वं; G$_{1.2}$ व्रजस्वाग्र्यं. — ^{b}) Ś$_1$ K$_2$ अग्ने (for अग्निस्). A few MSS. °पह. — ^{c}) K$_1$ देहं; B$_3$ Dc देवं (for देव). — ^{d}) B$_2$ ओजसा (for अञ्जसा).

17 ^{b}) Dn$_1$. n$_2$ D$_{4-6}$ G$_3$ तदा° (for तथा°). — ^{d}) K$_3$ तथा° (for तस्या°).

18 ^{a}) M$_1$ श्रुत्वा (for ज्ञात्वा). D$_2$ तु प्रथमं (for प्रथमजं). Ś$_1$ K$_1$ पुत्रं (for तं तु). — ^{b}) Ś$_1$ G$_1$ वह्निम् (for वह्नेर्). Ś$_1$ K$_3$ B$_{1.3}$ D$_{1.2.6}$ T$_1$ G$_{1.2}$ M$_2$ अंगिरसः (for आङ्गिरसं). — B$_2$ om. 18^{cd}; D$_2$ om. (hapl.) 18^{c}–19^{d}.

19 D$_2$ om. 19 (cf. v.l. 18). — ^{a}) G$_1$ ततो; G$_4$ तथा (for तदा). — ^{b}) G$_1$ तं तं (for ततः). — ^{c}) Ś$_1$ K$_{1.2}$ प्रतिगृह्य तु; K$_3$ D$_{3.5}$ S (except G$_3$) प्रत्यगृह्णंत. — ^{d}) Ś$_1$ तद्विधा°; B$_3$ तद्वाचा° (m तद्वचो° as in text). Ś$_1$ K$_{1.2}$ गताः; K$_3$ तथा (for तदा). K$_4$m सुतमंगिरसं तदा.

20 ^{a}) B Dn (Dn$_3$ marg.) D$_{1.4.6}$ G$_3$ तत्र (for अत्र). — ^{d}) K$_1$ B D (except D$_{1-3.5}$) G$_3$ नानार्थान् (for नानात्वं). K$_{3.4}$ Dc$_2$ D$_{1.2}$ [इ]ति; S (except G$_3$) [अ]पि (for [इ]ह).

Colophon. — *Major parvan:* Ś$_1$ K$_2$ T$_2$ G$_{1.2.4}$ आरण्य. — *Sub-parvan:* G$_1$ मार्कंडेयसमस्या (followed by आंगिरस). Ś$_1$ K B$_{2-4}$ D M$_2$ (all om. sub-parvan name) mention only आंगिरस. — *Adhy. name:* B$_1$ अंगिरसोत्पत्तिः; G$_2$ अंगिरसप्रजाकथनं. — *Adhy. no.* (figures, words or both); Dn$_1$ (*sup. lin.*) 216; Dn$_2$ 215; D$_1$ 219; T G$_1$ M (M$_2$ *inf. lin.*) 210; G$_{2.4}$ M$_2$ (orig.) 212. — *Śloka no.:* Dn$_1$. n$_2$ 22; D$_1$ 21.

208

1 ^{a}) Ś$_1$ K$_{2.3}$ D$_2$ T$_2$ G$_{1.3}$ ब्राह्मणो (for ब्र°). — ^{c}) Ś$_1$ K$_{2.3}$ B$_{1.4}$ Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ तस्याभवत् शुभा (Ś$_1$ K$_{2.3}$ सुता) भार्या; B$_{2.3}$ T$_1$ तस्यापि च शुभा भार्या; D$_3$ T$_2$

२०८

C. 3. 14122
B. 3. 218. 1
K. 3. 221. 1

मार्कण्डेय उवाच ।
ब्रह्मणो यस्तृतीयस्तु पुत्रः कुरुकुलोद्वह ।
तस्यापवसुता भार्या प्रजास्तस्यापि मे शृणु ॥ १
बृहज्ज्योतिर्बृहत्कीर्तिर्बृहद्ब्रह्मा बृहन्मनाः ।
बृहन्मन्त्रो बृहद्भासस्तथा राजन्बृहस्पतिः ॥ २
प्रजासु तासु सर्वासु रूपेणाप्रतिमाभवत् ।
देवी भानुमती नाम प्रथमाङ्गिरसः सुता ॥ ३
भूतानामेव सर्वेषां यस्यां रागस्तदाभवत् ।
रागाद्रागेति यामाहुर्द्वितीयाङ्गिरसः सुता ॥ ४
यां कपर्दिसुतामाहुर्दृश्यादृश्येति देहिनः ।
तनुत्वात्सा सिनीवाली तृतीयाङ्गिरसः सुता ॥ ५
पश्यत्यर्चिष्मती भाभिर्हविर्भिश्च हविष्मती ।
षष्ठीमङ्गिरसः कन्यां पुण्यामाहुर्हविष्मतीम् ॥ ६
महामखेष्वाङ्गिरसी दीप्तिमत्सु महामती ।
महामतीति विख्याता सप्तमी कथ्यते सुता ॥ ७
यां तु दृष्ट्वा भगवतीं जनः कुहुकुहायते ।
एकानंशेति यामाहुः कुहूमङ्गिरसः सुताम् ॥ ८

इति श्रीमहाभारते आरण्यकपर्वणि अष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥

G$_{2.4}$ तस्यापि वसुदा (D$_3$ °जा ; D$_{3m}$ *sec. m.* °भा ; G$_4$ °धा) भार्या ; D$_5$ तस्यैवाथाभवन्भार्याः ; G$_1$ तस्याभूद्वसुधा भार्या. ❀ Cn : सुष्ठु......भातीति सुभा । शुभा इति पाठेऽपि सैव ग्राह्या । ❀ — ^{d}) B$_{1-3}$ Dn D$_{4-6}$ G$_3$ तस्यां च मे ; Dc तस्यामिमे (for तस्यापि मे).

2 ^{a}) Ś$_1$ K D$_{2.3.5}$ प्राग्ज्योतिर्वै (for बृहज्ज्योतिर्). B$_{1-3}$ Dc Dn D$_{4.6}$ G$_3$ transp. °ज्ज्योतिर् and °त्कीर्तिर्. — T$_1$ om. 2^{b}–4^{a}. — ^{b}) G$_{2.4}$ बृहत्तेजा ; M$_2$ ब्रह्मन्ब्रह्मा (for बृहद्ब्रह्मा). — ^{c}) Ś$_1$ K$_{1.2.4}$ D$_{1-3}$ °त्पुत्रो (for °न्मन्त्रो). D$_2$ °द्भानुस ; M$_1$ °द्भासा (for °द्भासस्).

3 T$_1$ om. 3 (cf. v.l. 2). — ^{b}) D$_{3.4}$ °प्रतिमो° ; T$_2$ G$_{2.4}$ °नुपमो° (for °प्रतिमा°). — T$_2$ om. 3^{c}–5^{b}.

4 T$_1$ om. 4^{a} ; T$_2$ om. 4 (cf. v.l. 2, 3). — ^{a}) M$_2$ इह (for एव). — ^{b}) Ś$_1$ Dc$_1$ यस्या ; T$_1$ येषां (for यस्यां). G$_{2.4}$ तथाभवत् ; M$_1$ प्रवर्तते ; M$_2$ सदाभवत्. — ^{c}) Ś$_1$ K$_{1.2}$ रागो(Ś$_1$ °को)द्रेकेति ; D$_{2.3}$ G$_4$ M रागाद्राकेति. T$_1$ G$_{1.2}$ M$_2$ प्राहुर् (for आहुर्). — ^{d}) K$_4$ B$_4$ Dn$_1$. n$_2$ D$_{1.3.4.6}$ सुतां (for सुता).

5 T$_2$ om. 5^{ab} (cf. v.l. 3); D$_2$ om. (hapl.) 5. — ^{a}) K$_3$ कामंदि- ; K$_4$ कामधि- ; D$_1$ कामं हि ; D$_5$ कामदां ; M कपर्दी-. Ś$_1$ K$_{1.2}$ यां कर्दमीति वै प्राहुर्. — ^{c}) B$_1$ तत्र त्वसौ ; G$_4$ तनुत्वात्तां. B$_2$ D$_{1.5}$ शिनीवाली. — After 5, S reads 8.

6 G$_1$ om. 6^{ab}. — ^{a}) K$_4$ D$_3$ पश्यंती ; B$_{1.3}$ Dc Dn$_3$ D$_1$ चतुर्थी ; S (G$_1$ om.) पंचमी (for पश्यती). Ś$_1$ K$_{2-4}$ B$_{1.2}$ D$_{2.3}$ T M भाति ; B$_{3.4}$ ताभिर् ; G$_{2.4}$ नाम्ना (for भाभिर्). — D$_4$ om. (hapl.) from भाभिः (in ^{a}) up to °ष्मती (in ^{b}). — ^{b}) Ś$_1$ K$_{1.2}$ तु (for च). K$_{3.4}$ D$_{1-3}$ हविष्मद्भिर् (for हविर्भिश्च). K$_{2.3}$ हविष्मतीं. B$_{1.3}$ Dc Dn$_3$ दीप्तादीप्तिश्च पंचमी. — ^{c}) T G$_{2.4}$ M चांगि° (for अङ्गि°). G$_1$ पंचांगिरसकन्यासु. — ^{d}) K$_{3.4}$ B$_2$ Dn D$_{1-}$ M महि° (for हवि°).

7 ^{a}) Ś$_1$ आविरासीद् ; K$_{1.2}$ अरमत (for आङ्गिरसी). — ^{b}) K$_{3.4}$ Dn D$_{2.4.6}$ T$_2$ G$_{1.3}$ महामते (G$_1$ °तेः) ; D — ^{c}) महीपते ; G$_2$ महाद्युतिः ; G$_4$ महायति (for °मती). — ^{d}) T$_1$ तु (for [इ]ति). K$_3$ विज्ञेया (for विख्याता). — D$_1$ तु सा (for सुता).

8 S reads 8 after 5. — ^{b}) K$_{2.3}$ Dc$_2$ Dn$_3$ D$_5$. T$_2$ कुहकुहा°. — ^{c}) Ś$_1$ K$_{1.2}$ एकेनांशेन ; D$_1$ T G$_{1.3}$ M एका(T$_2$ °ता)नंगे(D$_1$ °ते)ति ; D$_5$ एकदैवेति ; G$_3$ एकायनेति G$_4$ एकानेकेति (for एकानंशेति). B$_{1-3}$ Dn D$_{4.6}$ T$_2$ G ताम् (for याम्). — ^{d}) T G$_1$ M$_2$ चतुर्थीमंगिरःसुतां ; G$_2$ M$_1$ चतुर्थ्यंगिरसः सुता.

Colophon om. in S (except G$_3$). — *Major parvan* : K$_{1.3.4}$ B D G Ś$_1$ K$_2$ Dn$_2$ आरण्य. — *Sub-parvan* : (all om. sub-parvan name) mention only आंगिरस — *Adhy. no.* (figures, words or both): D 217 ; Dn$_2$ 216 ; D$_1$ 220. — *Śloka no.* : Dn$_1$. D$_1$ 8.

२०९

मार्कण्डेय उवाच ।
बृहस्पतेश्चान्द्रमसी भार्याभूद्या यशस्विनी ।
अग्नीन्साजनयत्पुण्यान्षडेकां चापि पुत्रिकाम् ॥ १
आहुतिष्वेव यस्याग्नेर्हविषाज्यं विधीयते ।
सोऽग्निर्बृहस्पतेः पुत्रः शंयुर्नाम महाप्रभः ॥ २
चातुर्मास्येषु यस्येष्ट्यामश्वमेधेऽग्रजः पशुः ।
दीप्तो ज्वालैरनेकाभैरग्निरेकोऽथ वीर्यवान् ॥ ३
शंयोरप्रतिमा भार्या सत्या सत्या च धर्मजा ।
अग्निस्तस्य सुतो दीप्तस्तिस्रः कन्याश्च सुव्रताः ॥ ४
प्रथमेनाज्यभागेन पूज्यते योऽग्निरध्वरे ।
अग्निस्तस्य भरद्वाजः प्रथमः पुत्र उच्यते ॥ ५
पौर्णमास्येषु सर्वेषु हविषाज्यं स्रुवोद्यतम् ।
भरतो नामतः सोऽग्निर्द्वितीयः शंयुतः सुतः ॥ ६
तिस्रः कन्या भवन्त्यन्या यासां स भरतः पतिः ।
भरतस्तु सुतस्तस्य भरत्येका च पुत्रिका ॥ ७
भरतो भरतस्याग्नेः पावकस्तु प्रजापतेः ।
महानत्यर्थमहितस्तथा भरतसत्तम ॥ ८
भरद्वाजस्य भार्या तु वीरा वीरश्च पिण्डदः ।

C. 3. 14138
B. 3. 219. 9
K. 3. 221. 17

209

1 T G$_1$ M$_1$ om. the ref. — ^{a}) G$_1$ ब्रह्मद्योतेश्च; M महीपतेश्च (for बृहस्पतेश्च). M चंद्रमसो (for चान्द्रमसी). — ^{b}) Dc$_2$ या बभूव (for भार्याभूद्या). Ś$_1$ K$_{1.2.4}$ Dc$_1$ D$_1$ [आ]सीद्या; K$_3$ Dn$_3$ D$_{2.5}$ M$_1$ याभूद्; B$_1$ T$_2$ G$_{2.4}$ भूत्वा; B$_4$ चाभूद् (for [अ]भूद्या). — ^{c}) Dc Dn$_3$ अजन°; G$_4$ चाजन° (for साजन°). Ś$_1$ K Dc Dn$_3$ D$_{1-3.5}$ पुत्रान् (for पुण्यान्).

2 ^{a}) Ś$_1$ K$_{1-3}$ D$_3$ आहुतेषु; K$_4$ D$_1$ सुहुतेषु; D$_2$ अहुतेषु; T$_1$ M अतिथिषु. M [इ]व (for [ए]व). B$_1$ S (except G$_3$) यस्याग्रे. — ^{b}) Ś$_1$ K D$_{1.2}$ हविष्वाज्यं; B$_2$ Dn$_1$. n$_2$ D$_{3.4}$ °पाद्यं; Dc Dn$_3$ T$_2$ G$_{2.4}$ M °राज्यं; G$_1$ °ष्याज्ये (for °पाज्यं). — ^{c}) B$_4$ अग्निर् (for सोऽग्निर्). — ^{d}) T$_1$ M$_2$ शय्युर् (for शंयुर्). K$_4$ D$_5$ °प्रभुः; B$_1$ °यशाः; B$_3$ Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ °व्रतः (for °प्रभः).

3 ^{a}) Ś$_1$ K$_{1.2}$ T$_1$ इष्टिर्; G$_{2.4}$ इष्टम् (for इष्ट्याम्). — ^{b}) Ś$_1$ K$_{1.2}$ [ऽ]प्यजः (for ऽग्रजः). K$_3$ Dn$_2$ प्रभुः (for पशुः). T$_2$ अश्वमेधेषु यः पशुः; G$_1$ °मेध इति श्रुतः; G$_{2.4}$ °मेधाग्रभागभूत्. — ^{c}) Ś$_1$ K$_{1.2.4}$ Dc Dn$_3$ D$_{2.3.5}$ दीप्ता- (D$_{2.3}$ °प्तो)र्चिर्भिर्; K$_3$ दीप्तिरग्निर्; B$_2$ G$_{1.4}$ M$_1$ दीप्तिज्वा- (G$_1$ M$_1$ °जा)लैर्; B$_3$ दीप्तो ज्वानैर् (m as in text); D$_1$ T G$_2$ M$_2$ दीप्तज्वालैर्. Ś$_1$ अनीकाभैर्; K$_{1.2}$ अनेकारैर्; Dc Dn$_3$ D$_{2.3}$ अनेकाभिर्; T$_1$ G$_{1.4}$ अनेकाग्रैर्; G$_2$ अनेकाहैर्. — ^{d}) Ś$_1$ K$_{1.2}$ अग्निरीशोथ; K$_3$ B$_3$ Dc Dn$_3$ D$_{1.3.6}$ G$_3$ °रेषोथ; B$_1$ °रोषोथ; B$_4$ °वेधोथ; T$_1$ °ष्टोमोथ; T$_2$ G$_{1.2.4}$ M अग्नीषोमोथ.

4 ^{b}) Ś$_1$ K$_{3.4}$ B$_{2.3}$ (m as in text) D$_{1.3}$ सत्या स-; B$_1$ Dc Dn$_3$ (*sup. lin.*; T$_1$ सत्याय; Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ सत्याथ; D$_6$ सत्यांश- (for सत्या च). G$_{1.2.4}$ धर्मज. — ^{c}) Ś$_1$ K$_2$ Dc D$_{2.3.5}$ तस्याः (for तस्य). — ^{d}) B$_4$ तस्याः (for तिस्रः). Ś$_1$ K$_{1-3}$ D$_5$ सुप्रभाः (for °व्रताः).

5 ^{b}) T G$_{2.4}$ सोग्निर् (for योऽग्निर्). — ^{c}) D$_{2.3}$ अग्ने° (for अग्नि°).

6 ^{a}) K$_{1.2}$ B$_{1.4}$ Dc Dn D$_4$ पौर्णमासेषु. — ^{b}) Ś$_1$ K D$_{1-3.5}$ हविष्वाज्यं; S (except G$_3$) हविराज्यं. Ś$_1$ स्रुवोद्यतां; K$_1$ स्रुवोच्यतां; K$_2$ श्रुवच्युतां; K$_3$ B D$_3$ श्रुवोद्यतं; K$_4$ श्रुचो°; D$_1$ प्रचोदितं; T$_2$ स्रुचोद्यहं. D$_5$ हविष्वाज्येषु चोद्यतं. — ^{c}) Ś$_1$ K D$_{1.5}$ M$_1$ °तो नाम तस्याग्नेर् (K$_{1.3}$ D$_{1.5}$ M$_1$ °ग्निर्). — ^{d}) Ś$_1$ K$_{1.2}$ शंयवः; K$_{3.4}$ B$_{2.4}$ D$_{1.3}$ संयुतः; B$_1$ संयतः; S (except G$_{1.3}$) शंयुजः.

7 ^{a}) Ś$_1$ K$_{1.2}$ D$_5$ [अ]भवन्; K$_4$ (m as in text) M भरंति (for भवन्ति). — ^{c}) D$_{2.3}$ T$_2$ G$_{1.2.4}$ भारतस्तु; M भारति° (for भरत°). — ^{d}) K$_{3.4}$ D$_{1-3.5}$ भवत्येका; B$_2$ S (except G$_3$) भारत्येका. B$_2$ D$_5$ कन्यका (for पुत्रिका).

8 ^{a}) Ś$_1$ K$_{1.2}$ अद्भुतो; D$_{1-3}$ भारती; S (except G$_3$) भारतो (M$_2$ °तिर्) (for भरतो). K$_3$ D$_{2.3}$ भारतस्य. K$_{2.3}$ B Dc अग्निः (B$_2$ अपि); D$_{4.6}$ अग्ने (for अग्नेः). — ^{b}) K$_3$ प्रजायत; B$_3$ D$_1$ T G$_{1.2.4}$ °यते; D$_{2.3}$ °पते (for °पतेः). Ś$_1$ K$_1$ पावकश्चाप्यजायत; K$_2$ पावकस्यापि जायतः; Dc Dn$_3$ D$_5$ पावकः समजायत. — ^{c}) K$_3$ °सहितस्; Dn$_1$. n$_2$ T$_2$ G$_{1-3}$ °मभितस् (for °महितस्). Ś$_1$ K$_{1.2}$ महानक्षश्च महिपस्.

9 ^{a}) Ś$_1$ T भारद्वाजस्य. M$_2$ भार्यायां. — ^{b}) K$_2$ पुत्रा (for वीरा). K$_{1.3.4}$ B D T$_2$ (by corr.) G$_3$ वीरस्य.

C. 3. 14138
B. 3. 219. 9
K. 3. 221. 17

प्राहुराज्येन तस्येज्यां सोमस्येव द्विजाः शनैः ॥ ९
हविषा यो द्वितीयेन सोमेन सह युज्यते ।
रथप्रभू रथध्वानः कुम्भरेताः स उच्यते ॥ १०
सरय्वां जनयत्सिद्धिं भानुं भाभिः समावृणोत् ।
आग्नेयमानयन्नित्यमाह्वानेष्वेष कथ्यते ॥ ११
यस्तु न च्यवते नित्यं यशसा वर्चसा श्रिया ।
अग्निर्निश्च्यवनो नाम पृथिवीं स्तौति केवलम् ॥ १२
विपाप्मा कलुषैर्मुक्तो विशुद्धश्चार्चिषा ज्वलन् ।
विपापोऽग्निः सुतस्तस्य सत्यः समयकर्मसु ॥ १३
आक्रोशतां हि भूतानां यः करोति हि निष्कृतिम् ।
अग्निः स निष्कृतिर्नाम शोभयत्यभिसेवितः ॥ १४
अनुकूजन्ति येनेह वेदनार्ताः स्वयं जनाः ।
तस्य पुत्रः स्वनो नाम पावकः स रुजस्करः ॥ १५
यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति ।
तं प्राहुरध्यात्मविदो विश्वजिन्नाम पावकम् ॥ १६
अन्तराग्निः श्रितो यो हि भुक्तं पचति देहिनाम् ।
स यज्ञे विश्वभुङ् नाम सर्वलोकेषु भारत ॥ १७
ब्रह्मचारी यतात्मा च सततं विपुलव्रतः ।
ब्राह्मणाः पूजयन्त्येनं पाकयज्ञेषु पावकम् ॥ १८
प्रथितो गोपतिर्नाम नदी यस्याभवत्प्रिया ।

K$_{3.4}$ B D (except D$_5$) G$_3$ पिंडदा. — ^{c}) K$_{3.4}$ D$_{2.3}$ यस्येष्ट्यां; B Dc Dn$_3$ T$_1$ त(T$_1$ य)स्याज्यं; D$_5$ यस्येष्ट्वा; T$_2$ G$_1$ M यस्येज्यां.

10 ^{c}) Ś$_1$ K$_{1.2}$ रथप्रोभो; Dc Dn$_3$ G$_{1.4}$ °प्रभु- (for °प्रभू). K$_4$ D T$_1$ G$_{1.3}$ M रथाध्वानः (D$_4$ रयाध्वान-). K$_4$ रथभूतरवाध्वानः. — ^{d}) Ś$_1$ K$_{1.2}$ रुक्मरेताः; M$_2$ कुंभरेफाः. Ś$_1$ K$_{1.2}$ कथ्यते (for उच्यते).

11 ^{a}) Some MSS. शरय्वां. Ś$_1$ K$_{2.4}$ B$_{2.3}$ D$_{3.5}$ G$_2$ जनयन्. — ^{b}) Ś$_1$ K$_{1-3}$ D$_{1-3.5}$ सोमं (for भानुं). — ^{c}) Ś$_1$ K$_{1.2}$ अज्ञेय- (for आग्नेयम्). Ś$_1$ K$_{1.2}$ -मानसं; K$_3$ D$_1$ आनयेन्; G$_{3.4}$ अनयन् (for आनयन्). G$_{2.4}$ मिथ्यम्; M मध्यम् (for नित्यम्). — ^{d}) Ś$_1$ K$_{1-3}$ Dn$_3$ D$_{1.2.5}$ T$_1$ G$_1$ आह्वानेष्वेव; K$_4$ B$_{1.3}$ Dc$_1$ Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ °ने ह्येष; Dc$_2$ °नेष्वेषु; D$_3$ °ने ह्येव; T$_2$ °ने एष; G$_{2.4}$ मिथ्यो नामैष. Ś$_1$ K$_{1-3}$ B Dc Dn$_3$ D$_{1.3.5}$ श्रूयते; K$_4$ Dn$_1$. n$_2$ D$_{2.4.6}$ T$_2$ G$_3$ सूय° (for कथ्य°).

12 ^{b}) B$_2$ तेजसा (for वर्चसा). — ^{c}) M$_1$ सोग्निर् (for अग्निर्). Ś$_1$ निच्यावनो; K$_2$ निस्ववनो; B$_1$ त्रिश्वच्यवो; T$_1$ दुश्च्यवनो; G$_1$ न च्यवनो; G$_{2.4}$ निच्यवनो. — ^{d}) Ś$_1$ पृथिव्यां. K$_3$ सोभवत्यभिसेवितः (cf. 14^{d}).

13 ^{a}) T$_2$ G$_{1.2}$ पापात्मा; G$_4$ विपापः (for विपाप्मा). Dc$_2$ G$_1$ M$_1$ कल्मषै° (for कलुषै°) — ^{c}) Ś$_1$ विवाप्यो°; K$_1$ निवापो°; K$_2$ विपाप्यो°; K$_{3.4}$ D$_{2.3}$ निवापा°; B$_2$ विपाप्मा°; G$_4$ विपाको° (for विपापो°). — ^{d}) T$_2$ G$_{2.4}$ M योज्यः; G$_1$ योग्यः. B$_1$ Dc समयकर्मकृत्; B$_{2.3}$ Dn D$_{4.6}$ G$_3$ °धर्मकृत्; T$_1$ G$_1$ °कर्मणि.

14 ^{a}) K$_4$ B$_{2-4}$ Dc$_2$ Dn$_1$. n$_3$ T G$_3$ अक्रोशतां. Ś$_1$ K B Dc D$_{2.3.5}$ तु भूतानां; S (except G$_3$) नराणां हि. — ^{b}) Ś$_1$ K$_{2.4}$ B$_{1.3.4}$ Dc D$_{1-3.5}$ T$_1$ M [इ]ह; K$_3$ [इ]ति; G$_1$ न (for हि). — ^{d}) Ś$_1$ K$_2$ B$_1$ G$_{2.4}$ शोध° (for शोभ°). K$_3$ D$_3$ [अ]ति- (for [अ]भि-). K$_2$ °सेव्यतां; K$_4$ B Dc Dn$_3$ D$_{1.6}$ °षेचितः; Dn$_1$. n$_2$ G$_3$ °सेविते; D$_3$ M$_2$ °सेवितं; D$_4$ °षेचिते.

15 ^{b}) K$_1$ वेदनार्थाः; G$_4$ °नार्थं. — ^{c}) B$_{1-3}$ D$_6$ T G$_3$ सत्यपुत्रः. K$_{1.2}$ स्वरो; B$_1$ सुरो; B$_{2.4}$ सुनो; D$_6$ सुभो (for स्वनो). — ^{d}) Ś$_1$ K D$_{1-3.5}$ समजायत; T$_2$ (corrupt सुरुचिभास्करः (for स रुज°).

16 G$_1$ reads 16–21 after 3. 211. 7; M read them after 3. 211. 6. — ^{a}) Ś$_1$ K$_1$ निष्क्रम्य (for विश्वस्य — ^{c}) G$_1$ प्राहुरध्यात्मविदुषो. — ^{d}) Ś$_1$ K D$_{1.5}$ विश्वं (for °जिन्).

17 ^{a}) B$_3$ Dc Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ M अंतरग्निः. K B$_{1.3.4}$ Dn D$_{1.4.6}$ G$_3$ स्मृतो (for श्रितो). K$_4$ B D D$_{1.4.6}$ G$_3$ तु; G$_1$ वै (for हि). — ^{c}) K$_1$ B$_{1-3}$ D D$_{2.3}$ T G$_{1.2.4}$ M स (T सं-; G$_1$ यं) जज्ञे. B$_3$ °भुंजान B$_4$ °जिन्नाम (for °भुङ् नाम). — ^{d}) G$_1$ M सर्वलोकेश्वरेश्व

18 ^{a}) B$_4$ D$_2$ जितात्मा (for य°). Ś$_1$ K$_{2.3}$ D तु (for च). — ^{b}) T G$_{2.4}$ °प्रभः (for °व्रतः). — ^{c}) पूजयंतो वै; M °यंते यं. — ^{d}) Ś$_1$ K$_{2.3}$ D$_5$ °यज्ञेन (°यज्ञेषु).

19 ^{a}) Ś$_1$ K$_1$ M$_1$ प्रथिता; K$_2$ प्रार्थिता; K$_3$ D$_{1.2}$ पतितो; K$_4$ पतिता; B Dc Dn D$_{3.4.6}$ T$_2$ (by corr.) पवित्रा; D$_5$ पावको (for प्रथितो). Ś$_1$ K$_{1-3}$ B D (exc D$_{1.2.5}$) T$_2$ (by corr.) G$_{1.3}$ M$_1$ गोमती (for गोपति — ^{b}) M भार्या° (for यस्या°). — ^{c}) Ś$_1$ K$_{2.4}$ G$_1$ transp. सर्वाणि and कर्माणि. — ^{d}) B$_{1.2m.3}$ D$_{4.6}$ धर्मकर्मभिः (B$_2$ orig. सर्वकर्मभिः); Dn$_1$ धर्मकर्तृभिः G$_{1.2.4}$ कर्मभिः सदा; M धर्मसेतवः.

तस्मिन्सर्वाणि कर्माणि क्रियन्ते कर्मकर्तृभिः ॥ १९
वडवामुखः पिबत्यम्भो योऽसौ परमदारुणः ।
ऊर्ध्वभागूर्ध्वभाङ् नाम कविः प्राणाश्रितस्तु सः ॥ २०
उदग्द्वारं हविर्यस्य गृहे नित्यं प्रदीयते ।
ततः स्विष्टं भवेदाज्यं स्विष्टकृत्परमः स्मृतः ॥ २१
यः प्रशान्तेषु भूतेषु मन्युर्भवति पावकः ।
क्रोधस्य तु रसो जज्ञे मन्यती चाथ पुत्रिका ।
स्वाहेति दारुणा क्रूरा सर्वभूतेषु तिष्ठति ॥ २२
त्रिदिवे यस्य सदृशो नास्ति रूपेण कश्चन ।
अतुल्यत्वात्कृतो देवैर्नाम्ना कामस्तु पावकः ॥ २३
संहर्षाद्धारयन्क्रोधं धन्वी स्रग्वी रथे स्थितः ।
समरे नाशयेच्छत्रूनमोघो नाम पावकः ॥ २४
उक्थो नाम महाभाग त्रिभिरुक्थैरभिष्टुतः ।
महावाचं त्वजनयत्सकामाश्वं हि यं विदुः ॥ २५

C. 3. 14156
B. 3. 219. 25
K. 3. 221. 33

इति श्रीमहाभारते आरण्यकपर्वणि नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥

---

20 ^{a}) Hypermetric! Ś$_1$ D$_1$ वडवास्यः; B (B$_1$ m as in text) Dn D$_{4.6}$ G$_3$ °वाग्निः; Dc °वाग्नेः (for °मुखः). S (except G$_3$) [आ]पो (for [अ]म्भो). — ^{c}) K$_4$ ऊर्ध्वभुग्; G$_1$ °बाहू- (for °भाग्). K$_4$ M$_1$ °भुङ् नाम; D$_1$ °दृष्टिश्च (for °भाङ् नाम). — ^{d}) M$_2$ कलिः (for कविः). Dn D$_{4.6}$ G$_3$ यः (for सः).

21 Ś$_1$ K$_{1.2}$ om. (? hapl.) 21. — ^{a}) B$_{1.3}$ M उदग्धारं. K$_{3.4}$ D$_{1-3}$ अवीर्; M भवीर् (for हविर्). — 21^{cd}=3. 211. 17^{ef}. — ^{c}) T$_1$ स्विष्टो; T$_2$ G$_{2.4}$ तुष्टो; G$_1$ त्विष्टो (for स्विष्टं). T$_2$ G$_1$ [ऽ]भवद् (for भवेद्). K$_{3.4}$ D$_{1-3.5}$ M ग्राह्यं; T G$_{1.2.4}$ ब्रह्मा (for आज्यं). — ^{d}) K$_{3.4}$ Dc D$_{1-3.5}$ तु सः; T$_2$ G$_{2.4}$ ततः (for स्मृतः).

22 22^{ab}=(var.) 3. 211. 11^{ab}. — ^{a}) D$_5$ प्रयातेषु (for प्रशान्ते°). — ^{b}) T G$_{1.2.4}$ M$_2$ आवि°; M$_1$ प्रादु° (for मन्यु°). — After 22^{ab}, K$_4$ D$_{1-3}$ ins.:

1049* मन्युमान्नाम भगवानग्निरेव महाबलः ।
आरण्यानि तथा ग्राम्यान्यो दहन्संप्रकाशते ।
स्वयमुत्पतितः श्रीमान्वृद्धिमान्नाम पावकः ।;

while S (except G$_3$) ins.:

1050* क्रोधः स तु महातेजा विज्ञेयः सर्वदेहिषु ।

— T$_1$ om. from 22^{c} up to 23^{d}. — ^{c}) N G$_3$ क्रुद्धस्य (for क्रोध°). B$_1$ च (for तु). Ś$_1$ K$_{1.2}$ रथो; B$_4$ D$_{2.3}$ (*sup. lin.* as in text)$_{.5}$ M र(M$_2$ रु)जो; T$_2$ G$_{2.4}$ रणे (for रसो). — ^{d}) Ś$_1$ K$_{1.2}$ मन्युतीव्रा च (for मन्यती चाथ). K$_{3.4}$ B Dc Dn D$_{2-6}$ T$_2$ मन्यंती (Dn$_3$ मन्येतां); G$_3$ मन्यंते (for मन्यती). K$_4$ वाणि-; B$_4$ T$_2$ नाम; D$_1$ वापि; D$_{2.3}$ चापि; D$_4$ बाष्प-; G$_{2.4}$ चास्य (for चाथ). G$_1$ मती चापि सुपुत्रिका; Cnp मन्यन्ती चाथ पुत्रिका. — ^{e}) T$_2$ G$_{2.4}$ M हाहेति (for स्वा°). S (except G$_3$; T$_1$ om.) क्रुद्धा (for क्रूरा). — ^{f}) D$_3$ °देहेषु (for °भूतेषु). K$_3$ गच्छ° (for तिष्ठ°).

23 T$_1$ om. 23 (cf. v.l. 22). — ^{c}) K$_1$ Dn D$_{3.4}$ G$_3$ अतुलत्वात्. — ^{d}) T$_2$ नाम देवैस्तु; G$_1$ नाम्ना वेदस्तु (for नाम्ना कामस्तु).

24 ^{a}) Ś$_1$ K$_{1.2}$ D$_{1.5}$ संघर्षाद्; D$_2$ M$_2$ संकर्षाद्; G$_{2.4}$ सर्वेषां (for संहर्षाद्). Ś$_1$ K$_2$ D$_6$ वारयन्; K$_4$ D$_{2.5}$ वारयेत्; D$_3$ धारयेत् (for धारयन्). G$_4$ क्रोधान्. — ^{b}) B$_3$ सुश्री (m as in text); B$_4$ खड्गी (for स्रग्वी). D$_1$ रथस्थितः. — ^{c}) Dn$_1$. n$_2$ D$_5$ समये (for °रे). Ś$_1$ K$_{1.3}$ B$_4$ Dc$_2$ D$_{1-3}$ S (except G$_3$) नाशयञ्.

25 ^{a}) Ś$_1$ K$_3$ उक्तो; K$_2$ D$_4$ उत्थो; Dn$_2$ D$_2$ S (except T$_1$ G$_3$) उक्थ्यो; D$_1$ उक्थैर्; D$_3$ उंछो (for उक्थो). K$_4$ G$_1$ नामा. D$_{2.3.5}$ T$_2$ G$_{1.2.4}$ महाभागस्. — ^{b}) Ś$_1$ K$_3$ उक्तैर्; Dc D$_{3.4}$ उत्थैर्; T$_2$ G$_{2.4}$ M उक्थ्यैर्. D$_5$ परि° (for अभि°). — ^{c}) Ś$_1$ K$_{1.2}$ °भागं; B$_4$ °राजन्; D$_6$ °वालं; T$_1$ °पार्षं; T$_2$ °वर्षं; G$_{1.2.4}$ M °वर्षं (for °वाचं). K$_2$ तु जन°; G$_1$ M$_1$ च जन° (for त्वजन°). — ^{d}) Ś$_1$ K$_{1.2}$ साकमश्वं; K$_3$ सकामास्त्वं; K$_4$ सकामस्तं; Dc Dn D$_{4.6}$ समाश्वासं; D$_{1.5}$ सकामत्वं; D$_{2.3}$ सकामं तं; G$_3$ समावासं. Ś$_1$ K D$_{1.2.5}$ G$_1$ हि तं (K$_3$ तद्); D$_3$ हतं (for हि यं).

Colophon om. in Dc$_2$. — *Major parvan:* Ś$_1$ K$_3$ Dn$_2$ T$_2$ G$_{2.4}$ आरण्य. — *Sub-parvan:* G$_1$ M$_2$ मार्कंडेयसम(M$_2$ °मा)स्या (followed in M$_2$ by आंगिरस). Ś$_1$ K$_{1.3.4}$ B D (all om. sub-parvan name) mention only आंगिरस. — *Adhy. name:* T$_2$ G$_{2.3}$ आं(G$_2$ अं)गिरसप्रजाकथनं. — *Adhy. no.* (figures, words or both): Dn$_1$ (*sup. lin.*) 218; Dn$_2$ 217; D$_1$ 221; T G$_{1.3}$ M (M$_2$ *inf. lin.*) 211; G$_{2.4}$ M$_2$ (orig.) 213. — *Śloka no.:* Dn$_1$. n$_2$ 25; D$_1$ 27.

२१०

3.14156
3.220.1
3.222.1

मार्कण्डेय उवाच ।
काश्यपो ह्यथ वासिष्ठः प्राणश्च प्राणपुत्रकः ।
अग्निराङ्गिरसश्चैव च्यवनस्त्रिषुवर्चकः ॥ १
अचरन्त तपस्तीव्रं पुत्रार्थे बहुवार्षिकम् ।
पुत्रं लभेम धर्मिष्ठं यशसा ब्रह्मणा समम् ॥ २
महाव्याहृतिभिर्ध्यातः पञ्चभिस्तैस्तदा त्वथ ।
जज्ञे तेजोमयोऽर्चिष्मान्पञ्चवर्णः प्रभावनः ॥ ३
समिद्धोऽग्निः शिरस्तस्य बाहू सूर्यनिभौ तथा ।
त्वङ्नेत्रे च सुवर्णाभे कृष्णे जङ्घे च भारत ॥ ४
पञ्चवर्णः स तपसा कृतस्तैः पञ्चभिर्जनैः ।
पाञ्चजन्यः श्रुतो वेदे पञ्चवंशकरस्तु सः ॥ ५
दश वर्षसहस्राणि तपस्तप्त्वा महातपाः ।
जनयत्पावकं घोरं पितॄणां स प्रजाः सृजन् ॥ ६
बृहद्रथंतरं मूर्ध्नो वक्त्राच्च तरसाहरौ ।
शिवं नाभ्यां बलादिन्द्रं वाय्वग्नी प्राणतोऽसृजत् ॥ ७
बाहुभ्यामनुदात्तौ च विश्वे भूतानि चैव ह ।
एतान्सृष्ट्वा ततः पञ्च पितॄणामसृजत्सुतान् ॥ ८
बृहदूर्जस्य प्रणिधिः काश्यपस्य बृहत्तरः ।

210

1 ^{a}) Ś$_1$ कश्यपोप्यथ; K$_{1.2}$ क(K$_1$ का)श्यपाख्योथ; K$_{3.4}$ कश्यपोज्यो(K$_4$ °र्जो)थ; B$_4$ D$_1$ का(D$_1$ क)श्यपो योथ; D$_{4.6}$ काश्यपोत्यथ. K$_{2.3}$ B$_3$ वाशिष्टः. T$_1$ काश्यपोथ वसिष्ठश्च. — ^{b}) G$_{1.2.4}$ °पुत्रजः (for °पुत्रकः). — ^{c}) Ś$_1$ D (except D$_{3.5}$) अंगिरा° (for अग्निरा°). — ^{d}) Ś$_1$ K$_{1.2}$ D$_5$ च स(D$_5$ सु)वर्चकः; K$_{3.4}$ D$_{1-3}$ स्त्रीसमर्चकः; B$_3$ m. 3 त्रिपुवर्चसः; B$_4$ त्रिष्टववर्चकः; Dc Dn D$_{4.6}$ G$_3$ त्रिसुवर्चकः (Dn$_2$ °सः); T$_1$ M स्त्रीरवर्चकः; T$_2$ G$_1$ त्रिप्रवर्षकः; G$_{2.4}$ तीव्रवर्चकः.

2 ^{a}) Ś$_1$ K B$_4$ D$_{1-3.5}$ अचरंस्ते; B$_{1-3}$ Dc Dn D$_{4.6}$ G$_3$ °रस्स (for °रन्त). Ś$_1$ K$_{1.2}$ क्रूरं (for तीव्रं). — ^{b}) Ś$_1$ K D$_{1-3.5}$ G$_1$ पुत्रार्थं. — ^{c}) Ś$_1$ K$_{1.4}$ लेभे स; B Dc Dn D$_{1.4.6}$ T$_2$ G$_3$ लभेयं; D$_5$ लेभेथ (for लभेम). B$_3$ धर्मज्ञं. — ^{d}) B$_1$ तपसा (for यशसा). B$_4$ ब्रह्मसंमितं; S (except G$_{1.3}$) ब्रह्मणः समं.

3 ^{a}) Ś$_1$ K$_1$ M$_2$ ध्याते; K$_2$ ध्याप्तः; K$_4$ M$_1$ ध्यातैः; D$_{1.2}$ ध्यातेः; T$_1$ सार्धं; G$_{1.2.4}$ ध्यानैः (for ध्यातः). — ^{b}) D$_2$ T$_1$ ते (for तैस्). Ś$_1$ तथा; D$_2$ सदा (for तदा). — ^{c}) Ś$_1$ देवमहो°; K$_{1.2}$ D$_{2.3}$ चैव महो° (D$_{2.3}$ महा°); K$_4$ B$_{1-3}$ Dc Dn D$_{4.6}$ G$_3$ तेजो महा°; T$_2$ तेजोमयाच्छिष्टान्. — ^{d}) B$_1$ प्रतापवान्; B$_4$ प्रभास्वरः; S (except G$_3$) प्रभाकरः (for °वनः).

4 ^{a}) B$_3$ G$_1$ समृद्धो (for समिद्धो). — ^{c}) D$_5$ T तन्-; G$_1$ ते (for त्वङ्-). T G$_{1.2}$ [ऽ]थ (for च). — ^{d}) T$_1$ कृष्ण-; T$_2$ कृच्छ्रे (for कृष्णे). D$_{4.6}$ G$_3$ [ऽ]थ (for च).

5 ^{a}) G$_{2.4}$ °वर्षः (for °वर्णः). B$_4$ स्व-; Dc$_2$ Dn$_3$ G$_3$ सु- (for स). — ^{c}) Ś$_1$ K D$_{1-3}$ पंच° (for पाञ्च°). Ś$_1$ K$_{1-3}$ B$_1$ D$_5$ कृतो; D$_2$ स्तुतो (for श्रुतो). K$_{3.4}$ देवैः; B D (except D$_{2.5}$) G$_3$ देवः (for वेदे). — ^{d}) D$_2$ °विंश°; M$_1$ °वर्ण° (for °वंश°). D$_3$ सुतः (for तु सः). T$_1$ पंचवस्तुकविंशकः.

6 ^{b}) K$_1$ समातपः; K$_3$ B$_2$ महायशाः; D$_3$ महाव्रतः (*sup. lin. sec. m.* °तपाः as in text). — ^{c}) K$_{2.3}$ B$_{3.4}$ Dc$_2$ T G$_{1.2.4}$ जनयन्; K$_4$ D$_{2.3}$ असृजत्. S (except G$_3$) पावकान्घोरान्. — ^{d}) Ś$_1$ K$_{1-3}$ B$_4$ Dc Dn$_3$ स पितॄणां (by transp.). K$_4$ D$_{1-3}$ च (for स). Ś$_1$ K$_{1-3}$ D$_1$ G$_{1.4}$ प्रजासृजं (K$_3$ D$_1$ °जत्; G$_1$ °जन्). K$_4$ D$_{2.3}$ असृजत्प्रजाः; B$_{1-3}$ Dc M$_1$ प्रजाः सृजत्.

7 ^{a}) T$_2$ G$_{1.2}$ M$_2$ रथंतरौ; G$_4$ M$_1$ °तरो. B$_4$ मूर्ध्नि; D$_4$ °र्ध्ने; T G$_{1.2}$ °र्ध्ना (for °र्ध्नो). — ^{b}) K$_1$ B Dc Dn D$_{1.4.6}$ G$_3$ वा (for च). K$_{1-3}$ D$_5$ भ(D$_5$ त)रसाहसौ; K$_4$ T$_2$ G$_{2.4}$ तपसा हरिं; D$_{1-3}$ T$_1$ G$_1$ M तरसा हरिं. — ^{c}) Ś$_1$ K$_{1.2}$ दिवं (for शिवं). D$_5$ T$_1$ नाभ्या. — ^{d}) Ś$_1$ K$_1$. °स्मतः; K$_{3.4}$ B$_{1.3}$ Dc Dn$_3$ D$_{1.2}$ °त्मजौ (for °सृजत्). S (except G$_3$) प्राणाद्वायुं च भारत.

8 ^{a}) K$_2$ अनुदातुं च; K$_4$ D$_{1-3}$ °दात्तश्च; B$_1$ °दांतौ च; D$_5$ °दांतस्य; T$_2$ G$_1$ °दंतौ च; G$_{2.4}$ M °दत्तौ च. — ^{b}) Ś K$_{1.2}$ M$_1$ विश्व-; K$_4$ विह्वे (m as in text); D$_5$ विश्वा (for विश्वे). Ś$_1$ K$_{1.2}$ D$_{1.3}$ G$_{2.4}$ हि (for ह). — ^{c}) Ś K$_{1.3}$ Dn$_2$ D$_5$ T$_1$ दृष्ट्वा (for सृष्ट्वा). G$_{2.4}$ पुनः (for ततः).

9 ^{a}) Dn$_1$. n$_2$ बृहद्रथस्य; D$_{4.6}$ G$_3$ °द्रूपस्य; T$_2$ ब्रह त्मजस्य; G$_1$ बृहत्तरस्य. S (except T$_1$ G$_3$) प्रणिधाः. — Ś$_1$ K B$_3$ Dc Dn$_3$ D$_{1.4.5}$ कश्यप(K$_{1.2}$ °पो)स्य. K

भानुरङ्गिरसो वीरः पुत्रो वर्चस्य सौभरः ॥ ९
प्राणस्य चानुदात्तश्च व्याख्याताः पञ्च वंशजाः ।
देवान्यज्ञमुषश्चान्यान्सृजन्पञ्चदशोत्तरान् ॥ १०
अभीममतिभीमं च भीमं भीमबलाबलम् ।
एतान्यज्ञमुषः पञ्च देवानभ्यसृजत्तपः ॥ ११
सुमित्रं मित्रवन्तं च मित्रज्ञं मित्रवर्धनम् ।
मित्रधर्माणमित्येतान्देवानभ्यसृजत्तपः ॥ १२
सुरप्रवीरं वीरं च सुकेशं च सुवर्चसम् ।
सुराणामपि हन्तारं पञ्चैतानसृजत्तपः ॥ १३
त्रिविधं संस्थिता ह्येते पञ्च पञ्च पृथक्पृथक् ।
मुष्णन्त्यत्र स्थिता ह्येते स्वर्गतो यज्ञयाजिनः ॥ १४
तेषामिष्टं हरन्त्येते निघ्नन्ति च महद्भुवि ।
स्पर्धया हव्यवाहानां निघ्नन्त्येते हरन्ति च ॥ १५
हविर्वेद्यां तदादानं कुशलैः संप्रवर्तितम् ।
तदेते नोपसर्पन्ति यत्र चाग्निः स्थितो भवेत् ॥ १६
चितोऽग्निरुद्वहन्यज्ञं पक्षाभ्यां तान्प्रबाधते । C. 3. 14172 B. 3. 220. 17 K. 3. 222. 17

बृहत्तनुः; Dc$_1$ Dn D$_{4.6}$ G$_3$ महत्तरः. — ^{c}) Ś$_1$ K$_{1.2}$ भानोर्; T$_1$ अनुर् (for भानुर्). Dc आंगिरसो. B$_{2-4}$ Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ धीरः (for वीरः). — ^{d}) Ś$_1$ वर्ग°; D$_5$ वर्ष° (for वर्च°). Ś$_1$ K$_{1.2}$ सोभवत्; B$_{1.2.4}$ Dc Dn$_3$ D$_3$ S (except G$_3$) सौरभः; D$_2$ सौभगः (for सौभरः).

10 ^{a}) K$_{2.3}$ Dc$_1$ प्राणश्च (for °स्य). K$_{3.4}$ D$_5$ om. the first च. Ś$_1$ K$_1$ मनुदात्ताश्च; B$_{2.4}$ अन्नदातुश्च; T M$_1$ चानुद(T$_2$ °दा)त्तस्य; G$_3$ चारुदंतस्तु. B$_3$ Dn$_1$. n$_2$ D$_{4.6}$ तु; M$_2$ स (for च). — ^{b}) K$_{1.4}$ व्याख्यातः; G$_1$ व्याघाताः; G$_{2.4}$ व्याहृताः. K$_2$ Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ -त्रिंशतिः; B$_{2-4}$ Dc$_2$ D$_1$ G$_{2.4}$ -विंशजाः (for वंशजाः). — ^{c}) Ś$_1$ वेदान्; K$_3$ Dc$_1$ T$_2$ दैवान् (for देवान्). K$_2$ °मुषाश्च; K$_3$ B$_2$m D$_5$ °भुजश्च; K$_4$ °मुखांश्च; Dc$_2$ Dn$_3$ °मुखश्च (for °मुषश्च). K$_3$ [अ]पि (for [अ]न्यान्). — ^{d}) B$_{2.3}$ Dc$_2$ D$_6$ T$_1$ सृजत् (for सृजन्). G$_1$ असृजत्पंच सोत्तरान्.

11 ^{a}) B$_{2-4}$ Dn$_1$. n$_2$ D$_{1.3.4.6}$ G$_3$ सुभीमम् (for अभीमम्). B$_1$ अभीमसम(m °मति)भीमं च; G$_4$ अभीव-मतिभीवं च. — ^{b}) Ś$_1$ K$_{1.2}$ पंच (for भीमं). Ś$_1$ K$_1$ भीमं बला°; K$_2$ भीममहाबलः; B$_4$ भीमपराक्रमं; D$_{2.5}$ भीम-बलाबलौ; M भीमबलं बलं. — ^{c}) K$_2$ Dn$_3$ यज्ञमुखः; K$_4$ D$_{1.5}$ मुखान्; B$_2$ °रसः; B$_3$ °स्तुषः; D$_4$ °मुखाः (for °मुषः). — ^{d}) K$_3$ G$_{1.2.4}$ ततः (for तपः); cf. v.l. 13. K$_1$ B$_{1.3.4}$ Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ देवानां ह्य(B$_3$ °नत्य)सृजत्तपः; B$_2$ देवानामसृजत्ततः.

12 Ś$_1$ K$_1$ om. (hapl.) 12. — ^{a}) K$_3$ सुमित्र-; Dn$_3$ अमित्रं (for सुमित्रं). B$_2$ सुमित्रमतिमित्रं च. — ^{b}) K$_{3.4}$ D$_{1-3.5}$ °वत्सलं; B$_2$ °बांधवं (for °वर्धनम्). — ^{c}) K$_3$ T$_1$ G$_{1.2.4}$ M मित्रवर्माणम्; T$_2$ मित्रावरुणम् (for °धर्माणम्). — ^{d}) B$_3$ एत्य°; Dc अत्य°; G$_1$ अभ्या° (for अभ्य°). K$_{2.3}$ तमः; B$_2$ T$_2$ G$_{1.2.4}$ ततः (for तपः).

13 K$_4$ om. (hapl.) 13. — ^{a}) K$_{1.2}$ सुरं (for सुर-). T$_1$ सुप्रवीरं प्रवीरं च. — ^{b}) B D (except D$_{1-3.5}$) T$_1$ G$_3$ सुरेशं (for सुकेशं). K$_3$ Dc$_1$ D$_4$ सुखवर्चसं; Dc$_2$ Dn$_3$ D$_{1-3.5.6}$ सुरव° (for च सुव°). — ^{c}) S (except G$_3$) भर्तारं (for हन्तारं). — ^{d}) Ś$_1$ K पंच तान्. K$_3$ B$_2$m T$_2$ G$_{2.4}$ ततः (cf. v.l. 11); Dc तमः (for तपः).

14 ^{a}) G$_{1.2.4}$ त्रिविधाः. K$_1$ संश्रिता; K$_2$ संसृता; T$_1$ संविधा; T$_2$ सविता; G$_{1.2.4}$ सहिता; M$_2$ सहितान्. T$_2$ [अ]प्येते (for ह्येते). — ^{c}) K$_4$ मुष्णत्य(m °ते)त्र; B$_4$ D$_5$ मुद्यं(B$_4$ °ष्णं)तोत्र; T$_2$ मुष्णांस्तत्र. — ^{d}) K$_2$ D$_{1.2}$ स्वर्गतौ; D$_5$ मुष्णंतो; S (except G$_3$) स्वर्गतान्. Ś$_1$ K$_{1.2}$ यज्ञयाजिनौ; K$_4$ °नां; T$_2$ G$_4$ °नं.

15 ^{a}) K$_3$ इष्ट्या (for इष्टं). — ^{b}) Ś$_1$ K$_{1.2.4}$ विनि-घ्नंति; D$_2$ G$_4$ विघ्नंति च. B D (except D$_{1.2}$) G$_{1.3}$ महद्धविः; G$_4$ महान्भुवः; M$_2$ मखं भुवि (for महद्भुवि). — ^{d}) K$_{1.2}$ निघ्नंते ते; K$_3$ G$_4$ विघ्नंत्येते; G$_1$ निघ्नंति च (for निघ्नन्त्येते).

16 ^{a}) Ś$_1$ K$_{1-3}$ Dc Dn D$_3$ (marg. *sec. m.*). $_5$ G$_3$ बहिर्- (for हविर्-). Ś$_1$ K$_2$ M$_1$ तथा°; B$_2$ यदा° (for तदा°). — ^{b}) K$_2$ कुचैलैः (for कुशलैः). B$_4$ S (except G$_3$ M$_1$) संप्रकीर्तितं. — ^{c}) K$_4$ (m as in text) तदन्ये; B$_1$ तत्र ते; B$_3$ तद्रेतो; T$_2$ G$_{2.4}$ M तत्रैते; G$_1$ अत्रैते (for तदेते). D$_3$ नोपा°; G$_4$ नाप° (for नोप°). — ^{d}) T G$_2$ M चितो; G$_1$ श्र° (for स्थि°). K$_3$ B$_3$ Dc Dn$_3$ D$_3$ (by corr.). $_{4.6}$ G$_{2.4}$ [ऽ]भवत् (for भवेत्).

17 ^{a}) Ś$_1$ चित्ताग्निर्; K$_{1.3}$ Dc D$_{1.2.5}$ चिताग्निर्; K$_2$ वित्ताग्निर्; K$_3$ B$_{2.4}$ Dn D$_{3.4.6}$ G$_3$ चिताग्नेर्; K$_4$ चितानि; B$_1$ चित्राग्नेर्; T$_2$ चितोग्नेर् (for चितोऽग्निर्). B Dn D$_{2.4.6}$ G$_3$ आज्यं (for यज्ञं). — ^{b}) Ś$_1$ K$_{1.2}$ परोक्षं (for पक्षाभ्यां). K$_4$ D$_3$ तान्प्रबोधते; B$_1$ तात वर्तिते; B$_{2-4}$ Dc Dn D$_{4.6}$ G$_3$ तत्प्रवर्ति(B$_3$ Dc$_2$ Dn$_3$ °र्तै)ते. — ^{c}) K$_3$ मित्रैः (for मन्त्रैः). B$_2$ संप्रमिता; Dc$_2$ प्रशामिता. S

14172 .220.17 .222.17 मन्त्रैः प्रशमिता ह्येते नेष्टं मुष्णन्ति यज्ञियम् ॥ १७
बृहदुक्थतपस्यैव पुत्रो भूमिमुपाश्रितः ।
अग्निहोत्रे हूयमाने पृथिव्यां सद्भिरिज्यते ॥ १८
रथंतरश्च तपसः पुत्रोऽग्निः परिपठ्यते ।
मित्रविन्दाय वै तस्य हविरध्वर्यवो विदुः ।
मुमुदे परमप्रीतः सह पुत्रैर्महायशाः ॥ १९

इति श्रीमहाभारते आरण्यकपर्वणि दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥

२११

मार्कण्डेय उवाच ।
गुरुभिर्नियमैर्युक्तो भरतो नाम पावकः ।
अग्निः पुष्टिमतिर्नाम तुष्टः पुष्टिं प्रयच्छति ।
भरत्येष प्रजाः सर्वास्ततो भरत उच्यते ॥ १
अग्निर्यस्तु शिवो नाम शक्तिपूजापरश्च सः ।
दुःखार्तानां स सर्वेषां शिवकृत्सततं शिवः ॥ २
तपसस्तु फलं दृष्ट्वा संप्रवृद्धं तपो महत् ।
उद्धर्तुकामो मतिमान्पुत्रो जज्ञे पुरंदरः ॥ ३
ऊष्मा चैवोष्मणो जज्ञे सोऽग्निर्भूतेषु लक्ष्यते ।
अग्निश्चापि मनुर्नाम प्राजापत्यमकारयत् ॥ ४

(except G$_3$) त्वेते (for ह्येते). — ^{d}) D$_4$ नेष्टे. B$_1$ मुंचंति; D$_4$ मुष्टंति. S (except G$_3$) याज्ञियं.

18 ^{a}) Dc D$_4$ बृहदुस्थस्; D$_1$ G$_3$ °दुक्थ्यस् (for °दुक्थ-). K$_3$ D$_3$ G$_3$ [इ]व (for [ए]व). T G$_{2.4}$ M तपस्यै (T G$_2$ °स्ये)व बृहदुक्थः (T$_1$ °स्थः; M °क्थ्यः). G$_1$ तस्यैव ब्रह्मदुक्थः स. — ^{b}) B$_{2.4}$ पुत्रौ. Ś$_1$ B$_{1-3}$ Dc D$_{1.4.6}$ अपा°; K$_3$ इचा° (for उपा°). — ^{d}) M$_1$ सोद्भिर्; M$_2$ योद्भिर् (for सद्भिर्). Ś$_1$ T$_1$ इध्यते; K$_{1.2}$ D$_3$ इष्य°; Dc Dn$_3$ उच्य°; G$_{1.2.4}$ ईड्य° (for इज्य°).

19 D$_5$ om. 19^{ab}. — ^{b}) B$_{2.3}$ °पच्य°; T$_2$ °दश्य° (for °पठ्य°). — ^{c}) B$_1$ Dn$_1$. n$_2$ तस्मै; B$_4$ पश्य (for तस्य). Ś$_1$ K$_{1.2}$ मित्रविंदादयस्तस्य; K$_3$ B$_3$ Dc Dn$_3$ D$_{2.5}$ T$_2$ M °विंदाय चैतस्य; G$_{1.2.4}$ °विंदा तथा भार्या. — ^{d}) B$_4$ विभुः; G$_{2.4}$ M$_2$ ददुः (for विदुः). — After 19^{cd}, S (except G$_3$) ins.:

1051* एतैः सह महाभाग तपस्तेजस्विभिर्नृप ।

— ^{f}) B$_1$ सपुत्रेण (for सह पुत्रैर्). D$_3$ °तपाः (for °यशाः).

Colophon. — *Major parvan :* Ś$_1$ K$_2$ Dn$_2$ D$_3$ T$_2$ G$_{2-4}$ आरण्य. — *Sub-parvan :* G$_1$ मार्कंडेयसमस्या. Ś$_1$ K$_{1.3.4}$ B D (all om. sub-parvan name) mention only आंगिरस. — *Adhy. no.* (figures, words or both): Dn$_1$ 219; Dn$_2$ 218; D$_1$ 222; T G$_{1.3}$ M (M$_2$ *inf. lin.*) 212; G$_{2.4}$ M$_2$ (orig.) 214. — *Śloka no.:* Dn$_1$. n$_2$ 19.

211

1 ^{a}) Ś$_1$ K$_{1.2}$ यंता; K$_3$ B Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ जातो; K$_4$ D$_{1-3}$ यज्ञैर्; Dc Dn$_3$ D$_5$ यत्तो (for युक्तो). — ^{b}) S (except G$_3$) पार्थिव (for पावकः). — ^{c}) Ś$_1$ K$_{1.2}$ Dc$_2$ D$_{1.5}$ पुष्टिपति°; B$_1$ तुष्टिमति° (for पुष्टिमति°). — ^{d}) K$_{2.3}$ तुष्टिपुष्टिं; D$_5$ पुष्टः पुष्टिं. — After 1, S (except G$_3$) ins.:

1052* सततं भरतश्रेष्ठ पावको वै महाप्रभः ।

2 ^{a}) K$_4$ B$_{1-3}$ D (except D$_{1-3.5}$) T$_2$ G$_3$ च (for तु). — ^{b}) Ś$_1$ K$_{1.3.4}$ B$_1$ D$_{1.2}$ शक्तिपूजायनश्च यः (Ś$_1$ सः); T G$_{1.2.4}$ M शक्तिः (M$_2$ °क्तः) पूजा च (T$_1$ पूजाय; T$_2$ पूजय) नित्यशः (M निश्चयः). — ^{c}) B D (except D$_{2.3}$) G$_3$ च (for स). — ^{d}) Ś$_1$ transp. शिवकृत् and सततं. D$_6$ विदुः (for शिवः).

3 ^{a}) Ś$_1$ K D$_{1-3.5}$ तपसश्च; B$_2$ उपसह्य. D$_1$ परं; M बलं (for फलं). — ^{b}) Dn$_1$. n$_2$ D$_{4.6}$ T$_2$ G$_{2-4}$ संप्रवृत्तं; D$_1$ प्रवृद्धं च (for संप्रवृद्धं). Ś$_1$ K$_{2-4}$ D$_{1-3.5}$ ततो (for तपो). K$_3$ [ऽ]भवत् (for महत्). S (except G$_3$) तपोमयं (for तपो महत्). — ^{c}) K$_3$ तद्धंतुकामो; B$_1$ उद्धर्तुमानो; B$_4$ D$_5$ तत्कर्तुकामो; Dn$_3$ S (except G$_3$) तद्धर्तुकामो. B$_3$ बलवान् (for मतिमान्). — ^{d}) Ś$_1$ K$_{1.2}$ B$_2$ G$_4$ पुत्रं (for पुत्रो). K$_3$ D$_5$ (before corr.). $_6$ यज्ञे; D$_4$ याज्ञे (for जज्ञे).

4 ^{a}) K$_{1.2.4}$ Dn$_1$. n$_2$ D$_{1.4-6}$ G$_3$ उष्मा; Dc Dn$_3$ तस्माच् (for ऊष्मा). K$_2$ Dc$_1$ Dn$_3$ T$_1$ G$_{1.2.4}$ चैवोष्मणा; D$_1$ °ष्मवाञ्. — ^{c}) B$_1$ हि (for [अ]पि). D$_5$ मतिर् (for

शंयुमग्निमथ प्राहुर्ब्राह्मणा वेदपारगाः ।
आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम् ॥ ५
ऊर्जस्करान्हव्यवाहान्सुवर्णसदृशप्रभान् ।
अग्निस्तपो ह्यजनयत्पञ्च यज्ञसुतानिह ॥ ६
प्रशान्तेऽग्निर्महाभाग परिश्रान्तो गवांपतिः ।
असुराञ्जनयन्घोरान्मर्त्यांश्चैव पृथग्विधान् ॥ ७
तपसश्च मनुं पुत्रं भानुं चाप्यङ्गिरासृजत् ।
बृहद्भानुं तु तं प्राहुर्ब्राह्मणा वेदपारगाः ॥ ८
भानोर्भार्या सुप्रजा तु बृहद्भासा तु सोमजा ।
असृजेतां तु षट् पुत्राञ्शृणु तासां प्रजाविधिम् ॥ ९
दुर्बलानां तु भूतानां तनुं यः संप्रयच्छति ।
तमग्निं बलदं प्राहुः प्रथमं भानुतः सुतम् ॥ १०
यः प्रशान्तेषु भूतेषु मन्युर्भवति दारुणः ।
अग्निः स मन्युमान्नाम द्वितीयो भानुतः सुतः ॥ ११
दर्शे च पौर्णमासे च यस्येह हविरुच्यते ।
विष्णुर्नामेह योऽग्निस्तु धृतिमान्नाम सोऽङ्गिराः ॥ १२
इन्द्रेण सहितं यस्य हविराग्रयणं स्मृतम् ।
अग्निराग्रयणो नाम भानोरेवान्वयस्तु सः ॥ १३

C. 3. 14189
B. 3. 221. 13
K. 3. 223. 13

मनुर्). — ^{d}) K3 अकल्पयत्; B1 स कामयेत् (m as in text); S (except G3) स(G1 सु)कारणं (for अकारयत्).

5 ^{c}) Ś1 K3 आवसक्थ्यं (K3 °क्थं); B4 °सख्यं; T1 आहुः स्तुत्यं; G1 आवत्स्य त्वं (for आवसथ्यं).

6 G1 om. 6^{ab}. — ^{a}) Ś1 K2 T1 ऊर्जस्कारान्; K4 °स्वरान्; B2 °च्चुरान्; B3 (m as in text) ऊर्ध्वंकरान्. — ^{b}) Ś1 °रजत° (for °सदृश°). — ^{c}) Ś1 K D1. 2 वह्नीन्; B1–3 Dn1. n2 D4. 6 T2 G3 ततस्; B4 Dc Dn3 D3. 5 वह्निस् (for अग्निस्). Ś1 K B4 Dc Dn3 D1–3. 5 ततो; G4 तप्यो (for तपो). Ś1 K1. 2 [ऽ]न्यां जनयेत्; K3. 4 D1–3. 5 ह्यजनयत्; B4 [ऽ]प्य°; D4 [ऽ]भ्य° (for ह्य°). — ^{d}) K4 D2. 3 यज्ञः; M2 जज्ञे (for यज्ञ-). B3 D2 इव (for इह).

7 M om. 7. — ^{a}) K B1. 3 Dc D2. 3. 5 प्रशांतो (K2 °भांतो); T1 G1. 2. 4 °ततो (for °शान्ते). Ś1 K1. 2. 4 B2 D2 T2 °भागः; Dc D1 °राज (for °भाग). — ^{b}) T1 प्रति° (for परि°). K3 गतागतिं; D2 गवां गतिः (for गवां पतिः). — K2 om. 7^{c}–8^{d}. — ^{c}) B3 T1 G2. 4 जनयद्; Dc D2. 3. 5 असृजद् (for जनयन्). — ^{d}) K3. 4 D3. 5 मत्स्यान् (for मर्त्यान्). G1. 2. 4 च स (for चैव). — G1 reads 3. 209. 16–21 after 7; M (which om. 7) reads them after 6.

8 K2 om. 8 (cf. v.l. 7). — ^{ab}) D5 भानुं पुत्रं (by transp.). T1 पूर्वं (for पुत्रं) Ś1 K3 B Dn1. n2 D4. 6 T2 G3 चाप्यंगिराः सृजत्; K4 Dc Dn3 D1–3. 5 चासृजदं(D5 °तां)गिराः. — ^{c}) K3 Dc D5 ततः; T G2. 4 च तं (for तु तं). — D5 om. (hapl.) 8^{d}–10^{c}.

9 D5 om. 9 (cf. v.l. 8). — ^{a}) Ś1 K B1 (m as in text) D1–3 सूर्यजा तु; S (except G3) महाराज (for सुप्रजा तु). — ^{b}) K3 °भानुश्; B2 °होषा (for °भासा). K3 D2 S (except G3) च (for तु). B (B3 marg.) Dc Dn D4. 6 G3 सूर्यजा; B3 शाम° (for सोम°). — ^{c}) Ś1 K2. 3 B1 अयाचेतां; B2. 4 असृजत्तान् (B4 °त्सा); D1–3 अजायेतां; G2. 4 अजायत (for असृजेतां). G2. 4 हि (for तु). Ś1 K2. 4 D2. 3 ते; K3 B1 तान् (for षट्). T1 G1 षट् पुत्राञ्जनयामास; T2 सा षट् पुत्रानजायंत; M षट् पुत्रान्याचत तदा. — After 9^{c}, G1 ins.:

1053* तदा सा कन्यया सह ।
भानोरङ्गिरसस्याथ.

— ^{d}) Ś1 K1–3 ताभ्यां; D1. 3 G2. 4 तेषां; D2 M1 तस्याः; G1 तस्य; M2 तस्यां (for तासां). Ś1 D1 °विधिः (for °विधिम्). T2 हर्षपुत्रांस्तदा शृणु.

10 D5 om. 10^{abc} (cf. v.l. 8). — ^{b}) Ś1 K D1 तनूर्; B1. 3 Dc Dn D4. 6 G3 असून्; B4 D2. 3 बलं (for तनुं). B2 असृजन्यः प्रयच्छति. — ^{cd}) Ś1 transp. बलदं and प्रथमं. B4 भानुजः; S (except G3) °जं (for °तः).

11 11^{ab} = (var.) 3. 209. 22^{ab}. — ^{a}) K3 तु शा° (for प्रशा°). G1 लोके° (for भूते°). T1 भूतेषु यः प्रशांतेषु. — ^{c}) G4 अग्निः सुमन्युनामा वै. — ^{d}) S (except G3) भानुजः (for °तः). Ś1 K2 स्वयं (for सुतः).

12 ^{a}) Ś1 K3 D5 M पौर्णमास्ये; T1 G1 पूर्णमासे; T2 G2. 4 पौर्णमास्यां. — ^{b}) Ś1 °रुष्यते; K1. 2 °रिष्यते (for °रुच्यते). D1 हविर्यस्येह चोच्यते. — ^{c}) K3 D1–3. 5 T1 M विष्णुना सह (for विष्णुर्नामेह). Ś1 K1 [इ]ति; K4 T2 ह (for [इ]ह). Ś1 K2 T1 सोग्नि°; M1 वह्नि° (for योऽग्नि°). — ^{d}) Ś1 K1. 2 G1 नामतोंगिराः; K4 नामतोविरात्; D1. 3 नामतो विराट्. B2 धृतिर्नामापि सोंगिराः.

13 ^{a}) Ś1 K1. 2 तस्य; G4 यस्तु (for यस्य). — ^{b}) Ś1 K2 आश्रयणं; K3 B3 Dc2 अग्रयणं; K4 D3 आऽयरणं; B1 अग्रहणं; B2 अऽयहरं; D2 आम्रायणं. Ś1 K1. 2 विदुः (for

14189 221. 14 223. 14 चातुर्मास्येषु नित्यानां हविषां यो निरग्रहः ।
चतुर्भिः सहितः पुत्रैर्भानोरेवान्वयस्तु सः ॥ १४
निशां त्वजनयत्कन्यामग्नीषोमावुभौ तथा ।
मनोरेवाभवद्भार्या सुषुवे पञ्च पावकान् ॥ १५
पूज्यते हविषाग्र्येण चातुर्मास्येषु पावकः ।
पर्जन्यसहितः श्रीमानग्निर्वैश्वानरस्तु सः ॥ १६
अस्य लोकस्य सर्वस्य यः पतिः परिपठ्यते ।
सोऽग्निर्विश्वपतिर्नाम द्वितीयो वै मनोः सुतः ।
ततः स्विष्टं भवेदाज्यं स्विष्टकृत्परमः स्मृतः ॥ १७
कन्या सा रोहिणी नाम हिरण्यकशिपोः सुता ।
कर्मणासौ बभौ भार्या स वह्निः स प्रजापतिः ॥ १८
प्राणमाश्रित्य यो देहं प्रवर्तयति देहिनाम् ।
तस्य संनिहितो नाम शब्दरूपस्य साधनः ॥ १९
शुक्लकृष्णगतिर्देवो यो बिभर्ति हुताशनम् ।
अकल्मषः कल्मषाणां कर्ता क्रोधाश्रितस्तु सः ॥ २०
कपिलं परमर्षिं च यं प्राहुर्यतयः सदा ।
अग्निः स कपिलो नाम सांख्ययोगप्रवर्तकः ॥ २१
अग्निर्यच्छति भूतानि येन भूतानि नित्यदा ।
कर्मस्विह विचित्रेषु सोऽग्रणीर्वह्निरुच्यते ॥ २२
इमानन्यान्समसृजत्पावकान्प्रथितान्भुवि ।

स्मृतम्). — ^{c}) Ś$_1$ K$_{1.2}$ आश्रयणो; K$_3$ अग्रह्यणो; K$_4$ D$_{2.3}$ आग्र्ययणो; B$_1$ अग्रहणो; B$_2$ अग्र्यं यशो; B$_3$ Dc Dn$_3$ D$_6$ अग्रयणो. — ^{d}) = 14^{d}. B$_{1.4}$ [आ]त्मज° (for [अ]न्वय°). K$_3$ तु यः; S (except G$_3$) स्मृतः (for तु सः).

14 Ś$_1$ K$_{1.2}$ D$_1$ om. (hapl.) 14. — ^{b}) K$_3$ B$_{1.3.4}$ Dc Dn$_3$ D$_3$ (*sup. lin.*) T$_1$ G$_{2.4}$ M निरग्रजः; K$_4$ D$_{2.3}$ (orig.) निरग्रजः; B$_2$ निरुच्यते; D$_6$ T$_2$ G$_1$ [ऽ]ग्निरग्रतः (T$_2$ °जः; G$_1$ °हः). — M$_2$ om. (hapl.) from पुत्रैर् (in 14^{c}) up to सहितः (in 16^{c}). — ^{c}) G$_{1.2.4}$ सहितैः (for °तः). — ^{d}) = 13^{d}. G$_1$ अंगिरस° (for एवान्वय°). T स्मृतः (for तु सः).

15 M$_2$ om. 15 (cf. v.l. 14); G$_1$ om. (hapl.) 15–16. — ^{a}) B$_{2.4}$ Dc$_2$ Dn$_1$. n$_2$ D$_3$ T$_2$ निशा (for निशां). B$_1$ Dn$_3$ M$_1$ च (for तु). — ^{b}) Ś$_1$ K$_{1.2}$ सुतौ; G$_2$ अपि (for तथा). — ^{c}) Dn$_1$ भानोर् (for मनोर्). D$_6$ या चा°; T$_1$ M$_1$ एषा° (for एवा°). — ^{d}) T$_2$ °वे पावकान्बहून्.

16 M$_2$ om. up to सहितः (in 16^{c}); G$_1$ om. 16 (cf. v.l. 14, 15). — ^{a}) K$_4$ पूज्यंते; B$_2$ युज्यते. K$_{2.4}$ Dn$_3$ D$_1$ हविषाग्रेण; T G$_{2.4}$ M$_1$ हविषा (T$_1$ °षां) योग्रे. — ^{b}) B$_2$ चातुर्मास्येन; D$_6$ °स्ये ह. — ^{c}) Ś$_1$ पंचान्यस°; K$_1$ पचन्या स°; B$_{2.4}$ पर्जन्यः स°. — ^{d}) Dc Dn$_3$ च सः; T$_2$ ततः (for तु सः).

17 ^{a}) K$_{1.2}$ B$_{1.3}$ D$_2$ M$_1$ transp. लोक° and सर्व°. — ^{b}) K$_4$ B D (except D$_{1-3.5}$) G$_3$ प्रभुः (for पतिः). K$_3$ B Dn$_1$. n$_2$ D$_{1-4.6}$ G$_3$ परिपच्यते; Dc$_1$ Dn$_3$ M$_1$ °पद्यते. — ^{d}) B$_1$ यो (for वै). S (except T$_2$ G$_3$) द्वितीयस्त(G$_{2.4}$ °स्ता)पसः सुतः. — After 17^{cd}, T G$_{1.4}$ M *repeat* 3. 209. 16–21. — G$_2$ M om. 17^{ef}. — 17^{ef} = 3. 209. 21^{cd}. — ^{e}) Ś$_1$ K$_{2.3}$ D$_{2.3.5}$ G$_4$ त्विष्टं; K$_1$ त्विष्टिं; K$_4$ सृष्टं; B$_3$ Dc$_2$ शि° (for स्वि°). Ś$_1$ K$_{1.2}$ गुह्यं; K$_{3.4}$ D$_{1-3.5}$ T G$_{1.4}$ ग्राह्यं; B$_1$ गृह्यं (for आज्यं). — ^{f}) B$_2$ शिष्ट°; D$_3$ स्त्विष्ट°; G$_1$ मिष्ट° (for स्विष्ट°). K$_3$ B D (except D$_{2.3}$) G$_3$ परमस्तु सः; G$_{1.4}$ परसंमतः.

18 ^{a}) D$_{2.3}$ कन्यका; G$_{1.2.4}$ M$_1$ कन्या या (for कन्या सा). S (except G$_3$) हरिणी (for रोहिणी). — ^{b}) K$_1$ °कश्यपोः. K$_2$ Dc D$_{1.4}$ सुताः. — ^{c}) K$_4$ D$_{1-3}$ कर्दमस्य; B$_4$ T$_2$ G$_{1.2.4}$ M$_1$ कर्मणोसौ. K$_{1.2}$ B$_1$ T$_2$ M$_1$ सा; B$_4$ वा (for [अ]सौ). K$_3$ D$_1$ भवद्; T$_1$ वहौ (for बभौ).

19 ^{a}) Ś$_1$ K B$_1$ D$_{2.3.5}$ T G$_{1.2.4}$ M$_1$ प्राणम् (as in text); the rest प्राणान्. — Dn$_2$ om. 19^{cd}. — ^{c}) K$_2$ D$_3$ यस्य (for तस्य). — ^{d}) M$_2$ तस्य (for शब्द-). Ś$_1$ K D$_{1-3.5}$ साधकः (for °नः).

20 ^{a}) G$_1$ शुक्लं कृष्णं (for शुक्लकृष्ण-). D$_2$ गती; B$_4$ S (except T$_2$ G$_3$) -वपुर् (for -गतिर्). Ś$_1$ देहो; K$_2$ देहे (for देवो). — ^{b}) D$_1$ विशते यो (for यो बिभर्ति). B$_1$ Dc$_2$ D$_2$ T$_1$ G$_{2.4}$ M$_1$ हुताशनः.

21 ^{ab}) Ś$_1$ K D$_{1-3.5}$ परमर्षिं च यं प्राहुः कपिलं यतयः (Ś$_1$ K$_{1.2}$ मुनयः) सदा. — ^{c}) D$_5$ S (except G$_3$) तु for स).

22 ^{a}) K$_{3.4}$ अग्रे (K$_4$ °ग्नं) यच्छति भूतानां; B D G$_3$ अग्रं (D$_2$ अयं) यच्छंति भूतानां; T$_1$ G$_{1.2.4}$ M योंतर् (T$_1$ यो नियच्छति भूतानि. — ^{b}) B$_1$ गच्छति; T G$_{1.2.4}$ M$_1$ चेष्टंति (for भूतानि).

23 ^{a}) Ś$_1$ K$_{2.3}$ अवसृजत्; B$_1$ अप्यसृजत्; B$_2$ D$_{4.6}$ M$_2$ असृजत; T$_1$ असृजन्यः; T$_2$ G$_{1.2}$ चा(G$_1$ च)सृजत्तान्; G$_4$ च ससृजे; M$_1$ अभ्यसृजत् (for समसृजत्). — ^{b}) K$_3$ T$_1$

अग्निहोत्रस्य दुष्टस्य प्रायश्चित्तार्थमुल्बणान् ॥ २३
संस्पृशेयुर्यदान्योन्यं कथंचिद्वायुनाग्नयः ।
इष्टिरष्टाकपालेन कार्या वै शुचयेऽग्नये ॥ २४
दक्षिणाग्निर्यदा द्वाभ्यां संसृजेत तदा किल ।
इष्टिरष्टाकपालेन कार्या वै वीतयेऽग्नये ॥ २५
यद्यग्नयो हि स्पृश्येयुर्निवेशस्था दवाग्निना ।
इष्टिरष्टाकपालेन कार्या तु शुचयेऽग्नये ॥ २६
अग्निं रजस्वला चेत्स्त्री संस्पृशेदग्निहोत्रिकम् ।
इष्टिरष्टाकपालेन कार्या दस्युमतेऽग्नये ॥ २७
मृतः श्रूयेत यो जीवन्परेयुः पशवो यथा ।
इष्टिरष्टाकपालेन कर्तव्याभिमतेऽग्नये ॥ २८
आर्तो न जुहुयादग्निं त्रिरात्रं यस्तु ब्राह्मणः ।
इष्टिरष्टाकपालेन कार्या स्यादुत्तराग्नये ॥ २९
दर्शं च पौर्णमासं च यस्य तिष्ठेत्प्रतिष्ठितम् ।

C. 3. 14206
B. 3. 221. 30
K. 3. 223. 30

M$_2$ नव; M$_1$ नृप (for भुवि). T$_2$ G$_{1.\,2.\,4}$ पावकान्प्रथितौजसः. — ^{d}) Ś$_1$ K$_{1.\,2}$ उल्बणं; K$_3$ D$_{1.\,5}$ उद्वहन्; T$_1$ G$_1$ उद्वहेत्; G$_{2.\,4}$ उद्धलान् (for उल्बणान्).

24 $24^c=25^c, 26^c, 27^c, 28^c, 29^c, 30^c, 31^c$. — ^{d}) = (var.) 26^d. K$_4$ वै विधये; B$_1$ दस्युमते; Dn$_1$. n$_2$ D$_{2.\,5}$ M वै (M Dn$_1$ वि-) विचये; D$_1$ विविधये; D$_3$ सुमतये; T$_1$ तंतुमते; T$_2$ [अ]पि प्रचये; G$_1$ [अ]न्नपतये; G$_{2.\,4}$ तु शुचये. — After 24, T$_1$ reads 30.

25 Ś$_1$ K$_{1.\,2.\,4}$ om. (hapl.) 25; D$_2$ om. 25^a–28^b; D$_5$ T$_1$ om. (hapl.) 25–26. — ^{b}) K$_3$ संसृज्येत; B$_2$ संश्रयेत; T$_2$ संस्पृशेत. M$_1$ संस्पृशेदाग्निहोत्रिकं. — $25^c=24^c$, etc. — K$_3$ om. 25^d–26^d. — ^{d}) G$_1$ तु शुचये; G$_2$ विविचये; G$_4$ [अ]न्नपतये; M स्याद्वीतये (for वै वीतये). B$_1$ कर्तव्याभिमतेग्नये.

26 K$_3$ D$_{2.\,5}$ T$_1$ om. 26 (cf. v.l. 25). — ^{a}) K$_{1.\,2}$ B$_4$ G$_4$ यद° (for यद्य°). Ś$_1$ K$_{1.\,2.\,4}$ विसृष्ये(K$_4$ °मिश्रे)युर्; Dn D$_{4.\,6}$ G$_3$ हि स्पृशेयुर् (Dn$_3$ स्पृशेयुश्च); D$_1$ [ऽ]भिमर्शेयुर्; G$_{1.\,4}$ [ऽ]भिस्पृश्येयुर्. — ^{b}) Ś$_1$ विशेषस्था; K$_4$ निविशस्था; B$_1$ निवेशस्तं. K$_1$ दवाग्नये. — ^{c}) $=24^c$, etc. Dc अष्टाकपाले तु. — ^{d}) = (var.) 24^d. B$_3$ हि; B$_4$ Dc वै; T$_2$ M$_1$ स्यात् (for तु). B$_2$ कार्या पार्थकृतेग्नये. — After 26, T$_2$ G$_{1.\,2.\,4}$ M$_1$ read 31.

ते सर्व एव राजानमभिजग्मुर्युधिष्ठिरम् ।
अभिगम्य च तत्सर्वं शशंसुस्तस्य दुष्कृतम् ॥ ११
अजातशत्रुस्तच्छ्रुत्वा गन्धर्वस्य वचस्तदा ।
मोक्षयामास तान्सर्वान्गन्धर्वान्प्रशशंस च ॥ १२
दिष्ट्या भवद्भिर्बलिभिः शक्तैः सर्वैर्न हिंसिताः ।
दुर्वृत्तो धार्तराष्ट्रोऽयं सामात्यज्ञातिबान्धवः ॥ १३
उपकारो महांस्तात कृतोऽयं मम खेचराः ।
कुलं न परिभूतं मे मोक्षेणास्य दुरात्मनः ॥ १४
आज्ञापयध्वमिष्टानि प्रीयामो दर्शनेन वः ।
प्राप्य सर्वानभिप्रायांस्ततो व्रजत माचिरम् ॥ १५
अनुज्ञातास्तु गन्धर्वाः पाण्डुपुत्रेण धीमता ।

C. 3. 15026
B. 3. 246. 17
K. 3. 247. 21

T_1 G_4 M_2 [ऽ]पहसितुं; T_2 $G_{1.2}$ वंचयितुं (for ऽवहसितुं).

5 ^{a}) Ś$_1$ त्वेषां; K $B_{1.3.4}$ Dc $D_{1-3.5}$ T_2 $G_{1.4}$ तेषां; T_1 M ह्येषां (for चैषां). — ^{b}) $K_{3.4}$ $D_{1-3.5}$ पुरंदरः; S (except G_3 M_1) सुराधिपः (for सुरे°). — ^{c}) Ś$_1$ B_2 गत्वा (for बद्ध्वा). — ^{d}) K_3 G_4 सामात्यं तम्; B_{1-3} Dn $D_{4.6}$ G_3 सहामात्यम् (for सामात्यं त्वम्).

6 ^{b}) M_1 अच्युतः; M_2 अच्युत (for आहवे). — ^{c}) B Dn $D_{4.6}$ G_3 स च; G_1 तव (for स हि). $K_{1.2}$ प्रियसखा; $G_{2.4}$ M प्रियसखस् (for प्रियः सखा). T_1 मह्यं (for तुभ्यं). — ^{d}) $B_{2.4}$ Dn $D_{4.6}$ G_3 पांडव (!).

7 ^{a}) $K_{1.2}$ देवदेवस्य. — ^{b}) Dc G_1 M_1 ध्रुवं (for द्रुतम्). K_3 ततो मही गतो द्रुती (sic); D_5 ततो स्म हि गतो द्रुतं; T_1 G_2 ततोस्मि ह्यागतो द्रुतं; T_2 ततो ह्यभ्यागतो द्रुतं; G_1 ततोहं ह्यागतो ध्रुवं द्रुतं (sic). — After 7, B Dc Dn $D_{4.6}$ G_3 ins.:

1131* नेष्याम्येनं दुरात्मानं पाकशासनशासनात् ।
[B_1 Dc [अ]हं (for [ए]नं).]

8 Ś$_1$ धनंजयः (for अर्जुनः). — ^{b}) G_4 धार्तराष्ट्रः (for भ्राता°). $K_{2.4}$ सुयोधनं.

9 K_3 वैशं° (for चित्र°). — ^{a}) $B_{1.3}$ Dc Dn D_2 नित्यसंतुष्टो; D_3 °संद्रष्टो; M पापसेवी च. T_2 $G_{1.2.4}$ पापयोनिरयं दुष्टो. — ^{d}) $K_{1.2}$ परंतप (for धनं°).

10 Before 10, S (except T_2 G_3) ins. अर्जुनः. — ^{a}) Ś$_1$ K Dc $D_{1-3.5}$ ह्यस्य; G_1 M_2 त्वस्य (for तस्य). — ^{b}) $B_{1.3}$ धनंजयः; B_2. sm. $_4$ Dc Dn $D_{4.6}$ T_2 $G_{1.3}$ युधिष्ठिरः (for महा°). — ^{c}) B_2 [ऽ]पि (for हि). — ^{d}) K_3 Dc $D_{2.3.5}$ कुर्याद् (for कुरु). Dc $D_{3.5}$ [इ]च्छति. B_2 श्रुत्वा वाक्यं यथेप्सितं.

11 T_2 om. the ref. — ^{a}) K_3 $G_{2.4}$ सर्वे. D_2 एव राजानः; $G_{2.4}$ धर्मराजानम् (for एव राजानम्). — ^{c}) G_1 ततः (for च तत्). — ^{d}) B Dn $D_{4.6}$ चेष्टितं; D_2 दुष्करं (for दुष्कृतम्).

12 ^{b}) T_1 च तद्वचः (for वचस्तदा). — K_3 om. 12^{cd}. — ^{c}) K_4 मोच° (for मोक्ष°). — ^{d}) B_4 D_5 G_1 ह (for च).

13 Before 13, $B_{3.4}$ ins. युधिष्ठिर उ°. — ^{a}) K_3 दृष्ट्वा (for दिष्ट्या). — ^{b}) T_1 transp. शक्तैः and सर्वैः. Ś$_1$ $K_{1.2}$ सद्भिर् (for सर्वैर्). $K_{2.4}$ T_1 नि- (for न). — ^{c}) K_4 $D_{3.5}$ transp. धार्तराष्ट्रः and ऽयं.

14 ^{a}) $K_{1.2}$ तावत् (for तात). — ^{b}) T_2 धर्मं च (for ऽयं मम). B Dn $D_{4.6}$ G_3 खेचरैः; D_{1-3} T $G_{1.2.4}$ M_1 °र. — ^{c}) K_3 बलं नः; S (except G_3) न कुलं (by transp.). K_2 च परिभूतो; D_2 त्वपरिभूतं (for न परि°). D_1 च; D_2 नो (for मे). — ^{d}) B_{2-4} Dn $D_{3.4.6}$ G_3 मोक्षणे (for मोक्षेण).

15 ^{a}) K_4 इष्टानां; D_6 इच्छामि (for इष्टानि). — ^{b}) K_2 D_{4-6} G_3 M_1 प्रियामो; T_1 प्रियं मे; T_2 प्रीतिमंद्-; G_2 प्रीतिमान्; G_4 प्रीतं मां. $K_{1.2.4}$ च (for वः). — ^{c}) $K_{1.2}$ प्राप्त एवोपकारोयं; B_3m अक्षताः सन्निरामर्षास्. — ^{d}) T_2 G_1 गच्छ° (for व्रज°).

C. 3. 15026
B. 3. 246. 17
K. 3. 247. 21

सहाप्सरोभिः संहृष्टाश्चित्रसेनमुखा ययुः ॥ १६
देवराडपि गन्धर्वान्मृतांस्तान्समजीवयत् ।
दिव्येनामृतवर्षेण ये हताः कौरवैर्युधि ॥ १७
ज्ञातींस्तानवमुच्याथ राजदारांश्च सर्वशः ।
कृत्वा च दुष्करं कर्म प्रीतियुक्ताश्च पाण्डवाः ॥ १८
सस्त्रीकुमारैः कुरुभिः पूज्यमाना महारथाः ।
बभ्राजिरे महात्मानः कुरुमध्ये यथाग्नयः ॥ १९
ततो दुर्योधनं मुच्य भ्रातृभिः सहितं तदा ।
युधिष्ठिरः सप्रणयमिदं वचनमब्रवीत् ॥ २०
मा स्म तात पुनः कार्षीरीदृशं साहसं क्वचित् ।
न हि साहसकर्तारः सुखमेधन्ति भारत ॥ २१
स्वस्तिमान्सहितः सर्वैर्भ्रातृभिः कुरुनन्दन ।
गृहान्व्रज यथाकामं वैमनस्यं च मा कृथाः ॥ २२
पाण्डवेनाभ्यनुज्ञातो राजा दुर्योधनस्तदा ।
विदीर्यमाणो व्रीडेन जगाम नगरं प्रति ॥ २३
तस्मिन्गते कौरवेये कुन्तीपुत्रो युधिष्ठिरः ।
भ्रातृभिः सहितो वीरः पूज्यमानो द्विजातिभिः ॥ २४
तपोधनैश्च तैः सर्वैर्वृतः शक्र इवामरैः ।
वने द्वैतवने तस्मिन्विजहार मुदा युतः ॥ २५

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥

---

16 D$_6$ om. 16. — ^{a}) B$_3$ च (for तु). — After 16, S (except G$_3$ M$_2$) ins.:

1132* देवलोकं ततो गत्वा गन्धर्वैः सहितस्तदा ।
न्यवेदयच्च तत्सर्वं चित्रसेनः शतक्रतोः ।

17 ^{a}) B$_1$ देवराजश्च; D$_{3.5}$ G$_{1.2}$ °राजोपि. — ^{b}) K$_3$ T$_2$ G$_{1.2}$ हतांस्तान्. K$_3$ अपि जीवयन्. — ^{d}) K$_2$ कौरवा; K$_3$ Dc D$_2$ पांडवैर्; D$_1$ पांडवा (for कौरवैर्). — After 17, D$_2$ ins.:

1133* चित्रसेनस्तदा वाक्यमुवाच प्रौढया गिरा ।
मुञ्चध्वं सानुजामात्यं सदारं च सुयोधनम् ।
गन्धर्वास्तु वचः श्रुत्वा चित्रसेनस्य वै द्रुतम् ।
राजानं मोक्षयामासुर्बद्धं निगडबन्धनैः ।
सदारं सानुगामात्यं बाणजालमये वने । [5]
लुठन्तश्चापि ते सर्वे युधिष्ठिरसमीपतः ।
पतिता लज्जिताश्चैव तस्थुश्चाधोमुखास्तदा ।
युधिष्ठिरोऽपि दयया तान्समीक्ष्य तथागतान् ।

18 ^{a}) K$_3$ D$_3$ ज्ञातीस्. K$_3$ Dc D$_{1.5}$ G$_1$ °मोच्या°; K$_4$ D$_{2.3}$ °मोक्ष्या°; B$_1$ °जित्वा°; T$_2$ G$_2$ °जित्या° (for °मुच्या°). — ^{c}) K$_{1.2}$ दृष्ट्वा (for कृत्वा). K Dc D$_{1-3.5}$ S (except G$_3$) तद् (for च). — ^{d}) Ś$_1$ K$_{2.3}$ Dc D$_{2.3}$ M$_2$ स्म; B$_4$ D$_5$ तु (for च).

19 ^{a}) K$_1$ आस्त्री-; K$_2$ आस्त्रैः (for सस्त्री-). — ^{c}) D$_3$ विभ्राजिरे. — ^{d}) K$_3$ B Dc Dn D$_{3.4.6}$ T$_2$ G$_3$ क्रतु° (for कुरु°).

20 ^{a}) K$_{3.4}$ B D G$_3$ मुक्तं; T$_1$ G$_{1.2.4}$ मोच्य; T$_2$ मध्ये (for मुच्य). M$_2$ ततो युधिष्ठिरो राजा. — ^{b}) B$_{1.3.4}$ Dn D$_{4.6}$ T$_2$ G$_3$ M सहितः. M$_2$ प्रभुः (for तदा). — ^{cd}) B$_{1-3}$ Dn D$_{4.6}$ G$_3$ तु प्रणयाद् (for सप्रणयम्). M$_2$ ससांत्वमब्रवीच्छ्रीमानवमुच्य सुयोधनं.

21 ^{b}) D$_3$ सहसा (for साहसं). — ^{c}) M$_2$ साहसानां (for हि साहस-). — ^{d}) K$_2$ सुखमेधं न (for °मेधन्ति). K$_{1.2}$ कर्हिचित् (for भारत).

22 ^{a}) T$_2$ G$_1$ स्वस्तीत्युक्त्वाथ (T$_2$ तु) तान्सर्वान्. — ^{c}) G$_2$ यज (for व्रज).

23 Before 23, B Dc Dn D$_{4.6}$ ins. वैशं° उ°. — ^{a}) K$_{1.2}$ [अ]भिनुज्ञातो. — ^{b}) Ś$_1$ ततः (for तदा). — After 23^{ab}, B$_{2-4}$ Dc Dn D$_{4-6}$ G$_3$ ins.:

1134* अभिवाद्य धर्मपुत्रं गतेन्द्रिय इवातुरः ।
[G$_3$ प्रणम्य धर्मपुत्रं तु (for the prior half).]

— ^{c}) K$_3$ T$_2$ विदार्य°. K$_3$ B D G$_3$ व्रीडावान् (for व्रीडेन). — ^{d}) G$_{2.4}$ तदा (for प्रति).

24 ^{a}) M$_2$ धार्तराष्ट्रे (for कौर°). — ^{c}) K$_4$ T$_2$ G$_2$ वीरैः. — ^{d}) T$_1$ महात्म°; G$_1$ महर्षि° (for द्विजाति°).

25 K$_3$ om. 25^{ab}. — ^{a}) M$_2$ महर्षिभि° (for तपोधनै°). — ^{c}) B Dn D$_{4.6}$ तथा (for वने). — ^{d}) Ś$_1$ K D$_5$ T G$_2$ मुदान्वितः.

Colophon. — *Major parvan:* Ś$_1$ K$_{1.2}$ Dn$_2$ T$_2$ G$_{2.4}$ आरण्य. — *Sub-parvan:* K$_{1.3.4}$ B D G$_3$ घोषयात्रा; to it these MSS. (except K$_{1.3}$ B$_{2.3}$) add समाप्त. — *Adhy. no.* (figures, words or both): B$_4$ 317; Dn$_1$ (*sup. lin.*). n$_3$ 245; Dn$_2$ 244; D$_1$ 247; T$_1$ G$_{2.4}$ M (M$_2$ *inf. lin.*) 238 (M$_2$ orig. 240); T$_2$ G$_1$ 236. — *Śloka no.:* D$_4$ 27; D$_1$ 54.

२३६

जनमेजय उवाच ।
शत्रुभिर्जितबद्धस्य पाण्डवैश्च महात्मभिः ।
मोक्षितस्य युधा पश्चान्मानस्थस्य दुरात्मनः ॥ १
कत्थनस्यावलिप्तस्य गर्वितस्य च नित्यशः ।
सदा च पौरुषौदार्यैः पाण्डवानवमन्यतः ॥ २
दुर्योधनस्य पापस्य नित्याहंकारवादिनः ।
प्रवेशो हास्तिनपुरे दुष्करः प्रतिभाति मे ॥ ३
तस्य लज्जान्वितस्यैव शोकव्याकुलचेतसः ।
प्रवेशं विस्तरेण त्वं वैशंपायन कीर्तय ॥ ४
वैशंपायन उवाच ।
धर्मराजनिसृष्टस्तु धार्तराष्ट्रः सुयोधनः ।
लज्जयाधोमुखः सीदन्नुपासर्पत्सुदुःखितः ॥ ५
स्वपुरं प्रययौ राजा चतुरङ्गबलानुगः ।
शोकोपहतया बुद्ध्या चिन्तयानः पराभवम् ॥ ६
विमुच्य पथि यानानि देशे सुयवसोदके ।
संनिविष्टः शुभे रम्ये भूमिभागे यथेप्सितम् ।
हस्त्यश्वरथपादातं यथास्थानं न्यवेशयत् ॥ ७
अथोपविष्टं राजानं पर्यङ्के ज्वलनप्रभे ।
उपप्लुतं यथा सोमं राहुणा रात्रिसंक्षये ।
उपगम्याब्रवीत्कर्णो दुर्योधनमिदं तदा ॥ ८
दिष्ट्या जीवसि गान्धारे दिष्ट्या नः संगमः पुनः ।
दिष्ट्या त्वया जिताश्चैव गन्धर्वाः कामरूपिणः ॥ ९
दिष्ट्या समग्रान्पश्यामि भ्रातॄंस्ते कुरुनन्दन ।
विजिगीषून्रणान्मुक्तान्निर्जितारीन्महारथान् ॥ १०
अहं त्वभिद्रुतः सर्वैर्गन्धर्वैः पश्यतस्तव ।
नाशक्नुवं स्थापयितुं दीर्यमाणां स्ववाहिनीम् ॥ ११

C. 3. 15048
B. 3. 247. 12
K. 3. 248. 11

236

1 ^{a}) T$_2$ G$_{1.3.4}$ शत्रुभिर्वध्यमानस्य. — ^{b}) Dc$_2$ महर्षिभिः (for महात्मभिः). — ^{c}) K$_4$ D$_{1.2}$ मोक्षितश्च; Dc$_2$ मोहितस्य; G$_1$ क्षोभि°. T G$_1$ कथं; G$_{2.4}$ भयात् (for युधा). B$_1$ जित्वा; T G$_1$ त्वा(T$_2$ चा)सीन्; G$_{2.4}$ M$_1$ तस्मान् (for पश्चान्). — ^{d}) K$_{2-4}$ D$_{2.3}$ मानितस्य; B$_{1.2.4}$ D$_{1.5}$ मानिनश्च; B$_3$ Dc Dn D$_{4.6}$ G$_3$ मानिनः सु- (for मानस्थस्य). D$_1$ दुरात्मभिः; T$_1$ महात्मनः.

2 ^{a}) K$_4$ B$_1$ D$_{1.3}$ S (except G$_3$) कथं तस्य (for कत्थनस्य). — ^{b}) Ś$_1$ K$_{3.4}$ गर्हितस्य; G$_1$ गर्जितस्य. B$_4$ दुरात्मनः (for च नित्यशः). — ^{d}) K$_{3.4}$ Dc$_2$ T$_1$ °मन्यत; D$_{1.2}$ °जानतः; D$_3$ °मन्यते (for °मन्यतः).

3 ^{b}) Ś$_1$ K B$_4$ D$_{1-3}$ नित्याहंकारमानिनः; Dc साहंकारस्य मानिनः. — K$_1$ om. 3^{d}–4^{c}. — ^{d}) T$_2$ G$_1$ दुष्करं.

4 K$_1$ om. 4^{abc} (cf. v.l. 3). — ^{a}) K$_{2-4}$ D$_{3.5}$ T$_1$ M [ए]वं; B$_1$ [इ]ह (for [ए]व). — ^{b}) D$_2$ शोकेनाकुल°. — ^{c}) Ś$_1$ K$_2$ हस्तिनपुरे (for विस्तरेण त्वं).

5 D$_2$ om. 5. — ^{a}) Ś$_1$ K$_{1.2}$ धर्मराज्ञा वि(Ś$_1$ नि)सृष्टश्च; K$_3$ B$_1$ Dc D$_{1.5}$ °राजविसृष्टस्तु (D$_1$ °स्य). — ^{c}) Ś$_1$ K$_{1.2}$ [अ]भिमुखः. D$_1$ चासीद्; Dc श्रीमान् (for सीदन्). — ^{d}) K$_4$ D$_{1.3}$ अत्रासर्पन् (for उपासर्पत्). B$_1$ S (except G$_3$) अपासर्पत दुःखितः.

6 K$_3$ om. 6^{ab}. — ^{a}) D$_2$ T$_1$ M स पुरं. — ^{b}) Ś$_1$ K (K$_3$ om.) B$_3$ D$_{1.2}$ G$_1$ °बलान्वितः.

7 ^{a}) B$_{3.4}$ पार्थ (for पथि). — ^{b}) S (except T$_2$ G$_3$) स° (for सु°). — ^{c}) T$_2$ सुनिविष्टे; G$_1$ संनिविष्टे. — ^{d}) Ś$_1$ K$_{1.2}$ यथोचिते; K$_{3.4}$ Dc D$_{1-3}$ यथेप्सिते. — ^{f}) K$_2$ निवेशयत्.

8 ^{c}) B$_2$ °प्लवं; T$_1$ °स्थितं; M$_2$ °क्लृप्तं (for °प्लुतं). T$_1$ -कामं (for सोमं). — ^{e}) Ś$_1$ K$_{2.3}$ B Dn D$_{3.5}$ उपागम्या°. — ^{f}) Ś$_1$ K$_{1.2}$ D$_5$ वचः; G$_4$ तथा (for तदा).

9 Before 9, G$_1$ ins. कर्णः. — ^{a}) K$_3$ जयस्य; T जयसि (for जीवसि). — ^{b}) T$_2$ संगतं; G$_1$ °तः (for °मः). — ^{c}) B$_1$ M$_2$ transp. त्वया and जिताः. T$_2$ संख्ये; G$_1$ संघे (for चैव). — ^{d}) Ś$_1$ K Dc D$_{1-3.5}$ कामचारिणः.

10 ^{b}) B$_1$ जनमेजय (for कुरु°). — ^{c}) Ś$_1$ K$_{1.3.4}$ B D$_1$ G$_3$ रणे (for रणान्). K$_4$ B G$_3$ युक्तान् (for मुक्तान्). — ^{d}) B$_2$ महाबलान् (for °रथान्).

11 ^{a}) K$_2$ त्वति°; G$_4$ चाति° (for त्वभि°). — ^{b}) K$_4$ तस्य पश्यतः; K$_4$m D$_1$ तव पश्यतः (by transp.). T$_1$ पश्यतस्तव चाग्रतः. — ^{c}) S (except G$_{1.3}$) धारयितुं (for

C. 3. 15049
B. 3. 247. 13
K. 3. 248. 11

शरक्षताङ्गश्च भृशं व्यपयातोऽभिपीडितः ।
इदं त्वत्यद्भुतं मन्ये यद्युष्मानिह भारत ॥ १२
अरिष्टानक्षतांश्चापि सदारधनवाहनान् ।
विमुक्तान्संप्रपश्यामि तस्माद्युद्धादमानुषात् ॥ १३
नैतस्य कर्ता लोकेऽस्मिन्पुमान्विद्येत भारत ।
यत्कृतं ते महाराज सह भ्रातृभिराहवे ॥ १४
एवमुक्तस्तु कर्णेन राजा दुर्योधनस्तदा ।
उवाचावाक्शिरा राजन्बाष्पगद्गदया गिरा ॥ १५

इति श्रीमहाभारते आरण्यकपर्वणि षट्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३६ ॥

२३७

दुर्योधन उवाच ।
अजानतस्ते राधेय नाभ्यसूयाम्यहं वचः ।
जानासि त्वं जिताञ्शत्रून्गन्धर्वांस्तेजसा मया ॥ १
आयोधितास्तु गन्धर्वाः सुचिरं सोदरैर्मम ।
मया सह महाबाहो कृतश्चोभयतः क्षयः ॥ २
मायाधिकास्त्वयुध्यन्त यदा शूरा वियद्गताः ।
तदा नो नसमं युद्धमभवत्सह खेचरैः ॥ ३
पराजयं च प्राप्ताः स्म रणे बन्धनमेव च ।
सभृत्यामात्यपुत्राश्च सदारधनवाहनाः ।
उच्चैराकाशमार्गेण ह्रियामस्तैः सुदुःखिताः ॥ ४

स्याप°). — ^{d}) T_2 G_1 पीड्यमानां (for दीर्य°). K_4 B Dn $D_{4.6}$ च; $G_{2.4}$ तु (for स्व-).

12 ^{a}) D_2 सविक्षितांगश्च; T $G_{1.2}$ शरक्षतोहं (for °क्षताङ्गश्च). — ^{b}) $G_{2.4}$ अपयातो (for व्यप°). K_{1-3} $D_{1.2}$ M [ऽ]ति-; K_4 D_3 $G_{2.4}$ [ऽ]स्मि; T_1 $G_{1.2.4}$ नि- (for ऽभि-). — ^{c}) K_4 D_3 T_1 अप्यद्भुतं (for त्वत्य°). — ^{d}) K_2 अस्मान् (for युष्मान्). G_2 इति (for इह).

13 ^{a}) G_4 अश्लिष्टान् (for अरिष्टान्). M_1 अक्षयान् (for अक्षतान्). Ś$_1$ $K_{1.2}$ चैव (for चापि). — ^{b}) $K_{1.2}$ °वाहनं; B Dn $D_{4.6}$ सदारबलवाहनान्; T_1 $G_{1.2}$ सदाररथ°. — ^{c}) B_1 संप्रपश्यामि युष्मांस्तु. — ^{d}) B_{1-3} Dn $D_{4.6}$ transp. तस्मात् and युद्धात्. D_2 युष्मान्; G_1 सर्वान् (for तस्माद्).

14 ^{a}) D_2 transp. कर्ता and लोके. D_1 नैतस्य लोके कस्तस्मिन्. — ^{b}) K_4 Dc $D_{1-3.5}$ भारत विद्यते; $B_{1.3}$ Dn $D_{4.6}$ विद्यति भारत. — ^{c}) D_3 हि (for ते).

15 Before 15, B Dc Dn $D_{4.6}$ G_3 ins. वैशं° उ° (resp. वैशं°). — ^{c}) D_2 [अ]धोमुखो; T_2 [अ]वाङ्मुखो (for [अ]वाक्शिरा). $K_{3.4}$ Dc D_{1-3} वाक्यं (for राजन्). K_2 B Dn D_{4-6} G_3 उवाच चां(K_2 वां-; D_5 वं)गराजानं.

Colophon om. in Ś$_1$ $K_{1.2}$ $D_{1.2}$. — *Major parvan:* Dn_2 $G_{2.4}$ आरण्य. — *Sub-parvan:* $K_{3.4}$ B Dc Dn $D_{3.4.6}$ G_3 M_2 दुर्योधनप्रायोपवेश (Dn_2 °धनप्रवेश); D_5 प्रायोपवेशन. — *Adhy. no.* (figures, words or both): B_4 318; Dn_1 (marg.). n_3 246; Dn_2 245; T_1 $G_{2.4}$ M (M_2 *inf. lin.*) 239 (M_2 orig. 241); T_2 G_1 237. — *Śloka no.:* Dn 16.

237

☞ This adhy. is om. in B_1; the MS. is mostly ignored here.

1 Ś$_1$ $K_{1.2}$ om. the ref. — ^{a}) S (except G_3) तु (for ते). — ^{b}) Dc S (except G_3) ते (for [अ]हं). Ś$_1$m यत्प्रोक्तोहं त्वया वचः.

2 ^{a}) $K_{2.3}$ $D_{1.4.5}$ G_1 अ(D_5 सु)योधिताः. $K_{3.4}$ Dc D_5 च (for तु). — ^{b}) Dc ते चिरं; D_5 सुदीर्घं (for सुचिरं). Ś$_1$ $K_{1.2}$ सह (for मम). — ^{d}) D_2 तैः संयतः (for चोभयतः).

3 ^{a}) $K_{1.3}$ D_2 T_1 मया(K_3 °मा)धिकास्. $K_{1.2}$ तु युध्यंत; G_1 त्वबुध्यंत. — ^{b}) K_3 यथा (for यदा). K_4 $D_{2.3}$ दिवं गताः (for विय°). — ^{d}) B Dn $D_{4.6}$ G_3 transp. सह and खेचरैः. — After 3, M ins.:

1135* असमर्थास्ततस्तांस्तु प्रतियोद्धुं वियद्गतान् ।

4 ^{a}) $B_{2.3}$ Dc Dn D_6 G_3 प्राप्ताः स्मो; B_4 G_1 संप्राप्ताः (for प्राप्ताः स्म). — ^{c}) B_4 °मात्यसुताश्च; T_1 सभ्रातृमातृ- पुत्राश्च; $G_{2.4}$ संहृत्यामात्य°. — ^{d}) $B_{2.3}$ Dn $D_{4.6}$ G_3 °बल- वाहनाः; T $G_{1.2.4}$ M °धन($G_{2.4}$ °सुत)बांधवाः. — ^{f}) Ś$_1$

अथ नः सैनिकाः केचिदमात्याश्च महारथान् ।
उपगम्याब्रुवन्दीनाः पाण्डवाञ्शरणप्रदान् ॥ ५
एष दुर्योधनो राजा धार्तराष्ट्रः सहानुजः ।
सामात्यदारो ह्रियते गन्धर्वैर्दिवमास्थितैः ॥ ६
तं मोक्षयत भद्रं वः सहदारं नराधिपम् ।
परामर्शो मा भविष्यत्कुरुदारेषु सर्वशः ॥ ७
एवमुक्ते तु धर्मात्मा ज्येष्ठः पाण्डुसुतस्तदा ।
प्रसाद्य सोदरान्सर्वानाज्ञापयत मोक्षणे ॥ ८
अथागम्य तमुद्देशं पाण्डवाः पुरुषर्षभाः ।
सान्त्वपूर्वमयाचन्त शक्ताः सन्तो महारथाः ॥ ९
यदा चास्मान्न मुमुचुर्गन्धर्वाः सान्त्विता अपि ।
ततोऽर्जुनश्च भीमश्च यमजौ च बलोत्कटौ ।
मुमुचुः शरवर्षाणि गन्धर्वान्प्रत्यनेकशः ॥ १०
अथ सर्वे रणं मुक्त्वा प्रयाताः खचरा दिवम् ।
अस्मानेवाभिकर्षन्तो दीनान्मुदितमानसाः ॥ ११
ततः समन्तात्पश्यामि शरजालेन वेष्टितम् ।
अमानुषाणि चास्त्राणि प्रयुञ्जानं धनंजयम् ॥ १२
समावृता दिशो दृष्ट्वा पाण्डवेन शितैः शरैः ।
धनंजयसखात्मानं दर्शयामास वै तदा ॥ १३
चित्रसेनः पाण्डवेन समाश्लिष्य परंतपः ।
कुशलं परिपप्रच्छ तैः पृष्टश्चाप्यनामयम् ॥ १४
ते समेत्य तथान्योन्यं संनाहान्विप्रमुच्य च ।
एकीभूतास्ततो वीरा गन्धर्वाः सह पाण्डवैः ।
अपूजयेतामन्योन्यं चित्रसेनधनंजयौ ॥ १५

C. 3. 15069
B. 3. 248. 16
K. 3. 249. 17

इति श्रीमहाभारते आरण्यकपर्वणि सप्तत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३७ ॥

$K_{1.2.4}$ D_2 हतास्तैः स्म; D_3 हत्वास्तेस्मान् (sic); D_5 हताः स्मस्तैः; T G_1 प्रणितास्तैः; $G_{2.4}$ ह्रियमाणाः (for ह्रियामस्तैः). D_3 सुदुःखितान्. D_1 हतास्तैर्बहुदुःखिताः.

5 ^{a}) D_2 G_1 [अ]तः (for नः). — ^{b}) G_4 अमात्यांश्च (for अमात्या°). D_3 तान् (for च). K_4 B (B_1 om.) D (except $D_{2.3}$) $G_{1.3}$ महारथाः. — ^{c}) $Ś_1$ K_2 M_2 उपागम्य. K_3 $G_{1.2}$ [अ]ब्रवीद्; K_4 [अ]ब्रवन् (for [अ]ब्रुवन्). — ^{d}) K_1 Dn $D_{5.6}$ च रणप्रदान्; G_1 शरणैषिणः (for शरण°).

6 ^{b}) B_3 सुयोधनः (for सहा°). — ^{d}) B (B_1 om.) D (except $D_{1-3.5}$) G_3 आश्रितैः (for आस्थितैः).

7 ^{a}) D_2 विमोक्षय (for मोक्षयत). D_2 ते (for वः). — ^{b}) $Ś_1$ जनाधिपं; D_5 महारथं; $G_{2.4}$ M सुयोधनं (for नराधिपम्). — ^{c}) $Ś_1$ B_2 G_2 पराभवो; $K_{1.2}$ $B_{3.4}$ Dc Dn_3 D_6 परामर्षो. K_3 T G_2 M_1 नाभविष्यत् (for मा भ°). — ^{d}) $Ś_1$ K Dc D_{1-3} पांडवाः; T_2 G_1 सर्वथा (for सर्वशः). — After 7, T_1 $G_{2.4}$ ins.:

1136* इत्यब्रुवन्नृणान्मुक्ता धर्मराजमुपागताः ।

8 ^{a}) B_4 T_1 $G_{1.2}$ उक्तः स; D_3 उक्तेषु (for उक्ते तु). — ^{c}) B (B_1 om.) Dn $D_{4.6}$ G_3 पांडवान् (for सोदरान्). — ^{d}) K_3 मोक्षणं; T_2 रक्षणे (for मोक्षणे).

9 ^{a}) $Ś_1$ यदा° (for अथा°). G_4 [आ]गत्य (for [आ]गम्य). G_1 तद् (for तम्). — ^{b}) $K_{3.4}$ भरतर्षभाः. — ^{c}) T_2 G_1 साम्ना (for सान्त्व-). D_5 अवोचंत (for अयाचन्त). — ^{d}) T_2 मुक्तिं (for शक्ताः).

10 ^{b}) K_3 सांत्वतापि तैः; D_1 सांत्वितास्तु तैः; T $G_{1.2.4}$ M_1 सांत्वितापि (T °ताश्च; G_4 °ता स्म) ते. — After 10^{ab}, S (except G_3) ins.:

1137* आकाशचारिणो वीरा नदन्तो जलदा इव ।

— ^{c}) S तदा° (for ततो°). — ^{d}) T_1 यमौ चैव मदोत्कटौ; T_2 यमौ द्वौ च बलो°; $G_{2.4}$ यमौ च प्रबलो°.

11 ^{a}) $Ś_1$ $K_{1.2}$ Dc D_2 त्यक्त्वा (for मुक्त्वा). — ^{b}) $B_{3.4}$ Dc_2 Dn $D_{1.3.4.6}$ G_3 M_2 खेचरा. S (except G_3) दिशः (for दिवम्). — ^{c}) $Ś_1$ °मर्षंतो; K_{2-4} °वर्षंतो; T_1 °कांक्षंतो; T_2 G_1 °वीक्षंतो (for °कर्षन्तो). — ^{d}) T_1 G_1 दीना (for दीनान्).

12 ^{a}) K_3 $D_{1.2.5}$ समस्तं (for समन्तात्). $B_{2.3}$ Dc Dn $D_{4.6}$ M पश्यामः (for °मि). — ^{b}) M शरजालविवेष्टितं. — ^{d}) $Ś_1$ $K_{1.2.4}$ $D_{2.5}$ प्रदिशंतं; B_3 Dn $D_{4.6}$ G_3 °मुंचंतं; B_4 °मुंचानं (for °युञ्जानं).

13 ^{c}) D_5 धनंजयं स चात्मानं.

14 ^{a}) $G_{2.4}$ पांडवेयैः (for °न). — ^{b}) T_2 $G_{1.4}$ समाश्लिष्टः; G_3 समाविष्टः. B (B_1 om.) Dc Dn $D_{4.6}$ परस्परं (for परंतपः). — ^{c}) $Ś_1$ कुशलैः. G_1 परिपृष्टस्तैः (for °पप्रच्छ). — ^{d}) G_1 स (for तैः).

15 ^{a}) $Ś_1$ K Dc $D_{1-3.5}$ तदा; T_2 $G_{1.2.4}$ M_2 यथा- (for तथा). T_2 $G_{1.2.4}$ -न्यायं (for [अ]न्योन्यं). T_1 ते वै समेत्य चान्योन्यं. — ^{b}) G_4 संनाहं (for °हान्). $Ś_1$ $K_{1.2}$ B_2 प्रविमुच्य च; Dc वै प्रमुच्य च; Dn_2 D_1 विप्रमुच्यत; M_1 विप्रमुच्य वै. T_1 संनाहानि विमुच्य च. — ^{c}) $Ś_1$ $K_{1.2}$ D_1 तदा (for ततो). T_2 $G_{1.2.4}$ सर्वे (for वीरा). — ^{d}) Dc

२३८

C. 3. 15070
B. 3. 249. 1
K. 3. 250. 1

दुर्योधन उवाच ।

चित्रसेनं समागम्य प्रहसन्नर्जुनस्तदा ।
इदं वचनमक्लीबमब्रवीत्परवीरहा ॥ १
भ्रातॄनर्हसि नो वीर मोक्तुं गन्धर्वसत्तम ।
अनर्हा धर्षणं हीमे जीवमानेषु पाण्डुषु ॥ २
एवमुक्तस्तु गन्धर्वः पाण्डवेन महात्मना ।
उवाच यत्कर्ण वयं मन्त्रयन्तो विनिर्गताः ।
द्रष्टारः स्म सुखाद्धीनान्सदारान्पाण्डवानिति ॥ ३
तस्मिन्नुच्चार्यमाणे तु गन्धर्वेण वचस्यथ ।
भूमेर्विवरमन्वैच्छं प्रवेष्टुं व्रीडयान्वितः ॥ ४
युधिष्ठिरमथागम्य गन्धर्वाः सह पाण्डवैः ।
अस्मद्दुर्मन्त्रितं तस्मै बद्धांश्चास्मान्न्यवेदयन् ॥ ५
स्त्रीसमक्षमहं दीनो बद्धः शत्रुवशं गतः ।
युधिष्ठिरस्योपहृतः किं नु दुःखमतः परम् ॥ ६
ये मे निराकृता नित्यं रिपुर्येषामहं सदा ।
तैर्मोक्षितोऽहं दुर्बुद्धिर्दत्तं तैर्जीवितं च मे ॥ ७
प्राप्तः स्यां यद्यहं वीर वधं तस्मिन्महारणे ।
श्रेयस्तद्भविता मह्यमेवंभूतं न जीवितम् ॥ ८

T G_1 M transp. सह and पांडवैः. $G_{2.4}$ गंधर्वैः पांडवाः सह. — After 15^{cd}, S (except G_3) ins. :

1138* परस्परं समागम्य प्रीत्या परमया युताः ।

[G_2 M युतौ (for युताः). G_4 प्रहसन्नर्जुनस्तदा (for the posterior half); cf. 3. 238. 1^{ab}.]

Colophon om. in $Ś_1$ B_1. — *Major parvan :* $K_{1.2}$ Dn_2 $G_{2.4}$ आरण्य. — *Sub-parvan :* K_3 D_3 M_2 प्रायोपवेश; K_4 B (B_1 om.) Dc Dn $D_{1.2.4-6}$ G_3 दुर्योधनप्रायोपवेश (Dn_1 D_1 °वेशन); M_1 दुर्योधनघोषयात्रा. — *Adhy. name:* M_1 दुर्योधनपराजयः; M_2 corrupt. — *Adhy. no.* (figures, words or both): Dn_1 (marg.). n_3 247; Dn_2 246; D_1 248; T_1 $G_{2.4}$ M (M_2 *inf. lin.*) 240 (M_2 orig. 242); T_2 G_1 238. — *Śloka no.:* Dn_1. n_2 16; Dn_3 17.

238

1 $D_{2.3}$ वैशं° (for दुर्यो°). — ^{b}) M_2 प्रहर्ष° (for प्रहस°). — ^{d}) B_2 पांडवस्तदा (for परवीरहा).

2 ^{a}) K_4 असि हि (for अर्हसि). B_{2-4} Dn $D_{1.4-6}$ $G_{1.3}$ मे (for नो). — ^{c}) $Ś_1$ T_1 अनर्हं (T_1 °र्हं-) धर्षणं; K_1 अनार्हधर्षणं; K_2 अनर्हां च क्षणं; K_3 $D_{1.5}$ अनर्हा (D_1 °र्हां) धर्षणां; B Dn_2. n_3 $D_{4.6}$ T_2 G_{2-4} M_1 अनर्हं(Dn_2 °र्हां; G_4 M_1 °र्हा)धर्षणा; D_2 (corrupt) अत्रहर्धिर्षणां. Dn_1 अप्यनर्हा धर्षणा मे.

3 ^{a}) B_4 उक्तास्. B_3 च (for तु). $K_{1.2}$ B_4 गंधर्वाः. — ^{d}) T_1 मंत्रयित्वा. — After 3, S (except G_3) ins. :

1139* स्थितो राज्ये च्युतान्स्थानाच्छ्रिया हीनाञ्श्रियावृताः ।

[T_1 M_1 स्थिता (for स्थितो).]

— ^{e}) K_4 D_3 तु (for स्म). $D_{2.3}$ सुखासीनान् (for °द्धीनान्). $Ś_1$ $K_{1.2}$ D_1 द्रष्टारः स्मासु(K_2 D_1 °न्सु)खान्दीनान्; T_1 द्रष्टारस्तान्सुखाद्धीमान्; T_2 $G_{1.2.4}$ द्रष्टास्मि (G_4 °स्म-) निःसुखान्वीरान्. — ^{f}) T_1 ततस्तान् (for सदारान्).

4 ^{a}) K_3 $B_{1.3}$ $D_{1.2}$ S अस्मिन् (for तस्मिन्). — ^{b}) K_3 वचस्य तु; K_4 Dn D_6 °स्तथा; D_1 °स्यधः; D_2 °स्तदा (for °स्यथ). — ^{c}) K_4 D_3 T_2 M_2 अन्विच्छं; B_2 अन्येहं; Dc T_1 G_1 अन्विच्छन्; $G_{2.4}$ अन्विच्छे (for अन्वैच्छं).

5 ^{a}) $Ś_1$ $K_{1.2}$ B_1 D_3 T_2 G_1 उपागम्य (for अथा°). K_3 गंधर्वैः; K_4 Dc D_{1-3} T_2 G_4 °र्वैः (for °र्वाः). B_1 M_2 transp. सह and पांडवैः. — ^{c}) D_2 अस्मिन् (for अस्मद्-). $Ś_1$ $K_{1.2}$ चास्मै (for तस्मै). — ^{d}) K_3 D_3 G_1 M_1 बद्धाः; T_2 G_4 बध्वा (for बद्धान्). D_3 (*sup. lin.*) स्वा° (for चा°). D_1 समस्तं प्रत्यवेदयत्.

6 ^{c}) $K_{1.2}$ D_4 [उ]पकृतः; B_1 °हितः; Dc °कृतं; G_4 °सृतं (for °हृतः). — ^{d}) =1. 9. 3^{d}: 4. 18. 36^{d}. D_2 मे (for नु). G_1 इतः (for अतः).

7 ^{a}) T_1 ते (for मे). B_1 M_2 पूर्वं; T_1 तेषां (for नित्यं). — ^{b}) $Ś_1$ $K_{1.2}$ ये(K_2 ए)षां रिपुर् (by transp.). Dc तदा; T_2 गतः (for सदा). — ^{d}) $Ś_1$ K B_4 $D_{1-3.5}$ transp. दत्तं and तैर्. K_4 D_1 जीवितं हि (D_1 तु) मे; $B_{2.3}$ Dn $D_{4.6}$ G_3 एव जीवितं.

8 ^{a}) T_1 प्राप्तव्यं; T_2 प्राप्तोस्मि. $K_{1.2}$ यद् (for यदि). — ^{b}) B_1 तस्मान् (for तस्मिन्). $Ś_1$ K_2 °मृधे; K_1 °वने; D_1 B_2 °हवे (for °रणे). — ^{c}) B_1 तु (for तद्). — ^{d})

भवेद्यशः पृथिव्यां मे ख्यातं गन्धर्वतो वधात् ।
प्राप्ताश्च लोकाः पुण्याः स्युर्महेन्द्रसदनेऽक्षयाः ॥ ९
यत्त्वद्य मे व्यवसितं तच्छृणुध्वं नरर्षभाः ।
इह प्रायमुपासिष्ये यूयं व्रजत वै गृहान् ।
भ्रातरश्चैव मे सर्वे प्रयान्त्वद्य पुरं प्रति ॥ १०
कर्णप्रभृतयश्चैव सुहृदो बान्धवाश्च ये ।
दुःशासनं पुरस्कृत्य प्रयान्त्वद्य पुरं प्रति ॥ ११
न ह्यहं प्रतियास्यामि पुरं शत्रुनिराकृतः ।
शत्रुमानापहो भूत्वा सुहृदां मानकृत्तथा ॥ १२
स सुहृच्छोकदो भूत्वा शत्रूणां हर्षवर्धनः ।
वारणाह्वयमासाद्य किं वक्ष्यामि जनाधिपम् ॥ १३
भीष्मो द्रोणः कृपो द्रौणिर्विदुरः संजयस्तथा ।
बाह्लीकः सोमदत्तश्च ये चान्ये वृद्धसंमताः ॥ १४
ब्राह्मणाः श्रेणिमुख्याश्च तथोदासीनवृत्तयः ।
किं मां वक्ष्यन्ति किं चापि प्रतिवक्ष्यामि तानहम् ॥ १५
रिपूणां शिरसि स्थित्वा तथा विक्रम्य चोरसि ।
आत्मदोषात्परिभ्रष्टः कथं वक्ष्यामि तानहम् ॥ १६
दुर्विनीताः श्रियं प्राप्य विद्यामैश्वर्यमेव च ।
तिष्ठन्ति न चिरं भद्रे यथाहं मदगर्वितः ॥ १७
अहो बत यथेदं मे कष्टं दुश्चरितं कृतम् ।
स्वयं दुर्बुद्धिना मोहाद्येन प्राप्तोऽस्मि संशयम् ॥ १८
तस्मात्प्रायमुपासिष्ये न हि शक्ष्यामि जीवितुम् ।

C. 3. 15089
B. 3. 249. 20
K. 3. 250. 20

निद्य॰; D_2 नैवं॰ (for एवं॰). K_3 D_2 हि (for न). D_3 जीवनं (for जीवितम्). B Dc Dn $D_{4.6}$ नैवंभूतस्य जीवितं.

9 ^{a}) B Dn $D_{4.6}$ T_1 अभूद्; M_1 भूयाद् (for भवेद्). K_2 यथा (for यशः). — ^{b}) B_1 ख्यातिर्; T_1 ख्यातो. $K_{1.2}$ D_3 वधं; T_1 वधः (for वधात्). — ^{c}) $Ś_1$ $K_{1.2}$ D_5 प्राप्तस्य (for प्राप्ताश्च). $Ś_1$ $K_{1.2}$ D_5 लोकान्पुण्यान् ; B_{1-3} Dc_1 Dn $D_{4.6}$ T_1 पुण्यलोकाः (for लोकाः पुण्याः). $Ś_1$ K_{1-3} D_5 च; T_2 G_1 मे (for स्युर्). B_4 प्राप्ताः स्युश्चैव मे लोकाः. — ^{d}) T_1 महेंद्रभवने. $Ś_1$ $K_{1.2}$ ॰क्षयः; D_5 ॰क्षयान्.

10 ^{a}) B_1 यत्त्विदं; D_1 यदद्य; D_2 यच्चाद्य (for यत्त्वद्य). K_4 $G_{2.4}$ [ऽ]ध्यवसितं (for व्यव॰). G_1 यन्मे व्यवसितं किंचित्. — ^{b}) T_1 G_{2-4} M_1 नराधिपाः; T_2 G_1 नराधिप (for नर॰). — ^{c}) K_{2-4} D (except Dn_3 D_4) T_2 G_3 उपाशिष्ये; T_1 समासिष्ये (for उपासिष्ये). — ^{d}) K_3 गृहं. — ^{e}) $Ś_1$ $K_{1.2}$ [अ]द्य (for [प]व). — ^{f}) $=11^{d}$. D_3 पुरीं; G_1 गृहं (for पुरं). $Ś_1$ $K_{1.2}$ प्रयांतु नगरं प्रति; B_{2-4} Dn $D_{4.6}$ T_2 G_3 यांत्वद्य स्वपुरं प्रति.

11 ^{a}) G_4 सर्वे (for चैव). — ^{b}) $Ś_1$ $K_{1.2}$ B_1 T_1 G_1 च मे; T_2 $G_{2.4}$ M तथा (for च ये). — ^{d}) $=10^{f}$. K_4 D_3 T_2 G_1 प्रयांतु नगरं प्रति. — After 11, K_1 reads 13^{cd}.

12 ^{a}) B_2 त्वहं (for ह्यहं). $Ś_1$ $K_{1.2}$ सं(K_2 मां)प्रवेक्ष्यामि; B Dn $D_{1-4.6}$ संप्रयास्यामि; Dc_1 संप्रपश्यामि; Dc_2 संप्रयच्छामि (for प्रतिया॰). G_2 न ह्यप्यहं प्रयास्यामि. — ^{b}) $Ś_1$ (*sup. lin.*) K_1 $D_{3.5}$ शत्रुविमानितः; K_3 ॰तिरस्कृतः. — ^{c}) $K_{1.2}$ ॰मानापहौ; G_2 ॰मानासहो. — ^{d}) $Ś_1$ $K_{1.2}$ बलकृत्तदा (K_1 ॰था); T_1 शोकहृत्तथा; T_2 $G_{1.2}$ मानवर्धनः; G_4 मानकृत्तदा. — After 12, T $G_{2.4}$ ins.:

1140* कामं रणशिरस्यद्य शत्रुभिर्वै विमानितः ।
[T_2 कारणैः सम्यगभितः (for the prior half).]

On the other hand, G_1 ins. after 12:

1141* कारणैरस्म्यभिहितः शत्रुभिर्वै विमानितः ।
अकारणेऽस्म्यभिजितः शत्रुभिर्वै विमानितः ।

13 ^{a}) B Dn $D_{4.6}$ G_3 जातः; Dc भुवं (sic) (for भूत्वा). $K_{3.4}$ D_{1-3} सुहृच्छोकप्रदो भूत्वा (D_1 ॰दोद्याहं; D_2 ॰दो नित्यं); G_2 स सुहृच्छोकसंतप्तः. — K_1 reads 13^{cd} after 11. — ^{d}) $Ś_1$ $K_{1.2}$ नराधिपं (K_1 ॰प); B_2 त्रिपिष्टपं (for जना॰).

14 ^{a}) B_{1-3} Dn D_{3-6} G_3 भीष्मद्रोणौ; G_1 भीष्मौ द्रौणिः. $B_{2.3}$ Dn $D_{3.4.6}$ G_3 कृपद्रौणी (D_3 ॰णिर्). — ^{b}) K_1 T_1 G_4 तदा (for तथा). — ^{c}) N (except $B_{1.3.4}$; $Ś_1$ damaged) G_3 बाह्लिकः. $B_{1.3.4}$ Dn $D_{4.6}$ G_3 सौमदत्तिं॰. — ^{d}) K_2 वृत्तसंमतः; D_2 दृढसंमताः; G_4 M भृश॰.

16 $Ś_1$ $K_{1.2}$ D_4 om. 16. M_1 transp. 16 and 17. — ^{b}) K_4 चारिभिः; B_3 D_6 G_3 चोपरि (for चोरसि). — ^{d}) $D_{1.2.5}$ T_2 $G_{1.2.4}$ द्रक्ष्यामि (for व॰).

17 M_1 transp. 16 and 17. — ^{a}) Dc प्रियं; D_3 स्वयं (for श्रियं). — ^{b}) $K_{1.2.4}$ $B_{3.4}$ G_{2-4} M वा (for च). — ^{c}) $K_{1.2.4}$ $D_{3.5}$ transp. तिष्ठन्ति and न. — ^{d}) Dc मदगर्वितं; T_1 मतिगर्वितः; G_3 अति॰.

18 ^{a}) T_2 G_4 यदेतन्; G_1 यथैतन् (for यथेदं). B Dn $D_{4.6}$ G_3 अहोनर्ह(B_1 ॰नय॰; B_{2-4} नार्ह)मिदं कर्म. — ^{b}) D_5 दृष्टं (for कष्टं).

19 ^{a}) $K_{2.4}$ $Dn_{1.}$ n_3 (before corr.) D_1 T_2 G_3 उपाशिष्ये. Cf. 10^{c}. — ^{b}) $B_{1.3}$ Dn_2. n_3 D_{4-6} G_3 न हि

C. 3. 15089 B. 3. 249. 20 K. 3. 250. 20 चेतयानो हि को जीवेत्कृच्छ्राच्छत्रुभिरुद्धृतः ॥ १९
शत्रुभिश्चावहसितो मानी पौरुषवर्जितः ।
पाण्डवैर्विक्रमाढ्यैश्च सावमानमवेक्षितः ॥ २०

वैशंपायन उवाच ।

एवं चिन्तापरिगतो दुःशासनमथाब्रवीत् ।
दुःशासन निबोधेदं वचनं मम भारत ॥ २१
प्रतीच्छ त्वं मया दत्तमभिषेकं नृपो भव ।
प्रशाधि पृथिवीं स्फीतां कर्णसौबलपालिताम् ॥ २२
भ्रातॄन्पालय विस्रब्धं मरुतो वृत्रहा यथा ।
बान्धवास्त्वोपजीवन्तु देवा इव शतक्रतुम् ॥ २३
ब्राह्मणेषु सदा वृत्तिं कुर्वीथाश्चाप्रमादतः ।
बन्धूनां सुहृदां चैव भवेथास्त्वं गतिः सदा ॥ २४
ज्ञातींश्चाप्यनुपश्येथा विष्णुर्देवगणानिव ।
गुरवः पालनीयास्ते गच्छ पालय मेदिनीम् ॥ २५
नन्दयन्सुहृदः सर्वाञ्शात्रवांश्चावभर्त्सयन् ।
कण्ठे चैनं परिष्वज्य गम्यतामित्युवाच ह ॥ २६
तस्य तद्वचनं श्रुत्वा दीनो दुःशासनोऽब्रवीत् ।
अश्रुकण्ठः सुदुःखार्तः प्राञ्जलिः प्रणिपत्य च ।
सगद्गदमिदं वाक्यं भ्रातरं ज्येष्ठमात्मनः ॥ २७
प्रसीदेत्यपतद्भूमौ दूयमानेन चेतसा ।
दुःखितः पादयोस्तस्य नेत्रजं जलमुत्सृजन् ॥ २८
उक्तवांश्च नरव्याघ्रो नैतदेवं भविष्यति ।
विदीर्येत्सनगा भूमिर्द्यौश्चापि शकलीभवेत् ।
रविरात्मप्रभां जह्यात्सोमः शीतांशुतां त्यजेत् ॥ २९
वायुः शैघ्र्यमथो जह्याद्धिमवांश्च परिव्रजेत् ।
शुष्येत्तोयं समुद्रेषु वह्निरप्युष्णतां त्यजेत् ॥ ३०

शक्यामि; D$_2$ (by transp.) शक्ष्यामि न हि; G$_{2.4}$ न हि शक्नोमि. D$_1$ सह्यं मे नेह जीवितं. — ^{c}) K$_4$ D$_1$ T$_2$ G$_1$ चिंतयानो; B$_1$ चेतनावान्; T$_1$ वेदयानो.

20 ^{a}) S (except G$_3$) [अ]पह° (for [अ]वह°). — ^{b}) B$_4$ पौरुषगर्वितः. — ^{c}) K Dc Dn$_2$. n$_3$ D$_{1-4.6}$ G$_3$ विक्रमाद्यैश्च (K$_3$ विषमस्थैश्च); B$_1$ विक्रमारूढैः. — ^{d}) K$_2$ सावसानम्; D$_1$ स सावज्ञम् (for सावमानम्).

21 ^{a}) D$_{1.2}$ एवं चिंतागतो राजा.

22 ^{a}) B$_1$ प्रतीहासं (for प्रतीच्छ त्वं). — ^{b}) M नृपोत्तम (for नृपो भव). — ^{c}) Ś$_1$ K$_2$ Dn$_3$ G$_1$ कृत्स्नां; K$_{1.3}$ Dc D$_{3.5}$ सर्वां (for स्फीतां). — ^{d}) K$_2$ कर्णसौवल्य°; B$_2$ °पावितः; D$_2$ M °पालितः.

23 ^{a}) Ś$_1$ K$_4$ B$_{3.4}$ D$_{1-3}$ विश्रब्धं; K$_3$ Dc D$_5$ T$_1$ विश्रब्धः. — ^{b}) K$_3$ मरुतां; T$_1$ प्रभूतो (for मरुतो). — K$_3$ om. 23^{c}–25^{b}. — ^{c}) B Dn D$_{4.6}$ चोप° (for त्वोप°). — ^{d}) S (except G$_3$) सहस्राक्षमिवामराः.

24 K$_3$ om. 24 (cf. v.l. 23). — ^{a}) T$_1$ G$_1$ M$_2$ यथा (for सदा). K$_2$ G$_1$ वृत्तं; B$_1$ बुद्धिं; Dc D$_{1-3}$ वृत्तिः; T$_2$ दांतं (for वृत्तिं). — ^{b}) D$_6$ तु (for च). D$_2$ प्रसादयन् (for [अ]प्रमादतः). B$_4$ कुर्वीथा रोषमुत्सृज; T$_2$ कुरु वीराप्रमादतः.

25 K$_3$ om. 25^{ab} (cf. v.l. 23). — ^{a}) K$_2$ D$_{1.3}$ ज्ञातीश्च (for ज्ञातींश्च). K$_{2.4}$ Dc D$_{1-3.5}$ °मन्येथा (for °पश्येथा). — ^{b}) B$_{2.3}$ Dn D$_{4.6}$ G$_3$ यथा (for इव). — ^{c}) D$_2$ कुरवः (for गुरवः). K$_3$ D$_1$ मान° (for पाल°). D$_1$ T$_2$ G$_1$ च (for ते).

26 G$_1$ om. 26^{ab}. — ^{a}) Ś$_1$ K$_2$ चैव (for सर्वाञ्). — ^{b}) D$_5$ शत्रूंश्चैव (for शात्रवांश्च). Ś$_1$ K$_{1.2}$ Dc D$_{1-3.5}$ [अ]त्रसादयन्; K$_{3.4}$ [अ]वसादय; T$_1$ [अ]वनादयन्; T$_2$ [आ]ह्वय स्वयं. — ^{c}) T$_2$ G$_{1.2.4}$ कर्णे (for कण्ठे). — ^{d}) B$_1$ तं (for ह).

27 ^{c}) Ś$_1$ K$_{1.2}$ बाष्पकंठः (K$_1$ °ठाः); G$_2$ अश्रुपूर्णाः; M$_2$ उत्कंठश्च (for अश्रुकण्ठः). — ^{d}) B$_{2.4}$ ह (for च). — D$_2$ om. 27^{ef}. — ^{f}) B$_2$ एव च (for आत्मनः).

28 ^{a}) K$_1$ °भ्यपतद्; M$_2$ °त्येव तद् (for °त्यपतद्). — ^{b}) D$_{3.6}$ दीर्यमाणेन (for दूय°). Dc तेजसा (for चेतसा). — ^{c}) T$_2$ G$_2$ सखेदं (for दुःखितः). — ^{d}) G$_2$ नेत्राभ्यां (for नेत्रजं).

29 ^{a}) D$_3$ तु (for च). K$_4$ D$_{1.3}$ T$_2$ G$_{1.2.4}$ नरव्याघ्र. — ^{c}) B$_1$ दीर्येत (for विदीर्येत्). K$_3$ सा नगाद्; B Dn D$_{2.4.6}$ सकला (for सनगा). — ^{d}) T$_2$ मंदरः (for द्यौश्चापि). — ^{e}) G$_2$ आतपतां (for आत्मप्रभां). — G$_1$ om. (hapl.) 29^{f}–30^{a}. — ^{f}) K$_1$ शीतांशुतस; B$_1$ तीक्ष्णांशुतां. B$_1$ व्रजेत् (for त्यजेत्).

30 G$_1$ om. 30^{a} (cf. v.l. 29); K$_4$ D$_1$ om. 30. — ^{a}) Ś$_1$ K$_{1.2}$ शैत्यम्; D$_2$ शीघ्रम् (for शैघ्र्यम्). T$_2$ पाशं जलेशो जह्याद्यद्. — ^{b}) K$_3$ Dc परित्यजेत्; D$_5$ [अ]पि संचलेत्; T$_1$ G$_1$ हिमं व्र°; T$_2$ लतां व्र°; G$_{2.4}$ परिप्लवेत्. — ^{c}) Dc T$_2$ G$_3$ समुद्रस्य; D$_6$ °द्रोपि. — ^{d}) Dc अग्निर् (for वह्निर्). K$_1$ Dc अति- (for अपि). S (except G$_3$) भविष्यति श

न चाहं त्वदृते राजन्प्रशासेयं वसुंधराम् ।
पुनः पुनः प्रसीदेति वाक्यं चेदमुवाच ह ।
त्वमेव नः कुले राजा भविष्यसि शतं समाः ॥ ३१
एवमुक्त्वा स राजेन्द्र सस्वनं प्ररुरोद ह ।
पादौ संगृह्य मानार्हौ भ्रातुर्ज्येष्ठस्य भारत ॥ ३२
तथा तौ दुःखितौ दृष्ट्वा दुःशासनसुयोधनौ ।
अभिगम्य व्यथाविष्टः कर्णस्तौ प्रत्यभाषत ॥ ३३
विषीदथः किं कौरव्यौ बालिश्यात्प्राकृताविव ।
न शोकः शोचमानस्य विनिवर्तेत कस्यचित् ॥ ३४
यदा च शोचतः शोको व्यसनं नापकर्षति ।
सामर्थ्यं किं त्वतः शोके शोचमानौ प्रपश्यथः ।
धृतिं गृह्णीत मा शत्रूञ्शोचन्तौ नन्दयिष्यथः ॥ ३५
कर्तव्यं हि कृतं राजन्पाण्डवैस्तव मोक्षणम् ।
नित्यमेव प्रियं कार्यं राज्ञो विषयवासिभिः ।
पाल्यमानास्त्वया ते हि निवसन्ति गतज्वराः ॥ ३६
नार्हस्येवंगते मन्युं कर्तुं प्राकृतवद्यथा ।
विषण्णास्तव सोदर्यास्त्वयि प्रायं समास्थिते ।
उत्तिष्ठ व्रज भद्रं ते समाश्वासय सोदरान् ॥ ३७
राजन्नद्यावगच्छामि तवेह लघुसत्त्वताम् ।
किमत्र चित्रं यद्वीर मोक्षितः पाण्डवैरसि । C. 3. 15111 B. 3. 250. 1 K. 3. 251. 2

समाः (cf. 31^{ef}).

31 ^{a}) B_{4} तु (for च). $\acute{S}_{1}$ त्वत्कृते; D_{6} त्वामृते (for त्वदृते). — ^{b}) $\acute{S}_{1}$ K_{3} $D_{1.2}$ प्रशासिष्ये; $B_{2.4}$ शासयेयं (for प्रशासेयं). — ^{d}) T_{1} [ए]तद् (for [इ]दम्). — After 31^{cd}, S (except G_{3}) ins.:

1142* शत्रूणां शोककृद्राजन्सुहृदां शोकनाशनः ।
[G_{1} मानवर्धनः; M हर्षवर्धनः (for शोक°).]

— ^{e}) B_{1} $G_{2.4}$ जातो; D_{2} राजन् (for राजा). — ^{f}) K_{4} Dc $D_{2.4.6}$ G_{2} M_{2} भविष्यति. T G_{1} न संशयः (for शतं समाः).

32 Before 32, D_{1} ins. वैशं° उ°. — ^{a}) K_{4} $B_{1.4}$ D_{5} T_{2} G_{4} राजेंद्रं; $B_{2.3}$ Dn $D_{4.6}$ राजानं. — ^{b}) K_{3} $B_{1.2.4}$ Dn $D_{3.6}$ सुस्वरं; B_{3} Dc D_{4} सस्वरं (for सस्वनं). M_{2} च (for ह). — ^{c}) $K_{3.4}$ Dc_{2} स गृह्य; B_{2} संस्पर्श-; $B_{3.4}$ Dn $D_{4.6}$ T_{2} G_{3} °स्पृश्य; G_{4} °हृत्य (for °गृह्य). K_{4} D_{3} शिरसा; $B_{1.2.4}$ D_{1} मानार्हो. — ^{d}) $\acute{S}_{1}$ मानद (for भारत).

33 ^{a}) K_{2} T_{1} तदा; K_{4} D_{3} अथ (for तथा). K_{1} द्वौ; D_{1} सु-; G_{1} तु (for तौ). D_{1} भूत्वा (for दृष्ट्वा). — ^{c}) B Dn अधिगम्य. $\acute{S}_{1}$ महाबाहुः; $K_{1.2}$ महाराज; D_{1} सुदुःखार्ता (for व्यथा°).

34 ^{a}) D_{2} transp. विषीदथः and किं. $\acute{S}_{1}$ B_{4} T_{2} G_{4} विषीदतः. T_{1} कौरवेंद्रौ (for किं कौरव्यौ). — ^{b}) K_{4} $D_{1.2}$ बालिशौ; T_{1} किं युवां (for बालिश्यात्). K_{3} प्राकृतानि च; G_{4} प्राकृता इव. — ^{c}) $G_{1.4}$ शोक° (for शोच°). — ^{d}) K_{3} °वर्तति; B_{4} °वर्तेत्तु (for °वर्तेत). B Dn $D_{1.4.6}$ G_{3} कर्हि° (for कस्य°).

35 ^{a}) $\acute{S}_{1}$ K_{2} G_{1} यथा (for यदा). $K_{1.2}$ न; D_{1} T_{1} तु (for च). B_{1} शोचयतः (for च शोचतः). — ^{b}) T M_{2} व्यसनान् (for व्यसनं). D_{1} °सर्पति (for °कर्षति). — ^{c}) K_{1} $B_{3.4}$ Dc $D_{3.5}$ $G_{1.2.4}$ ततः (for त्वतः). $\acute{S}_{1}$ T_{2} शोकं; K_{3} शोको. — ^{d}) $\acute{S}_{1}$ K Dc $D_{1-3.5.6}$ शोचमानः. $\acute{S}_{1}$ K Dc $D_{1-3.5}$ प्रपश्यति; B_{4} °तः; T_{1} G_{4} °थ. — ^{e}) B_{2} Dn D_{6} गृह्णीतं; $B_{3.4}$ T_{1} M_{2} गृहीत. T_{2} G_{1} धृतिमंतौ श्रियं चेमां. — ^{f}) B_{3} $G_{2.4}$ शोचतो (for °न्तौ). $\acute{S}_{1}$ Dc T_{1} °ष्यत; K_{4} D_{3} °ष्यथ (for °ष्यथः). T_{2} शत्रूञ्शोकमिमं जहि; G_{1} शोचंतौ मा जहास्यथः. — After 35, G_{1} ins.:

1143* धृतिमन्तो जयं शत्रूञ्शोचन्तौ नाभविष्यथ ।

36 ^{c}) G_{2} एवं (for एव). T_{2} G_{1} हितं (for प्रियं). — ^{d}) =46^{b}. K_{4} राज्ञां. — ^{e}) K_{3} [ऽ]पि (for हि).

37 ^{a}) T_{1} नार्हति (for नार्हसि). B_{1} [ए]वं कृतं; T_{1} [ए]वं कृते (for [ए]वंगते). B_{1} मन्ये; D_{3} शोकं; T $G_{1.2}$ मृत्युं (for मन्युं). — ^{b}) Dc सर्वं (for कर्तुं). K_{4} D_{3} M_{2} प्रभो; T_{1} भवान्; $G_{1.2.4}$ स्वयं; M_{1} विभो (for यथा). — ^{c}) K_{4} त्वयि (for तव). Dc $D_{1.3}$ सौदर्यास्. — ^{d}) B_{2} T_{1} समाश्रिते; D_{5} उपासिते. — After 37^{cd}, S (except T_{1} G_{3}) ins.:

1144* तदलं दुःखितानेतान्कर्तुं सर्वान्नराधिप ।

— ^{e}) T_{1} तदलं दुःखितान्सर्वान् (cf. 1144*). — After 37, B D (except $D_{1-3.5}$) S (except T_{2} G_{3}) ins. an addl. colophon, followed in most MSS. by कर्ण उ° (resp. कर्णः) (*adhy. no.*: Dn_{1}. n_{3} 248; Dn_{2} 247).

38 ^{a}) B Dc Dn D_{4} G_{4} M_{1} नाद्याव°; D_{6} न ह्याव° (for अद्याव°). — ^{b}) K_{3} $D_{1.2}$ T_{2} G_{1} [इ]मां; T_{1} $G_{2.4}$ [ए]व (for [इ]ह). — After 38^{ab}, S (except G_{3}) ins.:

1145* अल्पत्वं च तथा बुद्धेः कार्याणामविवेकिताम् ।
[G_{1} आलस्यं (for अल्पत्वं). T अविवेकतां.]

— ^{c}) Dc तद्वीर; $G_{2.4}$ धर्मज्ञ (for यद्वीर). — ^{e}) G_{1} सद्यस्त्वं वशमापन्नः. — ^{f}) $\acute{S}_{1}$ $K_{1.2}$ B D_{2} °कर्षण; K_{3}

C. 3. 15112
B. 3. 250. 2
K. 3. 251. 2

सद्यो वशं समापन्नः शत्रूणां शत्रुकर्शन ॥ ३८
सेनाजीवैश्च कौरव्य तथा विषयवासिभिः ।
अज्ञातैर्यदि वा ज्ञातैः कर्तव्यं नृपतेः प्रियम् ॥ ३९
प्रायः प्रधानाः पुरुषाः क्षोभयन्त्यरिवाहिनीम् ।
निगृह्यन्ते च युद्धेषु मोक्ष्यन्ते च स्वसैनिकैः ॥ ४०
सेनाजीवाश्च ये राज्ञां विषये सन्ति मानवाः ।
तैः संगम्य नृपार्थाय यतितव्यं यथातथम् ॥ ४१
यद्येवं पाण्डवै राजन्भवद्विषयवासिभिः ।
यदृच्छया मोक्षितोऽद्य तत्र का परिदेवना ॥ ४२
न चैतत्साधु यद्राजन्पाण्डवास्त्वां नृपोत्तम ।
स्वसेनया संप्रयान्तं नानुयान्ति स्म पृष्ठतः ॥ ४३
शूराश्च बलवन्तश्च संयुगेष्वपलायिनः ।
भवतस्ते सभायां वै प्रेष्यतां पूर्वमागताः ॥ ४४
पाण्डवेयानि रत्नानि त्वमद्याप्युपभुञ्जसे ।
सत्त्वस्थान्पाण्डवान्पश्य न ते प्रायमुपाविशन् ।
उत्तिष्ठ राजन्भद्रं ते न चिन्तां कर्तुमर्हसि ॥ ४५
अवश्यमेव नृपते राज्ञो विषयवासिभिः ।
प्रियाण्याचरितव्यानि तत्र का परिदेवना ॥ ४६
मद्वाक्यमेतद्राजेन्द्र यद्येवं न करिष्यसि ।
स्थास्यामीह भवत्पादौ शुश्रूषन्नरिमर्दन ॥ ४७
नोत्सहे जीवितुमहं त्वद्विहीनो नरर्षभ ।
प्रायोपविष्टस्तु नृप राज्ञां हास्यो भविष्यसि ॥ ४८

वैशंपायन उवाच ।

एवमुक्तस्तु कर्णेन राजा दुर्योधनस्तदा ।
नैवोत्थातुं मनश्चक्रे स्वर्गाय कृतनिश्चयः ॥ ४९

इति श्रीमहाभारते आरण्यकपर्वणि अष्टात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३८ ॥

D$_{3.5.6}$ G$_3$ °कर्षनः; D$_1$ °कर्पणः.

39 ^{a}) Ś$_1$ B$_1$ °जीव्यैश्च; K$_2$ °जीवस्य. — M$_2$ om. (hapl.) 39^{c}–42^{b}. — ^{c}) B$_{1.3}$ D$_6$ G$_3$ ह्यथ; T$_2$ G$_2$ अथ (for यदि).

40 M$_2$ om. 40 (cf. v.l. 39). — ^{a}) K$_{1.2.4}$ T M$_1$ प्रधान॰; Dc प्रवीणाः (for प्रधानाः). — ^{b}) Ś$_1$ क्षोभयंतु; D$_3$ कालयंति; S (except G$_3$) क्षोभयित्वा. — ^{c}) K$_{1.2}$ सु-; Dc -षु; D$_2$ [ऽ]त्र (for च). — ^{d}) Ś$_1$ स्वसेवकैः; K$_2$ °सैन्यकैः; B$_2$ Dn D$_{4.6}$ G$_3$ [ए]व सैनिकैः.

41 M$_2$ om. 41 (cf. v.l. 39). Cf. 39^{ab}. — ^{a}) Ś$_1$ °जीव्या°; K$_2$ °जेव्या° (for °जीवा°). Dc G$_1$ राज्ञो; D$_2$ T$_1$ राजन् (for राज्ञां). — ^{b}) Ś$_1$ विजये (for विषये).

42 M$_2$ om. 42^{ab} (cf. v.l. 39). — ^{a}) K$_2$ यद्; D$_3$ यदा; T$_2$ G$_2$ इति (for यदि). Ś$_1$ K$_{1.2}$ राजा (for राजन्). — ^{b}) Ś$_1$ K$_{1-3}$ D$_{1.2}$ G$_4$ भवान् (for भवद्-). — ^{c}) K$_4$ B D (except D$_{1.2.5}$) G$_{2-4}$ [ऽ]सि (for ऽद्य). — ^{d}) =46^{d}; Gītā (Vulg.) 2. 28. G$_1$ transp. तत्र and का. K$_4$ D$_{1.3}$ G$_1$ परिविदना.

43 ^{a}) B$_1$ तवै°; G$_4$ न वै° (for न चै°). — ^{b}) B$_1$ पांडवानां; B$_2$ °वेया (for °वास्त्वां). B$_1$ Dn D$_4$ नृपोत्तमं. — ^{c}) Ś$_1$ K$_{1.2.4}$ Dn$_{2}$. n$_3$ D$_{1-3}$ G$_2$ संप्रयातं; B$_1$ °याते; Dc प्रयातं च; T$_1$ समं सर्वे. M$_1$ सेनया संप्रयांतं वै.

44 ^{b}) Ś$_1$ K$_{1.2}$ D$_1$ संग्रामेषु (for संयुगेषु). Ś$_1$ [अ]पलायनः; T$_2$ G$_1$ [अ]पराजिताः. — ^{c}) K$_4$ (before corr.) B D (except D$_{1-3.5}$) T$_2$ G$_3$ सहाया (for सभायां).

45 ^{a}) K$_1$ पूर्वाणि (for रत्नानि). — ^{b}) K$_4$ एतानि (for अद्यापि). Ś$_1$ K$_{1.2}$ [अ]नुयुज्यसे; K$_3$ [उ]पयुंजते; D$_1$ °युंजसे; G$_1$ °भुंक्ष्वसे. — ^{c}) T$_2$ G$_1$ सत्वस्थाः पांडवाश्चापि. — After 45^{cd}, S (except G$_3$) ins.:

1146* तदलं ते महाबाहो बुद्धिः प्रायोपवेशने ।

[T$_2$ G$_{1.2}$ विषादं (T$_2$ °मर्षं) कर्तुमीदृशं; M विशादेन महाबल (for the posterior half).]

— ^{f}) B$_{1.3.5}$ Dn D$_{4.6}$ G$_3$ चिरं (for चिन्तां).

46 G$_2$ om. 46. — ^{a}) Ś$_1$ M$_2$ अपश्यम् (for अवश्यम्). — ^{b}) =36^{d}. T$_1$ G$_4$ M$_2$ राज्ञां. — ^{d}) =42^{d}; Gītā (Vulg.) 2. 28. G$_1$ transp. तत्र and का. K$_3$ परिदेविना; K$_4$ D$_{1.3}$ G$_1$ °वेदना.

47 ^{b}) G$_1$ अद्य (for यदि). T$_2$ G$_2$ त्वं; G$_1$ [ए]तन् (for [ए]वं). — ^{d}) K$_4$ B$_1$ D$_{1.3}$ T$_1$ G$_{2.4}$ शुश्रूषुर्; G$_1$ शुश्रूषाम् (for शुश्रूषन्). T$_1$ भरतर्षभ (for अरि°).

48 ^{a}) Dc जीवितम् (for °तुम्). T$_2$ G$_1$ सत्यं; G$_2$ शक्यं (for अहं). — ^{b}) Ś$_1$ यद्-; D$_2$ त्वां (for त्वद्-). — After 48^{ab}, T$_2$ G$_1$ *repeat* 45^{ef}. — T$_2$ om. 48^{cd}. — ^{c}) K$_4$ D$_3$ च (for तु). K$_4$ D$_3$ G$_{1.2.4}$ M तथा (for नृप). T$_1$ प्रायोपविष्टं राजानं. — ^{d}) K$_3$ Dc D$_{1-3}$ हासो. K$_3$ D$_3$ भविष्यति. T$_1$ दुर्योधनममर्षणं (=3. 239. 1^{d}).

49 T$_1$ om. 49; K$_3$ D$_3$ om. the ref. — ^{b}) G$_{2.4}$ तथा (for तदा). T$_2$ यश्छ्रुतं (sic) कौरवं त्वया. — T$_2$

२३९

वैशंपायन उवाच ।
प्रायोपविष्टं राजानं दुर्योधनममर्षणम् ।
उवाच सान्त्वयन्राजञ्शकुनिः सौबलस्तदा ॥ १
सम्यगुक्तं हि कर्णेन तच्छ्रुतं कौरव त्वया ।
मयाहृतां श्रियं स्फीतां मोहात्समपहाय किम् ।
त्वमबुद्ध्या नृपवर प्राणानुत्स्रष्टुमिच्छसि ॥ २
अद्य चाप्यवगच्छामि न वृद्धाः सेवितास्त्वया ।
यः समुत्पतितं हर्षं दैन्यं वा न नियच्छति ।
स नश्यति श्रियं प्राप्य पात्रमाममिवाम्भसि ॥ ३
अतिभीरुमतिक्लीबं दीर्घसूत्रं प्रमादिनम् ।
व्यसनाद्विषयाक्रान्तं न भजन्ति नृपं श्रियः ॥ ४
सत्कृतस्य हि ते शोको विपरीते कथं भवेत् ।
मा कृतं शोभनं पार्थैः शोकमालम्ब्य नाशय ॥ ५
यत्र हर्षस्त्वया कार्यः सत्कर्तव्याश्च पाण्डवाः ।
तत्र शोचसि राजेन्द्र विपरीतमिदं तव ॥ ६
प्रसीद मा त्यजात्मानं तुष्टश्च सुकृतं स्मर ।
प्रयच्छ राज्यं पार्थानां यशो धर्ममवाप्नुहि ॥ ७
क्रियामेतां समाज्ञाय कृतघ्नो न भविष्यसि ।

C. 3. 15132
B. 3. 251. 9
K. 3. 252. 8

---

om. 49^{cd}. — ^{c}) G_4 स नो° (for नैवो°). — ^{d}) D_3 °मानसः (for °निश्चयः).

Colophon om. in D_3 T. — *Major parvan :* $Ś_1$ $K_{1.2}$ Dn_2 $G_{2.4}$ आरण्य. — *Sub-parvan :* $K_{3.4}$ B_{1-3} Dc Dn_1 D_{4-6} G_4 दुर्योधनप्रायोपवेश ; B_4 D_2 प्रायोपवेश ; Dn_3 दुर्योधनवेश ; D_1 दुर्योधनप्रायोपवेशन. — *Adhy. name :* M_3 कर्णहितोपदेशकथनं. — *Adhy. no.* (figures, words or both): B_4 320 ; Dn_1 (marg.). n_3 249 ; Dn_2 248 ; D_1 250 ; G_2 241 ; G_4 M (M_3 *inf. lin.*) 242 (M_3 orig. 244). — *Śloka no. :* Dn 13 ; D_1 33.

239

1 T_2 om. 1^{a}–2^{b} ; D_2 T_1 om. the ref. — ^{c}) $Ś_1$ $K_{1.2}$ G_4 राजा (for राजन्). — ^{d}) K_4 सौबलिस् . T_1 M_2 तथा (for तदा).

2 T_2 om. 2^{ab} (cf. v.l. 1). — Before 2, K_3 B D (except $D_{3.5}$) G_3 ins. शकुनिरुवाच (resp. शकुनिः). — ^{a}) K_4 D_3 तु (for हि). — ^{b}) K_1 न ; T_1 यत् (for तत्). — K_3 om. (hapl.) 2^{c}–3^{b}. — ^{c}) S (except G_3) दीप्तां (for स्फीतां). — ^{d}) K_4 स्नेहात् (for मोहात्). K (K_3 om.) $D_{1.2.5}$ समवहाय ; B_4 त्वमपहाय ; D_3 सर्वां विहाय. K_4 तां (for किं). $Ś_1$ B_2 Dc Dn $D_{1.3.4.6}$ तां मोहादप- ($Ś_1$ °त्सम- ; $D_{1.3}$ °दुप)हाय किं (Dc वै). — ^{ef}) B_1 Dn $D_{4.6}$ [अ]द्य नृपते ; $B_{2.3}$ च नृपते ; D_3 भूय एव (for नृपवर). B_3 D (except $D_{1.5}$) अर्हसि (for इच्छसि). T_2 त्वं बुध्वा नृवर प्राणानुत्स्रष्टुमिह चेष्टसि.

3 K_3 om. 3^{ab} (cf. v.l. 2). — ^{a}) B_4 Dn D_6 अथ (for अद्य). Dn $D_{2.6}$ G_1 वा (for च). G_1 तु (for [अ]पि). — ^{c}) Cf. 1. 74. 2^{a}, 3^{a}, 4^{a}. $G_{1.2}$ M यत् (for यः). T_1 घोरं ; G_1 कोपं ; $G_{2.4}$ M क्रोधं (for हर्षं). — ^{d}) Dc Dn_3 (by corr.) D_5 G_4 नियच्छसि. — ^{e}) T_2 G_1 M नश्यते हि (for स नश्यति). — ^{f}) D_3 आमकुंभ° ; T_1 प्राप्तनाव° ; T_2 G_4 छिद्रां नाव° (for पात्रमाम°). — After 3, K_4 D_{1-3} ins. :

1147* यः शोकं समनुप्राप्तं न नियच्छति भारत ।
तमीदृशं नरं न श्रीः कदाचिदपि सेवते ।

4 ^{a}) K_1 °भीम° ; K_3 D_3 °भीत° (for °भीरु°). B_4 S (except G_3) मृदुं (for अति-). — ^{c}) K_3 विषयक्रांतं ; T_2 $G_{2.4}$ विषमं तात. — ^{d}) $Ś_1$ $K_{1.2}$ नृप ; T_2 नरं ; G_1 पर- (for नृपं). K_3 B_{1-3} D प्रजाः ; B_4 बुधाः (for श्रियः).

5 ^{a}) T_2 तैः (for ते). T_2 लोके ; G_4 शोके (for शोको). — ^{b}) K_4 T $G_{1.2.4}$ M विपरीतः. — ^{c}) K_3 यत् ; D_1 तैः (for मा). $Ś_1$ $K_{1.2}$ पूजनं ; B_2 शोभनैः (for शोभनं). — ^{d}) $D_{1.3}$ (marg. *sec. m.*) शोकमेतं (D_1 °कालं) विनाशय.

6 ^{c}) T_2 G_2 अत्र (for तत्र).

7 ^{a}) $G_{1.2.4}$ M न (for मा). B_4 प्रसीद चात्मनात्मानं ; D_3 प्रसीद सत्यमात्मानं ; T_1 प्रसादं न त्यजास्माकं ; T_2 प्रसीद कृतसन्मानं. — ^{b}) K_3 तुष्टस्त्व ; D_2 सुष्टु त्वं ; G_1 संतुष्टः (for तुष्टश्च). B_2 D_3 स्व- (for सु-). — ^{c}) T_2 $G_{1.2}$ पांडूनां (for पार्थानां). K_3 D_2 तेषां प्रतिकृतं कृत्वा (D_2 कार्यं). — ^{d}) $Ś_1$ राज्य° (for धर्म°).

8 $Ś_1$ K_1 om. (hapl.) 8. — ^{a}) $B_{2.3}$ °स्थाय ; T_1 M °ज्ञाप्य (for °ज्ञाय). — ^{b}) K_3 B Dn $D_{4.6}$ G_3 कृतज्ञस्त्वं

C. 3. 15132 B. 3. 251. 9 K. 3. 252. 9 सौभ्रात्रं पाण्डवैः कृत्वा समवस्थाप्य चैव तान् ।
पित्र्यं राज्यं प्रयच्छैषां ततः सुखमवाप्नुहि ॥ ८
शकुनेस्तु वचः श्रुत्वा दुःशासनमवेक्ष्य च ।
पादयोः पतितं वीरं विक्लवं भ्रातृसौहृदात् ॥ ९
बाहुभ्यां साधुजाताभ्यां दुःशासनमरिंदमम् ।
उत्थाप्य संपरिष्वज्य प्रीत्याजिघ्रत मूर्धनि ॥ १०
कर्णसौबलयोश्चापि संस्मृत्य वचनान्यसौ ।
निर्वेदं परमं गत्वा राजा दुर्योधनस्तदा ।
व्रीडयाभिपरीतात्मा नैराश्यमगमत्परम् ॥ ११
सुहृदां चैव तच्छ्रुत्वा समन्युरिदमब्रवीत् ।
न धर्मधनसौख्येन नैश्वर्येण न चाज्ञया ।
नैव भोगैश्च मे कार्यं मा विहन्यत गच्छत ॥ १२
निश्चितेयं मम मतिः स्थिता प्रायोपवेशने ।
गच्छध्वं नगरं सर्वे पूज्याश्च गुरवो मम ॥ १३
त एवमुक्ताः प्रत्यूचू राजानमरिमर्दनम् ।
या गतिस्तव राजेन्द्र सास्माकमपि भारत ।
कथं वा संप्रवेक्ष्यामस्त्वद्विहीनाः पुरं वयम् ॥ १४
स सुहृद्भिरमात्यैश्च भ्रातृभिः स्वजनेन च ।
बहुप्रकारमप्युक्तो निश्चयान्न व्यचाल्यत ॥ १५
दर्भप्रस्तरमास्तीर्य निश्चयाद्धृतराष्ट्रजः ।
संस्पृश्यापः शुचिर्भूत्वा भूतलं समुपाश्रितः ॥ १६
कुशचीराम्बरधरः परं नियममास्थितः ।
वाग्यतो राजशार्दूलः स स्वर्गगतिकाङ्क्षया ।
मनसोपचितिं कृत्वा निरस्य च बहिष्क्रियाः ॥ १७
अथ तं निश्चयं तस्य बुद्ध्वा दैतेयदानवाः ।
पातालवासिनो रौद्राः पूर्वं देवैर्विनिर्जिताः ॥ १८

(for °घ्नो न). — ^{d}) K_3 हि (for तान्). — ^{e}) K_3 Dc $D_{1.2.5}$ प्रदायैषां (for प्रयच्छै°). — ^{f}) K_2 B Dn $D_{4.6}$ G_3 अवाप्स्यसि (for °प्नुहि).

9 Before 9, all MSS. ins. वैशं° उ° (resp. वैशं°). — ^{a}) B_1 T_1 च वचः; T_2 वचनं; M_1 तद्वचः (for तु वचः). — ^{b}) $B_{1.4}$ अवेक्ष्य ह; M_2 अवैक्षत (for अवेक्ष्य च). — ^{c}) $Ś_1$ K_2 T_2 $G_{1.2}$ दीनं (for वीरं). — ^{d}) B Dn $D_{4.6}$ G_3 विकृतं; T $G_{1.2.4}$ M °क्लवं (for °क्लवं).

10 ^{a}) B_4 साधुवृत्ताभ्यां. — ^{b}) K_3 Dc $D_{1.3}$ T_1 M अरिंदमः; $G_{2.4}$ अरिंदम. — ^{d}) M_2 प्रति- (for प्रीत्या). B_4 जिघ्रति; T_1 M_1 जिघ्राय; T_2 $G_{1.2.4}$ चाघ्राय (for [अ]जिघ्रत).

11 ^{a}) T_2 G_1 [ए]व (for [अ]पि). — ^{b}) B Dc Dn $D_{4.6}$ G_3 संश्रुत्य (for संस्मृत्य). B_2 [अ]थ (for [अ]सौ). — ^{c}) T_1 कृत्वा (for गत्वा). — ^{e}) K व्रीडेन (for व्रीडया). $Ś_1$ K_1 G_1 [अ]पि परीतात्मा; D_2 च परीतांगः; D_5 [अ]भिपरीतः सन्.

12 ^{a}) $B_{2.3}$ Dn $D_{4.6}$ G_3 तच्छ्रुत्वा सुहृदश्चैव. — ^{c}) G_1 धर्मैर् (for धर्म-). — ^{d}) B_1 वा° (for चा°). — ^{e}) K_4 च (for [ए]व). D_1 कामै° (for भोगै°). B_1 transp. मे and कार्यं. — ^{f}) K_1 मा विगच्छत कश्चन; K_{2-4} मां विहाय च गच्छत; T_1 G_1 मा न विघ्नत गच्छत; T_2 मा न विघ्नेन गच्छतः.

13 ^{a}) T_2 मतिः सिद्धा (for मम मतिः). — ^{b}) D_2 स्थितः; T_2 मम; G_1 स्थित्वा (for स्थिता). — ^{c}) T_2 G_1 सहिताः (for नगरं).

14 ^{a}) K_1 तम्; S (except G_3) इति (for त). G_4 उक्ते (for उक्ताः). — ^{d}) D_5 सा गतिर्न च भारत. — ^{e}) D_1 च; T_2 हि; G_1 नु (for वा). — ^{f}) $Ś_1$ त्वयि हीनाः (for त्वद्विहीनाः). M_1 transp. पुरं and वयं.

15 D_2 om. 15. — Before 15, $K_{1.2.4}$ B Dc Dn D_{4-6} G_{2-4} ins. वैशं° उ° (resp. वैशं°). — ^{a}) B_4 सहपुत्रैर् (for स सुहृद्भिर्). — ^{c}) K_4 $D_{1.5}$ इति (for अपि). — ^{d}) K_3 च चाल्यते; B Dn $D_{1.4.6}$ M विचाल्यते; G_1 [अ]प्यचाल्यत.

16 $Ś_1$ K_{1-3} Dc D_1 read 16^{ab} after 17^{cd}. — ^{a}) K_4 B_4 $D_{3.5}$ T_2 $G_{1.2.4}$ M दर्भसंस्तर°; B_{1-3} Dn $D_{4.6}$ T_1 G_3 दर्भास्तरण°. — ^{b}) T_1 निश्चयं (for निश्चयाद्). — ^{d}) $K_{3.4}$ B Dn D_{4-6} G_3 M भूतले. B_2 निषसाद ह; B_3 Dn D_{4-6} G_3 समुपस्थितः; T_2 समुपाहितः.

17 ^{b}) K_4 निश्चय° (for नियम°). B_4 परं नित्यमभीप्सितः. — ^{c}) K_4 D_3m वाग्जितो; D_1 वाक्यं ते (for वाग्यतो). K_2 $B_{2.3}$ Dn Dc_2 D_2 राजशार्दूल. — ^{d}) $Ś_1$ सुदुर्गति-. K_2 $B_{2.3}$ Dn $D_{4.6}$ -काम्यया. — After 17^{cd}, $Ś_1$ K_{1-3} Dc D_1 read 16^{ab}. — ^{e}) K_2 मनसोपतितं; G_1 °स्सोमचितं; M_1 °सोपहितं; M_2 °स्सोविजितं. K_4 ज्ञात्वा. — ^{f}) K_3 बहिःकृताः; B_1 Dc $G_{1.2.4}$ M बहिष्क्रियां. — After 17, S (except G_3) ins.:

1148* तस्थौ प्रायोपवेशेऽथ मतिं कृत्वा सुनिश्चयाम् ।
[T_2 G_1 °निश्चलां.]

18 ^{a}) K_1 निश्चितं (for निश्चयं). — ^{b}) $D_{1.2}$ ज्ञात्वा T_1 श्रुत्वा (for बुद्ध्वा). K_3 D_2 दैत्येय°.

ते स्वपक्षक्षयं तं तु ज्ञात्वा दुर्योधनस्य वै ।
आह्वानाय तदा चक्रुः कर्म वैतानसंभवम् ॥ १९
बृहस्पत्युशनोक्तैश्च मन्त्रैर्मन्त्रविशारदाः ।
अथर्ववेदप्रोक्तैश्च याश्चोपनिषदि क्रियाः ।
मन्त्रजप्यसमायुक्तास्तास्तदा समवर्तयन् ॥ २०
जुह्वत्यग्नौ हविः क्षीरं मन्त्रवत्सुसमाहिताः ।
ब्राह्मणा वेदवेदाङ्गपारगाः सुदृढव्रताः ॥ २१
कर्मसिद्धौ तदा तत्र जृम्भमाणा महाद्भुता ।
कृत्या समुत्थिता राजन्किं करोमीति चाब्रवीत् ॥ २२
आहुर्दैत्याश्च तां तत्र सुप्रीतेनान्तरात्मना ।
प्रायोपविष्टं राजानं धार्तराष्ट्रमिहानय ॥ २३
तथेति च प्रतिश्रुत्य सा कृत्या प्रययौ तदा ।
निमेषादगमच्चापि यत्र राजा सुयोधनः ॥ २४
समादाय च राजानं प्रविवेश रसातलम् ।
दानवानां मुहूर्ताच्च तमानीतं न्यवेदयत् ॥ २५
तमानीतं नृपं दृष्ट्वा रात्रौ संहत्य दानवाः ।
प्रहृष्टमनसः सर्वे किंचिदुत्फुल्ललोचनाः ।
साभिमानमिदं वाक्यं दुर्योधनमथाब्रुवन् ॥ २६

C. 3. 15154
B. 3. 251. 30
K. 3. 252. 31

इति श्रीमहाभारते आरण्यकपर्वणि एकोनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २३९ ॥

---

19 a) Ś1 K2 तु; B4 -पु (for स्व-). Ś1 K2 तं वै; G2. 4 M ज्ञात्वा (for तं तु). — b) Ś1 श्रुत्वा; T1 राज्ञो; G2. 4 M मतं (for ज्ञात्वा). Ś1 K1. 2 ह; T1 च (for वै). — c) T2 G1 आनयार्थं (for आह्वानाय). S (except G3) ततः (for तदा). D6m आश्वलायनतश्चक्रुः.

20 a) Ś1 K1. 2. 4 B4 D1–3. 5 बृहस्पत्युशनःप्रोक्तैर्. — c) K1 °वेदप्रोक्ताश्च; M1 °वेदमंत्रेषु. — d) Ś1 K1. 2. 4 B1 D3. 5 याश्चैवोपनिषत्क्रियाः; K3 B3. 4 Dc D1 T G1. 2. 4 M2 याश्चोपनिषद(B4 T1 G1. 2. 4 M2 °दाः; Dc °दः; T2 °दां)क्रियाः; M1 पारगाः सुदृढव्रताः. — e) K1. 3. 4 मंत्रजाप्य°. — f) Ś1 K1. 2 B2 Dn2. n3 D4. 6 G3 संप्रवर्तयन्; K3. 4 समवर्तयत्. M2 तदा सम्यगवर्तयन्.

21 a) D3 जुह्वंत्यग्नौ; S (except G3) जुह्वंतो°. K1–3 D1. 2. 5 ततः (for हविः). — b) D3. 5 °हितः (for °हिताः). — c) K3 D1 °वेदांगाः; B1 °वेदांगं (for °वेदाङ्ग-). — d) S (except G3) सुधृतव्रताः. — After 21, S (except G3) ins.:

1149* अध्वर्यवो दानवानां कर्म प्रावर्तयंस्ततः ।

[M2 °यंत तत् (for °यंस्ततः). T2 आसन्कर्मप्रवर्तकाः (for the posterior half).]

22 a) K1 ततस् (for तदा). — b) Ś1 K1. 2. 4 D1. 3 G1 महाद्भुताः; K3 महद्भुतं; Dc2 T1 महाभुजाः; G4 तदद्भुतं. — After 22^{ab}, G1 ins.:

1150* तस्मिन्यज्ञे दानवानां वर्तमाने नराधिप ।

— c) K3 घोरा (for राजन्). — d) T2 सा° (for चा°).

23 a) K3 D2 दैत्यांश्च (for दैत्या°). K3 तान् (for तां). D1 राजन् (for तत्र). Ś1 K1. 2 आहुश्च तां तदा तत्र. — b) G1 घोररूपां भयावहां. — After 23^{ab}, G1 ins.:

1151* कृत्यां सुतीक्ष्णदन्ताग्रां दीप्ता * * [शि]रोरुहाम् ।

— K3 om. (hapl.) 23^{d}–25^{a}. — d) D3 दुर्योधनमिहा°.

24 K3 om. 24 (cf. v.l. 23). — b) Dc [अ]थ (for प्र-). B2 नृप (for तदा). — c) Ś1 K (K3 om.) Dc D1. 3. 5 [ए]व (for [अ]पि).

25 K3 om. 25^{a} (cf. v.l. 23). — a) B1 T G1. 4 M सा त(B1 स)मादाय (for समादाय च). — c) T2 M मुहूर्तं (for मुहूर्ताच्च). — d) T1 अप्यानीतं; T2 पुरस्तात्तं (for तमानीतं). G2 पुरतस्तं निवे°; G4 आनीतं तत्र वेद°.

26 a) T2 G1 ततो (for नृपं). — b) T2 सर्वे (for रात्रौ). B1. 3 D (except D1–3. 5) G3 संगत्य; B2 °गम्य (for °हत्य). — M2 om. 26^{cd}. — c) Ś1 K1 °मानसाः; K2 °मानवाः. — d) K1 °लोचनः; G4 °चेतनाः. — After 26^{cd}, S (except G3) ins.:

1152* दृढमेनं परिष्वज्य पृष्ट्वा च कुशलं तदा ।

— f) K3 [अ]ब्रवीत् (for [अ]ब्रुवन्).

Colophon om. in D3. G1 partly broken. — *Major parvan:* Ś1 K1. 2 Dn2 T2 G2. 4 आरण्य. — *Sub-parvan:* K1 घोषयात्रा; K3 B1–3 Dc Dn1. n3 D1. 4–6 G3 दुर्योधनप्रायोपवेश (D1 °वेशन); K4 B4 D2 M2 प्रायोपवेश. — *Adhy. no.* (figures, words or both): B4 321; Dn 250 (Dn2 249); D1 251; T1 G4 M (M2 *inf. lin.*) 243 (M2 orig. 245); T2 240; G2 242. — *Śloka no.:* Dn 29.

240

1 a) K3 Dn2 D1–4 भो. B4 दुर्योधन. — b) Dc G1. 4 भारतानां. — c) B1 राजा (for नित्यं). — d) D2

२४०

C. 3. 15155
B. 3. 252. 1
K. 3. 252. 1

दानवा ऊचुः ।
भोः सुयोधन राजेन्द्र भरतानां कुलोद्वह ।
शूरैः परिवृतो नित्यं तथैव च महात्मभिः ॥ १
अकार्षीः साहसमिदं कस्मात्प्रायोपवेशनम् ।
आत्मत्यागी ह्यवाग्याति वाच्यतां चायशस्करीम् ॥ २
न हि कार्यविरुद्धेषु बह्वपायेषु कर्मसु ।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ ३
नियच्छैतां मतिं राजन्धर्मार्थसुखनाशिनीम् ।
यशःप्रतापधैर्यघ्नीं शत्रूणां हर्षवर्धनीम् ॥ ४
श्रूयतां च प्रभो तत्त्वं दिव्यतां चात्मनो नृप ।
निर्माणं च शरीरस्य ततो धैर्यमवाप्नुहि ॥ ५
पुरा त्वं तपसास्माभिर्लब्धो देवान्महेश्वरात् ।
पूर्वकायश्च सर्वस्ते निर्मितो वज्रसंचयैः ॥ ६
अस्त्रैरभेद्यः शस्त्रैश्चाप्यधःकायश्च तेऽनघ ।
कृतः पुष्पमयो देव्या रूपतः स्त्रीमनोहरः ॥ ७
एवमीश्वरसंयुक्तस्तव देहो नृपोत्तम ।
देव्या च राजशार्दूल दिव्यस्त्वं हि न मानुषः ॥ ८
क्षत्रियाश्च महावीर्या भगदत्तपुरोगमाः ।
दिव्यास्त्रविदुषः शूराः क्षपयिष्यन्ति ते रिपून् ॥ ९
तदलं ते विषादेन भयं तव न विद्यते ।
साह्यार्थं च हि ते वीराः संभूता भुवि दानवाः ॥ १०
भीष्मद्रोणकृपादींश्च प्रवेक्ष्यन्त्यपरेऽसुराः ।

सु- (for च).

तान्वेपमानान्वित्रस्तान्बीजमात्रावशेषितान् ।
मृगान्दृष्ट्वा सुदुःखार्तो धर्मराजो युधिष्ठिरः ॥ ८
तांस्तथेत्यब्रवीद्राजा सर्वभूतहिते रतः ।
तथ्यं भवन्तो ब्रुवते करिष्यामि च तत्तथा ॥ ९
इत्येवं प्रतिबुद्धः स रात्र्यन्ते राजसत्तमः ।
अब्रवीत्सहितान्भ्रातॄन्दयापन्नो मृगान्प्रति ॥ १०
उक्तो रात्रौ मृगैरस्मि स्वप्नान्ते हतशेषितैः ।
तनुभूताः स्म भद्रं ते दया नः क्रियतामिति ॥ ११
ते सत्यमाहुः कर्तव्या दयास्माभिर्वनौकसाम् ।
साष्टमासं हि नो वर्षं यदेनाननुपयुञ्ज्महे ॥ १२

C. 3. 15364
B. 3. 258. 12
K. 3. 259. 12

244

1 ^{a}) Ś$_1$ K Dc D$_{1-3.5}$ पांडुपुत्रा; B (B$_4$ marg.) Dn D$_{4.6}$ G$_3$ मोक्षयित्वा (for मोच°). — ^{b}) Ś$_1$ K Dc D$_{1-3.5}$ मोचयित्वा (for पाण्डु°). S (except G$_3$) महारथाः. — ^{c}) G$_4$ किमकुर्वन् (for °कार्षुर्). — ^{d}) G$_1$ तत्त्वमा° (for तन्ममा°). K$_4$ समा° (for ममा°). D$_5$ समाख्यातुं त्वमर्हसि; T$_1$ तन्ममाचक्ष्व सर्वशः.

2 ^{a}) B$_3$ नृपतिं; B$_4$ राजानं (for कौन्तेयं).

3 D$_5$ T$_1$ om. (hapl.) 3–4. — ^{b}) Ś$_1$ Dc वेपमानः. Dc कृतांजलिः. — ^{c}) B$_1$ तु (for स्थ). — ^{d}) K$_4$ इच्छते; B$_4$ इच्छथ (for इष्यते). T$_2$ G$_{2.4}$ M तत्करिष्याम्यशेषतः; G$_1$ करिष्ये तदशेषतः.

4 D$_5$ T$_1$ om. 4 (cf. v.l. 3). — ^{b}) G$_4$ महात्मना (for यश°). — ^{c}) G$_1$ त्रस्ता (for तत्र).

5 ^{b}) B$_2$ S (except G$_3$) हतशेषाः. B$_{1-3}$ Dn D$_{4.6}$ T$_1$ G$_3$ तु भारत; M$_1$ युधिष्ठिर (for स्म भारत). — ^{c}) G$_1$ नोत्सादनं (for नोत्सीदेम). — ^{d}) G$_1$ °तां पांडवर्षभ.

6 ^{a}) Ś$_1$ Dn$_2$ D$_{2.3}$ (by corr.) G$_3$ भवतो. — ^{b}) Dc सर्वशस्त्रास्त्र°. — ^{c}) Ś$_1$ °शेषाणि.

7 ^{a}) B$_3$ वने (for वयं). — ^{b}) Ś$_1$ K Dc D$_{1-3.5}$ T$_2$ G$_1$ महीपते; T$_1$ विशां पते (for महामते). — ^{c}) Ś$_1$ K$_{1.2}$ विवर्धेम महाराज; M$_1$ विवृधेमहि रा°.

8 Ś$_1$ K$_{1.3.4}$ om. (? hapl.) 8. — ^{c}) D$_1$ सुदुःखार्तान्. — ^{d}) B$_1$ धर्मपुत्रो.

9 ^{a}) T$_2$ G$_1$ [ए]व (for [इ]ति). — ^{c}) B$_{2-4}$ Dn D$_{4.6}$ G$_3$ यथा (for तथ्यं). — ^{d}) K$_3$ वचस् (for च तत्). S (except G$_3$) तत्करिष्यामि वो वचः.

10 ^{a}) T G$_4$ M$_1$ सन् (for स). — ^{b}) D$_6$ व्युष्टायां (for रात्र्यन्ते). S (except G$_3$) व्युष्टायां निशि पार्थिवः (M$_1$ भारतः). — ^{d}) B$_4$ दयावांस्तान्; D$_1$ दयावंतो.

11 ^{a}) Dc$_2$ T$_1$ G$_4$ अस्मिन्. — ^{b}) Dc मृगशेषितैः; T$_1$ हतशेषिभिः. — ^{c}) K$_3$ तेन्नभूताः; B$_1$ T$_1$ G$_1$ अनु°; B$_{2-4}$ Dc Dn D$_{2.4-6}$ G$_3$ तंनु°; D$_1$ M$_1$ तनू°. T$_1$ अनुभूतास्तु दृश्यंते.

12 ^{a}) T$_2$ G$_1$ कर्तव्यं. — ^{b}) Dc दयास्माकं; T$_2$ G$_1$ यदस्माभिर्. — ^{c}) T$_2$ दृष्टमासं; G$_2$ दृष्टामांसं. T$_2$ G$_1$ वने (for हि नो). — ^{d}) T$_2$ G$_1$ यदेतद्; G$_2$ यदेतम्; G$_4$ M यदेतान्. Ś$_1$ D$_4$ उपयुज्महे; K$_{1.2}$ °भुज्महे; K$_3$ °यत्स्महे; K$_4$ °भुंक्ष्यहे; B$_1$ °भुंज्महे; B$_{3-4}$ °भुंजते; B$_4$m G$_3$ °भुंक्ष्महे; Dc °युंजहे; Dn (Dn$_3$ before corr.) D$_3$ °युंक्ष्महे; T$_2$ °युज्महि; G$_1$ °युंक्ष्वहि; G$_{2.4}$ M$_1$ °युंज्महि; M$_3$ °युज्महि. — After 12, S (except G$_3$) ins.:

C. 3. 15365
B. 3. 258. 13
K. 3. 259. 13

पुनर्बहुमृगं रम्यं काम्यकं काननोत्तमम् ।
मरुभूमेः शिरः ख्यातं तृणबिन्दुसरः प्रति ।
तत्रेमा वसतीः शिष्टा विहरन्तो रमेमहि ॥ १३
ततस्ते पाण्डवाः शीघ्रं प्रययुर्धर्मकोविदाः ।
ब्राह्मणैः सहिता राजन्ये च तत्र सहोषिताः ।
इन्द्रसेनादिभिश्चैव प्रेष्यैरनुगतास्तदा ॥ १४
ते यात्वानुसृतैर्मार्गैः स्वन्नैः शुचिजलान्वितैः ।
ददृशुः काम्यकं पुण्यमाश्रमं तापसायुतम् ॥ १५
विविशुस्ते स्म कौरव्या वृता विप्रर्षभैस्तदा ।
तद्वनं भरतश्रेष्ठाः स्वर्गं सुकृतिनो यथा ॥ १६

इति श्रीमहाभारते आरण्यकपर्वणि चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४ ॥ समाप्तं मृगस्वप्नभयपर्व ॥

२४५

वैशंपायन उवाच ।
वने निवसतां तेषां पाण्डवानां महात्मनाम् ।
वर्षाण्येकादशातीयुः कृच्छ्रेण भरतर्षभ ॥ १
फलमूलाशनास्ते हि सुखार्हा दुःखमुत्तमम् ।
प्राप्तकालमनुध्यान्तः सेहुरुत्तमपूरुषाः ॥ २
युधिष्ठिरस्तु राजर्षिरात्मकर्मापराधजम् ।
चिन्तयन्स महाबाहुर्भ्रातॄणां दुःखमुत्तमम् ॥ ३
न सुष्वाप सुखं राजा हृदि शल्यैरिवार्पितैः ।

1173* अर्जुनः ।
त्वदधीना वयं राजन्मा त्वमस्मान्विचारय ।
यत्रैव मन्यसे पार्थ तत्र गच्छामहे वयम् ।

13 Before 13, S (except G_3) ins. युधिष्ठिरः. — ^{b}) T G_1 M श्रूयते काम्यकं वनं. — ^{c}) Dn स्थानं (!); M_2 ख्यातस्. $G_{1.2.4}$ मरुभूः शिखरं ख्यातं. — ^{e}) B Dn $D_{4.6}$ G_3 M_2 तत्रेमां वसतिं शिष्टां; T_2 $G_{1.2.4}$ तत्र मासान्वने शिष्टान्. — ^{f}) $Ś_1$ K Dc $D_{1-3.5}$ वसेमहि; $B_{1.2}$ रमामहे. — After 13, T_2 $G_{1.2.4}$ ins.:

1174* वैशंपायनः ।
इत्युक्तास्ते महात्मानः पाण्डवेन महात्मना ।

14 T_2 $G_{1.2}$ om. 14^{ab}. — ^{b}) B_1 युद्ध° (for धर्म°). — ^{d}) $Ś_1$ K_1 यैस्तैस्तत्र; K_3 Dc_2 ये तैस्तत्र; K_4 Dc_1 $D_{2.3}$ T_1 G_4 ये ते तत्र; D_1 य एतेत्र; M ये तत्रासन्. D_5 ये तत्र वनवासिनः; T_2 $G_{1.2}$ जग्मुस्तत्र सहोषितैः. — ^{f}) T_2 $G_{1.2}$ भृत्यैर् (for प्रेष्यैर्). Dc अनुगतैस्. $K_{1.2.4}$ B_1 $D_{1-3.5}$ G_3 तथा; T_2 G_1 च ते.

15 ^{a}) K_4 ते याताः; T_1 गत्वा ते. K_4 D_3 T_1 $G_{2.4}$ M_1 सुसुखैर्; B_3 M_2 [अ]नुगतैर्; T_2 तु रथैर्; G_1 तु सुखैर्. — ^{b}) $Ś_1$ $K_{1.2.4}$ $D_{1.3}$ शुभैः; B_1 श्वभ्रैः; D_5 क्षुण्णैः; T_1 स्वच्छैः; T_2 $G_{1.3}$ शनैः. — ^{c}) T_1 विविशुः (cf. 16^a). G_1 पुण्याम्; M_2 रम्यम्. — ^{d}) K_1 तापसावृतं; $K_{2.4}$ B Dc Dn $D_{1.4.6}$ T G_4 M_2 तपसा युतं (B_3 T °न्वितं; Dc_1 युताः; Dc_2 °न्विताः); $G_{1.2}$ तापसान्वितं; M_1 तापसैर्युतं.

16 ^{a}) T G_1 M_2 ददृशु° (for विविशु°); cf. 15^c. — ^{b}) K_4 Dc D_{1-3} विप्रर्षिभिस्. K_4 B_1 $D_{2.3}$ M_2 तथा. — ^{c}) M °श्रेष्ठ. G_1 तद्वनं विविशुः पार्थाः.

Colophon. — *Major parvan:* $Ś_1$ $K_{1.2}$ Dn_2 $G_{2.4}$ आरण्य. — *Sub-parvan:* K_3 B_4 Dc D_{1-3} M_2 मृगस्वप्नदर्शन; K_4 $B_{2.3}$ Dn $D_{4.6}$ G_3 मृगस्वप्न; B_1 स्वप्नदर्शन; D_6 मृगस्वप्नोद्भवप्रदर्शन. — *Adhy. no.* (figures, words or both): Dn 256 (Dn_3 257); D_1 259; T_1 G_4 M (M_2 *inf. lin.*) 248 (M_2 orig. 250); T_2 G_1 245; G_2 247. — *Śloka no.:* Dn D_1 17.

245

2 ^{a}) K_1 °शिन° (for °शना°). Dn_3 $D_{4.6}$ G_3 [ऽ]ति- T_1 [ऽ]पि (for हि). — ^{b}) K_4 G_4 सुखम् (for दुःखम् — $Ś_1$ D_1 om. (hapl.) 2^c–3^d. — ^{c}) T_2 प्राप्य- (for प्राप्त- T_2 $G_{1.2}$ °प्राप्ताः (for °ध्यान्तः). D_5 प्राप्तकालमनुष्यत्वात् — ^{d}) K_4 $D_{2.3}$ T_1 सेहुरुत्तमपौरुषाः; $B_{2.3.4}$ (m as in text) Dn $D_{4.6}$ G_3 सेहिरे वरपूरुषाः; T_2 तेरुस्ते पुरुषर्षभाः.

3 $Ś_1$ D_1 om. 3 (cf. v.l. 2). — ^{c}) $K_{1.3.4}$ D चिंतयंस्तन्; S (except G_3) अचिंतयन्.

4 ^{a}) T_1 महाराज; T_2 चिरं राजन्; $G_{2.4}$ M_1 तदा राज (for सुखं राजा). — ^{b}) $Ś_1$ $K_{1.2}$ इवार्दितः; B_1 T_1 G_1 M इवार्पितः; T_2 इवाभवत्. — ^{c}) $Ś_1$ $K_{1.2.4}$ $D_{2.3}$ अनु पश्यन्स; D_1 अनुसंपश्यन्. T_1 दौरात्म्यमात्मनः पश्यन्. — ^{d}

दौरात्म्यमनुपश्यंस्तत्काले द्यूतोद्भवस्य हि ॥ ४
संस्मरन्परुषा वाचः सूतपुत्रस्य पाण्डवः ।
निःश्वासपरमो दीनो बिभ्रत्कोपविषं महत् ॥ ५
अर्जुनो यमजौ चोभौ द्रौपदी च यशस्विनी ।
स च भीमो महातेजाः सर्वेषामुत्तमो बली ।
युधिष्ठिरमुदीक्षन्तः सेहुर्दुःखमनुत्तमम् ॥ ६
अवशिष्टमल्पकालं मन्वानाः पुरुषर्षभाः ।
वपुरन्यदिवाकार्षुरुत्साहामर्षचेष्टितैः ॥ ७
कस्यचित्त्वथ कालस्य व्यासः सत्यवतीसुतः ।
आजगाम महायोगी पाण्डवानवलोककः ॥ ८
तमागतमभिप्रेक्ष्य कुन्तीपुत्रो युधिष्ठिरः ।
प्रत्युद्गम्य महात्मानं प्रत्यगृह्णाद्यथाविधि ॥ ९
तमासीनमुपासीनः शुश्रूषुर्नियतेन्द्रियः ।
तोषयन्प्रणिपातेन व्यासं पाण्डवनन्दनः ॥ १०
तानवेक्ष्य कृशान्पौत्रान्वने वन्येन जीवतः ।
महर्षिरनुकम्पार्थमब्रवीद्बाष्पगद्गदम् ॥ ११
युधिष्ठिर महाबाहो शृणु धर्मभृतां वर ।
नातप्ततपसः पुत्र प्राप्नुवन्ति महत्सुखम् ॥ १२
सुखदुःखे हि पुरुषः पर्यायेणोपसेवते ।
नात्यन्तमसुखं कश्चित्प्राप्नोति पुरुषर्षभ ॥ १३
प्रज्ञावांस्त्वेव पुरुषः संयुक्तः परया धिया ।
उदयास्तमयज्ञो हि न शोचति न हृष्यति ॥ १४
सुखमापतितं सेवेद्दुःखमापतितं सहेत् ।
कालप्राप्तमुपासीत सस्यानामिव कर्षकः ॥ १५
तपसो हि परं नास्ति तपसा विन्दते महत् ।
नासाध्यं तपसः किंचिदिति बुध्यस्व भारत ॥ १६

C. 3. 15386
B. 3. 259. 17
K. 3. 260. 17

Ś$_{1}$ K D$_{1. 3. 5}$ M$_{1}$ कलेर्; B$_{1}$ कालं. Ś$_{1}$ K$_{3. 4}$ D$_{1. 3. 5}$ T$_{1}$ ह; K$_{1. 2}$ च (for हि). B$_{1}$ Dc काले (B$_{1}$ °लं) द्यूतोद्भवं स ह; B$_{3}$ G$_{3}$ काले द्यूतोद्भवं प्रति (G$_{3}$ स हि).

5 ^{a}) T$_{1}$ उवाच (for संस्मरन्). — ^{c}) Some MSS. निश्वास°. — ^{d}) S (except G$_{3}$) दध्रे (for बिभ्रत्).

6 ^{c}) G$_{4}$ भीमसेनो महा°. — ^{d}) S (except T$_{2}$ G$_{3}$) बले (for बली). — After 6^{cd}, S (except G$_{3}$) ins.:

1175* चिरस्य जातधर्मज्ञं सासूयमिव ते तदा ।

— ^{e}) Ś$_{1}$ उपे°; K$_{1. 2}$ अवे° (for उदी°). — ^{f}) Ś$_{1}$ K$_{1. 2}$ सेहिरे दुःखमुत्तमं.

7 ^{a}) Ś$_{1}$ ह्यल्पकालं; G$_{1}$ च कालं तु; G$_{2. 4}$ स्वल्प°; M$_{1}$ चाल्प°. K$_{4}$ D$_{2. 3}$ अवशिष्टाल्पकालं च. — ^{b}) B$_{1}$ पुरुषोत्तमाः. — ^{c}) T$_{1}$ अन्य; G$_{1}$ अन्यम् (for अन्यद्). — ^{d}) G$_{1}$ °चोदितैः.

8 8^{a}=1. 123. 68^{a}. — 8^{b} = 1. 157. 1^{d}: 3. 27. 20^{d}: (var.) 1. 100. 16^{c}. — ^{c}) =3. 37. 20^{c}. Ś$_{1}$ K$_{1–3}$ Dc D$_{1. 5}$ महातेजाः (for °योगी). — ^{d}) =3. 180. 44^{d}.

9 ^{a}) T$_{1}$ तमापतंतमुद्वीक्ष्य.

10 ^{a}) Ś$_{1}$ उपा°; G$_{2. 4}$ समा° (for तमा°). B$_{1}$ च शुश्रूषुर्; Dc उपासीनं; G$_{2}$ उपासीनाः. — ^{b}) B$_{1}$ नियतो (for शुश्रूषुर्). K$_{4}$ विजितेंद्रियः; D$_{1}$ G$_{2}$ नियतेंद्रियाः. — ^{c}) Ś$_{1}$ K Dc D$_{1–3}$ प्रणिधानेन. G$_{2. 4}$ M तोषयामास शौचेन. — ^{d}) K$_{1. 3}$ G$_{1}$ पांडवनंदन; B$_{4}$ सत्यवतीसुतं.

11 ^{a}) Ś$_{1}$ K$_{1. 3. 4}$ Dc D$_{1–3}$ समीक्ष्य; T$_{2}$ G$_{1}$ प्रेक्ष्य च (for अवेक्ष्य). T$_{1}$ समवेक्ष्य तु तान्पौत्रान्. — ^{b}) B$_{3}$ Dc$_{2}$ Dn$_{1}$ D$_{1. 3}$ T$_{2}$ G$_{4}$ जीवितः (D$_{1}$ G$_{4}$ °नः); G$_{2}$ जीवनः. — ^{c}) Ś$_{1}$ K Dc D$_{1. 3. 5}$ °रनुकंपस्तान्. — ^{d}) D$_{6}$ वाक्य° (for बाष्प°).

12 ^{a}) K$_{4}$ महाप्राज्ञ; D$_{2. 3}$ महाराज. — ^{c}) Ś$_{1}$ कामं; K$_{3}$ B$_{2. 3}$ Dn D$_{1. 4. 6}$ T$_{2}$ G$_{2. 3}$ लोके; B$_{1. 4}$ T$_{1}$ पुंसः; D$_{3}$ शीघ्रं; M$_{2}$ पार्थ (for पुत्र). — ^{d}) B$_{1}$ Dn D$_{1}$ M$_{2}$ महासुखं; T$_{2}$ G$_{1}$ महत्फलं.

13 ^{a}) T$_{2}$ G$_{1}$ सुखदुःखं. — ^{b}) B$_{1}$ [उ]पभुंजते; T$_{2}$ G$_{1}$ च सेवते. — ^{c}) Ś$_{1}$ K D$_{1. 3. 5}$ न ह्यत्यंतं सुखं; B Dc Dn D$_{2. 4. 6}$ G$_{3}$ न ह्यनंतं सुखं; T$_{1}$ M नात्यंतं हि (T$_{1}$ च) सुखं. — ^{d}) K$_{4}$ Dc D$_{2. 3. 5}$ भरतर्षभ; T$_{2}$ M$_{2}$ पुरुषर्षभः.

14 ^{a}) G$_{4}$ भाग्य° (for प्रज्ञा°). K$_{1}$ एव; K$_{4}$ D$_{2. 3}$ चैव; D$_{1}$ स्त्वेष (for स्त्वेव). — ^{b}) K$_{4}$ संसक्तः; D$_{2}$ M$_{2}$ स युक्तः. D$_{1}$ युक्तः परमया धिया. — ^{c}) K$_{4}$ B D (except D$_{1. 3. 5}$) G$_{3}$ °स्तमनज्ञो. — ^{d}) B$_{2. 3}$ Dn D$_{4. 6}$ G$_{3}$ transp. शोचति and हृष्यति. Dc कुप्यति (for हृष्य°).

15 ^{a}) T$_{2}$ G$_{1. 2}$ सेहेद्; G$_{4}$ विद्वान् (for सेवेद्). Dc दुःखं च पतितं से°. — ^{b}) Ś$_{1}$ K$_{1. 2}$ तथा; B$_{2. 3}$ Dn D$_{4. 6}$ वहेत्; D$_{3}$ महत्; T$_{1}$ G$_{4}$ सहन्; G$_{1}$ सहे; M$_{2}$ सह. — Ś$_{1}$ K$_{1. 2}$ om. 15^{c}–16^{b}. — ^{c}) K$_{3}$ D$_{1}$ T$_{1}$ प्राप्तकाल°; G$_{4}$ काल्यप्राप्ति° (for कालप्राप्त°). — ^{d}) K$_{4}$ D$_{1. 2}$ इव कर्षुकः; Dc उपकर्षकः.

16 Ś$_{1}$ K$_{1. 2}$ om. 16^{ab} (cf. v.l. 15). — ^{c}) Ś$_{1}$ K$_{1}$ तपसां; S (except G$_{3}$ M$_{1}$) °सा.

17 ^{b}) K$_{1}$ संविभागे दमश्च सः. — Ś$_{1}$ K$_{1. 2}$ om. 17^{cd}

C. 3. 15386
B. 3. 259. 17
K. 3. 260. 17

सत्यमार्जवमक्रोधः संविभागो दमः शमः ।
अनसूयाविहिंसा च शौचमिन्द्रियसंयमः ।
साधनानि महाराज नराणां पुण्यकर्मणाम् ॥ १७
अधर्मरुचयो मूढास्तिर्यग्गतिपरायणाः ।
कृच्छ्रां योनिमनुप्राप्य न सुखं विन्दते जनाः ॥ १८
इह यत्क्रियते कर्म तत्परत्रोपभुज्यते ।
तस्माच्छरीरं युञ्जीत तपसा नियमेन च ॥ १९
यथाशक्ति प्रयच्छेच्च संपूज्याभिप्रणम्य च ।
काले पात्रे च हृष्टात्मा राजन्विगतमत्सरः ॥ २०
सत्यवादी लभेतायुरनायासमथार्जवी ।
अक्रोधनोऽनसूयश्च निर्वृतिं लभते पराम् ॥ २१
दान्तः शमपरः शश्वत्परिक्लेशं न विन्दति ।
न च तप्यति दान्तात्मा दृष्ट्वा परगतां श्रियम् ॥ २२
संविभक्ता च दाता च भोगवान्सुखवान्नरः ।
भवत्यहिंसकश्चैव परमारोग्यमश्नुते ॥ २३
मान्यान्मानयिता जन्म कुले महति विन्दति ।
व्यसनैर्न तु संयोगं प्राप्नोति विजितेन्द्रियः ॥ २४
शुभानुशयबुद्धिर्हि संयुक्तः कालधर्मणा ।
प्रादुर्भवति तद्योगात्कल्याणमतिरेव सः ॥ २५

युधिष्ठिर उवाच ।

भगवन्दानधर्माणां तपसो वा महामुने ।
किं स्विद्बहुगुणं प्रेत्य किं वा दुष्करमुच्यते ॥ २६

व्यास उवाच ।

दानान्न दुष्करतरं पृथिव्यामस्ति किंचन ।
अर्थे हि महती तृष्णा स च दुःखेन लभ्यते ॥ २७
परित्यज्य प्रियान्प्राणान्धनार्थं हि महाहवम् ।

(cf. v.l. 15). — ^{c}) K_4 $D_{2.3}$ अहिंसा चानसूया च; K_3 D_1 T $G_{1.2.4}$ अनसूयाप्य(K_3 °यापि; D_1 °या त्व)हिंसा च. — ^{d}) D_5 T_2 G_1 °निग्रहः; T_1 °संगमः; G_2 °संयमं. — ^{e}) K_3 $D_{3.5}$ साधकानि; $B_{2.3}$ Dn $D_{2.4.6}$ G_3 पावनानि. S (except T_2 G_3) महाबाहो. — ^{f}) K_4 नृणां वै (for नराणां).

18 ^{b}) G_1 तिर्यग्योनि°. — ^{c}) T_1 $G_{2.4}$ गति° (for योनि°). B_{1-3} Dn $D_{4.6}$ G_3 अनुप्राप्ता. — ^{d}) B_4 (m as in text) महत् (for जनाः). $Ś_1$ $K_{1.2}$ B_1 D_3 न विंदंते (D_3 °ति) सुखं जनाः; S (except G_3) सुखं विंदंति नो जनाः. — After 18, K_4 $D_{2.3}$ ins.:

1176* कर्मभूमिरियं तात फलभूमिरसौ परा ।

19 ^{a}) $Ś_1$ कुरुते (for क्रियते). — ^{b}) $B_{2.4}$ Dn $D_{1.4.6}$ G_3 °युज्यते (for °भुज्यते). — After 19^{ab}, B Dc D_5 ins.:

1177* मूले सिक्तस्य वृक्षस्य फलं शाखासु दृश्यते ।

20 ^{a}) $Ś_1$ $B_{2.4}$ Dn $D_{2.4.6}$ G_3 प्रयच्छेत (for °च्छेच्च). — ^{c}) $Ś_1$ $K_{1.2}$ B Dn $D_{1.4-6}$ G_3 प्राप्ते (for पात्रे).

21 ^{a}) K D_3 M लभत्यायुर्; D_5 T_2 लभेदायुर्. — ^{b}) $Ś_1$ अथार्जकः; $K_{1.2}$ B Dn $D_{2.4-6}$ T_2 G_3 अथार्जवं; K_3 Dc $D_{1.3}$ अथार्जवात्; K_4 अनामयः. — ^{c}) $Ś_1$ Dc D_4 $G_{1.4}$ M_1 [ऽ]नसूयुश्च. — ^{d}) K_4 B_1 D_{1-3} निवृत्तिं.

22 ^{a}) K_4 D_3 प्रेत्य (for शश्वत्). — ^{b}) $K_{1.3}$ Dc D_1 G_4 M परिक्लेशान्. — G_1 om. (hapl.) 22^{c}–24^{b}. — ^{c}) M_2 कुप्यति (for त°). $Ś_1$ $K_{1.2}$ D_1 शांतात्मा; D_3 दीनात्मा.

23 G_1 om. 23 (cf. v.l. 22). — ^{d}) T_2 M °रोग्य-संयुतः.

24 G_1 om. 24^{ab} (cf. v.l. 22). — ^{a}) $K_{3.4}$ B Dn D_{2-6} G_3 M_1 मान्य-; Dc D_1 T_1 मान्यं; M_2 मान्या (for मान्यान्). — After 24^{ab}, S (except G_3) ins.:

1178* विन्दते सुखमत्यन्तमिह लोके परत्र च ।

— ^{c}) K_4 नैव; T $G_{1.4}$ M न च.

25 ^{a}) $G_{2.4}$ शुभानुबंध°. — ^{b}) $B_{3.4}$ M_2 कालकर्मणा. — ^{c}) Dc संयोगात् (for तद्योगात्). — ^{d}) T_1 G_1 ह; $G_{2.4}$ हि; M च (for सः).

26 ^{c}) $K_{3.4}$ D_3 किंचिद्बहु°. T_1 प्राप्य (for प्रेत्य). — G_1 om. 26^{d}–27^{a}.

27 G_1 om. 27^{a} (cf. v.l. 26). — ^{a}) $B_{1.3}$ D (except $D_{1-3.5}$) T_1 G (G_1 om.) दुष्करं तात ($G_{2.4}$ पार्थ) (for दुष्करतरं). — ^{c}) B_1 अर्थे तु; B_2 अर्थेषु; $B_{3.4}$ Dc_1 Dn $D_{5.6}$ T_2 $G_{1.3}$ M_1 अर्थे च; Dc_2 D_4 अर्थेन; M_2 अर्थेति. — ^{d}) D_1 कृच्छ्रेण (for दुःखेन). — After 27, D_1 ins.:

1179* राजन्प्रत्यक्षमेवैतद्दृश्यते लोकसाक्षिकम् ।

28 ^{b}) $Ś_1$ $K_{1.2}$ धनार्थे; B_1 परार्थं. B_{1-3} D (except $D_{1-3.5}$) G_3 °मते (for °हवम्). B_4 T_1 $G_{2.4}$ M प्रविशंति रणाजिरं; T_2 G_1 धनार्थे दुर्गमं स्थलं. — ^{c}) B_1 आविशंति. $Ś_1$ K B_1 $D_{1.3}$ नरा (K_4 महा-) धीराः; T_2 G_1 महावीराः B_4 T_1 $G_{2.4}$ M तथैव प्रतिपद्यंते; D_5 प्रविशंते महाधीराः. — After 28^{c}, T_2 G_1 ins.:

प्रविशन्ति नरा वीराः समुद्रमटवीं तथा ॥ २८
कृपिगोरक्ष्यमित्येके प्रतिपद्यन्ति मानवाः ।
पुरुषाः प्रेष्यतामेके निर्गच्छन्ति धनार्थिनः ॥ २९
तस्य दुःखार्जितस्यैवं परित्यागः सुदुष्करः ।
न दुष्करतरं दानात्तस्माद्दानं मतं मम ॥ ३०
विशेषस्त्वत्र विज्ञेयो न्यायेनोपार्जितं धनम् ।
पात्रे देशे च काले च साधुभ्यः प्रतिपादयेत् ॥ ३१
अन्यायसमुपात्तेन दानधर्मो धनेन यः ।
क्रियते न स कर्तारं त्रायते महतो भयात् ॥ ३२
पात्रे दानं स्वल्पमपि काले दत्तं युधिष्ठिर ।
मनसा सुविशुद्धेन प्रेत्यानन्तफलं स्मृतम् ॥ ३३
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
व्रीहिद्रोणपरित्यागाद्यत्फलं प्राप मुद्गलः ॥ ३४

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४५ ॥

२४६

युधिष्ठिर उवाच ।
व्रीहिद्रोणः परित्यक्तः कथं तेन महात्मना ।
कस्मै दत्तश्च भगवन्विधिना केन चात्थ मे ॥ १
प्रत्यक्षधर्मा भगवान्यस्य तुष्टो हि कर्मभिः ।

C. 3. 15406
B. 3. 260. 2
K. 3. 261. 2

1180* शास्त्रार्थकुशला भुवि ।
तथैव प्रतिपद्यन्ते.

— ^{d}) B3 धनार्थ° (for समुद्र°). Ś1 K1–3 Dc अटवीस्.

29 ^{a}) Ś1 D2 T1 G1. 2 M2 कृषिगोरक्षम्; K4 B2 कृषि गोरक्षम् (B2 °क्ष्यम्); B1. 3 कृषि(B3 °षिं)गौरक्ष्यम्. B1 G1 M2 इत्येते; B2 अप्यन्ये (for इत्येके). — ^{b}) K1 Dc प्रतिपश्यंति. — ^{c}) M1 प्रेत्यताम्. — K2 om. 29^{d}–31^{c}. — ^{d}) Ś1 K1 गच्छंति हि; G2. 4 नियच्छंति.

30 K2 om. 30 (cf. v.l. 29). — ^{a}) B1. 2 Dn D4–6 G3 तस्माद् (for तस्य). B Dn D4–6 G3 M1 [ए]व (for [ए]वं). — ^{b}) G1 हि (for सु-). — ^{c}) D4 G3. 4 सु- (for न). K3 G3. 4 दानं; K4 तात (for दानात्). G2 सुदुष्करकरं दानं. — ^{d}) K3. 4 दानात् (for तस्मात्). Ś1 K1. 4 D1–3 राजन्; K3 तस्मान् (for दानं). B2. 4m परं मतं (for मतं मम). — After 30, G1 ins.:

1181* तद्दुष्करतरं दानं तस्माद्दानं विशिष्यते ।

31 K2 om. 31^{abc} (cf. v.l. 29). — ^{a}) Ś1 K (K2 om.) B Dc2 D1. 2 T2 G1 तत्र; T1 G2. 4 M तस्य (for त्वत्र). — ^{b}) T2 G1 °नैवा° (for °नोपा°). — ^{c}) B3 Dn D4–6 G3 transp. देशे and काले. — ^{d}) S (except G3) प्रयतः (for साधुभ्यः). B1 प्रतिपादनं. — After 31, D2 ins.:

1182* श्रद्धया विधिवत्पात्रे दत्तस्यान्तो न विद्यते ।

32 ^{a}) B D (except D1. 3) T1 G2–4 अन्यायात् (for अन्याय-). — ^{b}) K1 G1 दानधर्मौ; B2 दानं सम्यग्. Ś1 K1. 2 न चोदयः; K3 विशां पते (for धनेन यः). — ^{c}) T2 G2 कुरुते (for क्रियते). — 32^{d} = Gītā (Vulg.) 2. 40.

33 ^{a}) T2 G1 न्यायार्जितं (for पात्रे दानं). — ^{b}) G2. 4 दानं; M1 दत्वा (for दत्तं). — ^{c}) B D (except D1–3) G2–4 हि (B2 तु) (for सु-). T1 मनसा तु विशिष्टेन. — ^{d}) B2 प्रेत्यानंतफलप्रदं. — After 33, K4 ins.:

1183* देशे काले च पात्रे च मुद्गलः श्रद्धयान्वितः ।
व्रीहिद्रोणं प्रदायाथ परमं पदमाप्तवान् ।

34 34^{ab} = 5. 35. 5^{ab}; etc., etc. — ^{d}) G4 M transp. यत् and फलं.

Colophon. — *Major parvan:* Ś1 K1. 2 Dn3 G2. 4 आरण्य. — *Sub-parvan:* K3. 4 B2–4 Dc Dn1. n3 D1–6 G3 व्रीहिद्रौ(B2. 4 °द्रो)णिक; M2 व्रीहिद्रोण. — *Adhy. name:* M1 व्यासवचनं. — *Adhy. no.* (figures, words or both): Dn 257 (Dn3 258); D1 260; T1 G4 M (M2 *inf. lin.*) 249 (M2 orig. 251); T2 G1 246; G2 248. — *Śloka no.:* Dn 35; D1 33.

246

1 ^{a}) T2 G1. 2. 4 °द्रोणं °त्यक्तं. — ^{b}) Ś1 K Dc D1–3. 5 महर्षिणा (for महा°). — ^{c}) T दत्तं च. — ^{d}) Ś1 K1. 2 तद्वद; K4 D1–3. 5 शंस मे; B1 वा विभो; B2–4 D4 वात्थ मे; T2 चार्थिने.

2 ^{a}) Ś1 K1. 2. 4 B1 D2. 5 °धर्मो; K3 D4 G1 °धर्म-;

C. 3. 15406
B. 3. 260. 2
K. 3. 261. 2

सफलं तस्य जन्माहं मन्ये सद्धर्मचारिणः ॥ २
व्यास उवाच ।
शिलोञ्छवृत्तिर्धर्मात्मा मुद्गलः संशितव्रतः ।
आसीद्राजन्कुरुक्षेत्रे सत्यवागनसूयकः ॥ ३
अतिथिव्रती क्रियावांश्च कापोतीं वृत्तिमास्थितः ।
सत्रमिष्टीकृतं नाम समुपास्ते महातपाः ॥ ४
सपुत्रदारो हि मुनिः पक्षाहारो बभूव सः ।
कपोतवृत्त्या पक्षेण व्रीहिद्रोणमुपार्जयत् ॥ ५
दर्शं च पौर्णमासं च कुर्वन्विगतमत्सरः ।
देवतातिथिशेषेण कुरुते देहयापनम् ॥ ६
तस्येन्द्रः सहितो देवैः साक्षात् त्रिभुवनेश्वरः ।
प्रत्यगृह्णान्महाराज भागं पर्वणि पर्वणि ॥ ७
स पर्वकालं कृत्वा तु मुनिवृत्त्या समन्वितः ।
अतिथिभ्यो ददावन्नं प्रहृष्टेनान्तरात्मना ॥ ८
व्रीहिद्रोणस्य तदहो ददतोऽन्नं महात्मनः ।
शिष्टं मात्सर्यहीनस्य वर्धत्यतिथिदर्शनात् ॥ ९
तच्छतान्यपि भुञ्जन्ति ब्राह्मणानां मनीषिणाम् ।
मुनेस्त्यागविशुद्ध्या तु तदन्नं वृद्धिमृच्छति ॥ १०
तं तु शुश्राव धर्मिष्ठं मुद्गलं संशितव्रतम् ।
दुर्वासा नृप दिग्वासास्तमथाभ्याजगाम ह ॥ ११
बिभ्रच्चानियतं वेषमुन्मत्त इव पाण्डव ।
विकचः परुषा वाचो व्याहरन्विविधा मुनिः ॥ १२
अभिगम्याथ तं विप्रमुवाच मुनिसत्तमः ।
अन्नार्थिनमनुप्राप्तं विद्धि मां मुनिसत्तम ॥ १३

T$_2$ °तुष्टो; M$_1$ °कर्मा (for °धर्मा). — ^{b}) Ś$_1$ K$_{1.2}$ T$_1$ तुष्टोसि. T$_1$ कर्मतः. — ^{c}) T$_2$ G$_1$ जन्मेति (for जन्माहं). — ^{d}) Ś$_1$ K$_{1.2}$ तद्धर्म°; K$_4$ Dc षड्धर्म°; D$_3$ T$_1$ सद्ब्रह्म°.

3 Ś$_1$ D$_1$ श्रीव्यासः. — ^{a}) Some S MSS. सिलोंछ°. — ^{b}) K$_4$ D$_{1-3}$ शंसितव्रतः; B Dn D$_{4.6}$ T G$_{1.3}$ संयतेंद्रियः. — ^{d}) G$_{2.4}$ सत्यवान्.

4 ^{a}) Hypermetric! Ś$_1$ K$_3$ अतिव्रत-; K$_{1.2}$ D$_1$ M$_2$ अतिव्रतः; D$_{2.3.5}$ M$_1$ अतिथिव्रतः; T G$_{2.4}$ अतिथिप्रियः. K$_4$ अतिथिव्रतचर्यायां. — ^{b}) Ś$_1$ B$_2$ D$_1$ G$_1$ आश्रितः (for आस्थितः). K$_4$ तथा धर्मप्रियो ह्यति. — M om. 4^{cd}. — ^{c}) K$_4$ इष्टा°; D$_{1.3}$ इष्टि°; T G$_{1.2.4}$ इष्ट°. — ^{d}) Ś$_1$ K$_1$ समुपास्थ; K$_2$ °स्त.

5 ^{a}) T$_2$ G$_1$ स (for हि). — ^{b}) T$_1$ पक्षांते च; M$_2$ भैक्षाहारो. B D (except D$_{2.3.5}$) T$_2$ G$_3$ ह (for सः). — After 5^{ab}, T$_1$ G$_4$ M ins.:

1184* मुनिः स तु महाराज महात्मा नियतव्रतः।

— ^{c}) T$_1$ कपोतवृत्तिः. — ^{d}) Ś$_1$ K$_{1.2}$ उपार्जयन्.

6 ^{a}) Ś$_1$ K$_1$ दार्शं. K$_3$ M पौर्णमास्यं. — ^{d}) K$_4$ B$_2$ Dc D$_1$ देहपालनम्; G$_1$ °पोषणम्.

7 ^{a}) T$_2$ तदेंद्रः; G$_2$ M$_1$ तत्रेंद्रः. — ^{d}) M$_1$ यागं.

8 ^{a}) G$_{2.4}$ M °काल्यं (for °कालं). Ś$_1$ K$_{1.2}$ च (for तु). T$_2$ G$_1$ सर्वकालेषु भागं तु. — ^{b}) K$_3$ T$_1$ G$_4$ M$_1$ मुनिर्धृत्या; G$_1$ मुनिः प्रीत्या. K$_1$ समुत्थितः (for समन्वितः). D$_{2.5}$ मुनिर्भृत्यसम°. — ^{c}) K$_{3.4}$ Dc D$_{1-3.5}$ G$_4$ M ददात्यन्नं; T$_1$ गतेभ्योयं (for ददावन्नं). — 8^d =1. 124. 4^b: 5. 8. 25^b.

9 ^{a}) K$_4$ B$_{1.3.4m}$ Dc D$_1$ सिद्धस्य; B$_{2.4}$ (orig.) Dn D$_{4-6}$ G$_3$ तद्व्ययस्य; D$_{2.3}$ तदहर्; T G$_{1.2.4}$ तत्प्रीत्या; M तद्व्ययन्नं (for तदहो). — ^{b}) M [ऽ]स्य (for ऽन्नं). — ^{c}) Ś$_1$ K$_{1-3}$ D$_2$ सृष्टं; K$_4$ D$_{1.3}$ सृष्टं; T$_1$ M दृष्टं; T$_2$ G$_{1.2.4}$ ऋषेर् (for शिष्टं). — ^{d}) Ś$_1$ K$_{1.2}$ T G$_{1.4}$ वर्धते°; K$_3$ D$_1$ वर्धता°; K$_4$ पर्वण्य°.

10 ^{a}) Ś$_1$ K$_{1.2}$ अयुतान्यपि; T$_1$ तच्छेषा°; G$_1$ तच्छिष्टा°. — ^{b}) Ś$_1$ K$_{1.2}$ D$_5$ महात्मनां; K$_3$ T$_1$ G$_{2.4}$ M तपस्विनां (for मनी°). — ^{c}) Ś$_1$ K$_{1.2}$ पुन° (for मुने°). Ś$_1$ हि; B$_4$ च (for तु). B$_3$ (m as in text) स नेष्ट्या परिशुद्धात्मा. — ^{d}) Ś$_1$ ऋद्धिम् (for वृद्धिम्). Ś$_1$ G$_1$ M इच्छति (G$_1$ °तः); K$_3$ B$_{1-3}$ Dn D$_{2-6}$ G$_3$ अर्छति; Dc अर्ह° (for ऋच्छ°).

11 ^{a}) K$_3$ तत्र; B$_4$ तत्तु. Ś$_1$ K$_{1.2}$ D$_5$ T$_1$ धर्मज्ञं. T$_2$ G$_2$ तं तु शुद्धं सुधर्मिष्ठं. — ^{b}) B$_4$ स्वकुलं (for मुद्गलं). K$_4$ D$_{1-3}$ शंसित°; T$_2$ संयतेंद्रियं (for संशित°). — ^{c}) Ś$_1$ K$_{1.2}$ दुर्वासो नृप दुर्वासास. — ^{d}) Ś$_1$ K D$_{1-3.5}$ तत्राथा- (D$_{1.3}$ °प्य)भ्या°; T$_2$ स तमभ्या°.

12 ^{a}) Ś$_1$ सुनियतं; K B Dc D$_{1.5}$ T$_1$ न (K$_4$ स) नि°; D$_2$ अनि°; D$_3$ त्वनि° (for चानि°). Ś$_1$ K$_{1.2}$ B वेशं. — ^{b}) Ś$_1$ भारत (for पाण्डव). — ^{c}) T$_1$ परुषाकारो (for °षा वाचो). — ^{d}) G$_1$ विविधं; G$_2$ M$_2$ विविधान्. T$_1$ गिरः (for मुनिः).

13 ^{a}) T$_2$ G$_1$ देशम् (for विप्रम्). — ^{b}) D$_3$ T G$_1$ M$_1$ मुनिसत्तमं; G$_{2.4}$ °पुंगवः. — T$_1$ om. (hapl.) 13^{cd}. — ^{c}) B$_1$ M$_1$ अर्थार्थिनम्. D$_2$ इह; M$_2$ अभि- (for अनु-).

स्वागतं तेऽस्त्विति मुनिं मुद्गलः प्रत्यभाषत ।
पाद्यमाचमनीयं च प्रतिवेद्यान्नमुत्तमम् ॥ १४
प्रादात्स तपसोपात्तं क्षुधितायातिथिव्रती ।
उन्मत्ताय परां श्रद्धामास्थाय स धृतव्रतः ॥ १५
ततस्तदन्नं रसवत्स एव क्षुधयान्वितः ।
बुभुजे कृत्स्नमुन्मत्तः प्रादात्तस्मै च मुद्गलः ॥ १६
भुक्त्वा चान्नं ततः सर्वमुच्छिष्टेनात्मनस्ततः ।
अथानुलिलिपेऽङ्गानि जगाम च यथागतम् ॥ १७
एवं द्वितीये संप्राप्ते पर्वकाले मनीषिणः ।
आगम्य बुभुजे सर्वमन्नमुञ्छोपजीविनः ॥ १८
निराहारस्तु स मुनिरुञ्छमार्जयते पुनः ।
न चैनं विक्रियां नेतुमशकन्मुद्गलं क्षुधा ॥ १९
न क्रोधो न च मात्सर्यं नावमानो न संभ्रमः ।
सपुत्रदारमुञ्छन्तमाविवेश द्विजोत्तमम् ॥ २०
तथा तमुञ्छधर्माणं दुर्वासा मुनिसत्तमम् ।
उपतस्थे यथाकालं षट्कृत्वः कृतनिश्चयः ॥ २१
न चास्य मानसं किंचिद्विकारं ददृशे मुनिः ।
शुद्धसत्त्वस्य शुद्धं स ददृशे निर्मलं मनः ॥ २२
तमुवाच ततः प्रीतः स मुनिर्मुद्गलं तदा ।
त्वत्समो नास्ति लोकेऽस्मिन्दाता मात्सर्यवर्जितः ॥ २३
क्षुद्धर्मसंज्ञां प्रणुदत्यादत्ते धैर्यमेव च ।
विषयानुसारिणी जिह्वा कर्षत्येव रसान्प्रति ॥ २४
आहारप्रभवाः प्राणा मनो दुर्निग्रहं चलम् ।
मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं निश्चितं तपः ॥ २५
श्रमेणोपार्जितं त्यक्तुं दुःखं शुद्धेन चेतसा ।
तत्सर्वं भवता साधो यथावदुपपादितम् ॥ २६

C. 3. 15430
B. 3. 260. 26
K. 3. 261. 27

— ^{d}) K$_{3.4}$ B D G$_{3}$ द्विज° (B$_{1}$ नृप°) (for मुनि°).

14 ^{a}) K$_{4}$ T$_{1}$ मुनिर्; B$_{1}$ मुहुर्; D$_{1}$ मुने. — ^{b}) B$_{4}$ (m as in text) स्वकुलः (for मुद्गलः). — ^{d}) B D (except D$_{1-3.5}$) T$_{1}$ G$_{1}$ °पाद्या° (for °वेद्या°).

15 ^{a}) D$_{1}$ T$_{1}$ प्रादाद्य(T$_{1}$ °त्त)त्; T$_{2}$ प्रदाय; M$_{2}$ प्रासादात् (for प्रादात्स). Ś$_{1}$ K$_{1.2}$ तापसोपात्तं; B$_{2.4}$ तपसोपातुं (sic); Dn D$_{4.6}$ G$_{3}$ तापसायान्नं; D$_{5}$ मनसोपात्तं. — ^{b}) T G$_{1.2.4}$ °तिथिप्रियः. — ^{d}) Ś$_{1}$ Dc D$_{2}$ स दृढ°; K$_{1.2}$ G$_{1}$ सुदृढ°; D$_{3}$ T G$_{4}$ M सुधृत°.

16 ^{a}) B$_{4}$ सकलं (m बलवत्); T$_{1}$ सर्वं हि (for रसवत्). — ^{b}) Ś$_{1}$ K D$_{1-3.5}$ T$_{2}$ G$_{1.2}$ °र्दितः (for °न्वितः). — ^{d}) Ś$_{1}$ K$_{1.2}$ T G$_{1}$ स (for च).

17 ^{a}) Ś$_{1}$ K$_{1.2}$ transp. चान्नं and सर्वं. — ^{b}) T$_{1}$ तनुं (for ततः). K$_{4}$ D$_{2}$ उच्छिष्टेनांतरात्मना. — After 17^{ab}, K$_{4}$ ins.:

1185* शेषे****लिप्य हसन्गायन्प्रधावति ।
नृत्यते धावते चैव बुद्ध्या तत्क्रोशते यथा ।

— ^{c}) B$_{1.2.4}$ Dn G$_{3}$ अथांगं लिलिपेन्नानि (B$_{2.4}$ G$_{3}$ °पेंगानि; Dn$_{1}$ °पेन्नेन); D$_{4.6}$ अथांगानि लिपेत्तानि. — ^{d}) K$_{3}$ यथासुखं. B$_{1.2.4}$ Dn D$_{4.6}$ G$_{3}$ यथागतमगाच्च सः.

18 ^{a}) G$_{2.4}$ ततो (for एवं). — ^{b}) K$_{1}$ पूर्वं°; K$_{2}$ G$_{1}$ सर्वं°; B$_{2.4}$ Dn D$_{4.6}$ T$_{2}$ G$_{3}$ यथा° (for पर्व°). — ^{c}) K$_{4}$ T$_{1}$ आगत्य. — ^{d}) K$_{1}$ Dc °जीवनः.

19 ^{a}) Ś$_{1}$ K$_{1.2}$ transp. तु and स. K$_{4}$ D$_{1}$ च (for तु). — ^{b}) Ś$_{1}$ K Dc D$_{1-3}$ °मर्जयते. — ^{c}) B$_{4}$ Dc D$_{1}$ चैवं. — ^{d}) K$_{1.2}$ दुर्बलं; T$_{1}$ M$_{2}$ मुद्गलः.

21 ^{b}) K$_{3.4}$ B Dc D$_{1-3.5}$ T$_{2}$ G$_{2.4}$ °सत्तमः. — ^{c}) Ś$_{1}$ K$_{1}$ यथाकामं. — ^{d}) D$_{2.3}$ मुनिपुंगवः (for कृत°).

22 ^{a}) K$_{4}$ Dn$_{3}$ मनसः कंचिद्; B$_{2}$ G$_{1}$ मनसः कश्चिद्; B$_{3}$ D$_{2.3}$ T$_{1}$ M मनसः किंचिद्; B$_{4}$ Dn$_{1.}$ n$_{2}$ D$_{4.6}$ T$_{2}$ G$_{3}$ मनसा कश्चिद्; G$_{2}$ मानसः किंचिद्. — ^{b}) T$_{2}$ G$_{1.2}$ विकारो दृश्यते मुनेः. — ^{c}) K$_{3.4}$ B$_{2}$ D$_{1}$ सत्वं स (K$_{4}$ तु). Dc शुद्धस्य; T$_{1}$ सदृशो; G$_{1}$ शुद्धांतं; G$_{2.4}$ M ददृशे (for शुद्धं स). D$_{2.3}$ तु (for स). Ś$_{1}$ K$_{1.2}$ सत्वशुद्धस्य शुद्धं हि (K$_{2}$ तु). — ^{d}) Dc ददर्श. T$_{1}$ G$_{2.4}$ M विशुद्धं (for ददृशे).

23 ^{a}) G$_{1}$ मुनिः (for ततः). — ^{b}) K$_{1}$ तथा; K$_{3.4}$ B Dn D$_{4.6}$ G$_{3}$ M$_{2}$ ततः (for तदा).

24 ^{a}) K$_{4}$ Dc D$_{1}$ प्रणुदन् (for प्रणुदति). — ^{b}) Ś$_{1}$ [आ]धत्ते; Dc नादातुं; D$_{3}$ नादत्ते (for [आ]दत्ते). Ś$_{1}$ K$_{1-3}$ D$_{5}$ वा (for च). K$_{4}$ यो दत्ते धर्ममास्थितः. — ^{c}) Hypermetric! B$_{1-3}$ D (except D$_{1.2}$) T$_{1}$ G$_{3}$ रसानुसारिणी; B$_{4}$ विषयास्वादिनी. — ^{d}) Ś$_{1}$ कर्षत्यन्न°; K$_{3}$ कर्षते च; Dc कर्षत्येनं (for कर्षत्येव). G$_{1}$ रसं. Dn$_{2}$ कस्मात्त्वां न प्रबाधते; T$_{2}$ क्षरत्येव रसं प्रति.

25 ^{a}) K$_{1}$ आहारं; Dc आहारः (for आहार°). — ^{c}) K$_{4}$ B$_{1.3}$ Dc$_{2}$ Dn$_{3}$ G$_{3}$ वा (for च). — ^{d}) Ś$_{1}$ K$_{1.2}$ Dc D$_{1-3.5}$ T$_{1}$ M$_{2}$ [अ]प्येकाग्रं; T$_{2}$ G$_{2}$ निग्रहं; G$_{1}$ एकाग्रं (for [अ]प्यैकाग्र्यं). B$_{1}$ निष्ठितं; B$_{4}$ °श्चलं (for °श्चितं).

26 ^{a}) Dc D$_{1}$ G$_{4}$ त्यक्तं; G$_{2}$ दत्तं. — ^{b}) Dc दुःखे. B$_{3}$ तेजसा (for चेतसा). T$_{2}$ G$_{2.4}$ न च दुःखेन चेतसा; M

C. 3. 15431
B. 3. 260. 27
K. 3. 261. 28

प्रीताः स्मोऽनुगृहीताश्च समेत्य भवता सह ।
इन्द्रियाभिजयो धैर्यं संविभागो दमः शमः ॥ २७
दया सत्यं च धर्मश्च त्वयि सर्वं प्रतिष्ठितम् ।
जितास्ते कर्मभिर्लोकाः प्राप्तोऽसि परमां गतिम् ॥ २८
अहो दानं विघुष्टं ते सुमहत्स्वर्गवासिभिः ।
सशरीरो भवान्गन्ता स्वर्गं सुचरितव्रत ॥ २९
इत्येवं वदतस्तस्य तदा दुर्वाससो मुनेः ।
देवदूतो विमानेन मुद्गलं प्रत्युपस्थितः ॥ ३०
हंससारसयुक्तेन किङ्किणीजालमालिना ।
कामगेन विचित्रेण दिव्यगन्धवता तथा ॥ ३१
उवाच चैनं विप्रर्षिं विमानं कर्मभिर्जितम् ।
समुपारोह संसिद्धिं प्राप्तोऽसि परमां मुने ॥ ३२
तमेवंवादिनमृषिर्देवदूतमुवाच ह ।
इच्छामि भवता प्रोक्तान्गुणान्स्वर्गनिवासिनाम् ॥ ३३
के गुणास्तत्र वसतां किं तपः कश्च निश्चयः ।
स्वर्गे स्वर्गसुखं किं च दोषो वा देवदूतक ॥ ३४
सतां सप्तपदं मित्रमाहुः सन्तः कुलोचिताः ।
मित्रतां च पुरस्कृत्य पृच्छामि त्वामहं विभो ॥ ३५
यदत्र तथ्यं पथ्यं च तद्ब्रवीह्यविचारयन् ।
श्रुत्वा तथा करिष्यामि व्यवसायं गिरा तव ॥ ३६

इति श्रीमहाभारते आरण्यकपर्वणि षट्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४६ ॥

दुःख(M$_1$ °खं)युक्तेन चे°.

27 ^{a}) Ś$_1$ K$_{1.2}$ Dc स्म (for च). K$_3$ D$_{2.3}$ T G$_{1.2.4}$ M प्रीतोस्म्यनुगृहीतश्च (T$_2$ °तोस्मि). — ^{b}) Ś$_1$ सत्येन (for समेत्य). B$_3$ समेत्य भरतर्षभ. — After 27^{ab}, K$_4$ D$_{1-3}$ ins.:

1186* सद्भिः समागमो नित्यं सर्वपापहरः स्मृतः ।;

while S (except G$_3$) ins.:

1187* पावनं परमं मन्ये दर्शनं ते महामुने ।

— ^{c}) M$_1$ इंद्रियाणां (for °याभि-). G$_4$ M$_2$ इंद्रियाणि मनोधैर्यं. — ^{d}) K$_4$ D$_{2.3}$ transp. दमः and शमः.

28 ^{a}) T$_1$ G$_4$ M$_1$ दयालुत्वं; G$_1$ तथा सत्यं; M$_2$ दयार्थत्वं (for दया सत्यं). — ^{b}) Dc सत्यं (for सर्वं). — After 28^{ab}, K$_4$ D$_{1-3}$ ins.:

1188* लोकाः समस्ता धर्मेण धार्यन्ते सचराचराः ।
धर्मोऽपि धार्यते ब्रह्मन्धृतियुक्तात्मना त्वया ।;

while S (except G$_3$) ins.:

1189* विशुद्धसत्त्वसंपन्नो न त्वदन्योऽस्ति कश्चन ।

29 ^{a}) K$_1$ विसंघुष्टं; B$_{1.3}$ विशिष्टं ते. — ^{b}) B$_4$ (m as in text) कामकृत्स्वर्गवासिनः. — ^{d}) K$_{3.4}$ Dc D$_{1-6}$ T$_2$ G$_3$ °व्रतः.

30 ^{d}) K$_3$ समुपास्थितः; T$_2$ प्रत्यपद्यत; G$_1$ प्रत्यभाषत.

31 ^{b}) = 1. 212. 3^d; etc. T$_1$ °शोभिना; G$_4$ °नादिना. — ^{c}) Ś$_1$ K D$_{1-3.6}$ विमानेन (for विचित्रेण). — ^{d}) Ś$_1$ D$_2$ T$_1$ G$_1$ तदा (for तथा).

32 ^{a}) Ś$_1$ K$_{1.3.4}$ B D$_{1-3}$ विप्रर्षे; Dc विप्रर्षिर्. — ^{b}) D$_2$ G$_4$ M कर्मनिर्जि(M$_1$ °र्मि)तं. — ^{c}) T$_1$ G$_{2.4}$ M त्वमु° (for °समु°). — ^{d}) K$_4$ B$_2$ गतिं (for मुने). G$_1$ संप्राप्तोसि परां मुने.

33 ^{c}) K$_4$ भगवत्- (for भवता). — ^{d}) K$_3$ °वासिनं; B$_2$ °वासिनः.

34 ^{c}) B$_{2-4}$ Dn D$_{4.6}$ G$_3$ तत्र सुखं; Dc स्वर्गफलं. K$_{3.4}$ B$_{1.3}$ D$_{1.3}$ G$_1$ M$_2$ किंचिद्; D$_5$ किं स्विद्; G$_{2.4}$ किं तु; M$_1$ किं नु (for किं च). — ^{d}) K$_{1.2.4}$ D$_2$ T$_2$ दोषा. Ś$_1$ K$_{1.2.4}$ °दूत के.

35 ^{a}) K$_1$ B$_2$ Dn D$_1$ G$_4$ M$_1$ साप्तपदं. K$_4$ Dc Dn$_3$ (by corr.) D$_1$ T$_2$ G$_1$ मैत्रम्. — ^{b}) D$_3$ प्राहुः. K$_4$ T$_2$ G$_1$ कुलोदिताः; T$_1$ M$_2$ °द्वहाः; G$_{2.4}$ M$_1$ °द्गताः. — ^{c}) Ś$_1$ K Dc D$_{1-3.5}$ तु (for च). — ^{d}) K$_2$ विभो ह्यहं; K$_4$ D$_{1.3}$ T अहं प्रभो.

36 ^{a}) K$_{2-4}$ B$_1$ Dc D$_{1.5}$ transp. तथ्यं and पथ्यं. T$_1$ तत्र (for तथ्यं), and यत् (for च). — ^{b}) Ś$_1$ K$_{1.2}$ तत्त्वं ब्रूहि; D$_5$ T$_2$ G$_1$ तद्ब्रूहि त्वं; T$_1$ प्रब्रवीहि (for तद्ब्रवीहि). D$_5$ महामते; T$_2$ G$_1$ विचारयन् (for [अ]विचारयन्). — ^{c}) T$_1$ G$_1$ T$_2$ G$_1$ तदा (for तथा). — ^{d}) K$_1$ G$_4$ गिरां; T$_1$ G$_1$ M गिरं.

Colophon. — *Major parvan:* Ś$_1$ K$_{1.2}$ Dn$_2$ T$_1$ G$_{2.4}$ आरण्य. — *Sub-parvan:* K$_{3.4}$ B Dc Dn$_1$. n$_3$ G$_1$ D$_{1-6}$ T$_1$ G$_3$ व्रीहिद्रौणिक; M$_2$ व्रीहिद्रोणोपाख्यान. G$_1$ (om. sub-parvan name) mentions only मुद्गलोपाख्यान. — *Adhy. no.* — *Adhy. name:* M$_2$ देवदूतागमनं. — *Adhy. no.* (figures, words or both): Dn 258 (Dn$_3$ 259); D$_1$ 261; T$_1$ G$_4$ M 250 (M$_2$ 252); T$_2$ G$_1$ 247; G$_2$ 249. — *Śloka no.:* Dn 36.

२४७

देवदूत उवाच ।
महर्षेऽकार्यबुद्धिस्त्वं यः स्वर्गसुखमुत्तमम् ।
संप्राप्तं बहु मन्तव्यं विमृशस्यबुधो यथा ॥ १
उपरिष्टादसौ लोको योऽयं स्वरिति संज्ञितः ।
ऊर्ध्वगः सत्पथः शश्वद्देवयानचरो मुने ॥ २
नातप्ततपसः पुंसो नामहायज्ञयाजिनः ।
नानृता नास्तिकाश्चैव तत्र गच्छन्ति मुद्गल ॥ ३
धर्मात्मानो जितात्मानः शान्ता दान्ता विमत्सराः ।
दानधर्मरताः पुंसः शूराश्चाहतलक्षणाः ॥ ४
तत्र गच्छन्ति कर्माग्र्यं कृत्वा शमदमात्मकम् ।
लोकान्पुण्यकृतां ब्रह्मन्सद्भिरासेवितान्नृभिः ॥ ५
देवाः साध्यास्तथा विश्वे मरुतश्च महर्षिभिः ।
यामा धामाश्च मौद्गल्य गन्धर्वाप्सरसस्तथा ॥ ६
एषां देवनिकायानां पृथक्पृथगनेकशः ।
भास्वन्तः कामसंपन्ना लोकास्तेजोमयाः शुभाः ॥ ७
त्रयस्त्रिंशत्सहस्राणि योजनानां हिरण्मयः ।
मेरुः पर्वतराड्यत्र देवोद्यानानि मुद्गल ॥ ८
नन्दनादीनि पुण्यानि विहाराः पुण्यकर्मणाम् ।
न क्षुत्पिपासे न ग्लानिर्न शीतोष्णभयं तथा ॥ ९
बीभत्समशुभं वापि रोगा वा तत्र केचन । C. 3. 15450 B. 3. 261. 10 K. 3. 262. 11

247

1 ^{a}) $B_{3.4}$ Dn $D_{4.6}$ G_3 आर्यबुद्धि° (with hiatus!); T_1 पात्रमुख्य°; T_2 [ऽ]कल्यबुद्धि°. — ^{b}) K_4 $D_{2.3}$ G_2 यत् (for यः). — ^{c}) S (except G_3) °हं प्रतिपत्त(T_1 °वक्त)व्यं. — ^{d}) Ś$_1$ B_3 Dc विमृष°; K_{1-3} B_1 $Dn_{2.}$ n_3 $D_{4.6}$ विमृष्य°; D_1 विमृक्ष्य°; D_3 विमृज्य°. — After 1, K_4 D_{1-3} ins.:

1190* नन्दनादीनि रम्याणि तत्रोद्यानानि मुद्गल ।
सर्वकामफलैर्वृक्षैः शोभितानि समन्ततः ।

[Cf. 9.]

2 ^{a}) $B_{1.3}$ Dc Dn $D_{4.6}$ G_3 च स्वर्; B_2 D_2 T $G_{1.2.4}$ M अयं (for असौ). — ^{b}) K_4 D_3 संज्ञकः; B_4 शब्दितः (for संज्ञितः). T_1 यः स्वर्ग इति संज्ञितः.

3 ^{a}) Ś$_1$ चैव; K_1 धैर्य; K_2 चर्या; Dc पुंसा; $D_{1-3.5}$ मर्त्या (for पुंसो). — ^{b}) K_4 °याचकाः (for °याजिनः). — ^{c}) T_1 नाहता. $D_{1.2}$ स्तेनास् (for चैव).

4 ^{a}) B_2 हि पुरुषाः; T $G_{1.4}$ M_2 महात्मानः (for जिता°). — ^{b}) B_4 T_1 $G_{2.4}$ M जितेंद्रियाः (for विमत्सराः). — ^{c}) K_3 D_5 T_1 $G_{2.4}$ °पराः (for °रताः). Ś$_1$ $K_{2.4}$ प्रज्ञाः; K_1 यज्ञाः; K_3 $D_{2.3.5}$ प्राज्ञाः; Dc D_1 मर्त्याः; T_1 $G_{2.4}$ M_1 नित्यं (for पुंसः). — ^{d}) B_1 शूरास्तेजोमयाः शुभाः; B_{2-4} D (except $D_{3.5}$) G_3 M_2 शूराश्चाहवलक्षणाः; T $G_{1.2.4}$ °श्चाहितल°.

5 ^{a}) K_3 ते कर्म; B_{1-3} Dn $D_{4.6}$ T_1 G_{2-4} धर्माग्र्यं; $D_{2.3}$ कृत्वाग्र्यं; M_2 धामाग्रं (for कर्माग्र्यं). — ^{b}) Ś$_1$ शमदमादिकं; B_1 $G_{1.4}$ M दमशमात्मकं. — ^{c}) K_4 Dc $D_{1.3}$ पुण्यकृतान्; M_2 °तमान्. — ^{d}) B_2 °चरितात्मभिः; $B_{3.4}$ Dn $D_{4.6}$ G_3 °चरितान्नृभिः; Dc °सेवितात्मभिः; T_1 °चरितं नृप.

6 ^{b}) Dc महर्षयः; D_1 T_1 M सहर्षिभिः. B Dn $D_{4.6}$ G_3 तथैव च महर्षयः. — ^{c}) K_1 T_2 G_{2-4} यामायामाश्च; K_4 Dc_2 T_1 G_1 यमो धाता च; D_1 यामा वामाश्च. B_4 सौकुल्य (for मौद्गल्य); cf. v.l. 13^{c}. — B_2 om. (hapl.) 6^{d}–13^{c}. — After 6, K_3 (line 2 in marg. *sec. m.*) ins.:

1191* देवानामपि मौद्गल्य काङ्क्षिता सा परा गतिः ।
न दुःखमसुखं चापि रागद्वेषौ कुतो मुने ।

7 B_2 om. 7 (cf. v.l. 6); K_3 om. 7^{ab}. — ^{a}) Ś$_1$ $K_{1.2}$ D_5 एवं; T_2 एतद्; G_3 येषां (for एषां). T_1 एते देवनिकायास्ते. — D_4 om. (? hapl.) from 7^{b} up to योजनानां in 8^{b}. — ^{c}) K_3 ततो वै; T_1 भ्राजंतः (for भास्वन्तः). — ^{d}) K_4 स्मृताः (for शुभाः).

8 B_2 om. 8 (cf. v.l. 6); D_4 om. up to योजनानां (cf. v.l. 7). — ^{b}) $B_{3.4}$ Dn D_6 T_2 $G_{2.3}$ योजनानि. — ^{c}) $D_{3.4}$ $G_{2.4}$ अत्र; D_6 G_3 तत्र (for यत्र). K_3 मेरुः पर्वतराजानं; T_1 मेरोः पर्वतराजस्य.

9 B_2 om. 9 (cf. v.l. 6). — ^{a}) T_2 चत्वारि (for पुण्यानि). — ^{b}) K_1 T_2 विहारः. T_1 °कर्मणः. — ^{c}) Ś$_1$ $K_{1.2}$ न क्षुत्तृष्णे न च ग्लानिर्. — ^{d}) B Dn $D_{4.6}$ G_3 M_2 शीतोष्णे; T_2 G_1 °ष्णौ; M_1 °ष्णं (for °ष्ण-).

10 B_2 om. 10 (cf. v.l. 6). — ^{a}) T_1 अश्विगं; T_2

C. 3. 15450
B. 3. 261. 10
K. 3. 262. 11

मनोज्ञाः सर्वतो गन्धाः सुखस्पर्शाश्च सर्वशः ॥ १०
शब्दाः श्रुतिमनोग्राह्याः सर्वतस्तत्र वै मुने ।
न शोको न जरा तत्र नायासपरिदेवने ॥ ११
ईदृशः स मुने लोकः स्वकर्मफलहेतुकः ।
सुकृतैस्तत्र पुरुषाः संभवन्त्यात्मकर्मभिः ॥ १२
तैजसानि शरीराणि भवन्त्यत्रोपपद्यताम् ।
कर्मजान्येव मौद्गल्य न मातृपितृजान्युत ॥ १३
न च स्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव च ।
तेषां न च रजो वस्त्रं बाधते तत्र वै मुने ॥ १४
न म्लायन्ति स्रजस्तेषां दिव्यगन्धा मनोरमाः ।
पर्युह्यन्ते विमानैश्च ब्रह्मन्नेवंविधाश्च ते ॥ १५
ईर्ष्याशोकक्लमापेता मोहमात्सर्यवर्जिताः ।
सुखं स्वर्गजितस्तत्र वर्तयन्ति महामुने ॥ १६
तेषां तथाविधानां तु लोकानां मुनिपुंगव ।
उपर्युपरि शक्रस्य लोका दिव्यगुणान्विताः ॥ १७
पुरस्ताद्ब्रह्मणस्तत्र लोकास्तेजोमयाः शुभाः ।
यत्र यान्त्यृषयो ब्रह्मन्पूताः स्वैः कर्मभिः शुभैः ॥ १८
ऋभवो नाम तत्रान्ये देवानामपि देवताः ।
तेषां लोकाः परतरे तान्यजन्तीह देवताः ॥ १९
स्वयंप्रभास्ते भास्वन्तो लोकाः कामदुघाः परे ।
न तेषां स्त्रीकृतस्तापो न लोकैश्वर्यमत्सरः ॥ २०
न वर्तयन्त्याहुतिभिस्ते नाप्यमृतभोजनाः ।

G$_1$ वाशुभं (for अशुभं). Ś$_1$ K$_2$ D$_1$ M$_1$ चापि; B$_1$ चैव (for वापि). — ^{b}) D$_{3.5}$ न च (for तत्र). B (B$_2$ om.) Dc Dn D$_{4.6}$ T$_1$ G$_3$ M तत्र किंचिन्न (T$_1$ °च न) विद्यते; T$_2$ G$_{1.2.4}$ रोगो वा तत्र कश्चन. — ^{c}) T$_2$ G$_1$ सर्वशो. — ^{d}) Ś$_1$ च सर्वतः; D$_1$ च मारुतः; T$_1$ समंततः; T$_2$ G$_{1.2.4}$ M$_1$ च वायवः (for च सर्वशः).

11 B$_2$ om. 11 (cf. v.l. 6). — ^{a}) Dc गंधाः (for शब्दाः). T$_2$ G$_{2.4}$ M शब्द[:] श्रुतिमनोग्राह्यः. — ^{b}) Ś$_1$ श्रूयंते (for सर्वतस्). — K$_4$ om. (hapl.) 11^c–16^d. — ^{d}) Ś$_1$ Dc D$_3$ G$_{1.4}$ M नायासः परिदेवनं (Dc °ने; D$_3$ M °ना); K$_{1.2}$ नायासपरिवेदनं; T G$_2$ °परिदेवना.

12 K$_4$ B$_2$ om. 12 (cf. v.l. 6, 11). — ^{a}) D$_3$ न ईर्ष्या तु (for ईदृशः स). K$_1$ D$_3$ स मुनेर्; T$_2$ सुमनो- (for स मुने). — ^{b}) Ś$_1$ K$_2$ सुकर्म°; B$_4$ T G$_{1.2.4}$ M$_2$ स्वधर्म°. — ^{c}) D$_{1-3}$ M पुरुषः. T$_1$ सुकृतस्तत्र पुरुषः. — ^{d}) K$_1$ Dc$_2$ D$_{2.3}$ T$_1$ M$_1$ संभवति; D$_1$ संचरंति. D$_3$ °कर्मसु.

13 K$_4$ om. 13 (cf. v.l. 11); B$_2$ om. 13^{abc} (cf. v.l. 6). — ^{a}) K$_3$ Dc तेजसानि. — ^{b}) Dc °युज्यतां (for °पद्यताम्). — ^{c}) G$_4$ धर्म° (for कर्म°). B$_4$ सौकुल्य (for मौद्ग°). — ^{d}) B$_3$ [अ]तः; D$_2$ तु; D$_3$ च; D$_6$ [अ]पि (for [उ]त).

14 K$_4$ om. 14 (cf. v.l. 11). — ^{a}) T$_2$ G$_1$ वा (for च). Ś$_1$ K (K$_4$ om.) Dc D$_{1-3.5}$ न स्वेदो न च दौ°; B Dn D$_{4.6}$ G$_{2.3}$ M न संस्वेदो न दौ°. — ^{b}) Ś$_1$ K$_{1.2}$ पुरीषो. B M$_1$ वा (for च). — ^{c}) D$_{2.3}$ एषां. Ś$_1$ K (K$_4$ om.) Dc D$_{1-3}$ (by transp.) च न; G$_1$ तु न. T$_1$ जरा (for रजो). — ^{d}) T$_1$ न बाधा (for बाधते). G$_1$ बाधंते नाधयो मुने; G$_{2.4}$ बाधते हि तपोधन.

15 K$_4$ om. 15 (cf. v.l. 11). — ^{a}) B$_{1.4}$ G$_1$ न ग्लायंति; D$_5$ (by transp.) म्लायंति न. G$_1$ सर्वा (for तेषां). — ^{c}) K$_3$ D$_5$ पर्युज्यंते; B$_1$ Dc$_2$ प्रयुज्यंते; B$_{2-4}$ Dc$_1$ Dn D$_{4.6}$ G$_3$ संयुज्यं(B$_{2.3}$ °ज्य)ते; D$_3$ पर्यटंति; T$_1$ G$_1$ पर्यूह्यंते; T$_2$ G$_2$ समू(G$_2$ °मु)ह्यंते. — ^{d}) K$_3$ B Dn D$_4$– G$_3$ ब्रह्मन्नेवंविधैश्; Dc °न्नेवंविधैश्. D$_{2.3}$ T$_1$ G$_{2.4}$ M हि (for च). B$_1$ ताः; B$_3$ D$_1$ ये (for ते).

16 K$_4$ om. 16 (cf. v.l. 11). — ^{a}) Ś$_1$ K$_1$ Dc D °क्लमोपेता; T$_1$ °मोहक्लमा°; G$_1$ °शोकसमो°. — ^{b}) T$_1$ मद°. — ^{d}) B Dn D$_{4.6}$ T$_1$ G$_3$ वर्तयंते. M$_2$ मनोरमाः (fo महा°).

17 ^{a}) T$_1$ तेषां तथा विमानानां. — ^{c}) B$_{2.3}$ D (excep D$_{1-3}$) G$_3$ लोकस्य (for शक्र°). — ^{d}) Dn$_2$. n$_3$ D$_{4.6}$ G लोका दिव्या गुणा°; T G$_{2.4}$ M लोको °न्वितः; G$_1$ दिव्यो लोकगुणान्वितः.

18 ^{a}) T$_1$ G$_4$ परितो; T$_2$ G$_1$ परस्ताद्; G$_2$ M परतो (for पुरस्ताद्). Ś$_1$ B$_{2.3}$ Dn$_1$ ब्राह्मण°. S (except G$_3$ तस्य (for तत्र). — ^{b}) S (except G$_3$) लोकस्तेजोमयः शुभ — ^{d}) Dc सुखैः (for शुभैः). B$_4$ पूताः स्वैः स्वैस्तु कर्मभि

19 ^{a}) K$_3$ B$_4$ D$_3$ ऋषयो; T$_1$ मानवा (for ऋभवो. — T$_1$ om. 19^c–22^b; K$_4$ G$_1$ om. (hapl.) 19^{cd}. — K$_{1.2}$ G$_2$ लोकः; B$_4$ Dc$_1$ Dn$_1$ G$_4$ लोकात्. Ś$_1$ K$_1$. परतरस्. — ^{d}) K$_3$ क्षरंतीह; G$_4$ D$_{1.3}$ जयंतीह.

20 T$_1$ om. 20 (cf. v.l. 19). — ^{a}) Dc वा (for ते B$_{1.2}$ D$_4$ G$_3$ भासंतो. — ^{b}) M कामदुहः. — ^{c}) Ś$_1$ K D$_{1-3.5}$ श्री° (for स्त्री°). — ^{d}) Ś$_1$ Dc लोकैश्वर्यमत्सरा G$_{1.2.4}$ M भोगै(G$_1$ लोभै)श्वर्यमत्सरः.

21 T$_1$ om. 21 (cf. v.l. 19). — ^{a}) D$_3$ (by cor

तथा दिव्यशरीरास्ते न च विग्रहमूर्तयः ॥ २१
न सुखे सुखकामाश्च देवदेवाः सनातनाः ।
न कल्पपरिवर्तेषु परिवर्तन्ति ते तथा ॥ २२
जरा मृत्युः कुतस्तेषां हर्षः प्रीतिः सुखं न च ।
न दुःखं न सुखं चापि रागद्वेषौ कुतो मुने ॥ २३
देवानामपि मौद्गल्य काङ्क्षिता सा गतिः परा ।
दुष्प्रापा परमा सिद्धिरगम्या कामगोचरैः ॥ २४
त्रयस्त्रिंशदिमे लोकाः शेषा लोका मनीषिभिः ।
गम्यन्ते नियमैः श्रेष्ठैर्दानैर्वा विधिपूर्वकैः ॥ २५
सेयं दानकृता व्युष्टिरत्र प्राप्ता सुखावहा ।
तां भुङ्क्ष्व सुकृतैर्लब्धां तपसा द्योतितप्रभः ॥ २६
एतत्स्वर्गसुखं विप्र लोका नानाविधास्तथा ।
गुणाः स्वर्गस्य प्रोक्तास्ते दोषानपि निबोध मे ॥ २७
कृतस्य कर्मणस्तत्र भुज्यते यत्फलं दिवि ।
न चान्यत्क्रियते कर्म मूलच्छेदेन भुज्यते ॥ २८
सोऽत्र दोषो मम मतस्तस्यान्ते पतनं च यत् ।
सुखव्याप्तमनस्कानां पतनं यच्च मुद्गल ॥ २९
असंतोषः परीतापो दृष्ट्वा दीप्ततराः श्रियः ।
यद्भवत्यवरे स्थाने स्थितानां तच्च दुष्करम् ॥ ३०
संज्ञामोहश्च पततां रजसा च प्रधर्षणम् ।
प्रम्लानेषु च माल्येषु ततः पिपतिषोर्भयम् ॥ ३१
आ ब्रह्मभवनादेते दोषा मौद्गल्य दारुणाः ।   C. 3. 15472 B. 3. 261. 32 K. 3. 262. 33

ते (for न). G_1 वर्तयंल्याहुतिभिस्ते; M न वर्तयंल्याहुतिस्ते. — ^{b}) T_2 $G_{2.4}$ ते न वा; G_1 न च च; M न चापि (for ते नापि). K_3 B_2 $D_{2.3}$ $G_{1.2}$ °भोजिनः. D_5 ते नानामृतभोजिनः. — ^{d}) B_1 °रूपिणः (for °मूर्तयः).

22 D_4 om. 22^{a}–23^{b}; T_1 om. 22^{ab} (cf. v.l. 19). — ^{a}) K_4 निमेषाः; T_2 $G_{1.2}$ नासुखाः; G_4 M नासुखे (for न सुखे). $B_{2.3}$ Dn D_6 G_3 ते (for च). B_1 न च सुखे सुखकामा. — ^{c}) K_4 न कल्पे परिवर्तते; T_1 न कल्पपरिवृत्तेषु; T_2 नॆ °वर्तते.

23 D_4 om. 23^{ab} (cf. v.l. 22). — ^{a}) K_1 Dc_2 T_2 $G_{1.2}$ जरामृत्यु; K_4 $D_{2.6}$ G_3 जरामृत्यू. — ^{b}) $Ś_1$ $K_{1.2}$ तथैव; M_2 सुखानि (for सुखं न). K_3 Dc Dn_1 $D_{2.3.5.6}$ T_2 G_3 हर्षः (K_3 °र्ष-; D_3 °र्षं) प्रीतिसुखं न च; Dn_2 हर्षः प्रीति कथंचन; T_1 $G_{1.2}$ M_1 हर्षः (G_2 M_1 °र्ष-) प्रीतिसुखानि च. — ^{c}) D_1 च दुःखं (for दुःखं न). K_3 D_3 T_1 M_1 असुखं; G_1 वासुखं (for न सुखं). $Ś_1$ $K_{1.2}$ चास्ति; K_3 B_{1-3} Dc_2 T_1 $G_{1.2.4}$ M_1 वापि (for चापि). T_2 दुःखं वाप्यसुखं वापि.

24 ^{b}) K_1 T_1 पुरा (for परा). — ^{c}) T_2 पुष्पोपमा परा सिद्धिर्. — ^{d}) $Ś_1$ K_1 Dc_2 अकाम्या का°.

25 ^{a}) $Ś_1$ $K_{1.2}$ अमी (for इमे). $K_{3.4}$ B D T_2 $G_{1.3}$ देवाः (D_1 भावाः) (for लोकाः). — ^{b}) N T $G_{1.3}$ येषां (K_4 तेषां) (for शेषा). — ^{c}) T नियतैर्. T दांतैर्; G_1 शांतैर् (for श्रेष्ठैर्). — ^{d}) T_2 G_1 दांतै° (for दानै°). T_2 वृद्धि° (for विधि°).

26 ^{a}) T_2 सेयं दानवतां वीर. — ^{b}) K Dc $D_{1.3.5}$ त्वया; T G_1 अनु- (for अत्र). $Ś_1$ त्वया प्राप्ता ह्यनुत्तमा; B Dn $D_{2.4.6}$ अनुप्राप्ता सुखं त्वया. — $Ś_1$ om. 26^{c}–27^{b}. — ^{c}) Dc प्रकृतैर्. K_3 तां भुंक्ष्व सुकृतेनाद्य.

27 $Ś_1$ om. 27^{ab} (cf. v.l. 26). — ^{a}) $G_{2.4}$ एवं (for एतत्). K_4 D_3 G_1 स्वर्गफलं. — ^{c}) $Ś_1$ $K_{1.2}$ ते प्रोक्ता (by transp.); K_3 Dc S (except G_3) चोक्तास्ते; B_1 भोग्यास्ते. K_4 D_{1-3} उक्ता गुणास्ते स्वर्गस्य.

28 ^{a}) B_1 तात; T_1 G_1 तस्य (for तत्र). — ^{b}) B_1 सृज्यते. $Ś_1$ $K_{1.2}$ Dc तत् (for यत्). K_4 यत्फलं भुज्यते दिवि. — ^{d}) B_1 मूलभेदेन; G_3 सूत्रछेदेन.

29 ^{a}) G_1 तत्र (for सोऽत्र). — ^{b}) T_1 तस्याद्यः- (for तस्यान्ते). K_4 $D_{1.3}$ गमनं (for पतनं). — ^{d}) T $G_{3.4}$ M_1 सहसा (for पतनं). B_4 Dc यत्र; D_2 तच्च; T_2 यं च. G_1 सहश्लावश्च मुद्गल.

30 ^{a}) $Ś_1$ K Dc Dn_2 D_5 T_1 G_1 असंतोषपरीतापो ($K_{1.2}$ Dc_2 D_3 °पौ; T_1 °नां). — ^{b}) $K_{3.4}$ $D_{3.5}$ दीप्ततरां श्रियं; D_2 दीप्ताः परश्रियः; T_1 $G_{2.4}$ M दीप्तां परश्रियं; T_2 G_1 परगतां श्रियं. — ^{c}) T_1 M तद् (for यद्). $Ś_1$ $K_{1.2}$ D_1 °त्यमरस्थाने; K_3 °त्परम°; Dn_3 $D_{4.6}$ °त्यधरे स्थाने; D_2 °त्यपरे स्थाने; T_1 °त्यातुले ज्ञाते; T_2 $G_{1.2.4}$ °त्य(G_1 °त्या)तुले स्थाने; M °त्यातुरे स्थाने. — ^{d}) B_1 यच्च; $B_{2.3}$ Dn D_{4-6} G_3 तत्सु-; Dc चेत्र (for तच्च). $Ś_1$ K_{1-3} दुःखदं; T_2 $G_{1.2.4}$ दुष्कृतं; M_1 दुष्पहं (for दुष्करम्).

31 ^{a}) $Ś_1$ °मोहाश्च. — ^{b}) K_4 $D_{2.4}$ सं- (for च). — ^{c}) K_3 Dc G_1 अम्ला°; M_2 प्रमादेषु (for प्रम्ला°). D_1 तु; T_1 हि (for च). Dc मानेषु; D_1 पुण्ये° (for माल्ये°). — ^{d}) $G_{2.4}$ M तस्मात् (for ततः). B_3 D_1 प्रपतितोर्; G_1 पिबतिषोर्. D_1 भृशं; T_2 ह्ययं (for भयम्). T_1 तस्माच्च

C. 3. 15472
B. 3. 261. 32
K. 3. 262. 33

नाकलोके सुकृतिनां गुणास्त्वयुतशो नृणाम् ॥ ३२
अयं त्वन्यो गुणः श्रेष्ठश्च्युतानां स्वर्गतो मुने ।
शुभानुशययोगेन मनुष्येषूपजायते ॥ ३३
तत्रापि सुमहाभागः सुखभागभिजायते ।
न चेत्संबुध्यते तत्र गच्छत्यधमतां ततः ॥ ३४
इह यत्क्रियते कर्म तत्परत्रोपभुज्यते ।
कर्मभूमिरियं ब्रह्मन्फलभूमिरसौ मता ॥ ३५
एतत्ते सर्वमाख्यातं यन्मां पृच्छसि मुद्गल ।
तवानुकम्पया साधो साधु गच्छाम माचिरम् ॥ ३६

व्यास उवाच ।
एतच्छ्रुत्वा तु मौद्गल्यो वाक्यं विममृशे धिया ।
विमृश्य च मुनिश्रेष्ठो देवदूतमुवाच ह ॥ ३७
देवदूत नमस्तेऽस्तु गच्छ तात यथासुखम् ।
महादोषेण मे कार्यं न स्वर्गेण सुखेन वा ॥ ३८
पतनं तन्महद्दुःखं परितापः सुदारुणः ।
स्वर्गभाजश्च्यवन्तीह तस्मात्स्वर्गं न कामये ॥ ३९
यत्र गत्वा न शोचन्ति न व्यथन्ति चलन्ति वा ।
तदहं स्थानमत्यन्तं मार्गयिष्यामि केवलम् ॥ ४०

पततो भयं.

32 *a*) Ś1 K Dc D1–3. 5 °भुवनाद्. — *b*) B4 मौकुल्य. — *c*) Ś1 K1. 2 B3. 4 D1 G1 नाक(G1 देव)लोकेषु कृ°; T1 G4 M2 नाग(T1 देव)लोके सु°. — *d*) T1 M1 मिताः; G2. 4 M2 मताः (for नृणाम्).

33 *a*) K1 अन्यस्त्वयं (for अयं त्वन्यो). K3 त्वल्पो गुणः; K4 B2. 4 Dc D1. 4 त्वन्यो गुण-; B1 तुल्यो गुण- (for त्वन्यो गुणः). — *b*) Ś1 K1. 2 D1. 3 T1 सर्व° (for स्वर्ग°). Ś1 K1. 2. 4 D1. 3 गुणैः (for मुने). — *c*) K4 D3 T G1. 2. 4 M2 सु(T1 दुः)खानु°. — *d*) Ś1 K1. 2 मानुषेषु. Ś1 प्र-; S (except G3) [ए]त्र (for [उ]प-).

34 T1 om. 34^{ab}. — *a*) K3 B1 T2 G1 M2 सुमहाभाग; B2–4 Dc Dn D1–4. 6 G3 स महाभागः (D2–4 G3 °ग). — *b*) Ś1 K1. 2 B4 Dc T2 अपि (for अभि-). K4 D3 सुखभो(D3 °भा)गी हि जायते; G2. 4 कुले महति जा°. — *c*) Dc G1 M स; T1 सु- (for सं-). — *d*) Ś1 प्राप्तोधमतां ततः (sic); T2 गच्छत्ययमतंद्रितः. — After 34, M1 ins.:

1192* तत्र गत्वा निवर्तन्ते न बुधा योगिनस्तथा ।

35 *a*) T2 G1 लोके (for कर्म). — *b*) D1 G1 (*sup. lin.* as in text) [उ]पयुज्यते. — *d*) Ś1 K1. 2 D2 असौ परा; K4 D3 अतो परा; T1 तु स स्मृतः. T2 भोगभूमिरसौ स्मृता. — After 35, D3 ins. 1193*.

36 *b*) Ś1 K1. 2 Dc यन्मां त्वं परिपृच्छसि; M1 यन्मा पृच्छति मुद्गल. — *d*) T2 G1. 2 तत्र (for साधु). B3 D1. 3 G4 गच्छामि; G1 °व.

37 Ś1 K2 श्रीव्यासः (for व्यास उ°). — *a*) T1 G2. 4 M एवमुक्तस (for एतच्छ्रुत्वा). Ś1 K1. 2 च (for तु). — *b*) Ś1 K1. 2 B1. 4 Dn3 D4. 6 विममृषे; B2. 3 Dc विमृशते; T1 स विमृशद्; G2. 4 सोवि(M1 °प)मृशद्. — *c*) Ś1 K1. 2 B1–3 Dn2. n3 D6 विसृष्य च; Dc विमृशंत; M2 विमृष्यंत.

38 Before 38, M1 ins. मुनिः. — *c*) K3 Dc D3 महादोषेन. B1 वाक्यं (for कार्यं). — *d*) Dc स्वर्गे न. K2. 3 D1. 5 च (for वा).

39 G2 om. (hapl.) 39^{a}–40^{b}. — *a*) Ś1 K1. 2. 4 D3 T2 G1 पतनांतं; K3 B Dc Dn D1. 2. 4–6 G3 °नांते; T1 °तां तन्; M °तां तु (for °नं तन्). B2. 4 Dc2 Dn1 D2–6 T G4 महादुःखं. — *b*) K3. 4 D1. 3 परितापं; G1 पततोपि. Ś1 K B2–4 Dc1 D1. 3 सुदारुणं. — *c*) Ś1 K1–3 T1 [अ]श्रुवंति; B2 Dc1 Dn D1–6 G3 चरंति; Dc2 भवंति; D3 (by corr.) G4 पतंति; T2 स्रवंति (for च्यवन्ति).

40 G2 om. 40^{ab} (cf. v.l. 39). — *b*) D1 T1 G4 M व्यथंते. K3 B4 Dc G4 च (for वा). T2 G न च्यवंति पतंत्वितः (G °त्युत). — *c*) G1 ततोहं. B4 अव्ययं; T1 अन्यत्तन् (for अत्यन्तं). — *d*) Ś1 जन°; K B4 D1–3. 5 अर्ज° (for मार्ग°). B2 माचिरं (for केवलम्). — Dn (!) ins. after 40: D3, after 35:

1193* मुद्गल उवाच ।
महान्तस्तु अमी दोषास्त्वया स्वर्गस्य कीर्तिताः ।
निर्दोष एव यस्त्वन्यो लोकं तं प्रवदस्व मे ।
देवदूत उवाच ।
ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम् ।
शुद्धं सनातनं ज्योतिः परं ब्रह्मेति यद्विदुः । [5]
न तत्र विप्र गच्छन्ति पुरुषा विषयात्मकाः ।
दम्भलोभमहाक्रोधमोहद्रोहैरभिद्रुताः ।
निर्ममा निरहंकारा निर्द्वंद्वाः संयतेन्द्रियाः ।
ध्यानयोगपराश्चैव तत्र गच्छन्ति मानवाः ।

[*N. B.* Some printed ed. wrongly read these lines after 35 (cf. D3 above).]

41 Before 41, B4 ins. व्यास उ°. — *a*) B1 एवमुक्त्वा

इत्युक्त्वा स मुनिर्वाक्यं देवदूतं विसृज्य तम् ।
शिलोञ्छवृत्तिमुत्सृज्य शममातिष्ठदुत्तमम् ॥ ४१
तुल्यनिन्दास्तुतिर्भूत्वा समलोष्टाश्मकाञ्चनः ।
ज्ञानयोगेन शुद्धेन ध्याननित्यो बभूव ह ॥ ४२
ध्यानयोगाद्बलं लब्ध्वा प्राप्य चर्द्धिमनुत्तमाम् ।
जगाम शाश्वतीं सिद्धिं परां निर्वाणलक्षणाम् ॥ ४३
तस्मात्त्वमपि कौन्तेय न शोकं कर्तुमर्हसि ।
राज्यात्स्फीतात्परिभ्रष्टस्तपसा तदवाप्स्यसि ॥ ४४
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
पर्यायेणोपवर्तन्ते नरं नेमिमरा इव ॥ ४५
पितृपैतामहं राज्यं प्राप्स्यस्यमितविक्रम ।
वर्षात् त्रयोदशादूर्ध्वं व्येतु ते मानसो ज्वरः ॥ ४६

वैशंपायन उवाच ।

एवमुक्त्वा स भगवान्व्यासः पाण्डवनन्दनम् ।
जगाम तपसे धीमान्पुनरेवाश्रमं प्रति ॥ ४७

इति श्रीमहाभारते आरण्यकपर्वणि सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४७ ॥ समाप्तं व्रीहिद्रौणिकपर्व ॥

२४८

वैशंपायन उवाच ।

तस्मिन्बहुमृगेऽरण्ये रममाणा महारथाः ।
काम्यके भरतश्रेष्ठा विजह्रुस्ते यथामराः ॥ १
प्रेक्षमाणा बहुविधान्वनोद्देशान्समन्ततः ।

C. 3. 15672
B. 3. 264. 2
K. 3. 265. 2

(for इत्युक्त्वा स). — ^{b}) K$_{3}$ B$_{1}$ G$_{1}$ विसर्ज्य. Dc च; G$_{1}$ वै (for तम्). — ^{c}) B$_{1-3}$ D (except D$_{1.3.5}$) G$_{3}$ °वृत्तिधर्मात्मा.

42 42^{a} = (var.) Gītā (Vulg.) 12. 19. — 42^{b} = *ibid.* 6. 8. — ^{c}) Ś$_{1}$ K$_{1.2}$ ज्ञानशुद्धेन योगेन. — ^{d}) M$_{2}$ ज्ञाननित्यो. — After 42, K$_{4}$ D$_{1-3}$ ins.:

1194* निगृहीतेन्द्रियग्रामं समयोजयदात्मनि ।
युक्तचित्तं तथात्मानं युयोज परमेश्वरे ।

43 ^{a}) G$_{1}$ ध्यानयोगे. T$_{1}$ फलं; G$_{4}$ वरं (for बलं). Dn$_{2}$ G$_{2}$ M$_{1}$ °योगबलं लब्ध्वा; T$_{2}$ °योगे मनो बध्वा; M$_{2}$ ज्ञानयोगफलं लब्ध्वा. — ^{b}) K$_{4}$ D$_{3}$ वृद्धिम्; B Dn D$_{1.2.4}$ T G बुद्धिम्; D$_{6}$ ऋद्धिम् (for चर्द्धिम्). D$_{1}$ च उत्तमां (for अनु°). — ^{c}) Ś$_{1}$ वृद्धिं; K$_{2}$ B$_{1}$ ऋद्धिं (for सिद्धिं). — ^{d}) B$_{4}$ निर्वेद° (for निर्वाण°).

44 T$_{1}$ om. 44^{cd}. — ^{c}) D$_{3}$ राज्यस्यांतात्; G$_{2}$ राज्यात्स्थिरात्.

45 ^{c}) Ś$_{1}$ K$_{1.2}$ M$_{2}$ °णोपवर्तंत (M$_{2}$ °ते); K$_{4}$ D$_{2.3}$ °णैव वर्तंते; B$_{1-3}$ Dc Dn D$_{4.6}$ T$_{1}$ G$_{3}$ °णोपसर्पंति (Dn T$_{1}$ °ते); T$_{2}$ G$_{1}$ °णोपगच्छंते (G$_{1}$ °ति); G$_{2.4}$ °णानुवर्तंते. — ^{d}) Ś$_{1}$ K$_{1.2}$ B$_{4}$ नरं नेमिचरा; K$_{4}$ (m as in text) D$_{3}$ (*sup. lin. sec. m.*) नरं नेमिपरा; B$_{3}$ Dc रथं नेमिनरा; D$_{5}$ T$_{2}$ G$_{1}$ नरा नेमिचरा (T$_{2}$ °गता; G$_{1}$ °मरा); T$_{1}$ नराश्चैवमरा.

46 ^{b}) B$_{1}$ लप्स्यसे°; Dc प्राप्स्यसे°.

47 T G$_{1}$ om. the ref. — ^{a}) B$_{2-4}$ Dn$_{1.n2}$ स एवमुक्त्वा (by transp.). D$_{5}$ T G$_{1}$ तु (for स). — ^{b}) M$_{1}$ व्यासः सत्यवतीसुतः. — 47^{cd} = 1. 1. 55^{cd}. — 47^{c} = 1. 107. 23^{c}.

Colophon. — *Major parvan:* Ś$_{1}$ K$_{2}$ Dn$_{2}$ G$_{2.4}$ आरण्य. — *Sub-parvan:* N G$_{3}$ व्रीहि (K$_{4}$ om. व्रीहि)-द्रौणिक, followed (except in B$_{2}$ D$_{2}$) by समाप्त; T G$_{2}$ व्रीहिद्रो (T$_{2}$ °द्रौ) णोपाख्यान. G$_{1}$ (om. sub-parvan name) mentions only मुद्गलोपाख्यान. — *Adhy. name:* M$_{2}$ व्रीहिद्रोणमोक्षस्तुतिः. — *Adhy. no.* (figures, words or both): Dn 259 (Dn$_{3}$ 260); D$_{1}$ 262; T$_{1}$ G$_{4}$ M (M$_{2}$ *inf. lin.*) 251 (M$_{2}$ orig. 254); T$_{2}$ G$_{1}$ 248; G$_{2}$ 250. — *Śloka no.:* Dn 51 (Dn$_{3}$ 50); D$_{1}$ 53.

☞ After adhy. 247, Dc$_{1}$ Dn D$_{1.2.6}$ G$_{3}$ ins. two addl. adhy. given in App. I (No. 25), comprising the famous Durvāsas episode, which, as may be seen, is a clear interpolation.

248

1 ^{a}) Ś$_{1}$ K$_{1.3.4}$ रम्ये (for ऽरण्ये). — ^{b}) K$_{4}$ B$_{1-3}$

C. 3. 15572
B. 3. 264. 2
K. 3. 265. 2

यथर्तुकालरम्याश्च वनराजीः सुपुष्पिताः ॥ २
पाण्डवा मृगयाशीलाश्चरन्तस्तन्महावनम् ।
विजह्रुरिन्द्रप्रतिमाः कंचित्कालमरिंदमाः ॥ ३
ततस्ते यौगपद्येन ययुः सर्वे चतुर्दिशम् ।
मृगयां पुरुषव्याघ्रा ब्राह्मणार्थे परंतपाः ॥ ४
द्रौपदीमाश्रमे न्यस्य तृणबिन्दोरनुज्ञया ।
महर्षेर्दीप्ततपसो धौम्यस्य च पुरोधसः ॥ ५
ततस्तु राजा सिन्धूनां वार्धक्षत्रिर्महायशाः ।
विवाहकामः शाल्वेयान्प्रयातः सोऽभवत्तदा ॥ ६
महता परिबर्हेण राजयोग्येन संवृतः ।
राजभिर्बहुभिः सार्धमुपायात्काम्यकं च सः ॥ ७
तत्रापश्यत्प्रियां भार्यां पाण्डवानां यशस्विनीम् ।
तिष्ठन्तीमाश्रमद्वारि द्रौपदीं निर्जने वने ॥ ८
विभ्राजमानां वपुषा बिभ्रतीं रूपमुत्तमम् ।
भ्राजयन्तीं वनोद्देशं नीलाभ्रमिव विद्युतम् ॥ ९
अप्सरा देवकन्या वा माया वा देवनिर्मिता ।
इति कृत्वाञ्जलिं सर्वे ददृशुस्तामनिन्दिताम् ॥ १०
ततः स राजा सिन्धूनां वार्धक्षत्रिर्जयद्रथः ।
विस्मितस्तामनिन्द्याङ्गीं दृष्ट्वासीद्दुष्टमानसः ॥ ११
स कोटिकाश्यं राजानमब्रवीत्काममोहितः ।
कस्य त्वेषानवद्याङ्गी यदि वापि न मानुषी ॥ १२
विवाहार्थो न मे कश्चिदिमां दृष्ट्वातिसुन्दरीम् ।
एतामेवाहमादाय गमिष्यामि स्वमालयम् ॥ १३
गच्छ जानीहि सौम्यैनां कस्य का च कुतोऽपि वा ।

Dc Dn $D_{2.4.6}$ G_3 अटमाना ; D_3 वसमाना (for रममाणा). S (except G_3) महाबलाः. — Dc om. 1^{cd}. — ^{c}) $K_{1.3.4}$ Dn_2 T_1 $G_{1.4}$ M भरतश्रेष्ठ. — ^{d}) B_1 यथा सुराः (for °मराः). T_2 G_1 महात्मानो महाबलाः.

2 ^{a}) $K_{1.3.4}$ $B_{1.2}$ Dc_1 Dn_3 $D_{1.3}$ प्रेक्ष्य° ; B_4 वीक्ष° (for प्रेक्ष°). — ^{b}) T_1 $G_{2.4}$ M मुदा युताः (for समन्ततः). — ^{c}) $Ś_1$ अथर्तु° ; D_5 सर्वर्तु° (for यथर्तु°).

3 D_5 om. 3–4. — ^{b}) T_1 $G_{2.4}$ M च (for तन्). K_3 B D (except $D_{1.2}$; D_5 om.) T_2 $G_{1.3}$ महद्वनं (B_1 वनं महत्) ; T_1 M_1 महावने. — ^{d}) K_4 D_1 किंचित् ; G_1 कचित्. $Ś_1$ K_2 Dn अरिंदम. T_2 कालशेषमरिंदमाः.

4 D_5 om. 4 (cf. v.l. 3). — ^{b}) M ययुः प्रतिदिशो नृप.

5 ^{cd}) T_1 $G_{2.4}$ M महर्षिं दीप्ततपसं धौम्यं चापि पुरोहितं (T_1 नृप पुरोधसं ; M_1 चैव पुरोहितं ; M_2 चापि पुरोधसं).

6 ^{a}) B_2 च ; D_6 T_2 $G_{1.3}$ स (for तु). D_1 सिंहानां (for सिन्धू°). — ^{b}) Dc वार्धक्षत्रो ; T_1 वार्धक्षेमिर् ; M_1 वर्धक्षत्रिर्. K_1 महाबलः ; $K_{3.4}$ D_{1-3} जयद्रथः (cf. 11^{b}). — ^{c}) T G_1 कर्तुं विवाहं (for विवाह°). K_1 D_3 T $G_{2.4}$ M साल्वे° ; B_1 पार्थे° (for शाल्वे°). — ^{d}) $B_{2.4}$ Dc स्म ; S (except G_3) [अ]थ (for सः). G_2 M_2 भवत्तदा.

7 ^{a}) D_2 पारिबर्हेण. — ^{b}) B_4 संभृतः ; M_1 संयुतः. — ^{d}) K_1 B_2 D_3 स्मरः ; T_1 हि सः ; $G_{1.2}$ वनं (for च सः).

8 ^{b}) K_1 मनस्विनीं ; M_1 यशस्विनां. — ^{c}) D_1 T_1 °द्वारे.

9 $9^{a}=1^{a}$. 65. 11^{a} ; (var.) 57. 92^{c}. — ^{b}) K_4 बिभ्रती. B_1 कालम् (for रूपम्). G_2 (*sup. lin.* as in text) अद्भुतं (for उत्तमम्). — ^{c}) K_4 भ्राजयंती. G_1 विभ्राजतीं वनोद्देशे. — After 9, M_1 *repeats* 9^{cd} (v.l. राजयंतीं for भ्राज°).

10 ^{a}) $Ś_1$ देवकाया. — ^{b}) G_1 मायया (for माया वा). — ^{c}) $Ś_1$ $K_{1.3}$ D_1 G_4 [अं]जलीन् ; K_4 [अं]जलीः ; B_2 मतिं ; D_2 [अं]जसा.

11 ^{a}) T_1 $G_{2.4}$ M तु (for स). — ^{b}) $Ś_1$ वार्धक्षत्रो ; T_1 वार्धक्षेमिर्. — ^{c}) K_3 विस्मितस्त्वनर्निद्यांगीं ; K_4 विस्मितो ह्यनवद्यांगीं ; B (B_4m as in text) Dn $D_{4.6}$ G_3 विस्मित-स्त्वनवद्यांगीं ; $G_{2.4}$ विष्ठितामनवद्यांगीं. — ^{d}) B_4 T G_1 दुष्टमानसः ; $G_{2.4}$ M दुष्टचेतनः (G_4 °सः). $Ś_1$ $K_{1.2}$ B_{1-3} Dn $D_{4.6}$ G_3 दृष्ट्वा तां दु($Ś_1$ K_1 संहृ)ष्टमानसः.

12 Dc_1 om. 12. — ^{a}) $Ś_1$ K_4 $B_{1.4}$ Dn_3 $D_{1.3}$ Cn कोटिकास्यं ; $K_{1.2}$ °श्वं ; $B_{2.3}$ Dc_2 $D_{2.6}$ Cnp °ख्यं ; Cnp also as in text. — ^{c}) T_2 कैषा (for त्वेषा). G_1 ह्यनिद्यांगी (for [अ]नवद्याङ्गी). — ^{d}) $Ś_1$ यदि वा नाप्यमानुषी ; K_4 देवी वा मानुषी यदि.

13 ^{a}) T G_1 विवाहेच्छा (for °हार्थो). T_1 G_1 काचिद्. — ^{b}) B_{2-4} Dn $D_{4.6}$ G_3 प्राप्य (for दृष्ट्वा). $Ś_1$ $K_{1.2.4}$ D_5 तु सुंदरीं ; B_1 M_2 [अ]तिमानुषीं. — ^{c}) T_2 G_1 एनाम् (for एताम्). — ^{d}) $Ś_1$ सुरालयं.

14 ^{a}) Dc_1 सौम्य तां ; Dn_3 D_4 G_3 सौम्येमां ; T_2 सौरथ्य ; K_4 M सौम्यैतां. — ^{b}) $Ś_1$ $K_{1.2}$ वापि ; K_3 D_1 G_1 वा नु ; K_4 वाथ ; B $Dn_{2.n3}$ $D_{2-4.6}$ G_3 वात्र ; Dc वा त्वं ; T_1 का वा ; T_2 का नु ; M_2 कापि (for का च). — ^{c}) T_1 G_1 चागता (for आगता).

किमर्थमागता सुभ्रूरिदं कण्टकितं वनम् ॥ १४
अपि नाम वरारोहा मामेषा लोकसुन्दरी ।
भजेदद्यायतापाङ्गी सुदती तनुमध्यमा ॥ १५
अप्यहं कृतकामः स्यामिमां प्राप्य वरस्त्रियम् ।
गच्छ जानीहि को न्वस्या नाथ इत्येव कोटिक ॥ १६
स कोटिकाश्यस्तच्छ्रुत्वा रथात्प्रस्कन्द्य कुण्डली ।
उपेत्य पप्रच्छ तदा क्रोष्टा व्याघ्रवधूमिव ॥ १७

इति श्रीमहाभारते आरण्यकपर्वणि अष्टचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥

२४९

कोटिकाश्य उवाच ।
का त्वं कदम्बस्य विनम्य शाखा-
मेकाश्रमे तिष्ठसि शोभमाना ।
देदीप्यमानाग्निशिखेव नक्तं
दोधूयमाना पवनेन सुभ्रूः ॥ १
अतीव रूपेण समन्विता त्वं
न चाप्यरण्येषु बिभेषि किं नु ।
देवी नु यक्षी यदि दानवी वा
वराप्सरा दैत्यवराङ्गना वा ॥ २
वपुष्मती वोरगराजकन्या
वनेचरी वा क्षणदाचरस्त्री ।
यद्येव राज्ञो वरुणस्य पत्नी
यमस्य सोमस्य धनेश्वरस्य ॥ ३
धातुर्विधातुः सवितुर्विभोर्वा
शक्रस्य वा त्वं सदनात्प्रपन्ना ।
न ह्येव नः पृच्छसि ये वयं स्म

C. 3. 15591
B. 3. 265. 4
K. 3. 266. 4

---

15 ^{c}) Ś$_1$ K$_1$ भजेत व्यायतापांगी (K$_1$ °गा); T$_2$ G$_1$ °दद्यासितापांगी. — ^{d}) B$_4$ T$_1$ G$_4$ M$_2$ सुंदरी (for सुदती).

16 B$_1$ om. 16^{ab}. — ^{c}) Ś$_1$ K$_1$ कोन्योस्या; T$_2$ को वास्या. — ^{d}) T G$_{1.2.4}$ नाथः सम्यग्विचारय.

17 Before 17, M ins. वैशं°. — ^{a}) Ś$_1$ K$_{1.2}$ B$_2$ Dc D$_{2.8}$ कोटिकाख्य°; K$_{3.4}$ B$_{1.3.4}$ Dn$_2$. n$_3$ D$_{1.6}$ °कास्य°. — ^{b}) =4. 30. 4^{d}; 32. 32^{b}: 5. 46. 14^{b}; etc., etc. T G$_1$ मैध्यात्प्रस्कंद्य तद्रथात्. — ^{d}) K$_{1.2}$ G$_1$ सिंह° (for व्याघ्र°).

Colophon om. in Ś$_1$ K$_{1.3}$ D$_5$ (cf. colophon of adhy. 249). — *Major parvan:* Dn$_2$ G$_{2.4}$ आरण्य. — *Sub-parvan:* N (Ś$_1$ K$_{1.3}$ D$_5$ om.) T$_1$ G$_3$ M$_2$ द्रौपदीप्रमाथ. — *Adhy. no.* (figures, words or both): Dn 262 (Dn$_3$ 263): D$_1$ 265; T$_1$ G$_4$ M (M$_2$ *inf. lin.*) 252 (M$_2$ orig. 254); T$_2$ G$_1$ 249; G$_2$ 251. — *Śloka no.:* Dn D$_1$ 17.

249

1 Ś$_1$ K$_1$ om. the ref.! K$_{2.3}$ B Dc Dn D$_{4.6}$ G$_3$ कोटिक उ°; K$_4$ D$_{1-3}$ कोटिकास्य (D$_{2.3}$ °ख्य) उ°. — ^{a}) K$_{3.4}$ B$_{1.2.4}$ Dc$_1$ D$_{3.5}$ विनाम्य; M$_1$ नियम्य. — ^{b}) G$_{2.4}$ किमाश्रमे (for एका°). — ^{c}) D$_{2.3}$ प्रदीप्य°. — ^{d}) B$_{2-4}$ Dc D$_{4.6}$ G$_3$ व्याधू° (for दोधू°). Ś$_1$ K$_{1-3}$ Dn D$_{2.5.6}$ T$_1$ G$_4$ सुभ्रु; Dc D$_1$ सुभ्रू. M आचक्ष्व शीघ्रं (M$_3$ तत्वं) व्रजिनाग्रकेशि (M$_2$ °केशिनी).

2 ^{b}) T$_1$ बिभर्षि. D$_{3.5}$ किं तु; T G$_1$ का नु; G$_{2.4}$ M देवि. — ^{c}) K$_3$ च; D$_2$ T$_1$ तु; G$_{1.4}$ न (for नु). D$_{2.3}$ न च (for यदि). Ś$_1$ K$_{1.2}$ D$_5$ दानवी त्वं; B$_4$ (m as in text) मानवी वा; Dc T$_1$ मानुषी वा; T$_2$ वापि मानुषी; G$_1$ वा मनुष्या.

3 ^{a}) K$_3$ Dn$_3$ D$_{1.2}$ G$_{1.4}$ च (for वा). K$_3$ °नाग-कन्या; T$_2$ °राजकन्यका; M$_2$ °कन्यका वा (for °राजकन्या). — ^{b}) S (except T$_1$ G$_3$) वनेचरा. K$_3$ वनेचरी वा कुसुमायुधस्त्री. — ^{c}) K$_4$ D$_{1-3}$ किं देव-; G$_{2.4}$ त्वं देव- (for यद्येव).

4 ^{a}) K$_3$ T$_1$ G$_{2.4}$ M$_1$ प्रभोर्वा; K$_4$ D$_{1-3.5}$ प्रभा वा (for विभोर्वा). — ^{c}) D$_5$ चैव (for ह्येव). Ś$_1$ K D$_{1-3}$ सं- (for नः). D$_{2.3}$ के (for ये). — ^{d}) G$_1$ वयं न (for न चापि). K$_{1.2}$ जाता कुले कस्य हि चंद्रवक्त्रे.

5 ^{b}) Ś$_1$ भवनं (for प्रभवं). Ś$_1$ K$_{1.2}$ D$_5$ पतिं; T$_2$ G$_{1.2}$ भुवं (for प्रभुं). — ^{c}) B$_1$ G$_4$ M transp. पतिं and

C. 3. 15591
B. 3. 265. 4
K. 3. 266. 4

न चापि जानीम तवेह नाथम् ॥ ४
वयं हि मानं तव वर्धयन्तः
पृच्छाम भद्रे प्रभवं प्रभुं च ।
आचक्ष्व बन्धूंश्च पतिं कुलं च
तत्त्वेन यच्चेह करोषि कार्यम् ॥ ५
अहं तु राज्ञः सुरथस्य पुत्रो
यं कोटिकाश्येति विदुर्मनुष्याः ।
असौ तु यस्तिष्ठति काञ्चनाङ्गे
रथे हुतोऽग्निश्चयने यथैव ।
त्रिगर्तराजः कमलायताक्षि
क्षेमंकरो नाम स एष वीरः ॥ ६
अस्मात्परस्त्वेष महाधनुष्मा-
न्पुत्रः कुणिन्दाधिपतेर्वरिष्ठः ।
निरीक्षते त्वां विपुलायतांसः
सुविस्मितः पर्वतवासनित्यः ॥ ७
असौ तु यः पुष्करिणीसमीपे
श्यामो युवा तिष्ठति दर्शनीयः ।
इक्ष्वाकुराज्ञः सुबलस्य पुत्रः
स एष हन्ता द्विषतां सुगात्रि ॥ ८
यस्यानुयात्रं ध्वजिनः प्रयान्ति
सौवीरका द्वादश राजपुत्राः ।
शोणाश्वयुक्तेषु रथेषु सर्वे
मखेषु दीप्ता इव हव्यवाहाः ॥ ९
अङ्गारकः कुञ्जरगुप्तकश्च
शत्रुंजयः संजयसुप्रवृद्धौ ।
प्रभंकरोऽथ भ्रमरो रविश्च
शूरः प्रतापः कुहरश्च नाम ॥ १०
यं षट्सहस्रा रथिनोऽनुयान्ति
नागा हयाश्चैव पदातिनश्च ।
जयद्रथो नाम यदि श्रुतस्ते

कुलं. — ^{d}) Ś$_1$ K$_{1.2}$ D$_5$ T$_3$ G$_1$ यच्चेह; K$_{3.4}$ Dc$_2$ D$_{1-3}$ G$_{2.4}$ जातिं च; T$_1$ गतिं च; M$_1$ ज्ञातिं च; M$_2$ ज्ञातींश्च (for तत्त्वेन). Ś$_1$ K$_{1.2}$ D$_5$ भद्रे प्र-; T$_2$ किं वाद्य; G$_1$ लोको हि (for यच्चेह).

6 ^{a}) Ś$_1$ K$_{1.2}$ D$_5$ हि; Dc D$_3$ च (for तु). — ^{b}) =3. 250. 4^{b}. Dc मां (for यं). Ś$_1$ K B$_1$ Dn D$_{3-5}$ कोटिकास्ये(K$_1$ °श्वे)ति; B$_{2.3}$ Dc D$_{1.2.6}$ °काख्येति; B$_4$ °शश्चाति. — After 6^{ab}, S (except G$_3$) ins.:

1195* वश्येन्द्रियः सभ्यरुचिर्वरोरु
वृद्धोपसेवी गुरुपूजकश्च ।

— ^{c}) T$_2$ G$_1$ अथो नु (G$_1$ न) (for असौ तु). Ś$_1$ K$_1$ कांचनांके. — ^{d}) K$_{1.4}$ T$_2$ हुताग्निश्च; Dc नतोग्निश्च; G$_4$ चितोग्निश्च. Dc$_2$ G$_1$ च वने; T$_1$ स वने. — ^{e}) B Dc Dn D$_{3.4.6}$ G$_3$ °यताक्षः. — ^{f}) K$_3$ समर्षः; B$_1$ D$_{1.2}$ G$_4$ स एव (for स एष).

7 ^{a}) B$_3$ तस्मात्; B$_4$ G$_1$ अस्मत्. D$_{2.3}$ पुरस्त्वेष. — ^{b}) B D (except D$_{1.2}$) T$_2$ G$_3$ कुलिंदा°. — ^{cd}) Ś$_1$ M$_2$ त्वा (for त्वां). B$_{1.3.4}$ Dn D$_{2.4.6}$ T$_1$ G$_3$ M$_1$ विपुलायताक्षः; B$_2$ Dc कमलायताक्षि (B$_2$ °क्षः). B$_{1.2.3}$m Dc Dn M$_1$ सुपुष्पितः; B$_{3.4}$ D$_3$ शुचिस्मितः; T$_1$ आविस्मितः; T$_2$ G$_1$ भुवि स्थितः; G$_4$ सुरस्मिते (for सुविस्मितः). K$_2$ °वासमुख्यः — For 7^{cd}, K$_1$ subst.:

1196* सुविस्मितः पर्वतवासनिद्रो
न चापि जानीम तवेह नाथम् ।

[Prior half = (var.) 7^{d}. Posterior half = 4^{d}.]

8 ^{c}) Ś$_1$ K$_3$ B$_2$ D$_{2.5}$ G$_{2.4}$ °राजः (for °राज्ञः). G$_3$ सुभवस्य (for सुबलस्य); and this is the reading of some of our old ed.! — ^{d}) B$_1$ Dc Dn D$_1$ एव (for एष).

9 ^{a}) Ś$_1$ K B$_{2.4}$ Dc Dn$_1$. n$_3$ D$_{2.3}$ T$_2$ यस्यानुचक्रं; B$_{1.3}$ Dn$_2$ D$_5$ °नुयात्रां; T$_1$ G$_{2.4}$ °नुयात्र-. Cnp अनुयात्रा[ः]. — ^{d}) Dc मध्येषु; M कुंडे° (for मखे°). Dc$_1$ तप्ता (for दीप्ता).

10 ^{a}) B$_{2.4}$ Dn$_1$. n$_2$ D$_2$ G$_3$ कुंजरो गुप्तकश्च; B$_3$ कुंजरगुप्तकंठः; T$_2$ G$_{1.2.4}$ M$_1$ °गुप्तकौ च. — ^{b}) Dc$_2$ शत्रुंतपः. K$_4$ °पुत्रबुद्धौ; B$_1$ T G$_{2.4}$ M$_1$ °सुप्रबुद्धौ; B$_3$ °सुप्रवृत्तौ; B$_4$ °संप्रवृत्तौ; D$_1$ °सप्रबुद्धौ; M$_2$ °सुप्रसिद्धौ. — ^{c}) Ś$_1$ K$_{1.2}$ भ्रूभंगुरोथ; K$_4$ Dn D$_{3.6}$ G$_3$ भयंकरोथ; B$_4$ M$_2$ प्रभा°; T G$_1$ शुभं°; M$_1$ भ्रमं°. K$_4$ D$_1$ भ्रमरोथ विश्वः. — ^{d}) K$_4$ कुररश्च; प्रतीपः; T$_1$ परागः; G$_{2.4}$ पतंगः (for प्रतापः). K$_4$ कुररश्च; B$_4$ Dn G$_3$ B$_2$ च सहश्च; B$_3$ Dc D$_3$ T G$_{1.2.4}$ M$_2$ कुहक°; B$_4$ Dn G$_3$ कुहन°. D$_3$ T G$_{1.4}$ M$_1$ नाम्ना; G$_2$ नाम्नः.

11 ^{b}) T$_1$ G$_{2.4}$ M चापि (for चैव). Ś$_1$ K B$_{1.3}$ Dc$_2$ D$_{1-3.5}$ T$_2$ G$_1$ पदातयश्च. — ^{c}) Ś$_1$ K$_2$ यथा (for यदि). — ^{d}) Ś$_1$ K$_{1.2}$ B$_{1.2.4}$ सुभगः. Ś$_1$ K$_1$ य (for स).

सौवीरराजः सुभगे स एषः ॥ ११
तस्यापरे भ्रातरोऽदीनसत्त्वा
बलाहकानीकविदारणाद्याः ।
सौवीरवीराः प्रवरा युवानो
राजानमेते बलिनोऽनुयान्ति ॥ १२
एतैः सहायैरुपयाति राजा
मरुद्गणैरिन्द्र इवाभिगुप्तः ।
अजानतां ख्यापय नः सुकेशि
कस्यासि भार्या दुहिता च कस्य ॥ १३

इति श्रीमहाभारते आरण्यकपर्वणि एकोनपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २४९ ॥

२५०

वैशंपायन उवाच ।
अथाब्रवीद् द्रौपदी राजपुत्री
पृष्टा शिबीनां प्रवरेण तेन ।
अवेक्ष्य मन्दं प्रविमुच्य शाखां
संगृह्णती कौशिकमुत्तरीयम् ॥ १
बुद्ध्याभिजानामि नरेन्द्रपुत्र
न मादृशी त्वामभिभाष्टुमर्हा ।
न त्वेह वक्तास्ति तवेह वाक्य-
मन्यो नरो वाप्यथ वापि नारी ॥ २
एका ह्यहं संप्रति तेन वाचं
ददानि वै भद्र निबोध चेदम् ।
अहं ह्यरण्ये कथमेकमेका
त्वामालपेयं निरता स्वधर्मे ॥ ३
जानामि च त्वां सुरथस्य पुत्रं

C. 3. 15605
B. 3. 266. 4
K. 3. 267. 4

---

12 ^{a}) Ś$_{1}$ K$_{1.2}$ Dc अस्यापरे. — ^{b}) T G$_{1}$ °कामित्रविदा(T$_{1}$ °चा)रणाद्याः; G$_{2.4}$ M °काभीरविचारणाद्याः. — ^{c}) G$_{2}$ सुवीर°. — ^{d}) D$_{3.5}$ °याताः (for °यान्ति).

13 ^{b}) Ś$_{1}$ इवावगुप्तः; B$_{2.3}$ इवाति°; T$_{1}$ इवानुयातः. — ^{c}) K$_{3}$ T G$_{2.4}$ M सा जानती; Dc न जानतां; D$_{1-3}$ साजानतां. K$_{4}$ आख्याहि मे शीघ्र * * * * *; G$_{1}$ (corrupt) सजानमख्यापय नः सुकेशि. — ^{d}) K$_{4}$ D$_{3}$ G$_{2.4}$ [अ]सि; T$_{2}$ [अ]थ (for च).

Colophon om. in Ś$_{1}$ K$_{1.3}$ D$_{1}$ (cf. colophon of adhy. 248). — *Major parvan:* Dn$_{2}$ G$_{4}$ आरण्य; G$_{2}$ श्रीमदारण्यकांड (!). — *Sub-parvan:* N (Ś$_{1}$ K$_{1.3}$ D$_{1}$ om.) T$_{1}$ G$_{3}$ M$_{2}$ द्रौपदीप्रमाथ. — *Adhy. name:* M$_{2}$ कोटिकाश्यवचनं. — *Adhy. no.* (figures, words or both): Dn 263 (Dn$_{3}$ 264); T$_{1}$ G$_{4}$ M (M$_{2}$ *inf. lin.*) 253 (M$_{2}$ orig. 255); T$_{2}$ G$_{1}$ 250; G$_{2}$ 252. — *Śloka no.:* Dn 13 (Dn$_{3}$ 14).

250

1 ^{a}) G$_{2.4}$ राजपुत्रं (for °पुत्री). T$_{2}$ G$_{1}$ अथाब्रवीद्राजपुत्री तदानीं. — ^{b}) B$_{2}$ G$_{1}$ ऋषभेण (for प्रवरेण). — ^{c}) B$_{1}$ (m as in text) सर्वं (for मन्दं). G$_{1}$ शालां (for शाखां). — ^{d}) T$_{2}$ संगृह्य सा; G$_{2}$ संगृह्णंती.

2 ^{a}) Ś$_{1}$ K$_{1.2}$ बुद्ध्या विजानामि; K$_{3}$ शुद्धाभिजा°; D$_{2.3}$ बुद्ध्याभिजानासि; T$_{1}$ अन्यापि जानामि; T$_{2}$ G$_{1.2.4}$ M अद्याभिजानीहि (M °नामि). — ^{b}) B$_{2}$ अभिभाष्यमाना; Dn अभिभाष्टुमर्हति (!); D$_{1}$ T$_{1}$ अभिप्रष्टुमर्हा; G$_{2.4}$ अभिद्रष्टुमर्हा. T$_{2}$ G$_{1}$ न मादृशी त्वादृशैः (G$_{1}$ त्वद्विधैः) प्रष्टुमर्हा. — ^{c}) Ś$_{1}$ K$_{1.2}$ B$_{1}$ Dc$_{2}$ Dn$_{3}$ D$_{2.6}$ G$_{2-4}$ त्वेव (for त्वेह). T$_{2}$ G$_{1}$ न त्वेव वक्ता हि न मेद्य वाक्यं.

3 K$_{3}$ om. 3^{ab}. — ^{a}) Ś$_{1}$ K$_{1.2}$ एकाप्यहं. G$_{1}$ नैव (for तेन). B$_{4}$ G$_{2}$ वाक्यं; T$_{1}$ वाचा. — ^{b}) K$_{4}$ Dn$_{2}$ D$_{1-3}$ T$_{1}$ ददामि. Ś$_{1}$ K (K$_{3}$ om.) D$_{1-3}$ T$_{2}$ G$_{1}$ ते; T$_{1}$ G$_{2.4}$ M तद् (for वै). — ^{c}) K$_{3}$ अरण्ये (om. हि); G$_{4}$ त्वरण्ये. — ^{d}) Ś$_{1}$ K$_{1}$ समा°; B$_{4}$ त्वां वा°; M$_{1}$ यामा° (for त्वामा°). T$_{2}$ G$_{1}$ नियता.

4 ^{a}) Ś$_{1}$ K$_{1.2}$ G$_{1}$ त्वा (for त्वां). — ^{b}) = 3. 249. 6^{b}. Ś$_{1}$ K$_{2.4}$ B$_{1.4}$ Dn$_{1}$. n$_{3}$ D$_{1.5}$ °कास्ये°; K$_{1}$ °काश्चे°; K$_{3}$m B$_{2.3}$ Dc D$_{2.3.6}$ °काख्ये° (for °काश्ये°). — K$_{3.4}$ M om. (hapl.) 4^{c}–5^{b}. — ^{c}) Ś$_{1}$ तुभ्यं हि सर्वम् (for

यं कोटिकाश्येति विदुर्मनुष्याः ।
तस्मादहं शैब्य तथैव तुभ्य-
माख्यामि बन्धून्प्रति तन्निबोध ॥ ४
अपत्यमस्मि द्रुपदस्य राज्ञः
कृष्णेति मां शैब्य विदुर्मनुष्याः ।
साहं वृणे पञ्च जनान्पतित्वे
ये खाण्डवप्रस्थगताः श्रुतास्ते ॥ ५
युधिष्ठिरो भीमसेनार्जुनौ च
माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।
ते मां निवेश्येह दिशश्चतस्रो
विभज्य पार्था मृगयां प्रयाताः ॥ ६
प्राचीं राजा दक्षिणां भीमसेनो
जयः प्रतीचीं यमजावुदीचीम् ।
मन्ये तु तेषां रथसत्तमानां
कालोऽभितः प्राप्त इहोपयातुम् ॥ ७
संमानिता यास्यथ तैर्यथेष्टं
विमुच्य वाहानवगाहयध्वम् ।
प्रियातिथिर्धर्मसुतो महात्मा
प्रीतो भविष्यत्यभिवीक्ष्य युष्मान् ॥ ८
एतावदुक्त्वा द्रुपदात्मजा सा
शैब्यात्मजं चन्द्रमुखी प्रतीता ।
विवेश तां पर्णकुटीं प्रशस्तां
संचिन्त्य तेषामतिथिस्वधर्मम् ॥ ९

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५० ॥

२५१

वैशंपायन उवाच ।
अथासीनेषु सर्वेषु तेषु राजसु भारत ।
कोटिकाश्यवचः श्रुत्वा शैब्यं सौवीरकोऽब्रवीत् ॥ १
यदा वाचं व्याहरन्त्यामस्यां मे रमते मनः ।

तथैव तुभ्यम्). — ^{d}) Ś1 K1. 2 ते; T1 G1 तान् (for तन्). B D (except D1–3) आख्यामि बंधून्प्रथितं कुलं च; T2 आख्यामि बंधुप्रतिमं निबोध.

5 K3. 4 M om. 5^{ab} (cf. v.l. 4). — ^{b}) Ś1 B1 मा (for मां). — ^{c}) G2. 4 M वृता (for वृणे). Dn2. n3 पतीन्वै (for पतित्वे).

6 ^{a}) M भीमसेनोर्जुनश्च.

7 ^{a}) Ś1 K1 भीमसेनोप्यवाचीं (for दक्षिणां भी°). — ^{b}) G1 जिष्णुः (for जयः). T2 G1 च यमा° (for यमजा°). — ^{d}) B1 कालोचितः; T G1 कालोतीतः; G2. 4 M कालो बहु. D1 कालोभीतः प्रातरिहोपयातुं.

8 ^{a}) Ś1 संमानिताश्चाप्यथ वा यथेष्टं. — ^{b}) B Dc Dn D2. 4. 6 G3 अवरोह(D2 °प)यध्वं; M अवगाहयंतु. — ^{d}) T1 G2. 4 M सर्वान् (for युष्मान्).

9 ^{b}) B1 प्रशस्ता (for प्रतीता). — ^{c}) B2. 3 Dn D4. 6 G3 पर्णशालां; D2. 3 पत्रकुटीं. — ^{d}) Dn1. n2 D6 G3 अतिथिस्वधर्मं. The reading अतिथित्वमर्थे (for °स्वधर्मम्) of some old printed ed. was *not* found in any MS. collated!

Colophon. — *Major parvan*: Ś1 K2 Dn2 G2. 4 आरण्य. — *Sub-parvan*: Ś1 K B Dc Dn D1. 2. 4–6 G3 M2 द्रौपदीप्रमाथ. — *Adhy. name*: B4 द्रौपदीवाक्यं. — *Adhy. no.* (figures, words or both): Dn 264 (Dn3 265); D1 266; T1 G4 M (M2 *inf. lin.*) 254 (M2 orig. 256); T2 G1 251; G2 253. — *Śloka no.*: Dn 9; D1 23.

251

1 ^{a}) K3 B1. 3. 4 D (except D1–3. 5) S (except G2. 4) तथा° (for अथा°). — After 1^{ab}, B2–4 D (except D1. 2) ins.:

1197* यदुक्तं कृष्णया सार्धं तत्सर्वं प्रत्यवेदयत् ।

सीमन्तिनीनां मुख्यायां विनिवृत्तः कथं भवान् ॥ २
एतां दृष्ट्वा स्त्रियो मेऽन्या यथा शाखामृगस्त्रियः ।
प्रतिभान्ति महाबाहो सत्यमेतद्ब्रवीमि ते ॥ ३
दर्शनादेव हि मनस्तया मेऽपहृतं भृशम् ।
तां समाचक्ष्व कल्याणीं यदि स्याच्छैब्य मानुषी ॥ ४
कोटिकाश्य उवाच ।
एषा वै द्रौपदी कृष्णा राजपुत्री यशस्विनी ।
पञ्चानां पाण्डुपुत्राणां महिषी संमता भृशम् ॥ ५
सर्वेषां चैव पार्थानां प्रिया बहुमता सती ।
तया समेत्य सौवीर सुवीरान्सुमुखी व्रज ॥ ६
वैशंपायन उवाच ।
एवमुक्तः प्रत्युवाच पश्यामो द्रौपदीमिति ।
पतिः सौवीरसिन्धूनां दुष्टभावो जयद्रथः ॥ ७
स प्रविश्याश्रमं शून्यं सिंहगोष्ठं वृको यथा ।
आत्मना सप्तमः कृष्णामिदं वचनमब्रवीत् ॥ ८
कुशलं ते वरारोहे भर्तारस्तेऽप्यनामयाः ।
येषां कुशलकामासि तेऽपि कच्चिदनामयाः ॥ ९
द्रौपद्युवाच ।
कौरव्यः कुशली राजा कुन्तीपुत्रो युधिष्ठिरः ।
अहं च भ्रातरश्चास्य यांश्चान्यान्परिपृच्छसि ॥ १० C. 3. 15622 B. 3. 267. 12 K. 3. 268. 12

[D_6 वीर (for साधे). B_2 समवर्धयत्; D_5 कोटिकोब्रवीत् (for प्रत्य°).]

— D_6 cont.:

1198* वाक्यं यथार्थं तच्छ्रुत्वा कोटिकाश्यमुखोद्गतम् ।

On the other hand, after 1^{ab}, $G_{2.4}$ ins.:

1199* कोटिकाश्यो जगामाशु सिन्धुराजनिवेशनम् ।

— ^{c}) MSS. °कास्य°, °काख्य°, °काश्व°, etc. T_2 $G_{1.2.4}$ श्रोतुं (for श्रुत्वा). — ^{d}) A few MSS. सैब्यं.

2 ^{a}) $K_{3.4}$ Dc D_{1-3} यदा वाचो; T_1 पांचालीति; T_2 यदुवाच. — ^{b}) T निरतं; G_1 नियतं (for रमते). — ^{c}) K_3 Dc_2 T_2 मुख्यानां; B_4 मुख्या सा; D_1 मुख्येयं. — ^{d}) T_2 विनियुक्तः. K_3 भवेत्; D_1 तदा; G_2 पुमान् (for भवान्).

3 ^{a}) Dc स्त्रिया; T_2 $G_{1.2.4}$ स्त्रियं. $Ś_1$ K_1 [ऽ]प्यन्या; B_1 [ऽ]न्या मे; T_2 G_1 मन्ये; G_2 मेन्यां.

4 ^{ab}) $Ś_1$ K_2 मनो यया; $K_{1.4}$ $D_{1.3.5}$ मनोनया (for मनस्तया). T_1 M प्रसभं (for ऽपहृतं). $Ś_1$ $K_{1.2}$ बलात् (for भृशम्). — ^{c}) $D_{4.6}$ T_1 $G_{2.4}$ M तां ममाचक्ष्व; G_1 नाममाचक्ष्व (corrupt). — ^{d}) T_1 G_4 M_2 मानुषीं.

5 $Ś_1$ K_4 $D_{1.3}$ कोटिकास्य उ° ($Ś_1$ om. उ°); K_1 °काश्वः; $K_{2.3}$ B Dc Dn $D_{4.6}$ G_3 कोटिक उ°; D_2 °काख्य उ°; M शैब्यः. — ^{b}) D_2 राजपत्नी. M_1 तर° (for यश°). — ^{d}) B_4 T_2 G_1 transp. महिषी and संमता.

6 ^{a}) B_4 T_1 $G_{2.4}$ M_1 om. च. — ^{b}) T_2 G_1 या वै प्रियतमा सती. — ^{c}) $Ś_1$ यथा; K_2 तथा (for तया). G_1 सौवीरान्. — ^{d}) $Ś_1$ $K_{1.2}$ सुवीरां; $B_{1.4}$ Dc T_1 $G_{2.4}$ सौवीरान्; G_1 प्रयाहि. $K_{1.2}$ सुमुखीं; K_4 $B_{1.4}$ Dc $D_{2.5}$ सुमुखी; G_2 सुकृती. $B_{2.3}$ Dn $D_{4.6}$ G_3 सौवीराभिमुखो व्रज.

7 T_2 G_1 om. the ref. — ^{b}) K_3 पश्याम; $B_{2.4}$ D_1 $G_{1.3}$ पश्यामि; T_2 नापश्यं. $K_{1.2}$ प्रति (for इति). — ^{c}) $Ś_1$ K Dc $D_{1-3.5}$ T_2 G_1 नृपः (for पतिः). D_5 सौवीरसिंहानां; T_1 G_2 सुवीरसिंधूनां.

8 ^{a}) T_1 तत्; T_2 M_1 सं· (for स). $B_{1.3.4}$ Dn $D_{4.6}$ G_3 M पुण्यं (for शून्यं). $G_{2.4}$ स प्रविश्याश्रमपदं. — ^{b}) $Ś_1$ $K_{1.2}$ सिंहीगोष्ठ·; T_1 सिंहपल्लीं; G_1 M_1 सिंहकोष्ठं; G_4 सिंहकोष्ठ·. B_4 (m as in text) मृगो (for वृको). — ^{c}) $Ś_1$ $K_{1.2}$ आत्मनः. D_1 मुदितः (for सप्तमः). B_4m आत्मनाभिमुखः कृष्णाम्; T_2 $G_{1.2}$ आत्मना सप्तदशमः. — ^{d}) T_2 $G_{1.2}$ कृष्णां (for इदं). B_4 इदमित्यब्रवीद्वचः; T_1 G_4 M अथोवाच हसन्निव (G_4 महीपते).

9 D_4 om. 9. — ^{b}) B_1 G_4 हि (for ऽपि). — ^{c}) T_2 येषां कुशलकामासीत्. — ^{d}) T G_4 तेषां (for तेऽपि). T $G_{2.4}$ अनामयं. G_1 तेषां संप्रत्यनामयं.

10 K_2 B_1 Dc Dn $D_{2.4-6}$ ins. after the ref.: B_{2-4} ins. after 10: T G ins. after 1201*:

1200* अपि ते कुशलं राज्ये राष्ट्रे कोशे बले तथा ।
कच्चिदेकः शिबीनाढ्यान्सौवीरान्सह सिन्धुभिः ।
अनुतिष्ठसि धर्मेण ये चान्ये विदितास्त्वया ।

[(L. 1) Dn राजन् (!); T G राष्ट्रे (for राज्ये). T G तथा कोशे च सैंधव. — (L. 2) D_5 अथ; T $G_{1.2.4}$ सर्वान् (for आढ्यान्). Dc_2 सह बंधुभिः; T $G_{1.2.4}$ चाप्यकंटकान्. — (L. 3) T G विजिताः. G_1 स्मृताः (for त्वया).]

— D_1 om. 10-11. — ^{a}) G_4 राजन् (for राजा). — ^{b}) $Ś_1$ K Dc_2 $D_{2.3.5}$ धर्म° (for कुन्ती°). — ^{d}) $Ś_1$ K Dc_2 $D_{2.3.5}$ अनु° (for परि°). — After 10, B_{2-4} ins. 1200*; while T G ins.:

1201* अपि त्वं कुशली राजन्सहामात्यः सहप्रजः ।,

followed by 1200*.

C. 3. 25623
B. 3. 267. 13
K. 3. 268. 13

पाद्यं प्रतिगृहाणेदमासनं च नृपात्मज ।
मृगान्पञ्चाशतं चैव प्रातराशं ददानि ते ॥ ११
ऐणेयान्पृषतान्न्यङ्कून्हरिणाञ्शरभाञ्शशान् ।
ऋश्यान्रुरूञ्शम्बरांश्च गवयांश्च मृगान्बहून् ॥ १२
वराहान्महिषांश्चैव याश्चान्या मृगजातयः ।
प्रदास्यति स्वयं तुभ्यं कुन्तीपुत्रो युधिष्ठिरः ॥ १३

जयद्रथ उवाच ।

कुशलं प्रातराशस्य सर्वा मेऽपचितिः कृता ।
एहि मे रथमारोह सुखमाप्नुहि केवलम् ॥ १४
गतश्रीकांश्च्युतान्राज्यात्कृपणान्गतचेतसः ।
अरण्यवासिनः पार्थान्नानुरोद्धुं त्वमर्हसि ॥ १५
न वै प्राज्ञा गतश्रीकं भर्तारमुपयुञ्जते ।
युञ्जानमनुयुञ्जीत न श्रियः संक्षये वसेत् ॥ १६
श्रिया विहीना राज्याच्च विनष्टाः शाश्वतीः समाः ।
अलं ते पाण्डुपुत्राणां भक्त्या क्लेशमुपासितुम् ॥ १७
भार्या मे भव सुश्रोणि त्यजैनान्सुखमाप्नुहि ।
अखिलान्सिन्धुसौवीरानवाप्नुहि मया सह ॥ १८

वैशंपायन उवाच ।

इत्युक्ता सिन्धुराजेन वाक्यं हृदयकम्पनम् ।
कृष्णा तस्मादपाक्रामद्देशात्सभ्रुकुटीमुखी ॥ १९
अवमत्यास्य तद्वाक्यमाक्षिप्य च सुमध्यमा ।
मैवमित्यब्रवीत्कृष्णा लज्जस्वेति च सैन्धवम् ॥ २०
सा काङ्क्षमाणा भर्तॄणामुपयानमनिन्दिता ।
विलोभयामास परं वाक्यैर्वाक्यानि युञ्जती ॥ २१

इति श्रीमहाभारते आरण्यकपर्वणि एकपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५१ ॥

---

11 D_1 om. 11 (cf. v.l. 10). — ^{a}) B_2 T $G_{1.2.4}$ त्वम् (for [इ]दम्). — ^{c}) K_1 D_3 पंचशतं. Ś$_1$ चापि; $K_{1.2}$ चास्य (for चैव). T_1 G_1 मृगान्हत्वा मृगीं चैव; T_2 मृगान्हतान्मृतांश्चैव; $G_{2.4}$ मृगान्विता मृगीश्चैव. — ^{d}) G_4 प्रातराशीन्. $K_{3.4}$ $D_{2.3}$ T $G_{1.2.4}$ ददामि.

12 ^{a}) Ś$_1$ $K_{1.2}$ Dc D_3 एणेयान्. T_1 न्यंकुकांश्चैव (for पृषतान्न्यङ्कून्). — ^{b}) M_1 शलभान्. G_4 शकान्; M_1 शलान् (for शशान्). — ^{c}) Ś$_1$ $K_{1.2}$ $B_{2.3}$ Dc_1 $D_{3.5}$ ऋष्यान्; K_3 $B_{1.4}$ Dc_2 Dn $D_{1.2.4.6}$ T G_3 ऋक्षान्. Ś$_1$ K_1 कुरूञ् (for रुरूञ्)! Ś$_1$ $K_{1.2}$ शंभरांश्च; D_3 M_1 च सृमरान्; T_1 M_2 वराहांश्च; T_2 $G_{1.2.4}$ च चमरान्.

14 ^{b}) Ś$_1$ सर्वस्य; $K_{1.2}$ सर्वापि; D_3 सदा मे; D_5 सर्वा च (for सर्वा मे). B Dc Dn $D_{4.6}$ G_3 सर्वं मे दित्सितं (B_1 तृषितं) त्वया. — ^{c}) K_4 आरुह्य.

15 ^{a}) T_2 $G_{1.2.4}$ हत° (for गत°). B Dn $D_{4.6}$ हृतराज्यान्. — ^{b}) D_5 नष्ट° (for गत°). — ^{c}) K_3 T_2 आरण्य°. — ^{d}) D_1 इहा° (for त्वम°).

16 ^{a}) K_4 $B_{1.3}$ Dn_1. n_2 T_2 G_3 नैव; $G_{1.2.4}$ न तु; M न हि (for न वै). Ś$_1$ पूज्या; K_1 G_4 प्रज्ञा. M गतश्रीकान्. T_1 न तु प्राज्ञान्गतश्रीकान्. — ^{b}) Ś$_1$ $K_{1.2}$ $B_{1.2.4}$ उपभुंजते; K_3 Dc °युंजसे (K_3m °भुंजसे); G_2 °युज्यते. T_1 M भर्तॄन्समुपयुं(T_1 °भुं)जते. — ^{c}) Ś$_1$ $K_{1.2}$ भुंजानम्. $K_{1.3}$ Dc_2 D_{1-3} T_1 M उपयुं(T_1 °भुं)जीत. — ^{d}) B_1 श्रिया न; B_4 श्रियश्च (for न श्रियः). Ś$_1$ संक्षयं; B_4 Dn_2 $D_{1.2.4.6}$ प्रक्षये; T_2 संक्षयो. T_2 भवेत् (for वसेत्).

17 ^{a}) $B_{3.4}$ विहीनान्. Dn राष्ट्राच्च (!). — ^{b}) S (except G_3) च्युतास्ते (for विनष्टाः). — ^{c}) B_1 अनष्टे (for अलं ते).

18 18^{a} = 1. 67. 1^{c}, etc. — ^{b}) $K_{3.4}$ Dc_2 D_{1-3} T_1 G_4 M_1 त्यजैतान्. — ^{d}) $B_{1.4}$ तानाप्नुहि; $B_{2.3}$ Dn D_4. T_2 G_3 आप्नुहि त्वं; $G_{1.2.4}$ प्राप्नुहि त्वं (for अवाप्नुहि).

19 K_4 om. 19. — ^{d}) G_1 क्रोधात् (for देशात्). $B_{3.4}$ Dc सा (for स-).

20 ^{a}) Ś$_1$ K Dc $D_{1-3.5}$ अनादृत्य तु (K_4 Dc च); $B_{1.3}$ अवमन्यास्य. T_1 $G_{2.4}$ M transp. तद् and वाक्यं. — ^{b}) S (except G_3) तदाक्षिप्य (for आक्षिप्य च). — ^{c}) M_2 वाक्यं (for कृष्णा). — ^{d}) T_1 वधस्वेति; T_2 $G_{1.4}$ त्यज (for लज्ज°). B_4 लज्जसे नेति सैंधवं; Dc_2 न लज्जस्वेति सैंधव

21 ^{b}) B_{1-3} Dc Dn D_3 उपयातम्; D_5 उपस्थानम्. Ś$_1$ K $B_{1.4}$ Dn — ^{c}) $G_{1.2}$ विलंब° (for विलोभ°). D_{1-6} परैर् (for परं). — ^{d}) T [अ]योजयत्; M योजयत (for युञ्जती). $G_{1.2.4}$ वाक्यैर्वाक्यं न योजयत् (G_2 न्ययोजयेत्). — After 21, T $G_{1.2.4}$ ins.:

1202* द्रौपदी ।

नैवं वद महाबाहो न्याय्यं त्वं न च मन्यसे ।
पाण्डूनां धार्तराष्ट्राणां स्वसा चैव कनीयसी ।
दुःशला नाम तस्यास्त्वं भर्ता राजकुलोद्भवः ।
मम भ्राता च न्याय्येन त्वया रक्ष्या महारथ ।

२५२

वैशंपायन उवाच ।
सरोषरागोपहतेन वल्गुना
सरागनेत्रेण नतोन्नतभ्रुवा ।
मुखेन विस्फूर्य सुवीरराष्ट्रपं
ततोऽब्रवीत्तं द्रुपदात्मजा पुनः ॥ १
यशस्विनस्तीक्ष्णविषान्महारथा-
नधिक्षिपन्मूढ न लज्जसे कथम् ।
महेन्द्रकल्पान्निरतान्स्वकर्मसु
स्थितान्समूहेष्वपि यक्षरक्षसाम् ॥ २
न किंचिदीड्यं प्रवदन्ति पापं
वनेचरं वा गृहमेधिनं वा ।
तपस्विनं संपरिपूर्णविद्यं
भषन्ति हैवं श्वनराः सुवीर ॥ ३
अहं तु मन्ये तव नास्ति कश्चि-
देतादृशे क्षत्रियसंनिवेशे ।
यस्त्वाद्य पातालमुखे पतन्तं
पाणौ गृहीत्वा प्रतिसंहरेत ॥ ४
नागं प्रभिन्नं गिरिकूटकल्प-
मुपत्यकां हैमवतीं चरन्तम् ।
दण्डीव यूथादपसेधसे त्वं

B. 3. 15643
B. 3. 268. 5
K. 3. 269. 5

धर्मिष्ठानां कुले जातो न धर्मं त्वमवेक्षसे । [5]
वैशंपायनः ।
इत्युक्तः सिन्धुराजोऽपि वाक्यमुत्तरमब्रवीत् ।
राज्ञां धर्मं न जानीषे स्त्रियो रत्नानि चैव हि ।
साधारणानि लोकेऽस्मिन्प्रवदन्ति मनीषिणः ।
स्वसा च स्वस्त्रिया चैव भ्रातृभार्या तथैव च ।
संगृह्णन्ति च राजानस्ताश्च तत्र नृपोद्भवाः । [10]

[(L. 1) T1 मैवं (for नैवं). T2 बुध्यसे (for मन्यसे). — (L. 3) T2 राजकुलोद्वह. — (L. 5) G1 अपे°; G4 उपे° (for अवे°). — (L. 10) T2 न संगृह्णंति राजानस्. G4 नृपोत्तमाः.]

Colophon. — *Major parvan:* Ś1 K1. 2 Dn2 G2. 4 आरण्य. — *Sub-parvan:* Ś1 K1. 3. 4 B D G3 द्रौपदीप्रमाथ. — *Adhy. name:* M2 जयद्रथप्रार्थनं. — *Adhy. no.* (figures, words or both): Dn 265 (Dn3 266); D1 267; T1 G4 M (M2 *inf. lin.*) 255 (M2 orig. 257); T2 G1 252; G2 254. — *Śloka no.:* Dn1 23; Dn2 22; Dn3 24; D1 21.

252

1 Dc om. the ref. — a) Ś1 K4 सा रागरोषोपहतेन; K1. 2 सरागरोषोप°; K3 B1 सा रागदोषोप°; B2–4 D1. 2 सा रोषरागोप°; Dc D3. 5 सा रागरोषाप°; T G1. 4 सरोषवाचोपहितेन; G2 M सा रोषवाचोपहतेन. K1. 2 G1 फल्गुना; D2 चक्षुषा (for वल्गुना). — b) Ś1 K3 B1 D3 M2 नतो(D3 तथो-; M2 ततो)न्नतभ्रुणा; D2 G2. 4 ततो(D2 °थो)न्नतभ्रुवा; T1 ततो नतभ्रूः. — c) Ś1 K1–3 D2. 5 G1 M1 विस्फूर्ज्य; B1 G4 विस्फार्य. Ś1 K B1 D3 °राष्ट्रजं; Dc D1 °राजं; T1 °राष्ट्रकं.

2 a) Ś1 K1–3 तीक्ष्णमुखान्. Ś1 K D1–3. 5 महोरगान् (for महारथान्). — b) B1–3 Dc1 Dn D4. 6 G3 अभिब्रुवन् (for अधिक्षिपन्). B3 वि- (for न). — c) K4 नरेंद्र°; T2 G1. 2 यमेंद्र° (for महेन्द्र°). D3 S (except G3) स्वधर्मे (for स्वकर्मसु). — d) D1 T2 स्थिरान्. Dc समृद्धे (for समूहे).

3 a) K4 B4m कंचिद्. K3 अन्यं; B1 ईड्याः; B4m इष्टं; T1 एवं; G1 M आर्यं; G2. 4 आर्याः (for ईड्यं). Ś1 K Dc D2. 3 (before corr.) G3 पापा; D3 (after corr.). 5 पार्था; T G1 वाचा (for पापं). — b) Ś1 D1 °मेधिनां. — d) K3 B1 G1 भवंति; G2. 4 भजंति (for भषन्ति). Ś1 K1. 2 श्वानाः; K3 नैवं; B1 नैव; T G1. 2. 4 चैवं; M चैव (for हैवं): B3 T2 स्वनराः; T1 शुनकाः; G1. 4 च नराः; G3 सुनराः (for श्वनराः).

4 c) B1. 3 Dn D4 G3 यस्त्वद्य; T G1. 2. 4 M यस्त्वां हि. — d) Ś1 K1. 2 पाणि. G2 प्रतिसंरभेत.

5 a) Ś1 K D1. 3. 5 °मात्रम्; S (except G3) °कायम् (for °कल्पम्). — b) K1 अपत्यकां; K4 उत्पत्तिकां; Dc उपेत्य तां; S (except G3) उपेत्य गां. T G1. 3. 4 हैमवतं. — c) K1. 2 B1. 4 D5 अपसेवसे; K4 D1 अपकर्षसे (D1 °सि); B3 Dn1 D2. 4. 6 G3 अपसेधसि; M अवधावसे. T1 दंडेन

C. 3. 15643
B. 3. 268. 5
K. 3. 269. 5

यो जेतुमाशंससि धर्मराजम् ॥ ५
बाल्यात्प्रसुप्तस्य महाबलस्य
सिंहस्य पक्ष्माणि मुखाल्लुनासि ।
पदा समाहत्य पलायमानः
क्रुद्धं यदा द्रक्ष्यसि भीमसेनम् ॥ ६
महाबलं घोरतरं प्रवृद्धं
जातं हरिं पर्वतकन्दरेषु ।
प्रसुप्तमुग्रं प्रपदेन हंसि
यः क्रुद्धमासेत्स्यसि जिष्णुमुग्रम् ॥ ७
कृष्णोरगौ तीक्ष्णविषौ द्विजिह्वौ
मत्तः पदाक्रामसि पुच्छदेशे ।
यः पाण्डवाभ्यां पुरुषोत्तमाभ्यां
जघन्यजाभ्यां प्रयुयुत्ससे त्वम् ॥ ८
यथा च वेणुः कदली नलो वा
फलन्त्यभावाय न भूतयेऽऽत्मनः ।
तथैव मां तैः परिरक्ष्यमाणा-
मादास्यसे कर्कटकीव गर्भम् ॥ ९

जयद्रथ उवाच ।

जानामि कृष्णे विदितं ममैत-
द्यथाविधास्ते नरदेवपुत्राः ।
न त्वेवमेतेन विभीषणेन
शक्या वयं त्रासयितुं त्वयाद्य ॥ १०
वयं पुनः सप्तदशेषु कृष्णे
कुलेषु सर्वेऽनवमेषु जाताः ।
षड्भ्यो गुणेभ्योऽभ्यधिका विहीना-
न्मन्यामहे द्रौपदि पाण्डुपुत्रान् ॥ ११
सा क्षिप्रमातिष्ठ गजं रथं वा
न वाक्यमात्रेण वयं हि शक्याः ।
आशंस वा त्वं कृपणं वदन्ती
सौवीरराजस्य पुनः प्रसादम् ॥ १२

द्रौपद्युवाच ।

महाबला किं त्विह दुर्बलेव

युद्धादवसेधसि त्वं; T_2 $G_{1.2.4}$ दंडीव दंडेन हि धावसि (T_2 G_2 °से) त्वं. — ^{d}) M_1 धर्मपुत्रं.

6 ^{a}) D_1 T_1 G_1 M_1 बलात् (for बाल्यात्). $B_{1.3}$ महाधनस्य. — ^{c}) $Ś_1$ K_1 पलायमानं; T_1 पलायसे त्वं.

7 ^{a}) $Ś_1$ Dc_2 D_5 T_1 $G_{1.4}$ घोरतमं. $Ś_1$ $K_{1.2}$ च (for प्र-). — ^{b}) T_1 $G_{1.4}$ M °कंदरासु. — ^{d}) $Ś_1$ K_{1-3} आपत्स्यसि; K_4 D_3 आपश्य°; B Dc Dn $D_{2.4-6}$ G_3 आयोत्स्य°; D_1 T_1 आशंस° (for आसेत्स्य°). $K_{1.2}$ मूढ जिष्णुं (for जिष्णुमुग्रम्).

8 ^{a}) T_2 $G_{1.4}$ M_2 तीक्ष्णो° (for कृष्णो°). K_4 दीप्तविषौ; Dc Dn D_{4-6} तीक्ष्णमुखौ; $D_{2.3}$ दीप्तमुखौ; G_2 तीव्रभुजौ; G_4 तीव्रविषौ. $Ś_1$ $K_{1.2}$ सुजिह्वौ; $G_{2.4}$ भुजंगमौ. — ^{b}) T_1 मुग्धः; T_2 $G_{1.2.4}$ M मत्तौ. G_1 पुच्छमूले. — ^{c}) K_4 D_{1-4} यत् (for यः).

9 ^{a}) D_3 (by corr.) कदलीदले च; T_1 M कदलीदलो वा. — ^{b}) $Ś_1$ $K_{1.3.4}$ Dc Dn_2 $D_{2-4.6}$ G_3 फलत्य°. $Ś_1$ $K_{1.2}$ B_4 D_3 (by corr.) पुनः (for ऽऽत्मनः). T_1 $G_{1.2.4}$ M पराभवायैव फलं बिभर्ति. — ^{d}) $Ś_1$ $K_{1.2}$ कर्कं (for गर्भम्).

10 ^{b}) S (except G_3) यथागता (T_1 °विधा) द्रौपदि पांडुपुत्राः. — ^{c}) T_1 बिभर्षि तेन (for विभीषणेन). — ^{d}) G_1 भवत्या (for त्वयाद्य).

11 K_3 om. 11. D_2 transp. 11 and 12. — ^{a}) $Ś_1$ त्विमे (for पुनः). — ^{c}) B_1 [ऽ]प्यधिकाः; Dc G_3 [ऽ]भ्यधिकान्; D_2 T_2 G_2 M [ऽ]भ्यधिकं; T_1 $G_{1.4}$ ह्यधिकं. $K_{1.4}$ न हीनान्; B_1 [अ]त्रहीनान्; $D_{1.2}$ निहीनान् (for विही°). — ^{d}) B_1 संध्या° (for मन्या°).

12 Before 12, $Ś_1$ $K_{1.2}$ $D_{2.5}$ ins. चित्रसेन उ°; K_3 कोटिः. — D_2 transp. 11 and 12. — ^{a}) $Ś_1$ K Dc $D_{1.3.5}$ एहि त्वमातिष्ठ रथं गजं वा. — ^{b}) S (except T_2 G_3) स्म (for हि). — ^{c}) B_1 आशंस वाक्यं; T_1 आशंससे त्वं; M_2 आशाससे त्वा (for आशंस वा त्वं). — $Ś_1$ om. (hapl.) 12^{d}–13^{a}. — ^{d}) B_{2-4} सौवीरराज्यस्य; M_2 सुवीरराजस्य. K_2 पुरः; D_2 हि नः; D_5 कुरु (for पुनः). G_3 प्रवादम्.

13 $Ś_1$ om. 13^{a} (cf. v.l. 12); M_2 om. the ref. — ^{a}) T_2 G_4 महाबलाः. M न्विह. T G_2 वा; $G_{1.4}$ M वै (for [इ]व). — ^{b}) K_4 पंचाल°; $B_{3.4}$ D_6 G_3 M_2 सुवीर°; T $G_{1.2.4}$ पांचाल° (for सौवीर°). K_4 T_1 $G_{1.2.4}$ सुताहम्; Dc नताहम् (for मताहम्). $Ś_1$ $K_{1.2}$ अस्य; D_3 अद्य (for अस्मि). — ^{c}) $K_{3.4}$ B D G_3 नाहं; T_1 कथं; T_2 $G_{1.2.4}$ साहं (for याहं). $Ś_1$ $K_{1.2}$ T $G_{1.2.4}$ प्रमादादिह.

सौवीरराजस्य मताहमस्मि ।
याहं प्रमाथादिह संप्रतीता
सौवीरराजं कृपणं वदेयम् ॥ १३
यस्या हि कृष्णौ पदवीं चरेतां
समास्थितावेकरथे सहायौ ।
इन्द्रोऽपि तां नापहरेत्कथंचि-
न्मनुष्यमात्रः कृपणः कुतोऽन्यः ॥ १४
यदा किरीटी परवीरघाती
निघ्नन्रथस्थो द्विषतां मनांसि ।
मदन्तरे त्वद्ध्वजिनीं प्रवेष्टा
कक्षं दहन्नग्निरिवोष्णगेषु ॥ १५
जनार्दनस्यानुगा वृष्णिवीरा
महेष्वासाः केकयाश्चापि सर्वे ।
एते हि सर्वे मम राजपुत्राः
प्रहृष्टरूपाः पदवीं चरेयुः ॥ १६
मौर्वीविसृष्टाः स्तनयित्नुघोषा
गाण्डीवमुक्तास्त्वतिवेगवन्तः ।
हस्तं समाहत्य धनंजयस्य
भीमाः शब्दं घोरतरं नदन्ति ॥ १७
गाण्डीवमुक्तांश्च महाशरौघा-
न्पतंगसंघानिव शीघ्रवेगान् ।
सशङ्खघोषः सतलत्रघोषो
गाण्डीवधन्वा मुहुरुद्वमंश्च ।
यदा शरानर्पयिता तवोरसि
तदा मनस्ते किमिवाभविष्यत् ॥ १८
गदाहस्तं भीममभिद्रवन्तं
माद्रीपुत्रौ संपतन्तौ दिशश्च ।
अमर्षजं क्रोधविषं वमन्तौ
दृष्ट्वा चिरं तापमुपैष्यसेऽधम ॥ १९
यथा चाहं नातिचरे कथंचि-
त्पतीन्महार्हान्मनसापि जातु ।
तेनाद्य सत्येन वशीकृतं त्वां C. 3. 15669 B. 3. 268. 21 K. 3. 269. 21

K3. 4 D1–3 G2 संप्रभीता; B1 °वृत्ता; T G4 °हीणा. — d) M2 सुवीर°.

14 a) T2 G2. 4 यस्याश्च; G1 यस्यां च. — b) K4 T1 समासिताव्. Ś1 K Dc2 एकरथौ (K4 °थं). K3. 4 D1–3 सखायौ; B Dn D4. 6 G3 समेतौ (for सहायौ). — c) K3. 4 B1. 4 D3 नोत (K4 °प·) हरेत्; T2 नाभिभवेत्.

15 a) B1. 2. 4 Dc1 Dn D4. 6 T1 G3 M1 यथा; T2 G1. 2. 4 सदा (for यदा). — c) Ś1 मां नंदयस; K1 मासांतरे; K2 सामंतरे; M2 तदंतरे (for मदंतरे). K2 G1 तद्-; T1 तु; G2. 4 ते (for त्वद्-). Ś1 K2. 3 ध्वजिनीः. D3 प्रविष्टः; T1 प्रवेष्टः. — d) K3 Dc2 T1 दहत्यग्निर्. Ś1 K Dc D1–3. 5 इवोष्ण(Dc °भ्र)तेजाः; T1 इवोष्णकाले; G1 इवोष्णकेषु.

16 a) K4 D1 T1 जनार्दनस्याप्यनुगा वृष्णिवीरा; B Dc Dn D4. 6 G3 जनार्दनः सां(D6 G3 सौं)धकवृष्णिवीरो; G2. 4 °नस्यानुकवृष्णिवीरो (G4 °रा). — b) K4 B3 Dn2. n3 D1. 6 G3 कैकया°. S (except T1 G3) चैव पंच (for चापि सर्वे). — c) Ś1 K Dc D1–3. 5 समेता (for हि सर्वे).

17 a) T1 M2 °प्रसृष्टाः; G1. 2. 4 °विमुक्ताः; M1 °निसृष्टाः. M2 °घोरा (for °घोषा). — b) T1 ह्यतिवेगवंतः; T2 G1. 2. 4 M ह्यतिवेलमुग्राः. — d) Dc T G1. 2. 4 शरा (for शब्दं). K3 घोषतरं; B1 घोररवं; Dc घोरभयं. T1 पतंति (for नदन्ति).

18 After 18ab, N T1 G3 ins.:

1203* यदा द्रष्टास्यर्जुनं वीर्यशालिनं
तदा स्वबुद्धिं प्रतिनिन्दितासि ।

[(L. 1) Ś1 K1. 2. 4 D3 (by transp.) द्रष्टा यदा; D1 यदा स्रष्टा; T1 दृष्ट्वा ह्यथा. K1. 2 T1 ह्रि (for [अ]सि). K3 B4 Dc D1–3. 6 [अ]र्जुनेन प्रयु(K3 D2. 3. 6 °मु)क्तान्; T1 [अ]र्जुनवीर्यशालिनः. Ś1 वै सृजंतं; K1. 2. 4 वीर(K4 °र्यं)शालिं (for वीर्यशालिनं). — (L. 2) T1 स्वयुद्धं (for स्वबुद्धिं). K D1–3. 5 T1 परि- (for प्रति-).]

— c) Ś1 K1. 2 सततुत्र°. — d) K3 B D (except D1–3. 5) G3 मुहुरुद्वहंश्च; T2 G1 °रन्वहंश्च.

19 b) Ś1 K1. 2 D5 संचरंतौ. T2 G1. 2. 4 हि दृष्ट्वा; M च दृष्ट्वा (for दिशश्च). — M om. 19cd. — c) T1 यदाजय्यौ (for अमर्षजं). T1 G4 वहंतौ (for वमन्तौ). — d) K3 Dc2 D2 भृशं; K4 D1. 3 परं; T1 ध्रुवं (for चिरं). Dc2 नाशम् (for तापम्). K3 Dc2 D1. 2 उपे(Dc2 D2 °पै)ष्यसि; K4 अवेक्ष्यसे; D3. 5 T1 उपेष्यसे. K3 Dc2 D1. 2. 5 T1 त्वम् (for ऽधम). Ś1 K1 दृष्ट्वा भृशं तापयसे नृपाधम;

C. 3. 15659
B. 3. 268. 21
K. 3. 269. 21

द्रष्टासि पार्थैः परिकृष्यमाणम् ॥ २०
न संभ्रमं गन्तुमहं हि शक्ये
त्वया नृशंसेन विकृष्यमाणा ।
समागताहं हि कुरुप्रवीरैः
पुनर्वनं काम्यकमागता च ॥ २१
वैशंपायन उवाच ।
सा ताननुप्रेक्ष्य विशालनेत्रा
जिघृक्षमाणानवभर्त्सयन्ती ।
प्रोवाच मा मा स्पृशतेति भीता
धौम्यं प्रचुक्रोश पुरोहितं सा ॥ २२
जग्राह तामुत्तरवस्त्रदेशे
जयद्रथस्तं समवाक्षिपत्सा ।
तया समाक्षिप्ततनुः स पापः
पपात शाखीव निकृत्तमूलः ॥ २३
प्रगृह्यमाणा तु महाजवेन
मुहुर्विनिःश्वस्य च राजपुत्री ।
सा कृष्यमाणा रथमारुरोह
धौम्यस्य पादावभिवाद्य कृष्णा ॥ २४
धौम्य उवाच ।
नेयं शक्या त्वया नेतुमविजित्य महारथान् ।
धर्मं क्षत्रस्य पौराणमवेक्षस्व जयद्रथ ॥ २५
क्षुद्रं कृत्वा फलं पापं प्राप्स्यसि त्वमसंशयम् ।
आसाद्य पाण्डवान्वीरान्धर्मराजपुरोगमान् ॥ २६
वैशंपायन उवाच ।
इत्युक्त्वा ह्रियमाणां तां राजपुत्रीं यशस्विनीम् ।
अन्वगच्छत्तदा धौम्यः पदातिगणमध्यगः ॥ २७

इति श्रीमहाभारते आरण्यकपर्वणि द्विपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५२ ॥

T_2 $G_{1.2.4}$ दृष्ट्वा समंतादुपवेक्ष्य (G_3 °दभिवीक्ष्य)सैथ.

☞ For 20, 22^{ab}, 23 and 24, cf. passage 307* of the Virāṭa-parvan (lines 1–7, 9–12).

20 ^{a}) K_3 D_4 T_2 $G_{1.2.4}$ यदा (for यथा). B_1 $D_{3.6}$ वाहं; G_4 चरन् (for चाहं). K $B_{3.4}$ $D_{1.3.5}$ नाभिचरे; Dc नाभिचरेत्. $B_{1.4}$ T_2 कदाचित्. — ^{c}) T_1 तेनास्य. — ^{d}) T $G_{1.2.4}$ द्रक्ष्यामि; M पश्यामि. B_1 D_2 परिक्लिश्यमाणं; M_2 °शुष्यमाणं.

21 ^{a}) D_3 कर्तुम् (for गन्तुम्). B_1 प्रसह्ये; B_4 हि शक्ये; Dc हि शक्या. — ^{d}) $B_{2.3}$ Dn $D_{4.6}$ G_3 [अ]स्मि (for च).

22 B S (except G_3) om. the ref. — ^{a}) $Ś_1$ K $D_{2.3}$ (orig.)$._5$ अभिप्रेक्ष्य; T_1 G_1 M उपप्रे°; T_2 $G_{2.4}$ समुत्प्रे°. $Ś_1$ K_4 om. विशाल°; K_1 जिघृक्षमाणा; M_2 विशालनेत्रां. D_3 (by corr.) स तामभिप्रेक्ष्य विशालनेत्रां. — ^{b}) T_2 परि-; G_2 अपि; G_4 अभि- (for अव-). K सौवीरराजेन न भर्त्स°; K_4 Dn_2 जिघृक्षमाणा न च भर्त्स°; D_3 (by corr.) °माणो न च भर्त्सयंतीं. — ^{c}) $Ś_1$ $K_{1.2.4}$ Dc $D_{2.3.5}$ उवाच (for प्रो°). D_2 मा मां. K_3 उवाच मा संस्पृशतीति मत्वा; T $G_{1.2.4}$ M पुरा ह्ययं मा (T_1 नराधमो मां; T_2 पुरा ह्यधर्मां; G_1 पुरा ह्यधर्मा) स्पृशतीति मत्वा. — ^{d}) D_3 च; S (except G_3) वै (for सा).

23 ^{a}) $Ś_1$ उत्तम° (for उत्तर°). — ^{b}) $K_{3.4}$ Dc_2 D_{1-3} सहसा°; T_2 $G_{2.4}$ स समा° (for समवा°). — ^{c}) D_3 समुत्क्षिप्ततनुः. G_4 पापी (for पापः).

24 ^{a}) M_2 महाजनेन. — ^{b}) Some MSS. विनिश्वस्य. T_2 $G_{2.4}$ Dc_2 T_1 तु (for च). — ^{c}) K_3 Dc D_2 विकृष्य°; T_2 $G_{2.4}$ M सामृष्य°. — ^{d}) D_2 सा धौम्य- (for धौम्यस्य). $Ś_1$ K_2 [अ]भिनंद्य; $K_{1.4}$ $D_{1.3}$ [अ]भिवंद्य.

25 ^{a}) T_1 बलान् (for त्वया). $G_{2.4}$ [आ]दातुम्; M_1 जेतुम् (for नेतुम्). — ^{b}) D_3 अभिजित्य; T_2 M_2 अवजित्य; $G_{2.4}$ $G_{1.2.4}$ अवमत्य. — ^{c}) $Ś_1$ क्षत्रधर्मस्य; T_1 तत्र धर्मं न; $G_{2.4}$ धर्मं क्षत्रस्य. T G_1 पौराणाम्.

26 ^{a}) $Ś_1$ K_2 फले; K_1 बले (for फलं). B_1 D_3 पाप. — ^{b}) B Dc S (except T_1 G_3) क्षुद्रं खलु नृशंसात्मन्. K_4 B D (except Dn $D_{4.6}$ G_3 transp. प्राप्स्यसि and त्वं. K_4 B D (except Dc_2 D_1) G_3 न संशयः; T असंशयः.

Colophon. — *Major parvan :* $Ś_1$ $K_{1.2}$ Dn_2 $G_{2.4}$ आरण्य. — *Sub-parvan :* $Ś_1$ $K_{1.3.4}$ B Dc $Dn_{1.}$ n_3 D_{1-6} T_1 G_3 M_2 द्रौपदीप्रमाथ. — *Adhy. no.* (figures, words or both) : Dn 266 (Dn_3 267) ; D_1 268; T_1 G_4 M (M_2 *inf. lin.*) 256 (M_2 orig. 258); T_2 G_1 253 ; G_2 255. — *Śloka no.* : Dn D_1 28..

२५३

वैशंपायन उवाच ।
ततो दिशः संप्रविहृत्य पार्था
मृगान्वराहान्महिषांश्च हत्वा ।
धनुर्धराः श्रेष्ठतमाः पृथिव्यां
पृथक्चरन्तः सहिता बभूवुः ॥ १
ततो मृगव्यालगणानुकीर्णं
महावनं तद्विहगोपघुष्टम् ।
भ्रातॄंश्च तानभ्यवदद्युधिष्ठिरः
श्रुत्वा गिरो व्याहरतां मृगाणाम् ॥ २
आदित्यदीप्तां दिशमभ्युपेत्य
मृगद्विजाः क्रूरमिमे वदन्ति ।
आयासमुग्रं प्रतिवेदयन्तो
महाहवं शत्रुभिर्वावसानम् ॥ ३
क्षिप्रं निवर्तध्वमलं मृगैर्नो
मनो हि मे दूयति दह्यते च ।
बुद्धिं समाच्छाद्य च मे समन्यु-
रुद्धूयते प्राणपतिः शरीरे ॥ ४
सरः सुपर्णेन हृतोरगं यथा
राष्ट्रं यथाराजकमात्तलक्ष्मि ।
एवंविधं मे प्रतिभाति काम्यकं
शौण्डैर्यथा पीतरसश्च कुम्भः ॥ ५
ते सैन्धवैरत्यनिलौघवेगै-
र्महाजवैर्वाजिभिरुह्यमानाः ।
युक्तैर्बृहद्भिः सुरथैर्नृवीरा-
स्तदाश्रमायाभिमुखा बभूवुः ॥ ६
तेषां तु गोमायुरनल्पघोषो
निवर्ततां वाममुपेत्य पार्श्वम् ।
प्रव्याहरत्तं प्रविमृश्य राजा
प्रोवाच भीमं च धनंजयं च ॥ ७
यथा वदत्येष विहीनयोनिः C. 3. 15674 B. 3. 269. 8 K. 3. 270. 8

253

1 ^{a}) K$_{3.4}$ D$_{1.3}$ संपरिहृ(K$_3$ °कृ)त्य; T G$_{1.2.4}$ संपरिवृत्य; M संपरिसृत्य. M$_2$ पांडवा (for पार्था). — ^{c}) B$_1$ D$_1$ G$_1$ श्रेष्ठतराः. — ^{d}) K$_3$ D$_1$ सह सं- (for सहिता).

2 ^{a}) K D$_{1.3.5}$ °गजा°; T$_1$ °मृगा°; G$_{1.2.4}$ M °जना° (for °गणा°). — ^{b}) K$_4$ D$_3$ T$_2$ G$_1$ महद्वनं. D$_1$ T$_1$ G$_1$ °जुष्टं (for °घुष्टम्). — ^{c}) Ś$_1$ K$_{1.2}$ त्वरन्; K$_{3.4}$ G$_1$ M$_2$ चरन्; D$_{1.3}$ चरंतो (for च तान्). Dc D$_2$ न्यवदद्; T$_1$ M$_2$ अभ्यवदन्. — ^{d}) T$_2$ वचो (for गिरो).

3 K$_3$ om. 3. — ^{a}) Ś$_1$ K$_{1.2}$ आदीप्तदीप्तां; K$_4$ D$_3$ आदित्यजुष्टां. T$_1$ अभ्युपेता; M$_1$ अभ्युपेतुर्. — ^{b}) B Dn D$_{4.6}$ T$_2$ मृगा (for मृग-). — ^{c}) M$_2$ यथा समग्रं (for आयासमुग्रं). Ś$_1$ °वेदयंते; K$_{1.2}$ B$_2$ °वेदयंति. — ^{d}) Ś$_1$ महाहवे; B D (except D$_{1.3.5}$) °वनं; T G$_{1.2.4}$ °भयं; G$_3$ Cnp °धनं. Ś$_1$ K$_{1.2}$ बाध°; K$_4$ D$_3$ चाव°; B Dc Dn D$_{2.4-6}$ G$_3$ बाध्य°; D$_1$ आह्वमाने; G$_1$ वध्य° (for वाव°).

4 ^{a}) Ś$_1$ विलंबैर्; K$_1$ मनो हि (for मृगैर्नो). — ^{b}) $_1$ मृगैश्च (for मनो हि). Ś$_1$ K$_4$ D$_3$ दह्यति; K$_{2.3}$ B$_{2-4}$ Dc D$_{1.2.6}$ T$_2$ G$_{1.3}$ M$_1$ दूयते; B$_1$ T$_1$ दह्यते; G$_2$ ग्लायते; G$_4$ ग्लायति (for दूयति). Ś$_1$ K$_4$ B$_1$ D$_3$ G$_{2.4}$ दूयते; T$_1$ द्रुह्यते (for दह्यते). — ^{c}) Ś$_1$ K$_{1.2.4}$ D$_3$ समास्थाद्य; K$_3$ °स्थाय (for °च्छाद्य). — ^{d}) T$_2$ G$_1$ उद्धूयायते; G$_{2.4}$ आधूयते. Ś$_1$ प्राणमतिः; B$_1$ °मिमं (for °पतिः).

5 ^{a}) G$_{2.4}$ हृतोरगेंद्रं (for हृतोरगं यथा). — ^{b}) T$_1$ राज्यं यथा राजसमाप्तलक्ष्मः (sic); T$_2$ G$_{1.2.4}$ M अ(M ह्य)-राजकं राष्ट्रमिवेह शांतं. — ^{d}) D$_5$ °रसं च कुंडं; S (except T$_1$ G$_3$) °सुरश्च कुंभः.

6 ^{a}) Ś$_1$ K T$_2$ तैः (for ते). B$_{2-4}$ Dn D$_{4.6}$ G$_3$ अत्यनिलोग्रवेगैर्; Dc D$_2$ अत्यनिलौघवर्णैर्; T$_2$ G$_{1.2.4}$ अभ्यनिलोद्ध(G$_2$ °लार्थ-; G$_4$ °लोत्थ)वेगैर्. — ^{b}) K$_{3.4}$ D$_3$ S (except G$_3$) महाबलैर्. — ^{c}) K$_4$ B$_{1.4}$ D$_3$ महद्भिः (for बृहद्भिः). B$_1$ पुरुषै°; T$_2$ स्वरथै°; G$_{1.2.4}$ सरथै°.

7 ^{a}) K$_4$ T$_1$ च (for तु). K$_1$ °तेजा (for °घोषो). — ^{b}) K$_{3.4}$ T$_1$ निवर्त्तितां. — K$_3$ om. (hapl.) 7^c–8^b. — ^{c}) K$_1$ B$_1$ T$_1$ G$_4$ प्रव्याहरंतं; D$_3$ प्रत्याहरत्तं. B$_{2-4}$ Dc Dn D$_{1.2.4-6}$ T$_2$ G$_{2.3}$ M तत् (for तं). A few MSS. °मृष्य.

C. 3. 15674
B. 3. 269. 8
K. 3. 270. 8

शालावृको वाममुपेत्य पार्श्वम् ।
सुव्यक्तमस्मानवमन्य पापैः
कृतोऽभिमर्दः कुरुभिः प्रसह्य ॥ ८
इत्येव ते तद्वनमाविशन्तो
महत्यरण्ये मृगयां चरित्वा ।
बालामपश्यन्त तदा रुदन्तीं
धात्रेयिकां प्रेष्यवधूं प्रियायाः ॥ ९
तामिन्द्रसेनस्त्वरितोऽभिसृत्य
रथादवप्लुत्य ततोऽभ्यधावत् ।
प्रोवाच चैनां वचनं नरेन्द्र
धात्रेयिकामार्ततरस्तदानीम् ॥ १०
किं रोदिषि त्वं पतिता धरण्यां
किं ते मुखं शुष्यति दीनवर्णम् ।
कच्चिन्न पापैः सुनृशंसकृद्भिः
प्रमाथिता द्रौपदी राजपुत्री ।
अनिन्द्यरूपा सुविशालनेत्रा
शरीरतुल्या कुरुपुंगवानाम् ॥ ११
यद्येव देवी पृथिवीं प्रविष्टा
दिवं प्रपन्नाप्यथ वा समुद्रम् ।
तस्या गमिष्यन्ति पदं हि पार्था-
स्तथा हि संतप्यति धर्मराजः ॥ १२
को हीदृशानामरिमर्दनानां
क्लेशक्षमाणामपराजितानाम् ।
प्राणैः समामिष्टतमां जिहीर्षे-
दनुत्तमं रत्नमिव प्रमूढः ।
न बुध्यते नाथवतीमिहाद्य
बहिश्चरं हृदयं पाण्डवानाम् ॥ १३
कस्याद्य कायं प्रतिभिद्य घोरा
महीं प्रवेक्ष्यन्ति शिताः शराग्र्याः ।
मा त्वं शुचस्तां प्रति भीरु विद्धि

---

8 K$_3$ om. 8^{ab} (cf. v.l. 7). — ^{a}) Ś$_1$ K$_{1.2}$ विहीनहानिः; D$_{3.5}$ T$_2$ G$_{1.2}$ M निहीनयोनिः. — ^{b}) T$_1$ सृगालको; T$_2$ G$_{1.2.4}$ M सालावृको. B$_{2.4}$ पार्थं (for पार्श्वम्). — ^{c}) T G$_{1.2.4}$ M$_1$ परिभूय; M$_2$ अभिभूय (for अवमन्य). — ^{d}) Ś$_1$ K$_{1.2}$ D$_{1.3}$ कृतो विमर्दः; K$_{3.4}$ Dc$_2$ D$_{2.5}$ T$_2$ G$_{1.2.4}$ M कृतोवमर्दः; T$_1$ कृतोवमानः.

9 ^{a}) S (except G$_3$) एत्याथ (for इत्येव). K$_3$ आविशंत्यो; T$_1$ आचरंतो. — ^{b}) G$_2$ दहत्यरण्ये. — K$_3$ om. (hapl.) 9^{d}–10^{c}. — ^{d}) K$_{3.4}$ D$_{1.3}$ G$_1$ M$_2$ प्रेक्ष्य; G$_4$ वीक्ष्य (for प्रेष्य-). T$_1$ धात्रीं तदा प्राणसमां प्रियां तां.

10 K$_3$ om. 10^{abc} (cf. v.l. 9). — ^{a}) K$_1$ G$_1$ °तो विसृत्य; G$_{2.4}$ °तोपसृत्य. — ^{d}) Dn$_1$. n$_2$ Cn अंति°; Cnp as in text.

11 ^{a}) Ś$_1$ K$_2$ धरित्र्यां; K$_{1.3.4}$ D$_{1-3.5}$ धरिण्यां. — ^{b}) T$_2$ G$_{1.2.4}$ त्वन्- (for ते). K$_{3.4}$ D$_3$ (m as in text) दीनकंठं. — After 11^{ab}, S ins.:

1204* गतेष्वरण्यं हि सुतेषु पाण्डोः
क्वचित्परैर्नापकृतं वनेऽस्मिन् ।
पर्याकुला सा तु समीक्ष्य सूत-
मभ्यापतन्तं द्रुतमिन्द्रसेनम् । [5]
उरो घ्नती कष्टतरं तदानी-
मुच्चैः प्रचुक्रोश हृतेति देवी ।

[(L. 4) T$_1$ M$_1$ समा° (for अभ्या°). — (L. 5) T$_1$ क्लिष्टतरं. — (L. 6) T$_1$ M$_1$ प्रचक्रंद (for प्रचुक्रोश).] — S (except G$_3$) om. 11^{cd}. — Before 11^{ef}, S ins इंद्रसेनः. — ^{e}) K$_3$ B D (except D$_{1.3.5}$) अचिंत्य° (f अनिन्द्य°). — After 11, D$_{1.3}$ ins.:

1205* पतिव्रता सत्यसंधा तथैव
क्व सा नीता केन वा शंस तथ्यम् ।;

while S (except G$_3$) ins.:

1206* केनात्मनाशाय वदापनीता
छिद्रं समासाद्य नरेन्द्रपत्नी ।

[(L. 1) T$_1$ हृतो°; G$_4$ विदो°; M पथा° (for वदा°). — (L. 2) T$_2$ रंध्रं (for छिद्रं). T$_1$ M$_1$ नरेंद्रपुत्री.]

12 ^{a}) S (except G$_3$) यदीह (for यद्येव). Dc D D$_{4.5}$ T देवीं. D$_1$ यदाप्यसौ पृथिवीं संप्रविष्टा. — ^{b}) T K$_3$ पथं प्रपन्नां. T$_1$ यदि वा; T$_2$ G$_{1.4}$ M ह्यथ वा. — ^{c}) K$_3$ पथं B$_2$ D$_6$ पदे (for पदं). S (except G$_3$) पदं गमिष्यंति हि तस्य (T$_1$ M$_1$ तत्र) पार्थास्. — ^{d}) B Dc$_1$ Dn D$_{4.6}$ G यथा (for तथा). N (except Ś$_1$ D$_1$) G$_3$ धर्मपुत्रः.

13 ^{a}) Ś$_1$ मादृ° (for हीदृ°). B$_1$ नरपुंगवानां (f अरिमर्द°). — ^{b}) K$_{1.2}$ B Dn D$_{4-6}$ °क्षमानाम्. — T$_1$ जिहीर्षुर्. — ^{d}) T$_1$ इव प्रमूढं; T$_2$ इव प्रमूढमान् (sic G$_{1.2.4}$ इव प्रमूषुः; M इवाप्रमुमूर्षुः.

14 ^{a}) K$_{3.4}$ D$_{1.3.5}$ T$_2$ G$_{1.2.4}$ प्रविभिद्य; T$_1$ प्रवि-

यथाद्य कृष्णा पुनरेष्यतीति ।
निहत्य सर्वान्द्विषतः समग्रा-
न्पार्थाः समेष्यन्त्यथ याज्ञसेन्या ॥ १४
अथाब्रवीच्चारुमुखं प्रमृज्य
धात्रेयिका सारथिमिन्द्रसेनम् ।
जयद्रथेनापहृता प्रमथ्य
पञ्चेन्द्रकल्पान्परिभूय कृष्णा ॥ १५
तिष्ठन्ति वर्त्मानि नवान्यमूनि
वृक्षाश्च न म्लान्ति तथैव भग्नाः ।
आवर्तयध्वं ह्यनुयात शीघ्रं
नदूरयातैव हि राजपुत्री ॥ १६
संनह्यध्वं सर्व एवेन्द्रकल्पा
महान्ति चारूणि च दंशनानि ।
गृह्णीत चापानि महाधनानि
शरांश्च शीघ्रं पदवीं व्रजध्वम् ॥ १७
पुरा हि निर्भर्त्सनदण्डमोहिता
प्रमूढचित्ता वदनेन शुष्यता ।
ददाति कस्मैचिदनर्हते तनुं
वराज्यपूर्णामिव भस्मनि स्रुचम् ॥ १८
पुरा तुषाग्नाविव हूयते हविः
पुरा श्मशाने स्रगिवापविध्यते ।
पुरा च सोमोऽध्वरगोऽवलिह्यते
शुना यथा विप्रजने प्रमोहिते ।
महत्यरण्ये मृगयां चरित्वा
पुरा शृगालो नलिनीं विगाहते ॥ १९
मा वः प्रियायाः सुनसं सुलोचनं

C. 3. 15688
B. 3. 269. 22
K. 3. 270. 25

शंति; M$_1$ प्रतिपद्य; M$_2$ प्रतिविश्य. G$_2$ घोरं; M$_1$ बाणा; M$_3$ बाला (for घोरा). Ś$_1$ K$_{1.2}$ आच्छाद्य कामं प्रविविश्य घोरा. — ^{b}) G$_1$ अभि· (for महीं). K$_4$ प्रविष्यंति (sic). M सुपुंखाः (for शराढ्याः). — ^{d}) G$_{1.2.4}$ यथा च (for यथाद्य). — ^{e}) Dc D$_2$ द्विपतान्. Ś$_1$ K$_{1.2}$ समेताः; K$_{3.4}$ Dc D$_{1-3.5}$ समेतान्; B$_1$ T$_1$ समग्राः; M ससैन्यान्.

15 ^{a}) B$_2$ चाश्रुमुखी; T$_2$ G$_{1.2.4}$ सा तु मुखं; G$_3$ साश्रुमुखं. K$_3$ Dn$_2$ विमृष्य; B$_{1.3}$ विसृज्य; B$_{2.4}$ Dc$_1$ Dn$_1$. n$_3$ D$_4$ विमृश्य; Dc$_2$ D$_6$ T$_2$ G$_3$ विमृज्य; D$_1$ प्रमृष्य. — Before 15^{cd}, G$_{1.2}$ ins. धात्रेयिका; G$_4$ धात्री. — ^{c}) K$_4$ D$_3$ °नोपहृतां; D$_1$ °नापहृतां. K$_1$ प्रमाथ्य; K$_3$ D$_3$ प्रपश्य. — ^{d}) K$_4$ D$_3$ G$_1$ कृष्णां; D$_1$ पार्थान्.

16 ^{a}) Ś$_1$ K$_1$ तिष्ठंत्यवर्त्मानि. K$_1$ B$_3$ वनानि; K$_4$ D$_3$ बहूनि; G$_1$ पद्मानि; G$_2$ चर्माणि (for नवानि). — ^{b}) S (except G$_3$) द्रुमा° (for वृक्षा°). B$_1$ नश्यंति; Dc D$_2$ लंबंति; T$_1$ नम्राश्च; T$_2$ G$_{1.4}$ न ग्लांति. D$_1$ म्लायंति वृक्षाश्च तथातिभग्नाः. — ^{c}) Ś$_1$ K Dc D$_{1-3.5}$ अनुयात; T$_2$ G$_{1.2.4}$ ह्यनुयांतु. — ^{d}) Ś$_1$ अदूर°; T$_2$ G$_{1.2.4}$ न दूरयातेव. Dc D$_2$ ह (for हि).

17 ^{b}) Dc D$_1$ दंशितानि; T$_2$ G$_{1.2.4}$ दंसितानि. T$_1$ महांति दारूणि वतंसितानि (sic); M$_1$ महार्हरूपाणि च दंसनानि. — ^{c}) K$_{2.3}$ B$_3$ Dc D$_{2.3}$ गृहीत. Ś$_1$ K$_{1.2}$ससाधनानि; B$_1$ शरांश्च शीघ्रं; G$_1$ महायुधानि (for °धनानि). — ^{d}) Ś$_1$ प्रपध्वं; K$_1$ प्रवृत्तं; K$_2$ पतध्वं; K$_3$ B$_{2-4}$ Dc Dn D$_{2.4-6}$ G$_3$ M चरध्वं; D$_1$ प्रपद्य (for व्रजध्वम्). B$_1$ बध्नीत तूणौ पदवीं च लध्वं.

☞ In Ś$_1$, the portion from भस्मनि (in 18^{d}) up to the *end* of this parvan is lost on missing fol.; the MS. is almost entirely ignored in the sequel.

18 ^{a}) K$_4$ °दंडताडिता. — ^{b}) Dc$_1$ Dn D$_{4.6}$ G$_3$ प्रमोहचित्ता; Dc$_2$ प्रमूढचेता. T$_2$ G$_{1.2.4}$ शुष्यति. — ^{d}) B$_{1.3.4}$ श्रुतं; Dc T$_1$ G$_{1.2}$ स्रुवं (for स्रुचम्).

19 ^{b}) K$_{3.4}$ D$_{2.3}$ स्मशाने. K$_3$ स्रगिवावविध्यते; B$_1$ M$_1$ °वोपदृश्यते; Dc D$_2$ °वोपविध्यते; G$_{1.4}$ °वाववध्यते. — ^{c}) K$_{1.2}$ पुरे च; T$_1$ पुरा हि. S (except G$_3$) °ध्वरजो. K D$_{1.3.5}$ T$_2$ G$_{2.4}$ विलुप्य (K$_4$ °प्यते); T$_1$ विलिह्य; G$_1$ विलिप्य; M$_1$ विलिह्यते. — ^{d}) Dc D$_{2.5}$ S (except G$_3$) विमो° (for प्रमो°). — After 19^{cd}, T$_1$ ins.:

1207* पुरा हि पार्थाश्च हतौ च कापिलम्
प्रसिच्यते क्षीरधारा यतध्वम् ।

— ^{e}) D$_{3.5}$ गतानां (for चरित्वा). — ^{f}) K$_1$ S सृगालो. B$_3$ प्रगाहते. — After 19, Dc$_1$ D$_{1-3}$ ins.:

1208* श्रुतिं च सम्यक्प्रकृतिं महाध्वरे
ग्राम्यो जनो यद्वदसौ न नाशयेत् ।;

while S (except G$_3$) ins.:

1209* पुरा हि मन्त्राहुतिपूजितायां
हुताग्निवेद्यां बलिभुङ् निलीयते ।

20 ^{b}) K$_{1.2}$ B$_1$ Dc D$_{1.2.5}$ °प्रभाभं; K$_3$ °प्रभं तद्; K$_4$ D$_3$ °प्रभासं. B$_4$ T$_2$ G$_{1.2.4}$ M चंद्रप्रभं वदनं तत्पुरस्तात् (B$_4$ °नं सुप्रसन्नं). — K$_1$ om. 20^{cd}. — ^{c}) K$_4$ पश्चाच्छुभं;

C. 3. 15688
B. 3. 269. 22
K. 3. 270. 25

चन्द्रप्रभाच्छं वदनं प्रसन्नम् ।
स्पृश्याच्छुभं कश्चिदकृत्यकारी
श्वा वै पुरोडाशमिवोपयुञ्जीत् ।
एतानि वर्त्मान्यनुयात शीघ्रं
मा वः कालः क्षिप्रमिहात्यगाद्वै ॥ २०

युधिष्ठिर उवाच ।

भद्रे तूष्णीमास्स्व नियच्छ वाचं
मास्मत्सकाशे परुषाण्यवोचः ।
राजानो वा यदि वा राजपुत्रा
बलेन मत्ता वञ्चनां प्राप्नुवन्ति ॥ २१

वैशंपायन उवाच ।

एतावदुक्त्वा प्रययुर्हि शीघ्रं
तान्येव वर्त्मान्यनुवर्तमानाः ।
मुहुर्मुहुर्व्यालवदुच्छ्वसन्तो
ज्यां विक्षिपन्तश्च महाधनुर्भ्यः ॥ २२
ततोऽपश्यंस्तस्य सैन्यस्य रेणु-
मुद्धूतं वै वाजिखुरप्रणुन्नम् ।
पदातीनां मध्यगतं च धौम्यं
विक्रोशन्तं भीममभिद्रवेति ॥ २३
ते सान्त्व्य धौम्यं परिदीनसत्त्वाः
सुखं भवानेत्विति राजपुत्राः ।
श्येना यथैवामिषसंप्रयुक्ता
जवेन तत्सैन्यमथाभ्यधावन् ॥ २४
तेषां महेन्द्रोपमविक्रमाणां
संरब्धानां धर्षणाद्याज्ञसेन्याः ।
क्रोधः प्रजज्वाल जयद्रथं च
दृष्ट्वा प्रियां तस्य रथे स्थितां च ॥ २५
प्रचुक्रुशुश्चाप्यथ सिन्धुराजं
वृकोदरश्चैव धनंजयश्च ।
यमौ च राजा च महाधनुर्धरा-
स्ततो दिशः संमुमुहुः परेषाम् ॥ २६

इति श्रीमहाभारते आरण्यकपर्वणि त्रिपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५३ ॥

$D_{1.3}$ स्पृशेच्छुभं; T_2 $G_{1.2.4}$ रागान्वितः; M रागान्नरः. — ^{d}) K_2 इवोपयोक्ष्य; K_3 D_5 T_2 °पयोक्षीत्; K_4 D_1 °पयुंज्यात्; B Dc Dn $D_{2.4.6}$ G_3 इवाध्वरस्थं; D_3 इवोपयुज्यते; G_3 °पभोक्ष्येत्. — ^{e}) T_1 G_1 वाक्यानि; M_2 वर्णानि (for वर्त्मानि). T_2 $G_{1.2.4}$ [अ]नुयांतु (for °यात). T_2 $G_{2.4}$ मा वः (for शीघ्रं). — ^{f}) T_2 $G_{2.4}$ कालः प्रति- (for मा वः कालः). M दीर्घं (for क्षिप्रम्). $K_{3.4}$ इहातिगाद्वै; M_2 इहात्ययाद्वै. — After 20, K_4 Dc_2 D_{1-3} ins.:

1210* शीघ्रं प्रधावध्वमितो नरेन्द्रो
यावन्न दूरं व्रजतीति पापः ।;

while S (except G_3) ins.:

1211* प्रत्याहरध्वं द्विषतां सकाशा-
ल्लक्ष्मीमिव स्वां दयितां नृसिंहाः ।

21 T_1 G_4 om. the ref. — ^{a}) $K_{1.2}$ तूर्णमाशु; $B_{2.4}$ Dn $D_{4.6}$ G_3 प्रतिक्राम (for तूष्णीमास्स्व). T_1 भद्रे प्रतीपं विनयाच्च वाचं. — ^{b}) $K_{1.4}$ M_1 वाचः (for [अ]वोचः). — ^{d}) G_1 बलेन युक्ताः. $G_{1.2.4}$ पंचतामामु° (for वञ्चनां प्राप्नु°).

22 ^{c}) B_1 मुहुर्मुहुर्व्यालवनं विशंतो. — ^{d}) $B_{2.4}$ Dc_2 Dn_2 D_2 T_1 G_3 ज्या (for ज्यां). B_2 उत्क्षि° (for विक्षि°). T_1 महाधनुर्भृतः.

23 ^{a}) B_4 ततोपश्यं रेणुसमुद्धृतं वै. — ^{b}) K_1 T $G_{1.2.4}$ M_2 उद्धूयंतं; B_2 समुद्धृतं; B_3 उद्धृतं वै; B_4 निपीडितं; M_1 आधूयंतं (for उद्धूतं वै). K_3 °खुरप्रपन्नं. — ^{c}) $K_{1.2}$ हि (for च). T_2 $G_{1.2.4}$ पदातिमध्ये विचरंतं च धौम्यं. — ^{d}) K_3 B_1 $D_{1.3.5}$ T_2 M_2 अभ्याद्रवेति; K_4 अभिद्रवंतं; G_1 अभ्यद्रवंतं. T_1 विक्रोशंतं भीम भीमाद्रवेति; T_2 $G_{2.4}$ विक्रोशंतं भीम पार्थेत्यभीक्ष्णं.

24 ^{a}) $K_{1.2.4}$ B_2 (m as in text) $D_{1.3}$ धौम्यं परिदीनसत्वं; T_2 $G_{1.2.4}$ M तं धौ(G_2 M_2 तद्धौ)म्यमदीनसत्वाः. — ^{b}) $G_{2.4}$ सुखी भवानस्त्विति राज°. — ^{c}) K_1 Dc D_3 S (except G_3 M_2) °संप्रसक्ता.

25 ^{c}) T_2 $G_{1.2.4}$ M_1 कोपः (for क्रोधः). $K_{3.4}$ D_3 तु (for च). — ^{d}) T_1 स्थितां (for प्रियां). M_1 चास्य (for तस्य). K_4 $G_{1.2.4}$ M_2 रथस्थितां; T_1 रथे प्रियां.

26 ^{a}) M [अ]भि (for [अ]पि). — ^{c}) B_2 T_2 $G_{1.2.4}$ M धनुर्धरास्तदा (B_2 °तो). — ^{d}) B_2 दिशो (for ततो) G_2 संप्रमुमुहुः. M_2 परेतरां.

२५४

वैशंपायन उवाच ।
ततो घोरतरः शब्दो वने समभवत्तदा ।
भीमसेनार्जुनौ दृष्ट्वा क्षत्रियाणाममर्षिणाम् ॥ १
तेषां ध्वजाग्राण्यभिवीक्ष्य राजा
स्वयं दुरात्मा कुरुपुंगवानाम् ।
जयद्रथो याज्ञसेनीमुवाच
रथे स्थितां भानुमतीं हतौजाः ॥ २
आयान्तीमे पञ्च रथा महान्तो
मन्ये च कृष्णे पतयस्तवेते ।
सा जानती ख्यापय नः सुकेशि
परं परं पाण्डवानां रथस्थम् ॥ ३
द्रौपद्युवाच ।
किं ते ज्ञातैर्मूढ महाधनुर्धरै-
रनायुष्यं कर्म कृत्वातिघोरम् ।
एते वीराः पतयो मे समेता
न वः शेषः कश्चिदिहास्ति युद्धे ॥ ४
आख्यातव्यं त्वेव सर्वं मुमूर्षो-
र्मया तुभ्यं पृष्टया धर्म एषः ।
न मे व्यथा विद्यते त्वद्भयं वा
संपश्यन्त्याः सानुजं धर्मराजम् ॥ ५
यस्य ध्वजाग्रे नदतो मृदङ्गौ
नन्दोपनन्दौ मधुरौ युक्तरूपौ ।
एतं स्वधर्मार्थविनिश्चयज्ञं
सदा जनाः कृत्यवन्तोऽनुयान्ति ॥ ६
य एष जाम्बूनदशुद्धगौरः
प्रचण्डघोणस्तनुरायताक्षः ।
एतं कुरुश्रेष्ठतमं वदन्ति
युधिष्ठिरं धर्मसुतं पतिं मे ॥ ७

C. 3. 15701
B. 3. 270. 7
K. 3. 271. 7

Colophon om. in $B_{1.3}$. — *Major parvan :* $K_{1.2}$ Dn_2 $G_{2.4}$ आरण्य; G_1 श्रीमदारण्य. — *Sub-parvan :* K $B_{2.4}$ Dc Dn_3 D_{1-6} T_1 G_3 M_1 द्रौपदीप्रमाथ; Dn_1 द्रौपद्याः प्रमाथ. — *Adhy. name :* M पांडवानुगमनं. — *Adhy. no.* (figures, words or both): Dn_2 267; Dn_3 268; D_1 269; T G_4 M (M_2 *inf. lin.*) 257 (M_2 orig. 259); G_1 254; G_2 256. — *Śloka no.:* Dn_1. n_2 28; Dn_3 29; D_1 30.

254

1 ^{d}) K_3 अमर्षणं; D_1 मनीषिणां; T_1 अमर्षिणौ; G_4 महर्षिणां.

2 K_1 om. 2^{ab}. — ^{a}) K_3 D_2 ध्वजाग्र्याणि; G_1 ध्वजाग्रान्. T_1 राजन्. — ^{b}) Dn_2. n_3 स्मयन् (for स्वयं). M_2 कुरुपांडवानां. — ^{d}) G_1 M स्थितो (for स्थितां). B_4 कांतिमतीं; G_4 भर्तृमतीं. K_1 B M हृ(B_1 त)तौजाः; K_4 महौजाः; T_1 विहस्य.

3 ^{a}) K_1 आयातेमे. T $G_{1.2.4}$ ते (for [इ]मे). — ^{b}) K_3 तथैते; K_4 तवेति; S (except G_3) तवेमे. — ^{c}) = var. 3. 249. 13^{c}. K_1 सा जानतां; T_2 सेमानिति; G_4 संजानती. — ^{d}) D_3 परस्परां; T_1 परावरं; $G_{1.2.4}$ परंपरां (for परं परं). D_3 T G_1 रथस्था; G_2 रथस्थां; G_4 रथानां.

4 ^{a}) $G_{1.3.4}$ M_1 तेद् (for ते). — ^{b}) K_1 अनार्योध्यं; B_2 अमानुषं. $K_{1.3.4}$ Dc D_2 कृत्वा सुघोरं (K_1 °षं). — ^{c}) M क्रुद्धा (for एते). Dc D_2 प्रियाः (for वीराः). — ^{d}) T_1 ते (for वः). $K_{3.4}$ Dc D_{1-3} G_4 शेषं. K_3 $D_{1.3}$ T_1 किंचिद्.

5 ^{a}) G_1 आख्यातताया. K_4 चैव; T_2 $G_{1.2}$ तव; G_4 तच्च (for त्वेव). $K_{1.3.4}$ Dc_2 $D_{2.3}$ G_2 M_1 मुमूर्षो. — ^{b}) T_2 $G_{1.2.4}$ सर्वं (for तुभ्यं). — ^{c}) $K_{3.4}$ D_1 T_2 $G_{1.2.4}$ transp. विद्यते and त्वद्भयं. — ^{d}) K_4 संप्रेक्षंत्याः.

6 ^{a}) T_1 ध्वजाग्रौ. K_3 T $G_{2.4}$ नदतौ. K_1 मृदंगैर्; K_4 Dc_2 $D_{1.2}$ मृदंगो. — ^{b}) K_3 Dc $D_{1.2}$ मधुरं युक्तरूपौ; K_4 B_2 °रं सुरूपौ; S (except G_3) °रं सुयुक्तौ. — ^{c}) K_1 B_4 Dn_2 $D_{1.3}$ एवं; T_2 $G_{1.2.4}$ एनं (for एतं). K_3 T_1 सु-; M_1 स्म (for स्व-). — ^{d}) K_1 Dc D_2 कृतवंतो. T_1 सदा जनाः सत्यवंतो वदंति.

7 ^{a}) D_1 $G_{1.2.4}$ M_1 स (for य). — ^{b}) $K_{1.2}$ D_1 T_1 °घोर°; K_3 B_1 D_3 °घोष° (for °घोण°). — ^{c}) K_4 Dc_1 D_{1-3} T G_{2-4} एनं. — ^{d}) T_1 प्रियं (for पतिं).

C. 3. 15702
B. 3. 270. 8
K. 3. 271. 8

अप्येष शत्रोः शरणागतस्य
दद्यात्प्राणान्धर्मचारी नृवीरः ।
परैह्येनं मूढ जवेन भूतये
त्वमात्मनः प्राञ्जलिर्न्यस्तशस्त्रः ॥ ८
अथाप्येनं पश्यसि यं रथस्थं
महाभुजं शालमिव प्रवृद्धम् ।
संदष्टोष्ठं भ्रुकुटीसंहतभ्रुवं
वृकोदरो नाम पतिर्ममैषः ॥ ९
आजानेया बलिनः साधु दान्ता
महाबलाः शूरमुदावहन्ति ।
एतस्य कर्माण्यतिमानुषाणि
भीमेति शब्दोऽस्य गतः पृथिव्याम् ॥ १०
नास्यापराद्धाः शेषमिहाप्नुवन्ति
नाप्यस्य वैरं विस्मरते कदाचित् ।
वैरस्यान्तं संविधायोपयाति
पश्चाच्छान्तिं न च गच्छत्यतीव ॥ ११
मृदुर्वदान्यो धृतिमान्यशस्वी
जितेन्द्रियो वृद्धसेवी नृवीरः ।
भ्राता च शिष्यश्च युधिष्ठिरस्य
धनंजयो नाम पतिर्ममैषः ॥ १२
यो वै न कामान्न भयान्न लोभा-
त्त्यजेद्धर्मं न नृशंसं च कुर्यात् ।
स एष वैश्वानरतुल्यतेजाः
कुन्तीसुतः शत्रुसहः प्रमाथी ॥ १३
यः सर्वधर्मार्थविनिश्चयज्ञो
भयार्तानां भयहर्ता मनीषी ।
यस्योत्तमं रूपमाहुः पृथिव्यां
यं पाण्डवाः परिरक्षन्ति सर्वे ॥ १४
प्राणैर्गरीयांसमनुव्रतं वै
स एष वीरो नकुलः पतिर्मे ।

---

8 ^{a}) $G_{1.4}$ शरणं गतस्य. — ^{b}) G_{1} प्राणं (for प्राणान्). — ^{c}) B_{1} Dc_{1} Dn_{1}. n_{3} D_{4} G_{1} M_{2} परेह्येनं; B_{4} M_{1} परैर्ह्येनं; G_{2} पुरोहितं; G_{4} परो ह्येतं. T_{1} प्रेत्य ह्येनं मूढ भजस्व तूर्णं. — ^{d}) K_{1} D_{1} त्वमात्मना; B_{4} दुरात्मनः; T_{1} महात्मानं; G_{4} तवात्मानः.

9 ^{a}) K_{1} M अथाप्येतं. K_{3} पश्यसे. S (except G_{3}) रथे स्थितं (for रथस्थं). — ^{b}) K_{1} महाबलं. K_{1} S (except T_{2} G_{3}) साल° (for शाल°). K_{3} प्रविद्धं. — ^{c}) N (except D_{1}) T G_{3} संदष्टौष्ठं. A few MSS. भृकुटी-. K_{1} °संनतभ्रूः; $K_{3.4}$ D_{1} T_{2} °संहतभ्रुं; T_{1} °संहतभ्रुर्; M_{2} °संहतभ्रुवो.

10 M_{2} om. (hapl.) 10–12. — ^{a}) K_{1} आजानीया; K_{2} आजानया; D_{4} अजानेया. Dc बलिनां; T_{2} $G_{1.2.4}$ वाजिनः. — ^{b}) K T_{1} M_{1} महाबलं; G_{4} महाजवाः. K_{1} शूरमुदाहरंति; T_{1} °तमं वहंति. — ^{d}) T $G_{1.2.4}$ M_{1} ततः (for गतः).

11 M_{2} om. 11 (cf. v.l. 10). — ^{a}) D_{5} T_{2} G_{3} अपराधात्. $K_{1.2}$ शेषमिहानुयांति; B_{1-3} D (except $D_{1.5}$) G_{3} °मवाप्नुवंति. — ^{b}) B Dn $D_{4.5}$ नायं; Dc $D_{2.3.6}$ G_{3} नायं च (for नाप्यस्य). T $G_{1.2.4}$ विस्मरंते. — ^{c}) $K_{1.3.4}$ B_{1} Dc $D_{2.3.6}$ T $G_{1.4}$ संनिधा°. — ^{d}) T $G_{1.2.4}$ M_{1} तत्तप्यतीह (for गच्छत्यतीव).

12 M_{2} om. 12 (cf. v.l. 10). — ^{a}) B Dn $D_{4.6}$ G_{3} धनुर्धराढ्यो (for मृदुर्वदान्यो). T $G_{1.2.4}$ M_{1} मति° (for धृति°). K Dc $D_{1.2.5}$ मनस्वी (for यशस्वी). — ^{b}) Dc D_{2} तथैव (for नृवीरः). — ^{c}) K_{1} श्रुता (for भ्राता).

13 ^{a}) $K_{3.4}$ D_{1} $G_{1.2.4}$ M_{1} नैव (for वै न). $G_{1.2.4}$ कोपान्न (for कामा°). K_{3} B Dc D_{2} T_{1} कोपात्; $G_{1.2.4}$ कामात्; M_{1} मोहात् (for लोभात्). T_{2} कदापि कोपान्न भिया न कामात्. — ^{b}) T_{1} धर्मं त्यजेन् (by transp.). Dc $D_{1.3}$ G_{4} नानृशंस्यं; Dn_{2}. n_{3} $D_{3.4}$ $G_{2.3}$ न नृशंस्यं. — ^{d}) $B_{2.3}$ M माद्रीसुतः; D_{1} T_{1} कुंतीपुत्रः. B_{2} सहदेवः; Dc $D_{1.5}$ शत्रुसंघ-; M_{1} शत्रुगण-.

14 After 14^{ab}, S (except G_{3}) ins.:

1212* बन्धुप्रियः शस्त्रभृतां वरिष्ठो
महाहवेष्वप्रतिवार्यवीर्यः ।

15 ^{a}) D_{1} प्राणैर्गरीयान्पांडवानां महात्मा; T $G_{1.2.4}$ प्राणैर्गरीयान्समनुव्रतश्च. — After 15^{a}, D_{1} ins.:

1213* शूरः कृतज्ञो दृढसौहृदश्च ।
महाहवे यश्च रिपुप्रमाथी.

— ^{c}) K_{4} खड्गवेधी; B_{1} संगयोधी. K_{3} B_{2} Dc D_{1} यः खड्गहस्तो लघुचित्रयोधी. — ^{d}) $K_{1.3}$ B_{1} Dc_{2} D_{1} T_{1} $G_{1.3}$ M मतो; K_{4} मानी; B_{4} T_{2} G_{4} मतौ च (for महांश्च). K

यः खड्गयोधी लघुचित्रहस्तो
महांश्च धीमान्सहदेवोऽद्वितीयः ॥ १५
यस्याद्य कर्म द्रक्ष्यसे मूढसत्त्व
शतक्रतोर्वा दैत्यसेनासु संख्ये ।
शूरः कृतास्त्रो मतिमान्मनीषी
प्रियंकरो धर्मसुतस्य राज्ञः ॥ १६
य एष चन्द्रार्कसमानतेजा
जघन्यजः पाण्डवानां प्रियश्च ।
बुद्ध्या समो यस्य नरो न विद्यते
वक्ता तथा सत्सु विनिश्चयज्ञः ॥ १७
स एष शूरो नित्यममर्षणश्च
धीमान्प्राज्ञः सहदेवः पतिर्मे ।
त्यजेत्प्राणान्प्रविशेद्धव्यवाहं
न त्वेवैष व्याहरेद्धर्मबाह्यम् ।
सदा मनस्वी क्षत्रधर्मे निविष्टः
कुन्त्याः प्राणैरिष्टतमो नृवीरः ॥ १८
विशीर्यन्तीं नावमिवार्णवान्ते
रत्नाभिपूर्णां मकरस्य पृष्ठे ।
सेनां तवेमां हतसर्वयोधां
विक्षोभितां द्रक्ष्यसि पाण्डुपुत्रैः ॥ १९
इत्येते वै कथिताः पाण्डुपुत्रा
यांस्त्वं मोहादवमन्य प्रवृत्तः ।
यद्येतैस्त्वं मुच्यसेऽरिष्टदेहः
पुनर्जन्म प्राप्स्यसे जीव एव ॥ २०
वैशंपायन उवाच ।
ततः पार्थाः पञ्च पञ्चेन्द्रकल्पा-
स्त्यक्त्वा त्रस्तान्प्राञ्जलींस्तान्पदातीन् ।
रथानीकं शरवर्षान्धकारं
चक्रुः क्रुद्धाः सर्वतः संनिगृह्य ॥ २१

C. 3. 15715
B. 3. 270. 21
K. 3. 271. 22

इति श्रीमहाभारते आरण्यकपर्वणि चतुःपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५४ ॥

Dc $D_{1.3.5.6}$ G_3 बलदेवो द्वि(K_1 B_4 °वाद् द्वि; K_4 B_3 Dc_2 °वद्वि)तीयः.

16 ^{a}) D_5 M_1 तस्याद्य; T_3 $G_{2.4}$ यस्मात्; G_1 तस्मात्. D_1 द्रक्ष्यसि. Dc D_2 मूढभावः; G_4 °सत्त्वः. — ^{b}) K_4 om. वा. $K_{1.2}$ दैत्यसैन्यस्य; T_2 मन्यसे साधु; G_1 अद्य सेनासु; M_1 दैत्यसैन्येषु. $K_{1.2}$ मध्ये; T_1 G_4 M संखे; G_2 संघे. — ^{c}) K Dc_2 $D_{1.2.5}$ धृतिमान्. B D (except $D_{1.2.5}$) G_3 मनस्वी (for मनीषी). — ^{d}) T_2 धर्मराजस्य.

17 ^{a}) $K_{1.2.4}$ Dc_1 स एष; S (except G_3) हुताश°.

18 ^{a}) $G_{1.2.4}$ य एष. — ^{d}) K_4 न त्वेवेव; G_1 न त्वेष वै; M_2 न त्वेवैष. B_1 धर्मवाक्यं; $B_{3.4}$ °राज्यं. — ^{e}) $G_{1.2.4}$ मनीषी (for मनस्वी). G_2 सत्यधर्मे. $B_{2.3}$ Dn $D_{3.4.6}$ G_3 रतश्च (for निविष्टः).

19 ^{a}) K_3 G_2 विशीर्यंती; B_2 व्यशीर्यंतीं; B_4 विशीर्यंतीर्; T_1 वशीयतिर् (sic); G_4 M_2 विशीर्यंतीं. $K_{1.2.4}$ T_1 °र्णवांतरे (T_1 °रं). — ^{c}) K_{1-3} D_1 T_1 $G_{1.2}$ M तथेमां. — ^{d}) T_1 पश्यसि (for द्रक्ष्य°).

20 ^{a}) $K_{1.3.4}$ Dc_2 $D_{1.2}$ T_2 $G_{1.2.4}$ इत्येवं ते; T_1 इत्येवमेते; M इत्येते ते (for इत्येते वै). — ^{b}) T_1 $G_{1.4}$ M_1 अवमत्य. — ^{c}) B_{2-4} Dn $D_{3.4.6}$ G_3 यद्येतेभ्यो (for °तैस्त्वं). K_2 $B_{3.4}$ T_1 G_1 मुच्यते. K_2 T_2 [ऽ]निष्ट°. — ^{d}) K_{1-3} $B_{1.3}$ $D_{1.5}$ M_2 प्राप्स्यसि. K_2 जीव एषः; B_1 सत्यमेव; T G_1 M_2 जीवितं च; $G_{2.4}$ जीवनं च; M_1 जीवमानः.

21 D_5 $G_{1.2.4}$ M_2 om. the ref. — ^{b}) K_3 द्विजातीन् (for पदा°). — ^{c}) D (except $D_{1.3}$) यथानीकं. — ^{d}) D_1 संनिरुद्धाः; $G_{1.2.4}$ ते निगृह्य.

Colophon. — *Major parvan:* $K_{1.3}$ Dn_3 $G_{2.4}$ आरण्य. — *Sub-parvan:* $K_{1.3.4}$ B D G_3 M द्रौपदीप्रमाथ. — *Adhy. no.* (figures, words or both): Dn 268 (Dn_3 269); D_1 270; T G_4 M (M_2 *inf. lin.*) 258 (M_2 orig. 260); G_1 255; G_3 257. — *Śloka no.:* Dn_1. n_3 21; Dn_3 D_1 22.

255

1 ^{a}) T_3 $G_{1.2.4}$ M सं(G_1 आ)तिष्ठध्वं (for °ष्ठत). — ^{b}) $K_{1.3.4}$ Dc $D_{1.2.5}$ द्रुतं; $G_{1.3.4}$ M_2 तूष्णीं (for तूर्णं). K_2 द्रुवंति परि°; T_3 तूर्णं न परि°. — ^{c}) K_1 तस्मिन् (for इति). K_1 स; B_2 वै (for स्म). — ^{d}) K_1 D_5 सैनिकान् (for तान्नृपान्).

2 ^{a}) $B_{2.4}$ Dn D_{3-6} G_3 घोरतमः. — ^{d}) B_1 ससैन्यान्

२५५

C. 3. 15716
B. 3. 271. 1
K. 3. 272. 1

वैशंपायन उवाच ।

संतिष्ठत प्रहरत तूर्णं विपरिधावत ।
इति स्म सैन्धवो राजा चोदयामास तान्नृपान् ॥ १
ततो घोरतरः शब्दो रणे समभवत्तदा ।
भीमार्जुनयमान्दृष्ट्वा सैन्यानां सयुधिष्ठिरान् ॥ २
शिबिसिन्धुत्रिगर्तानां विषादश्चाप्यजायत ।
तान्दृष्ट्वा पुरुषव्याघ्रान्व्याघ्रानिव बलोत्कटान् ॥ ३
हेमचित्रसमुत्सेधां सर्वशैक्यायसीं गदाम् ।
प्रगृह्याभ्यद्रवद्भीमः सैन्धवं कालचोदितम् ॥ ४
तदन्तरमथावृत्य कोटिकाश्योऽभ्यहारयत् ।
महता रथवंशेन परिवार्य वृकोदरम् ॥ ५
शक्तितोमरनाराचैर्वीरबाहुप्रचोदितैः ।
कीर्यमाणोऽपि बहुभिर्न स्म भीमोऽभ्यकम्पत ॥ ६
गजं तु सगजारोहं पदातींश्च चतुर्दश ।
जघान गदया भीमः सैन्धवध्वजिनीमुखे ॥ ७
पार्थः पञ्चशताञ्शूरान्पार्वतीयान्महारथान् ।
परीप्समानः सौवीरं जघान ध्वजिनीमुखे ॥ ८
राजा स्वयं सुवीराणां प्रवराणां प्रहारिणाम् ।
निमेषमात्रेण शतं जघान समरे तदा ॥ ९
ददृशे नकुलस्तत्र रथात्प्रस्कन्द्य खड्गधृक् ।
शिरांसि पादरक्षाणां बीजवत्प्रवपन्मुहुः ॥ १०
सहदेवस्तु संयाय रथेन गजयोधिनः ।
पातयामास नाराचैर्द्रुमेभ्य इव बर्हिणः ॥ ११
ततस्त्रिगर्तः सधनुरवतीर्य महारथात् ।
गदया चतुरो वाहान्राज्ञस्तस्य तदावधीत् ॥ १२
तमभ्याशगतं राजा पदातिं कुन्तिनन्दनः ।

(for सैन्यानां).

3 ^{a}) B Dn D_{3-6} G_3 शिबिसौवीरसिंधूनां. — ^{b}) K_3
B_1 D_1 चोपजायते; B_2 S (except G_3) समजायत. — ^{c})
K_4 तान्दृष्ट्वा पुरुषान्शूरान्. — ^{d}) Dn_2 अतीव च (for व्याघ्रा-
निव)! S (except G_3 M_2) मदो° (for बलो°).

4 ^{a}) D_1 हेमबिंदुसमु°; T_1 हेमबंधसमु°; T_2 $G_{1.2.4}$
हेमबिंदुं महोत्सेधां; M हेमबिंदुमयोत्सेधां. — ^{b}) $K_{1.3.4}$
$B_{1.3}$ D_3 S (except G_3) °सैक्या°. — ^{c}) G_1 प्राद्र° (for
[अ]भ्यद्र°). — ^{d}) K D_1 सैंधवं काममोहितं.

5 ^{a}) T $G_{1.2.4}$ तदंतरं समासाद्य (T_1 °विश्य); M
तयोरं(M_2 °तोनं)तरमासाद्य. — ^{b}) $K_{1.2}$ कोटिकाश्वो; $K_{3.4}$
B_1 Dn_1 $D_{1.4-6}$ °कास्यो; $B_{2.3}$ Dc $D_{2.3}$ °काख्यो. K_3
व्यदाहरत्; T_1 ह्यधारयत्; T_2 G_2 ह्यवा°; $G_{1.4}$ न्यवा°; M
[ऽ]भ्यवा°. — ^{c}) K_4 महता शरवर्षेण.

6 ^{a}) B_2 यष्टि°. — ^{d}) K_1 D_1 स; K_4 G_1 च (for स्म).
$K_{1.3}$ D_1 T_2 $G_{2.4}$ व्यकंपत; Dc D_2 व्यकंपयत्; T_1 G_1 M_1
[ऽ]प्यकंपत.

7 ^{a}) $K_{1.2}$ Dc_2 D_2 T_1 G_4 च (for तु). — ^{b}) $K_{1.3}$
D_1 पदातांश्च; Dc D_2 पादातांश्च. M_1 सहस्रशः (for चतुर्दश).
— ^{c}) K_3 T $G_{1.3.4}$ वीरः (for भीमः). — ^{d}) D_6 सैंधवस्य
महारणे.

8 $K_{1.2}$ om. (hapl.) 8. — ^{a}) K_4 पंचाशतं; B_1 पंच-
रथाञ्; M पंचशतं. B_2 T $G_{1.2.4}$ वीरान् (for शूरान्).
— ^{c}) D_1 G_4 परीप्समानान्. K_4 Dc D_2 $G_{1.4}$ सौवीरान्.

9 ^{a}) $K_{1.2}$ युधिष्ठिरः; $K_{3.4}$ Dc $D_{1.2}$ स्वयं राजा (by
transp.). $K_{1.2}$ स (for सु-). — ^{b}) D_1 प्रवीराणां. B_1
महीभुजां (for प्रहा°). — ^{d}) D_5 शतं; T_2 तथा (for तदा).
G_1 जघानाजौ युधिष्ठिरः.

10 ^{a}) T $G_{1.3.4}$ M नकुलोपि (T_2 $G_{2.4}$ °थ) तदा
क्रुद्धो. — ^{b}) $K_{1.3.4}$ Dc $D_{1.2}$ T_1 G_2 M खड्गभृत्; K_3
°वित्; Dn_1 T_2 °धृत्. — ^{c}) B_2 (m as in text) शतानि
(for शिरांसि). — ^{d}) B_1 T G_2 M प्रावपन्; G_1 प्रावपद्.
G_1 भुवि (for मुहुः).

11 ^{a}) K_4 T_2 $G_{1.2.4}$ M संवार्य; B_2 °जघ्ने; Dc D_2
°प्राप्य; Dn_2 T_1 °धाय; D_1 °ग्रामे (for °याय). — ^{b}) K_1
शत° (for गज°).

12 ^{a}) K_3 B_3 $D_{1.3.5}$ M सु- (for स-). — ^{b}) $K_{1.3.4}$
D_1 रथोत्तमात् (for महारथात्). — ^{c}) D_2 वीरान् (for
वाहान्). — ^{d}) K $D_{1.5}$ सर्वान् (for तस्य). T_1 राज्ञस्
स्यावधीत्पुनः.

13 ^{a}) K_1 D_3 अभ्याशे गतं; K_2 D_5 अभ्यासे गतं; $K_{3.4}$
B_3 Dc $D_{1.2.4}$ अभ्यास°; $G_{2.4}$ अधाभ्या°. — ^{b}) $B_{1.4}$

अर्धचन्द्रेण बाणेन विव्याधोरसि धर्मराट् ॥ १३
स भिन्नहृदयो वीरो वक्त्राच्छोणितमुद्वमन् ।
पपाताभिमुखः पार्थं छिन्नमूल इव द्रुमः ॥ १४
इन्द्रसेनद्वितीयस्तु रथात्प्रस्कन्द्य धर्मराट् ।
हताश्वः सहदेवस्य प्रतिपेदे महारथम् ॥ १५
नकुलं त्वभिसंधाय क्षेमंकरमहामुखौ ।
उभावुभयतस्तीक्ष्णैः शरवर्षैरवर्षताम् ॥ १६
तौ शरैरभिवर्षन्तौ जीमूताविव वार्षिकौ ।
एकैकेन विपाठेन जघ्ने माद्रवतीसुतः ॥ १७
त्रिगर्तराजः सुरथस्तस्याथ रथधूर्गतः ।
रथमाक्षेपयामास गजेन गजयानवित् ॥ १८
नकुलस्त्वपभीस्तस्माद्रथाच्चर्मासिपाणिमान् ।
उद्भ्रान्तं स्थानमास्थाय तस्थौ गिरिरिवाचलः ॥ १९
सुरथस्तं गजवरं वधाय नकुलस्य तु ।
प्रेषयामास सक्रोधमभ्युच्छ्रितकरं ततः ॥ २०
नकुलस्तस्य नागस्य समीपपरिवर्तिनः ।
सविषाणं भुजं मूले खड्गेन निरकृन्तत ॥ २१
स विनद्य महानादं गजः कङ्कणभूषणः ।
पतन्नवाक्शिरा भूमौ हस्त्यारोहानपोथयत् ॥ २२
स तत्कर्म महत्कृत्वा शूरो माद्रवतीसुतः ।
भीमसेनरथं प्राप्य शर्म लेभे महारथः ॥ २३
भीमस्त्वापततो राज्ञः कोटिकाश्यस्य संगरे ।
सूतस्य नुदतो वाहान्क्षुरेणापाहरच्छिरः ॥ २४
न बुबोध हतं सूतं स राजा बाहुशालिना । C. 3. 15740 B. 3. 271. 25 K. 3. 272. 25

Dc पदातिः. $K_{1.3.4}$ D_1 पांडु° (for कुन्ति°).

14 K_4 om. (hapl.) 14^a–15^b. — ^{a}) K_1 धीरो. — ^{b}) $Dn_{1.n2}$ $D_{1.3}$ G_3 उद्वहन्. — ^{c}) K_3 B_4 [अ]भिमुखं. K_1 तस्य (for पार्थं). T_1 पपात सहसा भूमौ; T_2 $G_{2.4}$ °भिमुखं प्रासश्. — ^{d}) = 4. 15. 9^d. M_2 जीर्ण° (for छिन्न°).

15 K_4 om. 15^{ab} (cf. v.l. 14). — ^{c}) T_1 अथास्य; T_2 हताश्वात्.

16 ^{a}) K_3 B_3 $D_{3.6}$ G_3 त्वभिसंयाय (K_3 D_3 both marg. *sec. m.* as in text); Dc_2 D_2 त्वभिसंप्राप्य; T $G_{1.3.4}$ चापि संवार्य; M त्वभिसंवार्य. — ^{b}) T_2 G_2 °सुमालवौ; $G_{1.3}$ °महामलौ. — ^{d}) $K_{1.2}$ अवाकिरत् (for अवर्षताम्).

17 ^{a}) B Dn $D_{3.4.6}$ G_3 तोमरैर्; Dc $D_{2.5}$ तौ शराव्. K_4 G_4 अभिवर्षतां. — ^{b}) K_4 पार्थिवौ (for वार्षिकौ). — ^{c}) D_1 एकैकेनैव बाणेन.

18 M_2 om. (hapl.) 18^a–23^b. — ^{b}) $K_{1.4}$ B_1 D_5 T_1 G_4 गजधूर्गतः; T_2 गजयूथपः. D_1 तत्पार्श्वगजधूर्गतः. — ^{c}) G_4 आरोप° (for आक्षेप°). — ^{d}) T_2 °न गजयूथवत्.

19 M_2 om. 19 (cf. v.l. 18). — ^{a}) K_1 D_1 तमभीस्; M_1 त्वपतत् (for त्वपभीस्). — ^{b}) T_2 $G_{1.3.4}$ °खड्गधृक् (for °पाणिमान्). — ^{c}) K B_1 Dc $D_{1.2}$ S (except G_3) उद्भ्राम्य; B_4 उद्भ्रांतः. — ^{d}) 1. 179. 14^d; 181. 4^d: 4. 54. 13^d. Cf. Hopkins, *Great Epic*, App. A, No. 91 (p. 414).

20 M_2 om. 20 (cf. v.l. 18). — ^{a}) $K_{1.2}$ सुरथस्थं. — ^{b}) T_1 रथाय (for वधाय). K_4 B_1 G_1 च (for तु). — ^{c}) D_1 M_1 संक्रुद्धम्. — ^{d}) $K_{1.2}$ B_1 Dn $D_{4.5}$ G_1 अत्यु° (for अभ्यु°). G_1 तदा; M_1 तथा.

21 M_2 om. 21 (cf. v.l. 18). — ^{a}) K_3 B_1 राज्ञस्य (for नाग°). — ^{c}) D_1 परं (for भुजं). K_1 T_2 मूलं; K_4 मूलात्. — ^{d}) B_4 निकृतं ततः; T_1 विनिकृंतत.

22 M_2 om. 22 (cf. v.l. 18). — ^{b}) $K_{1.2}$ किंकिणि°; $K_{3.4}$ B_3 कंटक°; $B_{2.4}$ Dc Dn_1 $D_{1.2.5}$ M_1 कंकट°; T_1 कनक°; T_2 $G_{1.2.4}$ घंटावि° (for कङ्कण°). — ^{c}) T_1 पपाताथ (for पतन्नवाक्-). K D_1 राजन् (for भूमौ). — ^{d}) T_2 दंतमोहाद्; G_2 हस्तिगोपान्; G_4 हस्तमोहाद्; M_1 हस्त्यारोहम्.

23 M_2 om. 23^{ab} (cf. v.l. 18). — ^{a}) K_{2-4} Dc $D_{1.2.5}$ स तत्कृत्वा महत्कर्म. — ^{d}) B_3 परंतपः (for महा°).

24 ^{b}) $K_{1.2}$ कोटिकाश्वस्य; K_4 B_1 Dn $D_{1.4.5}$ °स्यस्य; B_{2-4} Dc $D_{2.3}$ °स्यस्य; D_6 G_3 °स्येन. B_1 Dc D_2 S (except G_3) संयुगे. — ^{c}) K_1 B_3 Dc_2 M तुदतो; K_3 B_1 T_1 $G_{1.2.4}$ तु ततो; B_4 नकुलो (for नुदतो). — ^{d}) K_1 शरेण (for क्षुरेण). $K_{3.4}$ B_1 $Dn_{2.n3}$ D_3 G_1 [अ]पहरच्. Dc D_2 क्षुरप्रेणाहरच्छिरः.

25 ^{a}) K_4 बुधोपहतं; T_1 प्रबोधहतं. — ^{b}) Dc_2 $G_{2.4}$ M_2 बहुशालिना; T M_1 बा(T_1 व)हुशालिनः. — ^{c}) $K_{1.3.4}$ अश्वः. K_1 प्राद्रवत्; $K_{3.4}$ व्यद्रवत्; D_1 [अ]भ्याद्रवन्; T_1 व्यद्रवन्; T_2 G_2 प्राद्रवन्; $G_{1.4}$ M_1 [अ]भ्यद्रवन्; M_2 व्याद्रवन्. T_1 $G_{1.2}$ M संख्ये. — ^{d}) K_1 Dc_2 D_2 इतस्ततः (for ततस्ततः). $G_{1.2.4}$ हतसूतरथास्ततः (G_1 °थे स्थितः).

C. 3. 15740
B. 3. 271. 25
K. 3. 272. 25

तस्याश्वा व्यद्रवन्संख्ये हतसूतास्ततस्ततः ॥ २५
विमुखं हतसूतं तं भीमः प्रहरतां वरः ।
जघान तलयुक्तेन प्रासेनाभ्येत्य पाण्डवः ॥ २६
द्वादशानां तु सर्वेषां सौवीराणां धनंजयः ।
चकर्त निशितैर्भल्लैर्धनूंषि च शिरांसि च ॥ २७
शिबीनिक्ष्वाकुमुख्यांश्च त्रिगर्तान्सैन्धवानपि ।
जघानातिरथः संख्ये बाणगोचरमागतान् ॥ २८
सादिताः प्रत्यदृश्यन्त बहवः सव्यसाचिना ।
सपताकाश्च मातङ्गाः सध्वजाश्च महारथाः ॥ २९
प्रच्छाद्य पृथिवीं तस्थुः सर्वमायोधनं प्रति ।
शरीराण्यशिरस्कानि विदेहानि शिरांसि च ॥ ३०
श्वगृध्रकङ्ककाकोलभासगोमायुवायसाः ।
अतृप्यंस्तत्र वीराणां हतानां मांसशोणितैः ॥ ३१
हतेषु तेषु वीरेषु सिन्धुराजो जयद्रथः ।
विमुच्य कृष्णां संत्रस्तः पलायनपरोऽभवत् ॥ ३२
स तस्मिन्संकुले सैन्ये द्रौपदीमवतार्य वै ।
प्राणप्रेप्सुरुपाधावद्वनं येन नराधमः ॥ ३३
द्रौपदीं धर्मराजस्तु दृष्ट्वा धौम्यपुरस्कृताम् ।
माद्रीपुत्रेण वीरेण रथमारोपयत्तदा ॥ ३४
ततस्तद्विद्रुतं सैन्यमपयाते जयद्रथे ।
आदिश्यादिश्य नाराचैराजघान वृकोदरः ॥ ३५
सव्यसाची तु तं दृष्ट्वा पलायन्तं जयद्रथम् ।
वारयामास निघ्नन्तं भीमं सैन्धवसैनिकान् ॥ ३६

अर्जुन उवाच ।

यस्यापचारात्प्राप्तोऽयमस्मान्क्लेशो दुरासदः ।
तमस्मिन्समरोद्देशे न पश्यामि जयद्रथम् ॥ ३७

---

26 ^{a}) S (except G_3) विरथं (for °मुखं). — ^{c}) $K_{1.3.4}$ D_1 °मुक्तेन (for °युक्तेन). T_2 $G_{2.4}$ निजघानातियत्नेन; G_1 निजघान रथस्थेन. — ^{d}) T_1 [आ]वृत्य (for [अ]भ्येत्य). — After 26, T_1 ins.:

1214* तदा तु संप्रवृत्ते तु तुमुले योधसंक्षये ।
अङ्गारकः कुञ्जरश्च संजयो गुप्तकस्तथा ।
शत्रुंजयः सुप्रबुद्धो शुभकृत्क्रमका अपि ।
शूरः पराकुः कुहको द्वादशैते महारथाः ।
सुबलाः सैन्धवाश्चैव त्रिगर्ताश्च महाबलाः । [5]
इक्ष्वाकुयोधाः प्रबला रथिनः सह यद् द्विपाः ।
कोटीकृत्य च पार्थं तु शरवर्षैरवाकिरन् ।
अर्जुनस्तु ततः क्रुद्धः शरवर्षं निहत्य च ।

27 ^{ab}) K_4 वीराणां (for सर्वेषां), and सर्वेषां वा (for सौवीराणां). — ^{c}) $K_{1.2.4}$ D_1 बाणैर्; $G_{1.2}$ फलैर्.

28 ^{a}) S (except G_3) °वीरांश्च (for °मुख्यांश्च). — ^{c}) K_4 रथिनः (for [अ]तिरथः). S (as usual) संखे.

29 ^{a}) K_1 सागताः; T_2 $G_{1.2}$ सूदिताः. — ^{b}) $K_{1.3.4}$ Dc D_2 S (except G_3) बहुधा; D_1 बलिना (for बहवः). — T_1 om. 29^d–30^a.

31 ^{ab}) K_1 सगृध्रकंक°; K_3 श्वगृध्रकंककोलोकभास°; K_4 श्वगृध्रकंककाकोला भासागोमायु°; B_1 श्वकंकगृध्राः पृथुला भास°; Dc D_2 श्वगृध्रकंककाकोलश्येनगोमायु°; D_6 श्वगृध्रकंकगोमायुकाकोलूकाः सवायसाः; T M श्वकंकगृध्रकाकोल°; $G_{1.2.4}$ श्वकाकगृध्रकाकोल(G_1 °गाकोलो)भास°. — After 31, T_1 ins. a passage given in App. I (No. 26).

32 ^{d}) $B_{3.4}$ Dn D_{4-6} G_3 M °मना° (for °परो°). — After 32, T_1 ins.:

1215* विद्राव्यमाने सैन्ये तु मकरैरर्णवो यथा ।

33 ^{a}) K_4 आकुले (for संकुले). — ^{b}) B_1 अपहाय वै; $B_{2.3}$ Dn G_2 अवतार्य तां; D_5 T_2 $G_{1.4}$ °र्यं च. — ^{d}) K_3 ये च; D_8 (marg. *sec. m.*) वीरो; $G_{2.4}$ तत्र (for येन). K_3 $B_{2.3}$ Dc_2 D_3 (marg. *sec. m.*) T_2 G_4 नराधिपः; G_1 जनाधिपः. G_1 वनार्यैव नराधिपः.

34 ^{b}) M_2 कृत्वा (for दृष्ट्वा). B_2 °पुरःसरां. D_1 धौम्य दृष्टिपुरस्कृतां. — ^{c}) D_1 माद्रीसुतेन. — ^{d}) T_2 $G_{1.2}$ आरोहयत्. $B_{1.4}$ ततः (for तदा). — After 34, D_1 ins. an addl. colophon (*adhy. no.*: 271).

35 ^{a}) K_3 B_4 तं; D_1 $G_{1.3.4}$ तु (for तद्). K_4 विहतं. — ^{b}) K_1 उपयाते. — ^{c}) $K_{1.2}$ नाराचान्. — ^{d}) $K_{1.2}$ G_1 निचखान; K_3 B_2 T_2 निर्जघान; K_4 Dc $D_{1.2}$ T $G_{2.4}$ M_2 निजघान (for आजघान). —

37 ^{a}) K_4 Dc D_2 T_2 $G_{1.4}$ M [अ]पराधात्. — K_1 अस्मत्; $D_{1-3.6}$ अस्याः; G_1 अस्मात् (for अस्मान्). — ^{c}) K_1 स तस्मिन्; क्लेशोस्माकं (for अस्मान्क्लेशो). — ^{c}) K_1 स तस्मिन्; T_2 $G_{1.4}$ एतस्मिन् (for तमस्मिन्). B_1 शरणोद्देशे. — G_4 पश्याम.

38 ^{a}) $D_{1.3}$ अन्वेष; S (except $G_{2.3}$) अन्वि — ^{b}) K_4 नो; T_2 G_1 तैर् (for ते). — ^{c}) K_3 अमानुष

तमेवान्विष भद्रं ते किं ते योधैर्निपातितैः ।
अनामिषमिदं कर्म कथं वा मन्यते भवान् ॥ ३८

वैशंपायन उवाच ।

इत्युक्तो भीमसेनस्तु गुडाकेशेन धीमता ।
युधिष्ठिरमभिप्रेक्ष्य वाग्मी वचनमब्रवीत् ॥ ३९
हतप्रवीरा रिपवो भूयिष्ठं विद्रुता दिशः ।
गृहीत्वा द्रौपदीं राजन्निवर्ततु भवानितः ॥ ४०
यमाभ्यां सह राजेन्द्र धौम्येन च महात्मना ।
प्राप्याश्रमपदं राजन्द्रौपदीं परिसान्त्वय ॥ ४१
न हि मे मोक्ष्यते जीवन्मूढः सैन्धवको नृपः ।
पातालतलसंस्थोऽपि यदि शक्रोऽस्य सारथिः ॥ ४२

युधिष्ठिर उवाच ।

न हन्तव्यो महाबाहो दुरात्मापि स सैन्धवः ।
दुःशलामभिसंस्मृत्य गान्धारीं च यशस्विनीम् ॥ ४३

वैशंपायन उवाच ।

तच्छ्रुत्वा द्रौपदी भीममुवाच व्याकुलेन्द्रिया ।
कुपिता ह्रीमती प्राज्ञा पती भीमार्जुनावुभौ ॥ ४४
कर्तव्यं चेत्प्रियं मह्यं वध्यः स पुरुषाधमः ।
सैन्धवापसदः पापो दुर्मतिः कुलपांसनः ॥ ४५
भार्याभिहर्ता निर्वैरो यश्च राज्यहरो रिपुः ।
याचमानोऽपि संग्रामे न स जीवितुमर्हति ॥ ४६
इत्युक्तौ तौ नरव्याघ्रौ ययतुर्यत्र सैन्धवः ।
राजा निववृते कृष्णामादाय सपुरोहितः ॥ ४७
स प्रविश्याश्रमपदं व्यपविद्धबृसीघटम् ।
मार्कण्डेयादिभिर्विप्रैरनुकीर्णं ददर्श ह ॥ ४८
द्रौपदीमनुशोचद्भिर्ब्राह्मणैस्तैः समागतैः ।
समियाय महाप्राज्ञः सभार्यो भ्रातृमध्यगः ॥ ४९
ते स्म तं मुदिता दृष्ट्वा पुनरभ्यागतं नृपम् ।

C. 3. 15765
B. 3. 271. 50
K. 3. 272. 58

B_{1} अनामृष्यम्; $G_{1.2.4}$ अनार्याणाम् (for अनामिषम्). T_{2} अनामकं कर्म कथं. — ^{d}) T_{2} कर्तुं वै (for कथं वा).

39 ^{b}) D_{5} भारत (for धीमता). — Dc D_{2} om. 39^{cd}. — ^{c}) $G_{2.4}$ अभिप्रेत्य. — ^{d}) K_{3} Dn_{2} वाङ्मी; T_{1} इदं.

40 Before 40, M_{1} ins. भीमः. — ^{a}) T_{1} बहवो (for रिपवो). — ^{b}) T_{2} $G_{1.2.4}$ M भूयिष्ठं वि(T_{2} G_{4} प्र)द्रुतं बलं. — ^{c}) T_{1} प्रगृह्य (for गृहीत्वा). — ^{d}) K_{4} Dc D_{2} इति (for इतः).

41 ^{b}) $G_{1.2.4}$ तु (for च). — ^{d}) $B_{3.4}$ परिसांत्वयन्.

42 ^{a}) K_{3} मे मोक्षसे; Dc D_{2} संमोक्ष्य(D_{2} °क्ष)ते; D_{5} मोक्ष्यति मे. $K_{1.2}$ मूढो; K_{3} वीर (for जीवन्). — ^{b}) $K_{1.2}$ वीर (for मूढः). — T_{2} om. 42^{cd}. — ^{d}) G_{1} शक्रस्य (for शक्रोऽस्य).

43 K_{4} om. 43^{ab}. — ^{b}) D_{5} T $G_{1.2.4}$ चापि (for [अ]पि स). — ^{c}) K_{1} D_{1} अपि संस्मृत्य; T_{2} $G_{1.4}$ अभि(G_{1} भीम)संप्रेक्ष्य.

44 ^{a}) S (except G_{3}) साध्वी (for भीमम्). — ^{c}) K_{1-3} Dc $D_{2.5}$ बाला (for प्राज्ञा). K_{4} D_{1} कुपितांगी गतप्रज्ञा (D_{1} नरव्याघ्र); T_{2} कुपिता स्त्री महाप्राज्ञा.

45 Before 45, M_{1} ins. द्रौपदी. — ^{a}) S (except T_{1} G_{3} M_{1}) हि (for चेत्). — ^{c}) S (except G_{3}) °पशदः. — ^{d}) K D_{1} दुर्बुद्धिः (for दुर्मतिः).

46 ^{a}) $K_{1.2}$ Dn_{1} D_{5} भार्या विहर्ता; K_{3} °र्यां हि हर्ता; $B_{1.2}$ °पहर्ता; T_{1} °भिमंता; T_{2} $G_{2.4}$ M °वमंता; G_{1} °र्यां हि मंता. B_{1} यः पापो; B_{2} वै भीमो; $B_{3.4}$ D (except $D_{1.5}$) G_{3} वैरी यो; G_{1} निर्वीर्यो; M_{2} निर्वीरो. — ^{d}) K_{4} B D न मोक्तव्यः कथंचन (Dc °च नः).

47 Before 47, M_{1} ins. वैशं°. — ^{b}) B_{1} पर्यतप्यत सैंधवः. — ^{c}) T_{1} निववर्तते.

48 ^{a}) Dc_{2} D_{2} विवेशा° (for प्रविश्या°). — ^{b}) $K_{3.4}$ Dc $D_{1.2.5}$ °बृपी(K_{4} °बृशी)घटं; $B_{1.4}$ °बृपीमठं; $B_{2.3}$ Dn_{3} $D_{3.6}$ G_{3} विप्रविद्धबृपी(Dn_{3} G_{3} °सी)मठं; $Dn_{1.n2}$ D_{4} अपविद्धबृसी(D_{4} °षी)मठं; T_{1} $G_{2.4}$ अपविद्धबृसीकटं; T_{2} अप्रसिद्धबृपीमठं; G_{1} ह्यपविद्धबृपीकटं. — ^{d}) Dc D_{2} अनुकीर्णैर्; M_{2} अवकीर्णं. K_{4} D_{1} समंततः; D_{5} सहस्रशः (for ददर्श ह).

49 ^{b}) $K_{1.2}$ समंततः; B Dn $D_{3.4.6}$ T_{1} G_{3} M_{2} समाहितैः; Dc D_{2} °हितः. — ^{c}) K_{4} S (except T_{2} G_{3}) समेयाय. K_{1} महाबाहुः; K_{4} °प्राज्ञैः. — ^{d}) $K_{1.2}$ भृत्यमध्यगः; K_{4} धर्मनंदनः; D_{1} भ्रातृनंदनः.

50 ^{a}) K_{3} Dc D_{2} T_{1} G_{4} तं मुदितं; K_{4} प्रमुदिता; D_{3} तां मुदितां. K_{1} भृत्यैः सपदि तं दृष्ट्वा. — ^{b}) K_{2} B Dn D_{3-6} G_{3} प्रत्या° (for अभ्या°). — ^{c}) S (except T_{2} G_{3}) च (for तान्). — ^{d}) S (except T_{2}) om. च. T_{2} [आ]गतां (for [आ]हृतां).

C. 3. 15765
B. 3. 271. 50
K. 3. 272. 58

जित्वा तान्सिन्धुसौवीरान्द्रौपदीं चाहृतां पुनः ॥ ५०
स तैः परिवृतो राजा तत्रैवोपविवेश ह ।
प्रविवेशाश्रमं कृष्णा यमाभ्यां सह भामिनी ॥ ५१
भीमार्जुनावपि श्रुत्वा क्रोशमात्रगतं रिपुम् ।
स्वयमश्वांस्तुदन्तौ तौ जवेनैवाभ्यधावताम् ॥ ५२
इदमत्यद्भुतं चात्र चकार पुरुषोऽर्जुनः ।
क्रोशमात्रगतानश्वान्सैन्धवस्य जघान यत् ॥ ५३
स हि दिव्यास्त्रसंपन्नः कृच्छ्रकालेऽप्यसंभ्रमः ।
अकरोद्दुष्करं कर्म शरैरस्त्रानुमन्त्रितैः ॥ ५४
ततोऽभ्यधावतां वीरावुभौ भीमधनंजयौ ।
हताश्वं सैन्धवं भीतमेकं व्याकुलचेतसम् ॥ ५५
सैन्धवस्तु हतान्दृष्ट्वा तथाश्वान्स्वान्सुदुःखितः ।
दृष्ट्वा विक्रमकर्माणि कुर्वाणं च धनंजयम् ।
पलायनकृतोत्साहः प्राद्रवद्येन वै वनम् ॥ ५६
सैन्धवं त्वभिसंप्रेक्ष्य पराक्रान्तं पलायने ।
अनुयाय महाबाहुः फल्गुनो वाक्यमब्रवीत् ॥ ५७
अनेन वीर्येण कथं स्त्रियं प्रार्थयसे बलात् ।
राजपुत्र निवर्तस्व न ते युक्तं पलायनम् ।
कथं चानुचरान्हित्वा शत्रुमध्ये पलायसे ॥ ५८
इत्युच्यमानः पार्थेन सैन्धवो न न्यवर्तत ।
तिष्ठ तिष्ठेति तं भीमः सहसाभ्यद्रवद्बली ।
मा वधीरिति पार्थस्तं दयावानभ्यभाषत ॥ ५९

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५५ ॥

---

51 ^{b}) $B_{1.2.4}$ D_3 G_3 च (for [ए]व). — ^{d}) B D (except $D_{1.5}$) G_3 भाविनी.

52 ^{a}) Dc D_2 अपि श्रुत्य; D_1 अभिक्रुद्धौ; D_5 च संक्रुद्धौ. — ^{b}) $K_{3.4}$ K_4 B_3 Dn $D_{3.4.6}$ G_3 भीमसेनार्जुनौ चापि. — ^{b}) B_3 Dn D_{3-6} G_3 श्रुत्वा क्रोशगतं रिपुं; Dc_2 D_2 क्रोशमात्रं रिपुं गतं. — ^{c}) T_1 चोदयंतौ (for तुदन्तौ तौ). — ^{d}) $K_{1.3}$ [अ]थाभ्य°; G_2 ह्यभ्य° (for [ए]वाभ्य°).

53 ^{b}) B_4 Dc $D_{1.2.5}$ $G_{1.2.4}$ [अ]तिरथो; T_1 पुनर् (for पुरुषो). — After 53, T_1 ins. 1216*.

54 T_1 om. 54^{a}–56^{b}. — ^{b}) $K_{1.3.4}$ $G_{1.2}$ कृच्छ्र- (G_1 कष्ट)कालेष्वसंभ्रमः; G_4 M °ष्वसंभ्रमन्. — ^{d}) Dc $D_{1.2}$ M_1 अस्त्राभिमंत्रितैः.

55 T_1 om. 55 (cf. v.l. 54). — ^{a}) Dc D_2 दृष्ट्वा (for वीरौ). — ^{d}) T_2 अवेक्ष्याकुल°.

56 T_1 om. 56^{ab} (cf. v.l. 54). — ^{b}) K Dc_2 $D_{1.2.5}$ तान्सदश्वान्; $B_{1.4}$ T_2 G_1 M तत्राश्वान्स्वान्. $G_{2.4}$ तत्राश्वान्भृशदुःखितः. — T_2 $G_{1.2.4}$ M ins. after 56^{ab}: T_1 (which om. 54^{a}–56^{b}) ins. after 53:

1216* रथात्प्रस्कन्द्य पद्भ्यां वै पलायनपरोऽभवत् ।

— ^{c}) $K_{1.3.4}$ दृष्ट्वा विक्रम्य कर्माणि; K_2 B D (except D_1) अतिविक्रम(B_4 °मानुष)कर्माणि. — ^{f}) B_3 सैंधवं (for वै वनं). T_1 प्राद्रवन्नैव वनं ततः; G_1 प्रायाद्येव (sic) वनं प्रति.

57 ^{c}) K_4 अनुज्ञाय; Dc D_2 अन्वधावन्; S (except T_1 G_3) अनुयात्वा. Dc D_2 महाप्राज्ञः. — ^{d}) N (except K_1) T_2 G_3 फाल्गुनो.

58 ^{b}) T_1 transp. स्त्रियं and बलात्. — ^{e}) K_4 वानु°; $B_{2.3}$ Dn $D_{3.4.6}$ G_3 ह्यनु°; M_2 त्वानु (for चानु°). — ^{f}) $G_{1.2.4}$ प्रधावसि (for पला°).

59 After 59^{a}, K_4 ins.:

1217* अर्जुनेन च धीमता ।
सैन्धवोऽपि च पापात्मा.

— ^{b}) K_4 यातीति (for सैन्धवो). $B_{1.4}$ Dc D_2 नाभ्य°; T_1 न नि° (for न न्य°). — ^{d}) K_1 B_3 प्राद्रवद् (for [अ]भ्यद्र°). — ^{e}) Dc मावधीद्. B_1 S (except G_3) तु (for तं). — ^{f}) K_4 B_{1-3} Dc Dn $D_{3.4.6}$ $G_{2.3}$ प्रत्य° (for अभ्य°).

Colophon. — *Major parvan:* $K_{1.2}$ Dn_2 $G_{2.4}$ आरण्य. — *Sub-parvan:* $K_{1.3.4}$ B_{1-3} D G_3 M द्रौपदीप्रमाथ. — *Adhy. name:* B_4 जयद्रथदर्शनं; T_1 जयद्रथपलायनं. — *Adhy. no.* (figures, words or both): Dn 269 (Dn_3 270); D_1 272; T G_4 M (M_2 *inf. lin.*) 259 (M_2 orig. 261); G_1 256; G_2 258. — *Śloka no.:* Dn_1. n_3 61; Dn_2 60; D_1 27.

256

1 G_4 om. the ref. K_3 om. 1^{a}–2^{b}. — ^{a}) B_1 संप्राप्य; B_2 तं प्रेक्ष्य. — ^{b}) $K_{1.2}$ $B_{2.3}$ D (except Dc_1 $D_{1.2}$) G_3 °वुद्यतावुभौ. — ^{c}) K_2 B_{1-3} Dn D_{3-6} G_3 प्राधावद (for प्राद्रा°). T_1 आघूर्णो (for अव्यग्रो). — After 1, T_1 ins.:

२५६

वैशंपायन उवाच ।
जयद्रथस्तु संप्रेक्ष्य भ्रातरावुद्यतायुधौ ।
प्राद्रवत्तूर्णमव्यग्रो जीवितेप्सुः सुदुःखितः ॥ १
तं भीमसेनो धावन्तमवतीर्य रथाद्बली ।
अभिद्रुत्य निजग्राह केशपक्षेऽत्यमर्षणः ॥ २
समुद्यम्य च तं रोषान्निष्पिपेष महीतले ।
गले गृहीत्वा राजानं ताडयामास चैव ह ॥ ३
पुनः संजीवमानस्य तस्योत्पतितुमिच्छतः ।
पदा मूर्ध्नि महाबाहुः प्राहरद्विलपिष्यतः ॥ ४
तस्य जानुं ददौ भीमो जघ्ने चैनमरत्निना ।
स मोहमगमद्राजा प्रहारवरपीडितः ॥ ५
विरोषं भीमसेनं तु वारयामास फल्गुनः ।
दुःशलायाः कृते राजा यत्तदाहेति कौरव ॥ ६
भीमसेन उवाच ।
नायं पापसमाचारो मत्तो जीवितुमर्हति ।
द्रौपद्यास्तदनर्हायाः परिक्लिष्टा नराधमः ॥ ७
किं नु शक्यं मया कर्तुं यद्राजा सततं घृणी ।
त्वं च बालिशया बुद्ध्या सदैवास्मान्प्रबाधसे ॥ ८
एवमुक्त्वा सटास्तस्य पञ्च चक्रे वृकोदरः ।
अर्धचन्द्रेण बाणेन किंचिदब्रुवतस्तदा ॥ ९
विकल्पयित्वा राजानं ततः प्राह वृकोदरः ।
जीवितुं चेच्छसे मूढ हेतुं मे गदतः शृणु ॥ १० C. 3. 15786 B. 3. 272. 10 K. 3. 273. 11

1218* सलताभिः *संवृते किरीटं रत्नभास्वरम् ।
आपे विद्रव्य धावन्तं निलीयन्तं वनान्तरम् ।
भीमसेनस्तु तं कक्षे लीयमानं भयाकुलम् ।
मार्गमाणोऽवतीर्याशु रथाद्रत्नविभूषितात् ।

2 K_3 T_1 om. 2^{ab} (for K_3 cf. v.l. 1). — ^{c}) K_3 जयद्रथं च जग्राह; D_5 अभिद्रुत्याभिज°; $G_{2.\,4}$ अभिद्रुतं तं ज°. — ^{d}) B_{2-4} Dn $D_{3.\,4.\,6}$ G_3 °क्षे ह्यमर्षणः.

3 ^{a}) B D (except $D_{1.\,5}$) G_3 भीमो (for रोषान्). — ^{c}) B Dn $D_{3.\,4.\,6}$ G_3 शिरो (for गले). — D_5 om. 3^{d}–5^{c}. — ^{d}) K_1 त्रासयामास; K_{2-4} Dc_2 $D_{1.\,2}$ T_1 भ्राम°; T_2 $G_{2.\,4}$ M पात°; G_1 पोथ°. $K_{1.\,3.\,4}$ D_1 G_4 M_2 चैव हि; M_2 (*sup. lin.*) भूतले.

4 D_5 om. 4 (cf. v.l. 3). — ^{a}) T_2 G_2 पुनः स जीव-मासाद्य. — ^{b}) T_2 $G_{1.\,2}$ सद्योत्पतितु°; G_4 सद्योत्पादितु°. — ^{d}) $B_{1.\,3}$ प्राहनद्.

5 D_5 om. 5^{abc} (cf. v.l. 3). — ^{a}) K Dc $D_{2.\,4.\,6}$ $G_{3.\,4}$ जानु; B_{2-4} Dn_1 जानू. T_1 तदा (for ददौ). — ^{b}) K_3 जघान (for जघ्ने च). B_1 $G_{1.\,2.\,4}$ चैवम्. $K_{1.\,2}$ जघ्ने चैवमरत्निणा. — ^{c}) $G_{2.\,4}$ राजन्. — ^{d}) K_4 °बल°; S (except G_3) °परि° (for °वर°).

6 ^{a}) K_1 विज्ञप्ति; K_2 विक्रोशं; B_1 विरोषो; B_{2-4} Dc $D_{2.\,5}$ T $G_{1.\,2.\,4}$ सरोषं. — ^{b}) K B_2 $D_{1.\,5}$ स्मार° (for वार°). N (except K_1) G_3 फाल्गुनः. — ^{d}) $K_{3.\,4}$ $D_{1.\,5}$ S (except G_3) त्वाम् (for तदा). B_2 [उ]वाच (for [आ]हेति). T_1 स (for [इ]ति). $K_{1.\,2}$ B_{2-4} $G_{1.\,2.\,4}$ M कौरवः; T_1 धर्मराट्.

☞ Many of the following stanzas (up to 24) recur almost *verbatim* in an interpolated passage of the Virāṭaparvan (cf. App. I, No. 32 of that parvan).

7 $K_{3.\,4}$ $B_{2.\,3}$ Dn_2. n_3 $D_{4.\,6}$ G_3 भीम उ°; T $G_{1.\,2.\,4}$ M भीमः. — ^{b}) T_2 मर्त्यो; G_1 मुक्तो (for मत्तो). T_1 भवितु° (for जीवितु°). — ^{c}) B Dn $D_{3.\,4.\,6}$ G_3 कृष्णायास् (for द्रौपद्यास्). K_4 M_2 तव (M_2 °म-) नार्हायाः; Dc D_2 यस्त्वनर्हायाः.

8 ^{b}) T_1 स (for यद्). — ^{c}) $G_{1.\,2.\,4}$ तु (for च). — ^{d}) K Dc $D_{1.\,2.\,5}$ सततं स्म; S (except G_3) यततो-स्मान्. K $D_{1.\,5}$ T_1 प्रभाषसे.

9 Before 9, K $D_{1.\,5}$ ins. वैशं° उ° (resp. वैशं°). — ^{a}) $K_{1.\,3}$ D_5 सदा. D_5 चक्रे (for तस्य). — ^{b}) D_5 तस्य पंच वृको°. — ^{d}) D_1 न ब्रुवत°; G_1 उद्द्रवत° (for अब्रु°). T_1 मुंडयित्वा शिरस्तथा.

10 ^{a}) $K_{1.\,3}$ विकल्पबुद्ध्या; B Dn D_{3-6} G_3 विकस्थ°; M विरूप°. — ^{b}) K_4 त्वाह (for प्राह). — After 10^{ab}, T_1 ins. a corrupt variant of 13^{ab}:

1219* तं तथा न विचेष्टन्तमबुध्वाप वृकोदरः ।

— ^{c}) K_1 T_1 G_4 M_1 जीवितं; K_3 जीवित्वं. — ^{d}) K_3 ह्येतन् (for हेतुं). D_5 वदतः.

11 ^{a}) B_3 तथा (for त्वया). — ^{b}) T_1 सन्तु चैव (for

C. 3. 15787
B. 3. 272. 11
K. 3. 273. 12

दासोऽस्मीति त्वया वाच्यं संसत्सु च सभासु च ।
एवं ते जीवितं दद्यामेष युद्धजितो विधिः ॥ ११
एवमस्त्विति तं राजा कृच्छ्रप्राणो जयद्रथः ।
प्रोवाच पुरुषव्याघ्रं भीममाहवशोभिनम् ॥ १२
तत एनं विचेष्टन्तं बद्ध्वा पार्थो वृकोदरः ।
रथमारोपयामास विसंज्ञं पांसुगुण्ठितम् ॥ १३
ततस्तं रथमास्थाय भीमः पार्थानुगस्तदा ।
अभ्येत्याश्रममध्यस्थमभ्यगच्छद्युधिष्ठिरम् ॥ १४
दर्शयामास भीमस्तु तदवस्थं जयद्रथम् ।
तं राजा प्राहसद्दृष्ट्वा मुच्यतामिति चाब्रवीत् ॥ १५
राजानं चाब्रवीद्भीमो द्रौपद्यै कथयेति वै ।
दासभावं गतो ह्येष पाण्डूनां पापचेतनः ॥ १६
तमुवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः ।
मुञ्चैनमधमाचारं प्रमाणं यदि ते वयम् ॥ १७
द्रौपदी चाब्रवीद्भीममभिप्रेक्ष्य युधिष्ठिरम् ।
दासोऽयं मुच्यतां राज्ञस्त्वया पञ्चसटः कृतः ॥ १८
स मुक्तोऽभ्येत्य राजानमभिवाद्य युधिष्ठिरम् ।
ववन्दे विह्वलो राजा तांश्च सर्वान्मुनींस्तदा ॥ १९
तमुवाच घृणी राजा धर्मपुत्रो युधिष्ठिरः ।
तथा जयद्रथं दृष्ट्वा गृहीतं सव्यसाचिना ॥ २०
अदासो गच्छ मुक्तोऽसि मैवं कार्षीः पुनः क्वचित् ।
स्त्रीकामुक धिगस्तु त्वां क्षुद्रः क्षुद्रसहायवान् ।
एवंविधं हि कः कुर्यात्त्वदन्यः पुरुषाधमः ॥ २१
गतसत्त्वमिव ज्ञात्वा कर्तारमशुभस्य तम् ।
संप्रेक्ष्य भरतश्रेष्ठः कृपां चक्रे नराधिपः ॥ २२
धर्मे ते वर्धतां बुद्धिर्मा चाधर्मे मनः कृथाः ।
साश्वः सरथपादातः स्वस्ति गच्छ जयद्रथ ॥ २३
एवमुक्तस्तु सव्रीडं तूष्णीं किंचिदवाङ्मुखः ।

संसत्सु च). — ^{c}) $G_{2.4}$ चेज् (for ते). — ^{d}) $K_{1.2}$ ते युज्यते; K_{4} $D_{3.5}$ M_{2} युद्धजिते.

12 ^{b}) K_{2} $B_{1.3.4}$ Dn $D_{3.4.6}$ G_{3} कृष्यमाणो; K_{4} कृच्छ्रप्राप्तो. K_{1} जितेंद्रियः (for जय°). — ^{d}) K_{2} Dn_{2} °शोभनं; K_{3} B_{3} D_{2} °शोभितं. G_{1} दासोहं वो वृकोदर.

13 K_{1} om. 13. — ^{b}) B_{3} Dc D_{2} पाशैर् (for पार्थो). — ^{d}) K (K_{1} om.) Dc D_{5} पांशुगुंठितं; S (except G_{3}) पांसुकुंठितं.

14 ^{b}) K_{2} Dc $D_{2.5}$ T_{2} तथा. — ^{c}) $G_{2.4}$ अप्यम् (for अभ्येत्य).

15 ^{a}) G_{2-4} M_{2} बीभत्सुस्. — ^{b}) B_{2} (m as in text) युधिष्ठिरं (for जय°). — ^{c}) K_{3} B_{4} प्राह स दृष्ट्वा; D_{3} G_{2} प्राह संदृष्ट्वा; D_{5} T G_{4} प्रहसन्दृष्ट्वा. M_{2} तं दृष्ट्वा प्राहसद्राजा.

16 ^{b}) K $B_{1.3}$ (orig.) Dc $D_{1.2.5}$ T_{1} द्रौपदी ($B_{1.3}$ °दीं) कथयत्विति; $B_{2.3m.4}$ Dn $D_{4.6}$ G_{3} द्रौपद्याः कथ्यतामिति. — ^{d}) $K_{2.3}$ D_{1} °चेतसः.

17 ^{a}) B_{1} युधां श्रेष्ठो; D_{5} ततो हृष्टो. — ^{b}) T_{2} राजा (for भ्राता). D_{3} M_{1} सं-; T_{1} [अ]सौ (for स-). — ^{c}) B D (except $D_{1.5}$) G_{3} मुंचेमम्. — ^{d}) B D (except $D_{1.3}$) G_{3} प्रमाणा.

18 ^{b}) K Dc $D_{1.2.5}$ अभिगम्य; B_{2} °वीक्ष्य. — ^{c}) T_{1} वि- (for ऽयं). $K_{3.4}$ Dn_{2}. n_{3} राजन्; T_{1} पापः (for राज्ञः). — ^{d}) G_{2} पंचशिरः; G_{4} °शिखः. G_{1} त्वया पंचसटाः कृताः. — After 18, T_{1} ins.:

1220* एवमुक्तः स भीमस्तु भ्रात्रा चैव च कृष्णया ।
मुमोच तं महापापं जयद्रथमचेतसम् ।;

while G_{1} ins.:

1221* स मु[मो]चैवमुक्तस्तु भीमस्तं बन्धनात्तदा ।

19 ^{a}) T_{2} एवमुक्तो हि राजानम्. — ^{c}) $B_{2.3}$ Dn $D_{3.4.6}$ T_{2} G_{3} राजन् (for राजा). — ^{d}) B Dn $D_{4.6}$ G_{3} दृष्ट्वा; T G_{1} M सिद्धान्; $G_{2.4}$ वृद्धान् (for सर्वान्). Dc $D_{2.5}$ तथा (for तदा).

21 ^{a}) T_{2} $G_{2.4}$ अभीतो; G_{1} अभितो (for अदासो). — ^{b}) D_{1} त्विति (for क्वचित्). — ^{c}) B D_{2} स्त्रीकामं च; Dn $D_{4.6}$ G_{3} °कामं वा; T_{1} °कामुका; M_{1} °कामुकं. $K_{1.2}$ त्वा (for त्वां). — ^{d}) K B_{3} $D_{1.3.5}$ T_{1} M_{1} क्षुद्रकर्म°; Dc Dn_{3} D_{2} क्षुद्रं क्षुद्र°; Dn_{2} $D_{4.6}$ M_{2} क्षुद्र क्षुद्र°; T_{2} $G_{1.2.4}$ क्षुद्रक्षत्र°. — ^{e}) B_{1} एवं विहिंसकः कुर्यात्. — ^{f}) Dn_{2} D G_{2-4} पुरुषाधम. — After 21, T_{2} $G_{1.2.4}$ M_{1} ins.:

1222* कर्म धर्मविरुद्धं वै लोकदुष्टं च दुर्मते ।

22 ^{a}) B_{1} इति; Dc_{2} D_{2} इदं; T_{1} अपि (for इव). — ^{c}) T_{1} संप्रेष्य. Dc $D_{2.4}$ M_{1} भरतश्रेष्ठ. — ^{d}) K_{4} D G_{4} नराधिप; B_{4} युधिष्ठिरः.

23 ^{a}) K B_{1} Dc $D_{1.2.5}$ G_{1} M_{2} वर्ततां; M_{1} रमतां — ^{b}) $K_{1.2}$ मतिं (for मनः). — ^{d}) B_{3} तेस्तु (for गच्छ).

24 ^{a}) G_{2} M स (for तु). $K_{1.3.4}$ $B_{1.2.4}$ Dc

जगाम राजा दुःखार्तो गङ्गाद्वाराय भारत ॥ २४
स देवं शरणं गत्वा विरूपाक्षमुमापतिम् ।
तपश्चचार विपुलं तस्य प्रीतो वृषध्वजः ॥ २५
बलिं स्वयं प्रत्यगृह्णात्प्रीयमाणस्त्रिलोचनः ।
वरं चास्मै ददौ देवः स च जग्राह तच्छृणु ॥ २६
समस्तान्सरथान्पञ्च जयेयं युधि पाण्डवान् ।
इति राजाब्रवीद्देवं नेति देवस्तमब्रवीत् ॥ २७
अजय्यांश्चाप्यवध्यांश्च वारयिष्यसि तान्युधि ।
ऋतेऽर्जुनं महाबाहुं देवैरपि दुरासदम् ॥ २८
यमाहुरजितं देवं शङ्खचक्रगदाधरम् ।
प्रधानः सोऽस्त्रविदुषां तेन कृष्णेन रक्ष्यते ॥ २९
एवमुक्तस्तु नृपतिः स्वमेव भवनं ययौ ।
पाण्डवाश्च वने तस्मिन्न्यवसन्काम्यके तदा ॥ ३० C. 3. 15858 B. 3. 272. 81 K. 3. 273. 83

इति श्रीमहाभारते आरण्यकपर्वणि षट्पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५६ ॥

$D_{1.2}$ T_1 $G_{1.2.4}$ सव्रीडस; M तु व्रीळात्. — ^{b}) B_3 T_1 G_2 M अधोमुखः. — ^{c}) K_4 B Dn $D_{1.3.4.6}$ G_3 राजन् (for राजा).

25 ^{a}) K_4 कृत्वा (for गत्वा). — After 25^{ab}, T_1 ins.:

1223* निराहारो जितक्रोधः पादाङ्गुष्ठाग्रविष्ठितः ।

— ^{d}) B_4 (m as in text) [ऽ]भवद्भवः; T_2 $G_{1.2.4}$ [ऽ]भवत्तदा (for वृष°).

26 ^{a}) D_1 पूजां (for बलिं). — ^{c}) K Dc $D_{1.2}$ प्रीतः (for देवः). K_4 वरं चास्याददत्प्रीतः. — ^{d}) K_2 B D (except Dc_2 $D_{1.2}$) T_1 G_3 transp. च and जग्राह. D_1 S (except T_1 G_3) तं (for तत्).

27 Before 27, $B_{3.4}$ Dn_2 $D_{3.4}$ G_3 ins. जयद्रथ उ°. — ^{d}) T_2 $G_{1.2.4}$ ततो (for तम्).

28 Before 28, K_3 $G_{1.2.4}$ M ins. देवः; $B_{1.3.4}$ Dc महेश्वर उ°; B_2 शिव उ°; $D_{2.5}$ देवदेव उ°. — ^{b}) K_1 धार° (for वार°). Dc D_2 शृणु (for युधि). — After 28^{c}, B D (except D_1) G_3 ins.:

1224* नरं नाम सुरेश्वरम् ।
बदर्यां तप्ततपसं नारायणसहायकम् ।
अजितं सर्वलोकानां.

[(L. 1) D_5 देवैरपि सुदुःसहं. — (L. 2) B_1 °सहायवान्.] — ^{d}) K M दुरुत्सहं (for दुरासदम्). — After 28^{d}, B D (except D_1) G_3 ins. a passage given in App. I (No. 27). On the other hand, $K_{1.2.4}$ ins. after 28^{d}:

1225* मम पाशुपतास्त्रेण गुप्तं सर्वत्र सर्वदा ।

29 ^{a}) K_2 B Dn D_{2-6} T G_3 M कृष्णं (for देवं). — After 29^{ab}, B D (except D_1) G_3 ins.:

1226* श्रीवत्सधारिणं देवं पीतकौशेयवाससम् ।

— ^{c}) K_4 B D G_3 M_1 प्रधानं श(K_4 Dn_3 D_5 °नं शा°; $B_{1.4}$ °नः श°; M_1 °नं सो)स्त्रविदुषां. — ^{d}) B_2 तेन कृष्णेति कीर्त्यते; T_2 तेन द्रक्ष्यसि रक्षितं. — After 29, B D (except D_1) G_3 ins.:

1227* सहायः पुण्डरीकाक्षः श्रीमानतुलविक्रमः ।
समानस्यन्दने पार्थमास्थाय परवीरहा ।
न शक्यते तेन जेतुं त्रिदशैरपि दुःसहः ।
कः पुनर्मानुषो भावो रणे पार्थं विजेष्यति ।
तमेकं वर्जयित्वा तु सर्वं यौधिष्ठिरं बलम् । [5]
चतुरः पाण्डवान्राजन्दिनैकं जेष्यसे रिपून् ।
वैशंपायन उवाच ।
इत्येवमुक्त्वा नृपतिं सर्वपापहरो हरः ।
उमापतिः पशुपतिर्यज्ञहा त्रिपुरार्दनः ।
वामनैर्विकटैः कुब्जैरुग्रश्रवणदर्शनैः ।
वृतः पारिषदैर्घोरैर्नानाप्रहरणोद्यतैः । [10]
त्र्यम्बको राजशार्दूल भगनेत्रनिपातनः ।
उमासहायो भगवांस्तत्रैवान्तरधीयत ।

[(L. 3) B_1 स जेतुं वै (for तेन जेतुं). — (L. 4) B_1 कः पुमान्; B_4 किं पुनर्; Dc D_2 क एष (for कः पुनर्). — (L. 5) B_1 त्वया; Dc D_2 त्वं वै (for सर्वं). — (L. 7) Dc D_2 इत्युक्त्वा नृपतिं राजन् (for the prior half). — (L. 8) Dc D_2 त्रिपुरांतकः (for °रार्दनः). — (L. 9) Dc D_2 विकचैः; D_5 वड्डकैः (for विकटैः). Dc D_2 उग्रश्वरण° (for उग्रश्रवण°). — (L. 10) Dc D_2 परिषदैर् (for पारि°).] — On the other hand, T_1 ins. after 29:

1228* तस्मात्त्वं पार्थरहितान्पाण्डवान्वारयिष्यसि ।
एकदा पुरुषव्याघ्र मया दत्तं वरं तव ।

30 ^{a}) B D (except D_1) G_3 जयद्रथोपि मंदात्मा. — ^{b}) T_2 स्वयमेव वनं ययौ. — ^{c}) D_5 च तदा; T_2 च हते; $G_{2.4}$ विपिने (for च वने). — ^{d}) S (except G_3) transp. न्यवसन् and काम्यके. B_3 Dn $D_{3.4.6}$ G_3 तथा.

Colophon. — *Major parvan*: K_3 Dn_2 $G_{2.4}$ आरण्य.

२५७

C. 3. 15859
B. 3. 273. 1
K. 3. 274. 1

जनमेजय उवाच ।
एवं हृतायां कृष्णायां प्राप्य क्लेशमनुत्तमम् ।
अत ऊर्ध्वं नरव्याघ्राः किमकुर्वत पाण्डवाः ॥ १
वैशंपायन उवाच ।
एवं कृष्णां मोक्षयित्वा विनिर्जित्य जयद्रथम् ।
आसांचक्रे मुनिगणैर्धर्मराजो युधिष्ठिरः ॥ २
तेषां मध्ये महर्षीणां शृण्वतामनुशोचताम् ।
मार्कण्डेयमिदं वाक्यमब्रवीत्पाण्डुनन्दनः ॥ ३
मन्ये कालश्च बलवान्दैवं च विधिनिर्मितम् ।
भवितव्यं च भूतानां यस्य नास्ति व्यतिक्रमः ॥ ४
कथं हि पत्नीमस्माकं धर्मज्ञां धर्मचारिणीम् ।
संस्पृशेदीदृशो भावः शुचिं स्तैन्यमिवानृतम् ॥ ५
न हि पापं कृतं किंचित्कर्म वा निन्दितं क्वचित् ।
द्रौपद्या ब्राह्मणेष्वेव धर्मः सुचरितो महान् ॥ ६
तां जहार बलाद्राजा मूढबुद्धिर्जयद्रथः ।
तस्याः संहरणात्प्राप्तः शिरसः केशवापनम् ।
पराजयं च संग्रामे ससहायः समाप्तवान् ॥ ७
प्रत्याहृता तथास्माभिर्हत्वा तत्सैन्धवं बलम् ।
तद्दारहरणं प्राप्तमस्माभिरवितर्कितम् ॥ ८
दुःखश्चायं वने वासो मृगयायां च जीविका ।

— *Sub-parvan* : N G$_3$ M$_1$ द्रौपदीप्रमाथ ; to it the same MSS. (except B$_2$ Dn$_3$ G$_3$) add समाप्त. — *Adhy. name* : B$_4$ जयद्रथवरलम्भः ; T$_1$ M जयद्रथसटा(T$_1$ °टी)करणं ; G$_1$ जयद्रथशिरोवपनं. — *Adhy. no.* (figures, words or both): Dn 270 (Dn$_3$ 271) ; D$_1$ 273 ; T G$_4$ M (M$_2$ *inf. lin.*) 260 (M$_2$ orig. 262) ; G$_1$ 257 ; G$_2$ 259. — *Śloka no.* : Dn 81 ; D$_1$ 31.

257

1 ^{a}) K$_{1.2}$ गतायां (for हृ°). — ^{b}) Dc$_2$ D$_2$ प्राप्ताः (for प्राप्य). — ^{d}) K$_3$ B$_{1.3}$ D$_{1-3}$ T$_1$ G$_1$ M अकुर्वंत (for °र्वत).

2 K$_4$ om. 2^{ab}. — ^{ab}) K$_2$ G$_1$ मोच° ; Dc$_2$ D$_2$ मोह° (for मोक्ष°). B$_{2.3}$ transp. मोक्ष° and विनि°.

3 ^{a}) T G$_{1.2.4}$ महर्षिणां मध्ये (by transp.). — After 3, B D (except D$_{1.5}$) G$_3$ ins. :

1229* युधिष्टिर उवाच ।
भगवन्देवर्षीणां त्वं ख्यातो भूतभविष्यवित् ।
संशयं परिपृच्छामि छिन्धि मे हृदि संस्थितम् ।

[(L. 1) To improve the metre, B$_{3.4}$ देवर्षीणां त्वं प्रवरः (for the prior half). — (L. 2) B$_2$ तं छिंधि (for छिन्धि मे). B$_1$ तं मे छिंधि हृदि स्थितं ; Dc D$_2$ छिंधि तं च हृदि स्थितं (for the posterior half).]

— B Dn D$_{3.4.6}$ G$_3$ cont. : Dc D$_2$ ins. after 5 :

1230* द्रुपदस्य सुता ह्येषा वेदिमध्यात्समुत्थिता ।
अयोनिजा महाभागा स्नुषा पाण्डोर्महात्मनः ।

[(L. 1) B$_1$ ज्येष्ठा (for ह्येषा). D$_2$ दुहिता द्रुपदस्यैषा (for the prior half).]

4 Before 4, T$_1$ M$_1$ ins. युधिष्ठिरः. — ^{a}) T G$_{1.3.4}$ कालं च. B$_3$ Dn D$_{4.6}$ G$_3$ भगवान् ; T$_2$ G$_{1.2.4}$ भगवन् (for बलवान्). — ^{b}) T$_2$ विधिनिर्जितं ; G$_{2.4}$ दुरतिक्रमं.

5 ^{a}) B Dc$_1$ Dn D$_{3.4.6}$ G$_3$ इमां (for कथं). — ^{b}) G$_2$ पांचालीं (for धर्मज्ञां). B$_1$ धर्मभाविनी ; Dc$_2$ D$_2$ °चारिणां. — ^{d}) Dc$_2$ D$_2$ शुचीन् ; D$_5$ G$_{2.4}$ शुचि. B$_{1.2}$ [अ]मृतं (for [अ]नृतम्). — After 5, Dc D$_2$ ins. 1230*.

6 ^{b}) Dc कर्मणा (for कर्म वा). K$_{1.2}$ D$_5$ निर्मितं (for निन्दितं). — ^{c}) G$_{2.4}$ [ए]वं (for [ए]व).

7 ^{a}) K$_4$ स यत् (for बलाद्). K Dc$_2$ D$_{3.5}$ पापो ; D$_1$ पुण्यां (for राजा). — ^{c}) K$_1$ M$_2$ तस्य (for तस्याः). K$_1$ स्म ; K$_3$ T G$_{1.2}$ स (for सं·). B$_1$ संहरणोपायः ; D$_2$ संहरणार्थाय. K प्राप्तं ; B$_{2-4}$ Dn D$_{3.4.6}$ G$_3$ पापः ; G$_4$ पार्थाः (for प्राप्तः). — ^{d}) B Dn D$_3$ (marg. *sec. m.* as in text). $_{4.6}$ °पातनं (for °वापनम्). — ^{f}) G$_{2.4}$ ससहायैः. K$_3$ स आप्तवान् ; B$_2$ स पांडवान्. M$_1$ सहायः समवाप्तवान्.

8 ^{a}) T$_1$ सहा° ; T$_2$ तदा° (for तथा°). — ^{b}) G$_{2.4}$ जित्वा (for हत्वा). — ^{c}) D$_1$ तद्वीरग्रहणं ; T$_1$ ततोनुग्रहणं ; G$_{2.4}$ तत्तदा हरणं.

9 ^{b}) K$_{1.2}$ जीवनं (for जीविका). — ^{d}) G$_4$ वनौको हि (for °कोभिर्). — ^{f}) K$_2$ Dn$_1$, n$_3$ इयं ; Dc D$_2$ अपि (for अयम्).

हिंसा च मृगजातीनां वनौकोभिर्वनौकसाम् ।
ज्ञातिभिर्विप्रवासश्च मिथ्या व्यवसितैरयम् ॥ ९
अस्ति नूनं मया कश्चिदल्पभाग्यतरो नरः ।
भवता दृष्टपूर्वो वा श्रुतपूर्वोऽपि वा भवेत् ॥ १०

इति श्रीमहाभारते आरण्यकपर्वणि सप्तपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५७ ॥

२५८

मार्कण्डेय उवाच ।
प्राप्तमप्रतिमं दुःखं रामेण भरतर्षभ ।
रक्षसा जानकी तस्य हृता भार्या बलीयसा ॥ १
आश्रमाद्राक्षसेन्द्रेण रावणेन विहायसा ।
मायामास्थाय तरसा हत्वा गृध्रं जटायुषम् ॥ २
प्रत्याजहार तां रामः सुग्रीवबलमाश्रितः ।
बद्ध्वा सेतुं समुद्रस्य दग्ध्वा लङ्कां शितैः शरैः ॥ ३
युधिष्ठिर उवाच ।
कस्मिन्रामः कुले जातः किंवीर्यः किंपराक्रमः ।
रावणः कस्य वा पुत्रः किं वैरं तस्य तेन ह ॥ ४
एतन्मे भगवन्सर्वं सम्यगाख्यातुमर्हसि ।
श्रोतुमिच्छामि चरितं रामस्याक्लिष्टकर्मणः ॥ ५
मार्कण्डेय उवाच ।
अजो नामाभवद्राजा महानिक्ष्वाकुवंशजः ।
तस्य पुत्रो दशरथः शश्वत्स्वाध्यायवाञ्शुचिः ॥ ६
अभवंस्तस्य चत्वारः पुत्रा धर्मार्थकोविदाः ।
रामलक्ष्मणशत्रुघ्ना भरतश्च महाबलः ॥ ७
रामस्य माता कौसल्या कैकेयी भरतस्य तु । C. 3. 15879 B. 3. 274. 8 K. 3. 275. 8

---

10 = (var.) 3. 49. 34^{abcd}. — ^{a}) S (except T$_1$ G$_3$) लोके (for नूनं). — ^{d}) K$_{1-3}$ D$_1$ भवेदिति (for ऽपि वा भवेत्). S (except G$_3$) क्वचित् (for भवेत्).

Colophon om. in B$_4$. — *Major parvan:* K$_{1.2.4}$ Dn$_3$ G$_{2.4}$ आरण्य. — *Sub-parvan:* K$_{3.4}$ B$_{1-3}$ Dc Dn D$_{2-6}$ G$_3$ (all om. sub-parvan name) mention only रामो(B$_2$ श्रीरामो)पाख्यान; M$_2$, likewise, रामायणोपाख्यान. — *Adhy. no.* (figures, words or both): Dn 271 (Dn$_3$ 272); D$_1$ 274; T G$_4$ M (M$_2$ *inf. lin.*) 261 (M$_2$ orig. 263); G$_1$ 258; G$_2$ 260. — *Śloka no.:* Dn 13; D$_1$ 11.

258

1 ^{a}) G$_{2.4}$ मतिमता (for अप्रतिमं). K$_4$ रूपं (for दुःखं). — ^{b}) K$_4$ दुःखं रामेण भारत; T$_1$ रामेणाक्लिष्टकर्मणा. — After 1^{ab}, K$_2$ D$_5$ ins.:

1231* व्यसनं पितृशोकादि भार्याया हरणं महत् ।
पितुर्निदेशाद्वसतो वनेऽस्य स्वर्गतः पिता ।

2 ^{a}) K$_{1.2}$ रक्षसा तेन (for राक्षसेन्द्रेण). — ^{b}) B$_{1.3.4}$ Dc Dn D$_{2-4.6}$ G$_3$ दुरात्मना; B$_2$ D$_5$ G$_2$ बलीयसा (for विहायसा).

3 ^{a}) K$_{1.2}$ राजन् (for रामः). — ^{c}) K$_4$ समुद्रे स (for °द्रस्य). — After 3, B$_{3.4}$ Dc D$_{1.2}$ ins.:

1232* ततस्तं बलवान्रामो रिपुं भार्यापहारिणम् ।
सह वानरसैन्येन जघान रणमूर्धनि ।

4 ^{c}) B D (except D$_5$) G M$_2$ पुत्रो वा (by transp.). — ^{d}) K B$_{1.3.4}$ Dc$_2$ D$_{2.5.6}$ T$_1$ च; T$_2$ G$_{1.2.4}$ M वै (for ह).

5 After 5^{ab}, K$_4$ ins.:

1233* त्वया प्रत्यक्षतो दृष्टं यथा सर्वमशेषतः ।

— ^{c}) G$_1$ भगवन् (for चरितं).

6 After the ref., B$_4$ D$_1$ ins.:

1234* शृणु राजन्पुरा वृत्तमितिहासं पुरातनम् ।
सभार्येण यथा प्राप्तं दुःखं रामेण भारत ।

— ^{b}) K$_{1.2.4}$ D$_1$ °संभवः (for °वंशजः). — ^{d}) K$_3$ Dc D$_{2.3}$ °तत्परः (for °वाञ्शुचिः).

7 ^{b}) T$_2$ G$_{1.2.4}$ °चारिणः; M$_1$ °वेदिनः; M$_3$ °वादिनः (for °कोविदाः). — ^{cd}) T$_1$ G$_{1.3.4}$ M$_1$ °शत्रुघ्नभरता(G$_{1.2}$ °त)श्च. B$_1$ T$_1$ G$_4$ M महाबलाः. B$_2$ रामलक्ष्मणभरतशत्रुघ्ना इति विश्रुताः.

8 ^{a}) Many N MSS. कौशल्या. — ^{b}) K$_{1.3}$ B$_{1.2}$ Dc D$_{1.2.5}$ च (for तु). — ^{d}) K$_{1.3}$ सुमित्रायां. K D$_{1.6}$

C. 3. 15879
B. 3. 274. 8
K. 3. 275. 8

सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायाः परंतपौ ॥ ८
विदेहराजो जनकः सीता तस्यात्मजा विभो ।
यां चकार स्वयं त्वष्टा रामस्य महिषीं प्रियाम् ॥ ९
एतद्रामस्य ते जन्म सीतायाश्च प्रकीर्तितम् ।
रावणस्यापि ते जन्म व्याख्यास्यामि जनेश्वर ॥ १०
पितामहो रावणस्य साक्षाद्देवः प्रजापतिः ।
स्वयंभूः सर्वलोकानां प्रभुः स्रष्टा महातपाः ॥ ११
पुलस्त्यो नाम तस्यासीन्मानसो दयितः सुतः ।
तस्य वैश्रवणो नाम गवि पुत्रोऽभवत्प्रभुः ॥ १२
पितरं स समुत्सृज्य पितामहमुपस्थितः ।
तस्य कोपात्पिता राजन्ससर्जात्मानमात्मना ॥ १३
स जज्ञे विश्रवा नाम तस्यात्मार्धेन वै द्विजः ।
प्रतीकाराय सक्रोधस्ततो वैश्रवणस्य वै ॥ १४
पितामहस्तु प्रीतात्मा ददौ वैश्रवणस्य ह ।
अमरत्वं धनेशत्वं लोकपालत्वमेव च ॥ १५
ईशानेन तथा सख्यं पुत्रं च नलकूबरम् ।
राजधानीनिवेशं च लङ्कां रक्षोगणान्विताम् ॥ १६

इति श्रीमहाभारते आरण्यकपर्वणि अष्टपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५८ ॥

२५९

मार्कण्डेय उवाच ।

पुलस्त्यस्य तु यः क्रोधादर्धदेहोऽभवन्मुनिः ।
विश्रवा नाम सक्रोधः स वैश्रवणमैक्षत ॥ १
बुबुधे तं तु सक्रोधं पितरं राक्षसेश्वरः ।

बभूवतुः.

9 T$_3$ om. 9^{ab}. — ^{a}) T$_1$ G$_4$ °राजा (for °राजो). — ^{b}) K B$_2$ D$_1$ [अ]भवत् (for विभो). — ^{c}) D$_3$ स्त्रियं (for स्वयं). Dc$_2$ D$_{1.2}$ स्रष्टा; T G$_1$ M तुष्टो; G$_{2.4}$ हृष्टो (for त्वष्टा). — ^{d}) T$_3$ G$_{1.4}$ यो राम- (for रामस्य). Dc महिषी प्रिया.

10 ^{a}) K$_3$ जन्मासीत् (for ते जन्म). — ^{b}) B$_1$ संप्रकी°; T$_3$ G$_{2.4}$ चापि की° (for च प्रकी°). — ^{c}) B$_3$ Dc$_2$ च (for [अ]पि). — ^{d}) K$_{1-3}$ B$_2$ नरेश्वर; Dc$_2$ D$_2$ विशेषतः (for जने°).

11 Dc D$_2$ om. 11^{ab}. — ^{b}) K$_4$ D$_1$ पितामहः (for प्रजा°). — ^{c}) K$_{1.2.4}$ D$_1$ °भूतानां (for °लोकानां). — ^{d}) D$_5$ त्वष्टा; S (except G$_3$) ब्रह्मा (for स्रष्टा). K$_{1.2}$ प्रजापतिः (for महा°).

12 ^{b}) K$_4$ Dc D$_2$ T$_2$ मनसो (for मा°). T$_1$ विदितः (for दयितः). — ^{c}) K$_3$ विश्रवसो; G$_4$ वैश्रवसो. — ^{d}) T$_2$ G$_{1.2.4}$ ऋषेः; M ऋषिः (for गवि). G$_2$ पौत्रो.

13 ^{a}) T$_1$ स्वं (for स). — ^{b}) B$_2$ उपाश्रितः; G$_4$ उपास्थितः. — ^{c}) T$_1$ रोषात् (for कोपात्). — ^{d}) T$_2$ G$_2$ विसृज्य; G$_4$ विनिंद्य (for ससर्ज).

14 ^{a}) T$_1$ संजज्ञे. — ^{b}) G$_{1.2.4}$ तस्यार्धेन च (G$_2$ स); M तस्यैवार्धेन (for तस्यात्मार्धेन). — T$_2$ G$_{2.4}$ om. 14^{cd}. — ^{c}) K D$_{1.5}$ प्रतिकाराय. K$_4$ सक्रोधं; G$_1$ स क्रोधात्. — ^{d}) T$_1$ तदा; G$_1$ M तस्माद् (for ततो). B$_2$ हि (for वै).

15 B$_2$ om. (hapl.) 15^{ab}. — ^{a}) B$_1$ धर्मात्मा (for प्रीता°). — ^{b}) K$_{3.4}$ Dc D$_{1.2}$ वैश्रवणाय. Dc D$_2$ च; D$_1$ T$_1$ M$_2$ वै (for ह).

16 ^{b}) K$_3$ पुत्रस्तु (for पुत्रं च). K$_{1.2}$ नड° (for नल°). — ^{c}) Dc$_2$ T G$_{1.2}$ M$_2$ राजधानीं. — After 16, B$_{2.4}$ Dc Dn$_2$ D$_{1-3}$ ins.:

1235* विमानं पुष्पकं नाम कामगं च ददौ प्रभुः ।
यक्षाणामाधिपत्यं च राजराजत्वमेव च ।

Colophon. — *Major parvan:* K$_{1.2}$ G$_{3.4}$ आरण्य. — *Sub-parvan:* K B Dc Dn$_1$. n$_3$ D$_{1-6}$ G$_3$ (all om. sub-parvan name) mention only रामोपाख्यान; T$_1$ likewise, only श्रीरामायणोपाख्यान; and G$_1$ M$_1$, only रामायणो°. — *Adhy. name:* B$_4$ कुबेरवरप्रदानं. — *Adhy. no.* (figures, words or both): Dn$_1$ (*sup. lin. sec. m.*) n$_2$ 272; Dn$_3$ 273; D$_1$ 275; T G$_4$ M (M$_2$ *inf. lin.*) 262 (M$_2$ orig. 264); G$_1$ 259; G$_2$ 261. — *Śloka no.* Dn$_1$. n$_3$ 16; Dn$_2$ 17; D$_1$ 19.

कुबेरस्तत्प्रसादार्थं यतते स्म सदा नृप ॥ २
स राजराजो लङ्कायां निवसन्नरवाहनः ।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः ॥ ३
तास्तदा तं महात्मानं संतोषयितुमुद्यताः ।
ऋषिं भरतशार्दूल नृत्तगीतविशारदाः ॥ ४
पुष्पोत्कटा च राका च मालिनी च विशां पते ।
अन्योन्यस्पर्धया राजञ्श्रेयस्कामाः सुमध्यमाः ॥ ५
तासां स भगवांस्तुष्टो महात्मा प्रददौ वरान् ।
लोकपालोपमान्पुत्रानेकैकस्या यथेप्सितान् ॥ ६
पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ ।
कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि ॥ ७
मालिनी जनयामास पुत्रमेकं विभीषणम् ।
राकायां मिथुनं जज्ञे खरः शूर्पणखा तथा ॥ ८
विभीषणस्तु रूपेण सर्वेभ्योऽभ्यधिकोऽभवत् ।
स बभूव महाभागो धर्मगोप्ता क्रियारतिः ॥ ९
दशग्रीवस्तु सर्वेषां ज्येष्ठो राक्षसपुंगवः ।
महोत्साहो महावीर्यो महासत्त्वपराक्रमः ॥ १०
कुम्भकर्णो बलेनासीत्सर्वेभ्योऽभ्यधिकस्तदा ।
मायावी रणशौण्डश्च रौद्रश्च रजनीचरः ॥ ११
खरो धनुषि विक्रान्तो ब्रह्मद्विट् पिशिताशनः ।
सिद्धविघ्नकरी चापि रौद्रा शूर्पणखा तथा ॥ १२
सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः ।
ऊषुः पित्रा सह रता गन्धमादनपर्वते ॥ १३
ततो वैश्रवणं तत्र ददृशुर्नरवाहनम् । C. 3. 15902 B. 3. 275. 14 K. 3. 276. 14

259

1 a) D1 च (for तु). K4 कोपाद्; M2 क्रोधो (for क्रोधाद्). — b) B1 अर्धहेतो; T2 M2 दग्धदेहो (for अर्धदेहो).

2 a) K1. 2 D5 च (for तु). G2 सक्रोधः. — b) G3. 4 °श्वरं (for °श्वरः). — K3 om. 2d–4a (up to तं). — d) S (except T2 G3) यतति स्म. K4 G1 तदा (for सदा). G4 नृपः (for नृप).

3 K3 om. 3 (cf. v.l. 2). — b) K4 तोषयन्; Dc1 Dn D3. 4 G1 न्यवसन् (for निवसन्). — c) Dn2 T1 राक्षस्यः (for °सीः). K1. 2 विप्र (for तिस्रः). — d) T1 परिचारकाः; G1 °वारकाः.

4 K3 om. up to तं (cf. v.l. 2). — a) Dn सदा (!); G1. 4 M तथा (for तदा). T G1. 3. 4 वै (for तं). — d) N G3 नृत्य°.

5 a) K1. 3. 4 च बा(K1 वा)का च; T G1. 2. 4 M बकाचेति (T1 M चैव) (for च राका च). — b) G1. 4 [इ]ति (for च). — c) D5 T M1 अन्योन्यं स्प°. — d) K3 जयकामाः (for श्रेय°).

6 a) B D (except D1. 5) T2 G2. 3 स तासां (by transp.). — b) K3 वरं (for वरान्). — d) B1 एकैकस्यै; B2 °कस्यां.

7 a) K1. 2. 4 D1. 5 पुष्पोत्कटाया.

8 D2 om. 8. — b) D1. 3. 4. 6 एकं पुत्रं (by transp.). — c) K1. 4 वाकाया; K2 D1. 5. 6 राकाया; K3 T2 G1. 2. 4 M2 बकायां; T1 बलायां. — d) K1. 2 Dc D5 G1 शूर्पनखा; G2. 4 M °णखी. G1. 2 तदा (for तथा). T1 खरं शूर्पणखीं तथा.

9 a) K1–3 D1 च (for तु). D5 धर्मात्मा (for रूपेण). — b) =(var.) 11b. D1 [S]पि; G1 हि (for Sभि-). G1. 3. 4 तदा (for [अ]भवत्). — cd) K D1. 5 बभूव च (K1 ह and च; K4 स) (for स बभूव). T1 G4 °बाहो (for °भागो). Dc T2 G1. 3. 4 °रतः (for °रतिः). Dc D3 महाभागो धर्मगोप्ता स बभूव क्रियारतः (D3 °रतिः).

10 b) K3 B Dn2. n3 D3. 4. 6 T2 G3 श्रेष्ठो (for ज्येष्ठो). — c) T2 G1. 3. 4 °बाहुर् (for °वीर्यो).

11 a) D6 बले राजन्; S (except G3 M1) महानासीत् (for बलेना°). — G2 om. 11b–12d. — b) =(var.) 9b. K4 D1 [S]पि; G1 हि (for Sभि-). K3. 4 D1 T1 M तथा; B Dc Dn D2–4. 6 G3 युधि; D6 [अ]भवत् (for तदा). — c) K D1. 5 रणशूरश्च; Dc3 D2 युद्धशौंडश्च; T1 रणचंडश्च.

12 G2 om. 12 (cf. v.l. 11). — a) T1 भयंकरोपि (for खरो धनुषि). — b) D3 ब्रह्मविद्-; D5 ब्रह्मर्षि-; G1 ब्रह्महा (for ब्रह्मद्विट्). — c) K1. 2 D1 T1 सिद्धिविघ्नं(D1 T1 °घ्न)करी. — d) B2. 4 Dn D5 T1 M2 रौद्री. K1. 2 Dc D5 G1 शूर्पनखा; B1 G4 M °णखी. K3. 4 B Dc3 D2 सदा; Dc1 Dn D3–6 T2 G1. 3 तदा (for तथा).

13 b) K1–3 D5 T1 M च; G4 तु (for सु-). — c) G2 तदा (for रता). T1 ऊषुः पिता च सह ते. — d) Dc D2 °पर्वतं.

सुसूक्ष्ममपि काकुत्स्थ मैथिली नापराध्यति ॥ २७

वरुण उवाच ।

रसा वै मत्प्रसूता हि भूतदेहेषु राघव ।
अहं वै त्वां प्रब्रवीमि मैथिली प्रतिगृह्यताम् ॥ २८

ब्रह्मोवाच ।

पुत्र नैतदिहाश्चर्यं त्वयि राजर्षिधर्मिणि ।
साधो सद्वृत्तमार्गस्थे शृणु चेदं वचो मम ॥ २९
शत्रुरेष त्वया वीर देवगन्धर्वभोगिनाम् ।
यक्षाणां दानवानां च महर्षीणां च पातितः ॥ ३०
अवध्यः सर्वभूतानां मत्प्रसादात्पुराभवत् ।
कस्माच्चित्कारणात्पापः कंचित्कालमुपेक्षितः ॥ ३१
वधार्थमात्मनस्तेन हृता सीता दुरात्मना ।
नलकूबरशापेन रक्षा चास्याः कृता मया ॥ ३२
यदि ह्यकामामासेवेत्स्त्रियमन्यामपि ध्रुवम् ।

C. 3. 16664
B. 3. 291. 34
K. 3. 292. 35

— 23^{cd} = (var.) 24^{cd}. — ^{c}) S (except G_3) transp. मे and विमुंचतु.

24 T_1 $G_{2.4}$ om. (hapl.) 24. — 24^{cd} = (var.) 23^{cd}. — ^{c}) K $D_{1.3}$ विब्रुवंतु यथातत्त्वं ($K_{1.2}$ °थ्यं). — ^{d}) $K_{1.3.4}$ $D_{1.3}$ एते वा(K_3 D_3 चा)द्य त्यजंतु मां; K_2 तमेवादि त्यजंतु मां. — After 24, N (D_4 missing) T_1 G_3 ins.:

1302* यथाहं त्वदृते वीर नान्यं स्वप्नेऽप्यचिन्तयम् ।
तथा मे देवनिर्दिष्टस्त्वमेव हि पतिर्भव ।

[(L. 1) Dc D_2 हि (for [अ]हं). K_3 व्यचिंतयं; T_1 ह्यचिंतयं. — (L. 2) B_2 यथा (for तथा). K_3 $D_{1.3.5}$ [इ]ह (for हि). T_1 गतिर् (for पतिर्).]

25 ^{b}) $K_{1.2}$ श्रा(K_2 छा)वयंत्यखिला दिशः; K_3 Dc $D_{1.2}$ सुस्वरा लोकसाक्षिणी.

26 ^{a}) K_4 D_3 M_1 ते (for वै). — ^{c}) B_1 न पापा (for अपापा). — ^{d}) D_1 गच्छस्व (for संगच्छ). S (except G_3) सीतया (for भार्यया).

27 S (except T_1 G_3) om. the ref. — ^{d}) K_1 $D_{3.5}$ नापराध्यते; K_3 प्रतिगृह्यतां.

28 ^{a}) K Dc $D_{1-3.5}$ रसाः सर्वे मत्प्रसूता; B_1 रसा मम प्रसूता हि; T_1 रसानि मत्प्रसूतानि; T_2 समंतस्थः प्रसूते हि; G_1 रसं मत्तः प्रसूतं हि; G_2 सर्वमंतश्चरो वेत्ति. — ^{b}) K_4 D_2 देहे देहेषु; Dc देहिदेहेषु; T_1 हितो देवेषु; T_2 सर्वदेवेषु (for भूतदेहेषु). — ^{c}) $K_{1.2}$ च त्वां; K_3 Dc $D_{1-3.5}$ T_1 M त्वां वै (by transp.). T_1 ब्रवीमीह; $G_{2.4}$ ब्रवीम्येतन् (for प्रब्रवीमि). — ^{d}) $K_{1.2}$ जानकी (for मैथिली). — After 28, D_1 ins:

1303* पारं परं त्वमेवासीर्विष्णुब्रह्मात्मरूपवान् ।
अपारपारोऽसि हरे पारेभ्योऽपि परः सदा ।
ब्रह्मपारोऽसि विश्वेश परपारनयस्तथा ।
पराणां च परास्यसि पारः पारः सदैव सः ।
सर्वभूतनिवासी च भूमन्स परमस्तथा ।;

while T_1 G_1 M ins.:

1304* यमः ।
धर्मराजोऽस्मि काकुत्स्थ साक्षी लोकस्य कर्मणाम् ।
शुभाशुभानां सीतेयमपापा प्रतिगृह्यताम् ।

[G_1 धर्मः (for यमः). — (L. 1) G_1 धर्मोऽहमस्मि (for धर्मराजोऽस्मि).]

29 ^{a}) T_2 $G_{1.2}$ अत्र (for पुत्र). — ^{b}) $K_{1.2}$ सद्वृत्तधर्मिणि; some MSS. राजर्षिधर्मणि. — ^{c}) $K_{1.4}$ $B_{3.4}$ Dn_1 $D_{3.5}$ G_3 साधौ. K_3 T_2 G_4 -मार्गस्ते; Dc_1 Dn_1. n_3 $D_{2.6}$ काकुत्स्थ; Dc_2 T_1 -मार्गस्थः; G_1 M_1 -मार्गस्थ.

30 D_2 om. 30^{a}. — ^{a}) T_2 एषां (for एष). $K_{1.2}$ धीर (for वीर). — ^{d}) D_1 मानवानां निपातितः.

31 ^{a}) K_3 D_5 °सत्त्वानां; B_1 °शत्रूनां (for °भूतानां). — $K_{1.2}$ om. 31^{c}-32^{b}. — ^{d}) Dc_2 D_3 G_4 किंचित् (for कंचित्).

32 $K_{1.2}$ om. 32^{ab} (cf. v.l. 31). — ^{c}) $K_{1.2}$ नडकूबर°. — ^{d}) D_1 हि; T_2 वा (for च). S (except G_3 M_1) transp. कृता and मया.

3. 16564
3. 291. 34
3. 292. 35
शतधास्य फलेद्देह इत्युक्तः सोऽभवत्पुरा ॥ ३३
नात्र शङ्का त्वया कार्या प्रतीच्छेमां महाद्युते ।
कृतं त्वया महत्कार्यं देवानाममरप्रभ ॥ ३४

दशरथ उवाच ।

प्रीतोऽस्मि वत्स भद्रं ते पिता दशरथोऽस्मि ते ।
अनुजानामि राज्यं च प्रशाधि पुरुषोत्तम ॥ ३५

राम उवाच ।

अभिवादये त्वां राजेन्द्र यदि त्वं जनको मम ।
गमिष्यामि पुरीं रम्यामयोध्यां शासनात्तव ॥ ३६

मार्कण्डेय उवाच ।

तमुवाच पिता भूयः प्रहृष्टो मनुजाधिप ।
गच्छायोध्यां प्रशाधि त्वं राम रक्तान्तलोचन ॥ ३७
ततो देवान्नमस्कृत्य सुहृद्भिरभिनन्दितः ।
महेन्द्र इव पौलोम्या भार्यया स समेयिवान् ॥ ३८
ततो वरं ददौ तस्मै अविन्ध्याय परंतपः ।
त्रिजटां चार्थमानाभ्यां योजयामास राक्षसीम् ॥ ३९
तमुवाच ततो ब्रह्मा देवैः शक्रमुखैर्वृतः ।
कौसल्यामातरिष्टांस्ते वरानद्य ददानि कान् ॥ ४०
वव्रे रामः स्थितिं धर्मे शत्रुभिश्चापराजयम् ।
राक्षसैर्निहतानां च वानराणां समुद्भवम् ॥ ४१
ततस्ते ब्रह्मणा प्रोक्ते तथेति वचने तदा ।
समुत्तस्थुर्महाराज वानरा लब्धचेतसः ॥ ४२
सीता चापि महाभागा वरं हनुमते ददौ ।
रामकीर्त्या समं पुत्र जीवितं ते भविष्यति ॥ ४३
दिव्यास्त्वामुपभोगाश्च मत्प्रसादकृताः सदा ।
उपस्थास्यन्ति हनुमन्निति स्म हरिलोचन ॥ ४४

---

33 K_3 om. 33. — ^{a}) $K_{1.4}$ $D_{1.3}$ आसीदेत्; $B_{1.2}$ Dn_3 सेवेत; D_5 आसीदे; T_2 $G_{1.2.4}$ सीतां वा; M_1 मन्येत; M_3 आसीत (for आसेवेत्). — ^{b}) $K_{1.3}$ प्रियाम् (for स्त्रियम्). $K_{1.2}$ इति (for अपि). K_2 ध्रुवन् (for ध्रुवम्). — ^{c}) $K_{1.2}$ पतेद्; D_1 भवेद् (for फलेद्). B Dc_1 Dn D_6 मूर्धा (for देह). — ^{d}) $K_{1.2}$ इत्युक्तोसौ पुराभवत्.

34 ^{a}) T_2 $G_{1.2.4}$ तु (for [अ]त्र). — ^{b}) Dc D_2 G_3 महामते (for °द्युते). $K_{1.3}$ D_1 संगच्छ सह भार्यया. — ^{c}) M_1 कर्म (for कार्यं). — ^{d}) $K_{1.2}$ अमरप्रभो; Dc_1 D_2 °प्रभः; G_4 अमितप्रभः.

35 ^{a}) D_5 S (except G_3) तव (for वत्स). — ^{b}) $K_{1.2}$ तव; T_2 G_4 [अ]स्म्यहं (for [अ]स्मि ते). — ^{c}) K_1 Dc $D_{1-3.5}$ T_1 ते राज्यं; T_2 $G_{1.2.4}$ राज्यं स्वं (for राज्यं च).

36 ^{a}) Hypermetric! K_2 D_3 G_1 M_2 त्वा. — ^{b}) $G_{2.4}$ पिता मे जनको यदि.

37 T_1 om. 37–39 (with मार्कण्डेय उ°); T_2 $G_{1.2.4}$ M om. the ref. — ^{b}) B Dn D_6 G_3 भरतर्षभ; T_2 $G_{1.2.4}$ मनुजर्षभ. M प्रहृष्टेनांतरात्मना. — ^{c}) B Dc Dn D_6 G_3 [इ]ति (for त्वं). — ^{d}) B Dc Dn $D_{2.6}$ G_3 रामं रक्तांतलोचनं. — After 37, N (D_4 missing) G_3 ins.:

1305* संपूर्णानि हि वर्षाणि चतुर्दश महाद्युते ।

[K_4 च; $B_{2.3}$ Dn $D_{1.4-6}$ [इ]ह (for हि).]

38 T_1 om. 38 (cf. v.l. 37). — ^{b}) G_2 अभिसंवृतः. — ^{d}) $K_{3.4}$ $D_{3.5}$ वैदेह्या; G_1 सीतया (for भार्यया). $K_{1.2}$ भार्यया समुपेयिवान्; T_2 सभार्यः पुरमेयिवान्; $G_{2.4}$ भार्यया सह सीतया.

39 T_1 om. 39 (cf. v.l. 37). — ^{ab}) Dc D_2 तयोर् (for ततो). M_1 transp. वरं and ददौ. $K_{2.3}$ Dc D_2 T_2 तस्मा; D_1 M तस्माद् (for तस्मै). K_3 Dc $D_{2.3}$ अ(K_3 य)विध्याय; K_4 अवंध्याय; B Dn $D_{5.6}$ G_3 ह्यविंध्याय; T_2 $G_{1.2.4}$ अवध्याय (for अविन्ध्याय). K_3 Dc_1 $D_{1.3}$ परंतप. — ^{c}) B_1 चानुमानाभ्यां; B_3 D_1 दान°; $G_{1.2.4}$ M चार्थकामाभ्यां.

40 ^{b}) B Dn D_6 G_3 (before corr.) शक्रपुरोगमः (for °मुखैर्वृतः). — ^{c}) N (except K_1 Dn_2; D_4 missing) कौशल्या-. T_1 कौशल्यापुत्र ते राम. — ^{d}) T $G_{1.2.4}$ अन्यान् (for अद्य). K_4 Dn_2 D_3 $G_{2.4}$ ददामि.

42 ^{a}) T_2 $G_{1.2.4}$ तथेति (for ततस्ते). K_1 सर्वे (for प्रोक्ते). — ^{b}) T_2 $G_{2.3}$ ततस्तद्-; G_1 M_1 ततस्ते; M_2 तथेव (for तथेति). $K_{1.4}$ T_2 $G_{1.2.4}$ वचनात् (for वचने). K_3 Dc_2 D_2 तथा (for तदा). — ^{d}) $K_{1.2}$ लब्धचेतनाः.

43 ^{a}) T_1 चैव (for चापि). T_1 महाभाग. — ^{b}) M_1 हनुमतो. — ^{c}) T_2 रामकीर्ति-. T_1 वत्स (for पुत्र).

44 ^{a}) D_5 च सुख° (for त्वामुप°). — ^{b}) T_2 $G_{1.2.4}$ -प्रसादात् (for -प्रसाद-). S (except G_3) तथा (for सदा). — ^{d}) D_5 नित्यं (for इति).

45 ^{a}) T_2 $G_{1.2.4}$ तत्; M तु (for ते). K_4 D_3 त संप्रेक्ष्य(D_3 °क्ष)माणानां. — ^{b}) K_4 D_3 $G_{1.2.4}$ °कारि

ततस्ते प्रेक्षमाणानां तेषामक्लिष्टकर्मणाम् ।
अन्तर्धानं ययुर्देवाः सर्वे शक्रपुरोगमाः ॥ ४५
दृष्ट्वा तु रामं जानक्या समेतं शक्रसारथिः ।
उवाच परमप्रीतः सुहृन्मध्य इदं वचः ॥ ४६
देवगन्धर्वयक्षाणां मानुषासुरभोगिनाम् ।
अपनीतं त्वया दुःखमिदं सत्यपराक्रम ॥ ४७
सदेवासुरगन्धर्वा यक्षराक्षसपन्नगाः ।
कथयिष्यन्ति लोकास्त्वां यावद्भूमिर्धरिष्यति ॥ ४८
इत्येवमुक्त्वानुज्ञाप्य रामं शस्त्रभृतां वरम् ।
संपूज्यापाक्रमत्तेन रथेनादित्यवर्चसा ॥ ४९
ततः सीतां पुरस्कृत्य रामः सौमित्रिणा सह ।
सुग्रीवप्रमुखैश्चैव सहितः सर्ववानरैः ॥ ५०
विधाय रक्षां लङ्कायां विभीषणपुरस्कृतः ।
संततार पुनस्तेन सेतुना मकरालयम् ॥ ५१
पुष्पकेण विमानेन खेचरेण विराजता ।
कामगेन यथा मुख्यैरमात्यैः संवृतो वशी ॥ ५२
ततस्तीरे समुद्रस्य यत्र शिश्ये स पार्थिवः ।
तत्रैवोवास धर्मात्मा सहितः सर्ववानरैः ॥ ५३
अथैनान्राघवः काले समानीयाभिपूज्य च ।
विसर्जयामास तदा रत्नैः संतोष्य सर्वशः ॥ ५४
गतेषु वानरेन्द्रेषु गोपुच्छर्क्षेषु तेषु च ।
सुग्रीवसहितो रामः किष्किन्धां पुनरागमत् ॥ ५५
विभीषणेनानुगतः सुग्रीवसहितस्तदा ।
पुष्पकेण विमानेन वैदेह्या दर्शयन्वनम् ॥ ५६
किष्किन्धां तु समासाद्य रामः प्रहरतां वरः ।
अङ्गदं कृतकर्माणं यौवराज्येऽभ्यषेचयत् ॥ ५७
ततस्तैरेव सहितो रामः सौमित्रिणा सह ।
यथागतेन मार्गेण प्रययौ स्वपुरं प्रति ॥ ५८
अयोध्यां स समासाद्य पुरीं राष्ट्रपतिस्ततः ।
भरताय हनूमन्तं दूतं प्रस्थापयत्तदा ॥ ५९

C. 3. 16591
B. 3. 291. 61
K. 3. 292. 61

(for °कर्मणाम्). — ^{cd}) K $D_{2.3.5}$ transp. देवाः and सर्वे.

46 ^{ab}) B Dn $D_{3.6}$ G_3 transp. तु and रामं, and read संगतं (B_1 °मं) (for समेतं). — ^{c}) $K_{2.3}$ $D_{2.3.5.6}$ T_1 परमः; B_1 परमं. — ^{d}) K_3 सुरमध्य (for सुहृन्मध्य).

47 ^{b}) K_{1-3} $D_{1.3.5}$ मनुष्योरगरक्षसां; K_4 मानुषासुररक्षसां; B_1 राक्षसानां च भोगिनां; Dc D_2 मनुष्योरगभोगिनां; $G_{2.4}$ मनुष्यासुर°. — ^{d}) T_1 इति (for इदं).

48 ^{a}) K_1 B_4 °गंधर्व-. — ^{b}) K $B_{1.4}$ Dc $D_{1-3.5}$ °राक्षसकिंनराः; T $G_{1.2}$ M °किंनरपन्नगाः; G_4 °गंधर्वपन्नगाः. — ^{c}) T_2 $G_{1.2.4}$ लोके (for लोकास्). — D_4 resumes from 48^{d}. — ^{d}) M_1 भविष्यति (for धरि°).

49 ^{c}) K_4 $D_{1.3}$ T_1 प्राक्रमत्; T_2 G_2 [अ]पक्रमत् (for [अ]पाक्रमत्).

50 ^{c}) S (except G_3) चापि (for चैव).

51 ^{a}) S (except T_2 G_3) लंकाया. — ^{c}) K Dc $D_{1-3.5}$ उत्ततार; B_4 S (except G_3 M_2) स ततार. K_3 G_2 पुर°; T_2 रघु° (for पुन°). B_1 तं तु (for तेन).

52 ^{a}) K_4 Dc $D_{1.2.4.5}$ पुष्पकेन. — ^{b}) K_2 $B_{1.2}$ D_5 T_2 G_1 M खचरेण. K_1 पुरस्कृता; K_2 विराजिता. — ^{d}) K_1 D_3 स (D_3 सु-) वृतो. $K_{1.2.4}$ Dc D_1 बली (for वशी).

53 K_4 om. 53–55. — ^{b}) $K_{1.2.4}$ $B_{2.3}$ Dc $D_{1.2}$ शिष्ये. $K_{1.2}$ M_2 राघवः (for पार्थिवः). — ^{c}) T_2 G_1 यत्रै° (for तत्रै°). — ^{d}) B_{1-3} Dn D_5 तत्र (for सर्व-).

54 K_3 om. 54 (cf. v.l. 53). — ^{a}) K_4 B_3 [ए]वान् (for [ए]नान्). — ^{c}) B_3 हरीन् (for तदा). — ^{d}) S (except T_2 G_3) संपूज्य (for °तोष्य).

55 K_3 om. 55 (cf. v.l. 53). — ^{a}) T_1 गंधर्व- (for गतेषु). Dn D_5 G_3 तेषु सर्वेषु (for वानरे°). — ^{b}) $G_{1.2.4}$ गोपुच्छेषु च (for गोपुच्छ°). D_5 $G_{2.4}$ सर्वशः (for तेषु च). — ^{d}) $K_{1.2}$ किष्किंदां; K_4 $D_{2.5}$ किष्किंध्यां. K (K_3 om.) Dc D_2 पुनराव्रजत्; $G_{3.4}$ समुपागमत्.

56 ^{a}) $K_{1.2}$ °मतः (for °गतः). — ^{b}) G_4 ततः (for तदा). — ^{c}) = 52^{a}. K $B_{2.3}$ Dc $D_{2.3.5}$ पुष्पकेन.

57 ^{a}) $K_{1.2}$ किष्किंदां; K_4 किष्किंध्यां. T_2 $G_{1.2.4}$ च (for तु). — ^{b}) B_1 शस्त्रभृतां (for प्रहरतां). K_2 वर. — ^{d}) D_5 °भिषिंचयत्; T $G_{1.4}$ M_1 °भिषेचयत्.

58 ^{d}) T_1 जगाम वसतिं प्रति.

59 ^{a}) B_1 च; S (except G_3) तु (for स). — ^{b}) Dc_1 राष्ट्रे परं ततः; Dc_2 D_2 राष्ट्र(Dc_2 राष्ट्रे)परंतपः. — ^{c}) Dc हनुमंतं! — ^{d}) T_1 इगत् (for दूतं). B Dn_2. n_3 $D_{1.2.4.6}$ M_1 प्रास्थापयत्. T_2 G_1 रघुः; $G_{2.4}$ द्रुतं (for तदा).

60 T_2 om. 60^{ab}. $G_{1.2.4}$ read 60^{ab} after 10^{ab}. — ^{a}) $K_{3.4}$ Dc $D_{1-3.5}$ T_1 G_1 M [इं]गितैः (for [इं]गितं). T_1 G_1 सर्वैः. — ^{b}) T_1 $G_{1.2.4}$ सर्वं (for तस्मै). K_3 $B_{2.3}$

C. 3. 16591 B. 3. 291. 61 K. 3. 292. 62 लक्षयित्वेङ्गितं सर्वं प्रियं तस्मै निवेद्य च ।
वायुपुत्रे पुनः प्राप्ते नन्दिग्राममुपागमत् ॥ ६०
स तत्र मलदिग्धाङ्गं भरतं चीरवाससम् ।
अग्रतः पादुके कृत्वा ददर्शासीनमासने ॥ ६१
समेत्य भरतेनाथ शत्रुघ्नेन च वीर्यवान् ।
राघवः सहसौमित्रिर्मुमुदे भरतर्षभ ॥ ६२
तथा भरतशत्रुघ्नौ समेतौ गुरुणा तदा ।
वैदेह्या दर्शनेनोभौ प्रहर्षं समवापतुः ॥ ६३
तस्मै तद्भरतो राज्यमागतायाभिसत्कृतम् ।
न्यासं निर्यातयामास युक्तः परमया मुदा ॥ ६४

ततस्तं वैष्णवे शूरं नक्षत्रेऽभिमतेऽहनि ।
वसिष्ठो वामदेवश्च सहितावभ्यषिञ्चताम् ॥ ६५
सोऽभिषिक्तः कपिश्रेष्ठं सुग्रीवं ससुहृज्जनम् ।
विभीषणं च पौलस्त्यमन्वजानाद्गृहान्प्रति ॥ ६६
अभ्यर्च्य विविधै रत्नैः प्रीतियुक्तौ मुदायुतौ ।
समाधायेतिकर्तव्यं दुःखेन विससर्ज ह ॥ ६७
पुष्पकं च विमानं तत्पूजयित्वा स राघवः ।
प्रादाद्वैश्रवणायैव प्रीत्या स रघुनन्दनः ॥ ६८
ततो देवर्षिसहितः सरितं गोमतीमनु ।
दशाश्वमेधानाजह्रे जारूथ्यान्स निरर्गलान् ॥ ६९

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७५ ॥

Dn $D_{4.6}$ वै; B_1 तत्; $G_{2.4}$ सः (for च). — ^{c}) B_1 T_1 G_1 ततः (for पुनः). T_2 $G_{2.4}$ वायुपुत्रस्ततः प्राप्तः. — ^{d}) Dc $D_{2.5}$ उपागतः (D_5 °तं); Dn_1 पुरागमत्; T_2 $G_{1.2.4}$ उपाविशत् (for उपागमत्).

61 ^{b}) T_1 जटिलं (for भरतं). — After 61^{ab}, $G_{2.4}$ ins.:

1306* नन्दिग्रामगतं रामः सशत्रुघ्नं स राघवः ।

62 ^{a}) B_{2-4} Dn $D_{4.6}$ G_3 संगतो (for समेत्य). — Dc om. 62^{c}–64^{d}. — ^{d}) G_1 मुदितो (for मुमुदे).

63 Dc om. 63 (cf. v.l. 62). — ^{a}) B Dn $D_{4.6}$ G_3 ततो; T_2 $G_{2.4}$ तदा (for तथा). — ^{b}) G_4 मुमुदे (for समेतौ). — ^{c}) B_1 T_2 $G_{1.4}$ M_2 दर्शने चो° (for दर्शनेनो°).

64 Dc om. 64 (cf. v.l. 62). — ^{b}) K_2 °भिसंकृतं; K_3 °भिसत्कृता; $B_{1.4}$ Dn $D_{4.6}$ °तिसत्कृतं; $D_{1.3}$ T_1 G_3 °भि(D_3 G_3 °ति)संस्कृतं. — ^{d}) $G_{1.2.4}$ संयुक्तं परया मुदा (G_1 तदा).

65 ^{a}) $K_{1.2}$ M_2 राघवं; $B_{2.4}$ वैष्णवं. B_1 ततस्तं वै महाशूरं. — ^{b}) K_4 नक्षत्रेभिहते; Dc D_2 °भिजिते; D_1 $G_{2.4}$ °त्रे महि(D_1 मह)ते. — ^{c}) $B_{2.3}$ वशिष्ठो. — ^{d}) $K_{1.4}$ [अ]भिषिचतां.

66 ^{a}) T_2 $G_{1.2.4}$ वसिष्ठेन (for कपिश्रेष्ठं). — ^{b}) G_1 ससुहृद्गणं; G_2 सुसुहृज्जनं. — ^{c}) G_2 धर्मज्ञम् (for पौलस्त्यम्). — ^{d}) Dc D_2 अनुजानाद्; T_1 अभ्यजानाद् (for अन्वजानाद्). B_1 पुरीन्; G_1 गृहं (for गृहान्). G_4 बली (for प्रति).

67 ^{a}) $B_{2.3}$ Dn $D_{4.6}$ G_3 भोगैः (for रत्नैः). — ^{b}) $K_{1.2}$ D_1 T_1 G_1 M_1 मुदान्वितौ (for मुदा युतौ). — ^{c}) K_3 समाधीय; K_4 °ध्याय; $D_{1.3}$ (*sup. lin.* as in text) °दाय (for °धाय). — ^{d}) $K_{1.2}$ तौ दुःखेन ससर्ज ह.

68 ^{a}) $B_{1.3}$ G_1 तु; D_3 तद् (for च). $K_{3.4}$ $D_{3.5}$ T_1 च (for तत्). — ^{b}) T_2 G_1 M [अ]थ (for स). — ^{d}) D_1 प्रीतः (for प्रीत्या). K_4 D_3 वै; D_5 च (for स). S (except G_3) प्रीत्या परमया युतः.

69 ^{c}) $G_{1.2.4}$ शताश्व°. — ^{d}) $K_{1.2}$ ह्ययोध्यां; B_1 D_1 M_1 जारूथ्यां; T_1 हैरण्यान्; T_2 जानक्या (for जारूथ्यान्). ❀ Cn: जारूथ्यान् त्रिगुणदक्षिणानित्यर्जुनमिश्रः। ❀ — After 69, D_1 ins.:

1307* दश वर्षसहस्राणि दश वर्षशतानि च ।
राज्यं कारितवान्रामः पश्चात्स त्रिदिवं गतः ।

Colophon. — *Major parvan:* $K_{1.2}$ $G_{2.4}$ आरण्य. — *Sub-parvan:* $K_{1.4}$ B D G_1 M_2 (all om. sub-parvan name) mention only रामो(G_1 श्रीरामायणो-; M_2 रामायणो)पाख्यान; to it Dn_2 adds समाप्त. — *Adhy. name:* K_3 अभ्युदयिकं; B_4 सुग्रीवादिविसर्जनं; G_1 श्रीरघुनाथपट्टाभिषेकः; M_2 रामाभिषेकः. — *Adhy. no.* (figures, words or both): Dn_1 (marg.). n_2 289; Dn_3 290; D_1 294; T_1 M_2 (orig.) 281; T_2 G_4 M (M_2 *inf. lin.*) 279; G_1 276; G_2 278. — *Śloka no.:* Dn 72; D_1 58.

276

1 ^{a}) T_1 महाप्राज्ञ (for महाबाहो). — ^{b}) D_1 राघवेणामितौजसा. — ^{d}) D_1 वने (for वन-). Dc D_2 पुनः (for पुरा). — After 1, G_1 ins.:

२७६

मार्कण्डेय उवाच ।

एवमेतन्महाबाहो रामेणामिततेजसा ।
प्राप्तं व्यसनमत्युग्रं वनवासकृतं पुरा ॥ १
मा शुचः पुरुषव्याघ्र क्षत्रियोऽसि परंतप ।
बाहुवीर्याश्रये मार्गे वर्तसे दीप्तनिर्णये ॥ २
न हि ते वृजिनं किंचिद्दृश्यते परमण्वपि ।
अस्मिन्मार्गे विषीदेयुः सेन्द्रा अपि सुरासुराः ॥ ३
संहत्य निहतो वृत्रो मरुद्भिर्वज्रपाणिना ।
नमुचिश्चैव दुर्धर्षो दीर्घजिह्वा च राक्षसी ॥ ४
सहायवति सर्वार्थाः संतिष्ठन्तीह सर्वशः ।
किं नु तस्याजितं संख्ये भ्राता यस्य धनंजयः ॥ ५
अयं च बलिनां श्रेष्ठो भीमो भीमपराक्रमः ।
युवानौ च महेष्वासौ यमौ माद्रवतीसुतौ ।
एभिः सहायैः कस्मात्त्वं विषीदसि परंतप ॥ ६
य इमे वज्रिणः सेनां जयेयुः समरुद्गणाम् ।
त्वमप्येभिर्महेष्वासैः सहायैर्देवरूपिभिः ।
विजेष्यसि रणे सर्वानमित्रान्भरतर्षभ ॥ ७
इतश्च त्वमिमां पश्य सैन्धवेन दुरात्मना ।
बलिना वीर्यमत्तेन हृतामेभिर्महात्मभिः ॥ ८
आनीतां द्रौपदीं कृष्णां कृत्वा कर्म सुदुष्करम् ।
जयद्रथं च राजानं विजितं वशमागतम् ॥ ९
असहायेन रामेण वैदेही पुनराहृता ।
हत्वा संख्ये दशग्रीवं राक्षसं भीमविक्रमम् ॥ १०
यस्य शाखामृगा मित्रा ऋक्षाः कालमुखास्तथा ।

C. 3. 16613
B. 3. 292. 12
K. 3. 293. 12

1308* तदुक्तं भवतां सर्वं रामायणमनुत्तमम् ।
आयुष्यमिदमाख्यानं शृण्वतामघनाशनम् ।
पुत्रपौत्रप्रदं पुंसामायुरारोग्यवर्धनम् ।
तस्मात्त्वमपि राजेन्द्र भ्रातृभिः सह धर्मज ।

2 ^{a}) D$_{5}$ भरत° (for पुरुष°). — ^{b}) Dn$_{3}$ परंतपः. — ^{c}) B$_{2-4}$ D (except D$_{1.3.5}$) G$_{3}$ °श्रिते (for °श्रये). — ^{d}) B$_{1}$ प्राप्तनिर्णये; M$_{1}$ दीप्तिनिर्णये.

3 ^{b}) B Dc$_{1}$ Dn D$_{4.6}$ G$_{3}$ M वर्तते (for दृश्यते). K$_{4}$ परमाण्वपि; G$_{1}$ परमावपि. — ^{c}) T$_{1}$ तस्मिन् (for अस्मिन्). K$_{3}$ B D (except D$_{1.3}$) निषी(B$_{1}$ °षे)देयुः. — ^{d}) B$_{1.3}$ सेंद्रापि ससुरासुराः.

4 ^{a}) T$_{1}$ संहत्याभिहते वृत्रे. — ^{b}) G$_{4}$ मन्युभिर् (for मरुद्भिर्). — ^{c}) K Dc D$_{1-3.5}$ च (D$_{1}$ स) महावीर्यो (for चैव दुर्धर्षो). — ^{d}) G$_{1}$ दीप्तजिह्वा; G$_{2.4}$ दीर्घजंघा.

5 ^{a}) Dc D$_{2}$ ते सर्वाः (for सर्वार्थाः). — ^{b}) K$_{4}$ Dc D$_{2}$ संतिष्ठंते. K$_{3}$ D$_{3.5}$ च; Dc D$_{1.2}$ हि (for [इ]ह). K$_{1.2}$ सर्वतः; B$_{1.3.4}$ S (except G$_{3}$) नित्यशः. — ^{c}) K$_{3}$ D$_{5}$ न; Dc$_{2}$ D$_{3}$ T$_{1}$ G$_{1.3}$ तु (for नु). D$_{5}$ स्वर्गे; T G$_{4}$ M संखे; G$_{1}$ युद्धे; G$_{2}$ संघे (for संख्ये). — ^{d}) B Dn D$_{4.6}$ G$_{3}$ transp. भ्राता and यस्य.

6 ^{a}) G$_{2.4}$ तु (for च). — 6^{b} =1. 2. 184^{b}; 114. ^{d}; 141. 18^{b}; etc., etc. — ^{c}) K$_{1}$ अयुवानो; K$_{3}$ सुवीरौ च; D$_{1.3}$ योद्धारौ च (for युवानौ च). — ^{d}) B D (except D$_{1.3.5}$) G$_{3}$ वीरौ; M$_{1}$ इमौ; M$_{2}$ विमौ (for यमौ). — ^{f}) G$_{4}$ नराधिप (for परं°).

7 ^{a}) K$_{4}$ D$_{3}$ य एते; Dc$_{2}$ D$_{2}$ यदिमे (for य इमे). G$_{1}$ पत्रिणः (for वज्रिणः). Dc सेंद्रा (for सेनां). — ^{b}) K$_{1-3}$ D$_{1.5}$ दहेयुः. K$_{1}$ Dc D$_{2}$ समरुद्गणाः; K$_{3}$ D$_{5}$ G$_{1}$ °द्गणान्; D$_{1.4}$ °द्गणं. — ^{c}) T$_{2}$ [ए]तैर् (for [ए]भिर्). — ^{e}) K$_{4}$ विजेष्यसे. B$_{2}$ कुरून् (for रणे).

8 ^{a}) K$_{1}$ Dc D$_{1-3.5}$ भ्रातृभिश्चापि पश्यैतां.

9 K$_{1}$ om. 9^{ab}. — ^{a}) Dc D$_{2}$ T$_{1}$ G$_{1.4}$ आनीता द्रौपदी कृष्णा. — ^{b}) =1. 1. 82^{d}; 147. 13^{d}. K$_{2}$ सुदुष्कृतं — After 9^{ab}, K$_{1}$ *repeats* 7^{cd}. — ^{d}) D$_{1}$ च समागतं; D$_{3}$ च सहानुगं (for वशमा°).

10 ^{a}) B$_{1}$ सहसा येन रा°. — ^{c}) T$_{1}$ G$_{2.4}$ M संखे; G$_{1}$ संघे. — ^{d}) K$_{1.2}$ Dc D$_{1.2}$ भीमदर्शनं.

11 ^{ab}) K$_{1.2.4}$ B$_{1.4}$ Dn D$_{3.5.6}$ मित्राण्यृक्षाः; D$_{1}$ T G$_{2.4}$ मित्रमृक्षाः; G$_{1}$ ऋक्षा मित्राः (by transp.). S (except G$_{3}$) कृष्ण° (for काल°). — ^{c}) K$_{1.2}$ °गतान्; G$_{2}$ °कृता (for °गता). — ^{d}) K$_{1}$ एतान्; S (except G$_{3}$) इति (for एतद्). K$_{1.2.4}$ D$_{1.3}$ विचारय; K$_{3}$ Dn$_{1}$ D$_{3}$ T$_{1}$ विचिंतय; Dc D$_{2}$ विचिंत्यतां; G$_{1}$ [अ]नुचिंत्य च (for [अ]नुचिन्तय).

C. 3. 16613
B. 3. 292. 12
K. 3. 293. 12

जात्यन्तरगता राजन्नेतद्बुद्ध्यानुचिन्तय ॥ ११
तस्मात्त्वं कुरुशार्दूल मा शुचो भरतर्षभ ।
त्वद्विधा हि महात्मानो न शोचन्ति परंतप ॥ १२

वैशंपायन उवाच ।
एवमाश्वासितो राजा मार्कण्डेयेन धीमता ।
त्यक्त्वा दुःखमदीनात्मा पुनरेवेदमब्रवीत् ॥ १३

इति श्रीमहाभारते आरण्यकपर्वणि षट्सप्तत्यधिकद्विशततमोऽध्यायः ॥ २७६ ॥

२७७

युधिष्ठिर उवाच ।
नात्मानमनुशोचामि नेमान्भ्रातॄन्महामुने ।
हरणं चापि राज्यस्य यथेमां द्रुपदात्मजाम् ॥ १
द्यूते दुरात्मभिः क्लिष्टाः कृष्णया तारिता वयम् ।
जयद्रथेन च पुनर्वनादपहृता बलात् ॥ २
अस्ति सीमन्तिनी काचिद्दृष्टपूर्वाथ वा श्रुता ।
पतिव्रता महाभागा यथेयं द्रुपदात्मजा ॥ ३

मार्कण्डेय उवाच ।
शृणु राजन्कुलस्त्रीणां महाभाग्यं युधिष्ठिर ।
सर्वमेतद्यथा प्राप्तं सावित्र्या राजकन्यया ॥ ४

---

12 ^{a}) Dc D_2 एतस्मात् (for तस्मात्त्वं). G_3 वै कुरुश्रेष्ठ (for कुरु°). $B_{2.4}$ Dn $D_{4.6}$ तस्मात्स त्वं (B_2 Dn सर्वं) कुरुश्रेष्ठ. — ^{c}) K_1 तद्विधाय (for त्वद्विधा हि). $K_{1.2}$ महाबाहो (for °त्मानो). — After 12, $K_{1.2}$ ins. a passage of 14 lines given in App. I (No. 29).

13 ^{a}) D_3 राजन् (for राजा). — ^{b}) K_1 मार्कंडेयेन. — ^{c}) D_5 दैन्यम् (for दुःखम्). — ^{d}) $B_{1.2}$ अप्येवम्; $B_{3.4}$ Dn $D_{4.6}$ G_3 अप्येनम् (for एवेदम्). — For 13^{cd}, G_1 subst.:

1309* श्रुत्वा रामायणं सर्वं त्यक्त्वा दुःखं युधिष्ठिरः ।
मार्कण्डेयं पुनः प्राह भ्रातृभिः सह संमतैः ।

Colophon. In K_3, the portion of the text from this colophon up to 3. 278. 19^{ab} is lost on a missing fol. — *Major parvan:* $K_{1.2}$ Dn_2 T_2 $G_{2.4}$ आरण्य. — *Sub-parvan:* $K_{1.2.4}$ B Dc Dn_1. n_3 D_{1-6} T_1 G M (all om. sub-parvan name) mention only रामो(K_2 श्रीरामो-; T_1 G_2 M_2 श्रीरामायणो-; G_1 M_1 रामायणो)पाख्यान; to it all these (except B_2) add समाप्त. — *Adhy. no.* (figures, words or both): Dn_1 (marg.). n_2 290; Dn_3 291; D_1 295; T_1 M_2 (orig.) 282; T_2 G_4 M (M_2 *inf. lin.*) 280; G_1 277; G_2 279. — *Śloka no.:* Dn D_1 14.

277

☞ Here begins what is perhaps the most celebrated of all the episodes of the Great Epic, namely, the Sāvitrī episode. The episode occurs also in the Skanda Purāṇa (7. 1. 166); many lines and pādas of our text recur *verbatim* in the Purāṇa text. — This adhy. is missing in K_3 (cf. v.l. 3. 276. 13).

1 1^a=3. 281. 92^a. — ^{b}) $K_{1.2}$ transp. नेमान् and भ्रातॄन्. K (K_3 missing) $D_{1.3}$ T_2 G_4 M तथा मुने; T_1 परंतप (for महामुने).

2 ^{a}) D_3 T_1 M_1 क्लिष्टा; $G_{1.2.4}$ क्लिष्टां. — ^{b}) T_1 $G_{1.2.4}$ M_2 क्लिष्टया (for कृष्णया). D_3 कृष्णेयं तापिता वयं; M_1 क्लिष्टया तारितं वनं. — ^{c}) T_1 बलाद् (for पुनर्). — ^{d}) Dc D_2 T_2 $G_{1.2.4}$ बलाद्; T_1 वने (for वनाद्). Dc D_2 T_2 $G_{1.2.4}$ बलाद्; T_1 चा अपहृतं; B_{2-4} D (except $D_{1.5}$) G_3 चापि हृता; T_1 चा अपहृतं; B_{2-4} D (except $D_{1.5}$) G_3 चापि हृता; T_2 $G_{2.4}$ [अ]बला (for हृता. Dc_2 D_2 वनात्; T_1 पुनः; T_2 $G_{2.4}$ [अ]बला (for बलात्).

3 Cf. 3. 49. 34^{abcd}. — ^{b}) K_2 G_4 यथा; B_2 D — ^{d}) T_2 $G_{1.2}$ D_{3-6} G_3 [अ]पि वा (for [अ]थ वा). — यथैव.

4 K_1 मार्कंडेयः; M_2 श्रीमार्कंडेयः. — ^{a}) Dc D_2 स्त्रीणां; D_1 कुरु°. — ^{c}) K_2 यथाप्राप्ते; M_2 यथावृत्तं.

5 ^{a}) B_{2-4} मंद्रेषु; G_1 माद्रेषु. — ^{c}) $B_{2.3}$ Dn D_4 G_3 महात्मा च; T_2 $G_{1.2.4}$ कृतज्ञश्च (for शर°). — Dc_1 सत्यवान्संयतेंद्रियः.

6 G_3 om. (hapl.) 6^a–7^b; Dc_1 om. 6. — ^{a}) K_1 दानमतिर्. D_5 दांतः (for दक्षः). — 6^d=1. 8. 4^d;

आसीन्मद्रेषु धर्मात्मा राजा परमधार्मिकः ।
ब्रह्मण्यश्च शरण्यश्च सत्यसंधो जितेन्द्रियः ॥ ५
यज्वा दानपतिर्दक्षः पौरजानपदप्रियः ।
पार्थिवोऽश्वपतिर्नाम सर्वभूतहिते रतः ॥ ६
क्षमावाननपत्यश्च सत्यवाग्विजितेन्द्रियः ।
अतिक्रान्तेन वयसा संतापमुपजग्मिवान् ॥ ७
अपत्योत्पादनार्थं स तीव्रं नियममास्थितः ।
काले परिमिताहारो ब्रह्मचारी जितेन्द्रियः ॥ ८
हुत्वा शतसहस्रं स सावित्र्या राजसत्तम ।
षष्ठे षष्ठे तदा काले बभूव मितभोजनः ॥ ९
एतेन नियमेनासीद्वर्षाण्यष्टादशैव तु ।
पूर्णे त्वष्टादशे वर्षे सावित्री तुष्टिमभ्यगात् ।
स्वरूपिणी तदा राजन्दर्शयामास तं नृपम् ॥ १०
अग्निहोत्रात्समुत्थाय हर्षेण महतान्विता ।
उवाच चैनं वरदा वचनं पार्थिवं तदा ॥ ११
ब्रह्मचर्येण शुद्धेन दमेन नियमेन च ।
सर्वात्मना च मद्भक्त्या तुष्टास्मि तव पार्थिव ॥ १२
वरं वृणीष्वाश्वपते मद्रराज यथेप्सितम् ।
न प्रमादश्च धर्मेषु कर्तव्यस्ते कथंचन ॥ १३

अश्वपतिरुवाच ।

अपत्यार्थः समारम्भः कृतो धर्मेप्सया मया ।
पुत्रा मे बहवो देवि भवेयुः कुलभावनाः ॥ १४
तुष्टासि यदि मे देवि काममेतं वृणोम्यहम् ।
संतानं हि परो धर्म इत्याहुर्मां द्विजातयः ॥ १५

सावित्र्युवाच ।

पूर्वमेव मया राजन्नभिप्रायमिमं तव ।
ज्ञात्वा पुत्रार्थमुक्तो वै तव हेतोः पितामहः ॥ १६
प्रसादाच्चैव तस्मात्ते स्वयंभुविहिताद्भुवि ।

C. 3. 16682
B. 3. 293. 17
K. 3. 294. 18

---

61. 53^{d}; 92. 1^{b}; 110. 10^{d}; etc.

7 G_3 om. 7^{ab} (cf. v.l. 6); M_2 om. 7^{a}–8^{b}. — ^{b}) Dc D_2 सत्यवान्. $B_{1.3}$ Dc D_2 S (G_3 M_2 om.) संय(Dc$_2$ D_2 °जि)तेंद्रियः; D_5 यो जितेंद्रियः (for विजि°). K (K_3 missing) वेदवेदांगपारगः. — D_6 om. (hapl.) 7^{c}–8^{d}. — ^{c}) T_1 मनसा (for वयसा). — ^{d}) T_1 इव (for उप-).

8 D_6 om. 8; M_2 om. 8^{ab} (cf. v.l. 7). — ^{a}) B D (except $D_{1.3}$) G_3 °नार्थं च; T_2 $G_{1.2.4}$ °नार्थाय. — ^{d}) S (except G_3) बभूव ह (for जितेन्द्रियः).

^{a}) $K_{1.2}$ हुत्वा शतसहस्रयां स; T_1 हुताशनसहस्रं स. — ^{b}) Dc$_1$ $D_{3.5}$ T_1 °सत्तमः. $K_{1.2}$ सावित्र्यां °सत्तमः. — ^{c}) $G_{2.4}$ गते; M_2 यथा (for तदा). B_2 षष्ठे काले तदा राजन्.

10 ^{a}) D_4 यतेन (for एतेन). — ^{b}) T_1 च; T_2 G_4 M_2 ह; $G_{1.2}$ M_1 हि (for तु). $K_{1.2}$ $D_{1.5}$ वर्षाणि दश चाष्ट च; Dc$_2$ D_2 वर्षाण्यष्टौ दशैव तु. — ^{d}) D_3 तोषम् (for तुष्टिम्). $K_{1.2}$ D_5 सावित्री तं समभ्यया(D_5 °गा)त्; K_4 °त्री तोषमभ्ययात्. — ^{c}) B D (except $D_{1.3.5}$) G_3 रूपिणी तु (for स्वरू°). K (K_3 missing) $D_{1.3.5}$ हि सावित्री (for तदा राजन्).

1 ^{a}) S (except G_3) समुत्पन्ना (for °त्थाय). — ^{b}) K$_3$ missing) $D_{1.3.5}$ सौम्येन वपुषान्विता. — ^{c}) K_1 वपुषा (for वरदा). — After 11, S (except G_3) ins.:

1310* सा तमश्वपतिं राजन्सावित्री नियमस्थितम् ।

12 Before 12, N (except K_1; K_3 missing) T_2 G ins. सावित्र्युवाच (resp. सावित्री). — ^{b}) $B_{1.3.4}$ Dc $D_{1.2}$ transp. दमेन and नियमेन. K (K_3 missing) $D_{3.5}$ नियमेन च तेनघ. — ^{c}) B D (except $D_{1.3.5}$) G_3 भक्त्या च (for मद्भक्त्या).

13 ^{b}) $B_{1.2.4}$ Dn $D_{4.6}$ T_2 G_{2-4} यदीप्सितं; G_1 यदिच्छसि. — ^{c}) D_5 च कर्तव्यस्; T_1 G_1 तु (G_1 च) ते धर्मे; $G_{2.4}$ स्वधर्मेषु. — ^{d}) K (K_3 missing) $D_{1.3}$ कदाचन. D_5 त्वया धर्मे कदाचन.

14 ^{a}) $K_{1.2}$ B_3 $D_{3.5}$ T_1 G_1 M अपत्यार्थं. — ^{b}) T_2 $G_{2.4}$ ततो (for कृतो). — ^{c}) T_1 बहुला (for बहवो). — ^{d}) B_2 कुलपावनाः; T_1 G_2 °वर्धनाः.

15 ^{a}) K_4 $D_{3.5}$ तुष्टा च; M तुष्टा तु. — ^{b}) B Dc$_1$ Dn $D_{1.4.6}$ G_3 वरम् (for कामम्). Dn$_3$ G_3 एनं; T_1 एतद्; T_2 $G_{1.2.4}$ एवं. — ^{c}) $B_{1.3}$ संतानः. K_1 हि वृणो; B Dn $D_{4.6}$ G_3 परमो; D_5 G_4 हि परं; T_2 हि पुरो. D_5 धर्मम्. — After 15, B ins.:

1311* एवमुक्त्वा तु सावित्री प्रत्युवाच च तं नृपम् ।

16 ^{b}) K_4 T_1 $G_{1.2}$ M_2 इदं (for इमं). — D_1 om. 16^{cd}. — ^{d}) B D (except $D_{3.5}$; D_1 om.) G_3 भगवांस्ते (for तव हेतोः).

C. 3. 16633
B. 3. 293. 17
K. 3. 294. 18

कन्या तेजस्विनी सौम्य क्षिप्रमेव भविष्यति ॥ १७
उत्तरं च न ते किंचिद्व्याहर्तव्यं कथंचन ।
पितामहनिसर्गेण तुष्टा ह्येतद्ब्रवीमि ते ॥ १८

मार्कण्डेय उवाच ।

स तथेति प्रतिज्ञाय सावित्र्या वचनं नृपः ।
प्रसादयामास पुनः क्षिप्रमेव भवेदिति ॥ १९
अन्तर्हितायां सावित्र्यां जगाम स्वगृहं नृपः ।
स्वराज्ये चावसत्प्रीतः प्रजा धर्मेण पालयन् ॥ २०
कस्मिंश्चित्तु गते काले स राजा नियतव्रतः ।
ज्येष्ठायां धर्मचारिण्यां महिष्यां गर्भमादधे ॥ २१
राजपुत्र्यां तु गर्भः स मालव्यां भरतर्षभ ।
व्यवर्धत यथा शुक्ले तारापतिरिवाम्बरे ॥ २२
प्राप्ते काले तु सुषुवे कन्यां राजीवलोचनाम् ।
क्रियाश्च तस्या मुदितश्चक्रे स नृपतिस्तदा ॥ २३
सावित्र्या प्रीतया दत्ता सावित्र्या हुतया ह्यपि ।
सावित्रीत्येव नामास्याश्चक्रुर्विप्रास्तथा पिता ॥ २४
सा विग्रहवतीव श्रीर्व्यवर्धत नृपात्मजा ।
कालेन चापि सा कन्या यौवनस्था बभूव ह ॥ २५
तां सुमध्यां पृथुश्रोणीं प्रतिमां काञ्चनीमिव ।
प्राप्तेयं देवकन्येति दृष्ट्वा संमेनिरे जनाः ॥ २६
तां तु पद्मपलाशाक्षीं ज्वलन्तीमिव तेजसा ।
न कश्चिद्वरयामास तेजसा प्रतिवारितः ॥ २७
अथोपोष्य शिरःस्नाता दैवतान्यभिगम्य सा ।
हुत्वाग्निं विधिवद्विप्रान्वाचयामास पर्वणि ॥ २८
ततः सुमनसः शेषाः प्रतिगृह्य महात्मनः ।
पितुः सकाशमगमद्देवी श्रीरिव रूपिणी ॥ २९
साभिवाद्य पितुः पादौ शेषाः पूर्वं निवेद्य च ।
कृताञ्जलिर्वरारोहा नृपतेः पार्श्वतः स्थिता ॥ ३०

---

17 ^{a}) M प्रसादं चैव. T_1 दत्ता (for तस्मात्). — ^{b}) B_1 स्वयं तु; B_3 Dn_1. n_2 स्वयंभू° (for स्वयंभु°). D_5 नृप (for भुवि). $K_{1.2.4}$ $D_{1.3}$ T_1 स्वयंभु(K_4 °भू)विहितानघ; T_2 $G_{1.2.4}$ M स्वयं विहितवत्यहं. — ^{c}) K_4 B_2 M सौम्या; T_2 $G_{1.2.4}$ नाम.

18 ^{a}) K_4 D_3 नेह; $G_{1.2.4}$ न च (by transp.). — ^{b}) G_1 व्याहर्तं वै. — ^{c}) $K_{1.2}$ °विसर्गेण; T_2 $G_{1.2.4}$ °नियोगेन.

19 B_4 G_1 M_2 om. the ref. K_1 मार्कंडेय. — ^{a}) M_1 तथैव. — ^{b}) K (K_3 missing) Dc $D_{1.2.5}$ नृप. — ^{c}) B_2 तदा (for पुनः). T_1 प्रसादादेव नोवाच. — ^{d}) B $K_{1.4}$ D_1 एवं; D_5 एतद्; T_2 चैव; G_1 त्वेतद् (for एव). B Dc Dn $D_{2.4.6}$ G_3 क्षिप्रमेतद्भविष्यति; T_1 पुत्रार्थे किंचिदुत्तरं.

20 ^{b}) K (K_3 missing) D_3 स्वगृहान्; B Dn $D_{4.6}$ G_3 स्वपुरं. $K_{1.2}$ D_1 नृप; Dc D_2 पुनः. — ^{c}) M स्वं राज्यं. B Dn $D_{4.6}$ G_3 वीरः (for प्रीतः). T_2 $G_{1.2.4}$ स राजोपावसत्प्रीतः. — ^{d}) K_4 प्रजां.

21 ^{c}) K (K_3 missing) $D_{1.3.5}$ श्रेष्ठायां. — ^{d}) S (except G_3) आदधत्.

22 ^{a}) B_3 Dn $D_{4.6}$ T G_{2-4} राजपुत्र्यास्; D_1 G_1 °पत्न्यां. $K_{1.2}$ M_1 transp. तु and स. B_1 राजपुत्र्यामभूद्गर्भो. — ^{b}) Cf. 3. 281. 58^{cd}. B Dn $D_{4.6}$ मानव्या ($B_{3.4}$ °व्यां); D_1 मालंव्य; D_5 ह्यालंभ्य; T G_3 मालव्या; $G_{2.4}$ कालेन. — ^{c}) B Dn $D_{4.6}$ T_1 G_3 M तदा; T_2 $G_{1.2.}$ महान् (for यथा). — ^{d}) G_4 ताराधिप इवांबरे.

23 ^{a}) Dc_2 D_3 प्राप्तकाले. T_1 [अ]जनयत् (for सुषुवे — ^{b}) G_1 (? gloss) कमल° (for राजीव°). — ^{c}) T $G_{1.2.4}$ नृपति° (for मुदित°). — ^{d}) B Dn $D_{4.6}$ G_3 चा च ($B_{3.4}$ स) नृपसत्तमः; D_5 चक्रे च नृपतिस्तथा; T_2 $G_{1.2.}$ चक्रे स (G_1 सु-) मुदितस्तदा.

24 ^{b}) D_1 गतया (for हु°). K (K_3 missing) D $D_{1.2.5}$ त्वपि; B_1 त्विति (for ह्यपि). — ^{c}) D_5 T_2 $G_{1.}$ च (for [ए]व).

25 ^{a}) K_4 $B_{1.2.4}$ श्री. Dc_2 सावित्री विग्रहवती सावित्रीग्रवती च श्री (sic). — ^{c}) $K_{1.2}$ [ए]व तु; D_1 (for चापि). D_1 कन्या सा (by transp.).

26 ^{c}) K_2 प्राप्तेयं देवि कस्येति. — ^{d}) K_4 B_1 S (ex G_3) तां (for सं-).

27 ^{b}) D_5 दीप्यंती° (for ज्वलन्ती°). — ^{d}) Dn_2. n_3 प्रतिबाधितः; D_4 G_3 °बोधितः; D_5 °भासितां.

28 ^{a}) B_4 अथोपास्य. B_1 M_2 °स्नात्वा. — ^{b}) B Dn $D_{2.4.6}$ G_3 देवताम(Dc D_2 °न)भि°.

29 ^{b}) Dc D_2 प्रतिपूज्य. — ^{c}) B Dn D_4. D समीप° (for सकाश°). — ^{d}) Cf. 1. 92. 2^{b}. देवश्रीवर(G_4 °रिव)रू°.

30 ^{a}) D_1 om. सा. — ^{b}) K_1 शेषां पूर्वं; K_2 Dc

यौवनस्थां तु तां दृष्ट्वा स्वां सुतां देवरूपिणीम् ।
अयाच्यमानां च वरैर्नृपतिर्दुःखितोऽभवत् ॥ ३१

राजोवाच ।

पुत्रि प्रदानकालस्ते न च कश्चिद्वृणोति माम् ।
स्वयमन्विच्छ भर्तारं गुणैः सदृशमात्मनः ॥ ३२
प्रार्थितः पुरुषो यश्च स निवेद्यस्त्वया मम ।
विमृश्याहं प्रदास्यामि वरय त्वं यथेप्सितम् ॥ ३३
श्रुतं हि धर्मशास्त्रे मे पठ्यमानं द्विजातिभिः ।
तथा त्वमपि कल्याणि गदतो मे वचः शृणु ॥ ३४
अप्रदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः ।
मृते भर्तरि पुत्रश्च वाच्यो मातुररक्षिता ॥ ३५
इदं मे वचनं श्रुत्वा भर्तुरन्वेषणे त्वर ।
देवतानां यथा वाच्यो न भवेयं तथा कुरु ॥ ३६

मार्कण्डेय उवाच ।

एवमुक्त्वा दुहितरं तथा वृद्धांश्च मन्त्रिणः ।
व्यादिदेशानुयात्रं च गम्यतामित्यचोदयत् ॥ ३७
साभिवाद्य पितुः पादौ व्रीडितेव मनस्विनी ।
पितुर्वचनमाज्ञाय निर्जगामाविचारितम् ॥ ३८
सा हैमं रथमास्थाय स्थविरैः सचिवैर्वृता ।
तपोवनानि रम्याणि राजर्षीणां जगाम ह ॥ ३९
मान्यानां तत्र वृद्धानां कृत्वा पादाभिवन्दनम् ।
वनानि क्रमशस्तात सर्वाण्येवाभ्यगच्छत ॥ ४०
एवं सर्वेषु तीर्थेषु धनोत्सर्गं नृपात्मजा ।
कुर्वती द्विजमुख्यानां तं तं देशं जगाम ह ॥ ४१

C. 3. 16657
B. 3. 293. 41
K. 3. 294. 42

इति श्रीमहाभारते आरण्यकपर्वणि सप्तसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७७ ॥

पूर्वं. D_4 G_3 नियम्य (for निवेद्य). — ^{d}) B Dn $D_{4.6}$ T_2 G_3 पार्श्वमास्थि($B_{1.3}$ °ग)ता; D_5 अग्रतः स्थिता.

31 ^{a}) D_3 स तां; T_1 सुतां (for तु तां). — ^{b}) D_1 $G_{1.4}$ स्व· (for स्वां). — ^{c}) D_5 M तु (for च). $K_{1.2}$ M_2 परैर्; $G_{1.2.4}$ नरैर् (for वरैर्).

32 $K_{1.2}$ अश्वपतिः (for राजो°.) — ^{a}) K_2 पुत्र; B_2 प्रति (for पुत्रि). — ^{c}) K_2 अन्वेच्छ; Dc D_2 अन्विष्य; T_2 $G_{1.2.4}$ M_2 इच्छस्व.

33 ^{a}) $K_{1.2}$ प्राकृतः; T_2 $G_{1.2.4}$ पार्थिवः. — ^{b}) G_4 संनिवेद्यस्. $K_{1.2}$ $D_{1.3.5}$ त्वयानघे. — ^{c}) K (K_3 missing) B_2 Dc_2 Dn $D_{2.3.6}$ G_3 विमृष्याहं. — ^{d}) B_1 वरयध्वं; D_6 °स्व; T_2 G_1 वरं तव; $G_{2.4}$ त्वां वराय; G_3 वरयेस्त्वं; M वराय त्वां. Dc D_2 यथेच्छसि.

34 ^{a}) K (K_3 missing) $D_{1.3.5}$ च (for हि). $K_{1.2}$ धर्मशास्त्रं ते; K_4 B D G_3 °शास्त्रेषु; G_1 सर्वशास्त्रे मे. — ^{b}) T_2 $G_{2.4}$ पठ्यमाने; G_1 °मानैर्. D_1 द्विजातिषु. — ^{c}) $G_{2.4}$ यथा (for तथा).

35 =(var.) Manu. 9. 4. — ^{a}) $K_{1.2}$ याच्यो; D_3 वाह्यो; M याप्यो. — ^{b}) K_1 D_3 (*sup. lin.* as in text) याच्या(D_3 °त्या)श्चा°; K_2 याच्योश्चा° (sic); D_5 वाच्याश्चा°; M याप्यश्चा°. — ^{c}) S (except $G_{1.3}$) मृते पितरि पुत्रस्तु. — ^{d}) $K_{1.2}$ याच्यो; D_3 (*sup. lin.* as in text) यात्यो; M याप्यो.

36 ^{b}) $G_{2.4}$ कुरु (for त्वर). — ^{c}) $K_{1.2}$ D_3 (*sup. lin.* as in text) याच्यो; M याप्यो.

37 K_1 S (except G_3 M_1) om. the ref. — ^{a}) Dc_3 D_2 तु दुहितां (for दुहितरं). — ^{b}) K_2 Dc_2 $D_{2.3}$ यथा. T_2 धर्मिणः (for मन्त्रिणः). — ^{c}) K_1 °यात्रे च; B_1 °यातं च; Dc D_2 °यातांश्च; D_5 °यात्रं तु; G_1 °यात्रां च. — ^{d}) K_4 (marg. *sec. m.* as in text) व्रियताम् (for गम्यताम्). $K_{1.2}$ B_{2-4} D (except $D_{1.3}$) G_3 चेति; K_4 चापि (for इति). K_4 D_1 [अ]नोदयत्.

38 ^{a}) G_1 ततः (for पितुः). — ^{b}) $K_{2.4}$ B D (except $D_{1.3}$) G_3 तप° (for मन°). — ^{c}) D_1 आदाय (for आज्ञाय). — ^{d}) D_3 [अ]निवारिता; T [अ]विचार्य सा (T_2 च); G_1 M_1 विचार्य च; $G_{3.4}$ विमृश्य च; M_2 [अ]विचारयन् (for [अ]विचारितम्).

39 ^{a}) K_3 D_6 हैमरथम्. T_1 $G_{2.4}$ हैमं रथं समास्थाय. — ^{b}) T $G_{1.2.4}$ transp. स्थविरैः and सचिवैः. — ^{c}) Dc_2 D_2 वन्यानि (for रम्याणि). — ^{d}) T_1 $G_{2.4}$ सा (for ह).

40 K_1 om. (hapl.) 40–41. — ^{a}) B_3 Dc_2 $D_{2.3}$ (*sup. lin.* as in text) वन्यानां (for मा°). — ^{b}) =(var.) 3. 278. 3^{d}. $B_{1.2}$ Dn_3 T_2 G_3 °वादनं (for °वन्दनम्). — ^{c}) $K_{2.4}$ Dc $D_{1.2.5}$ तानि; M तत्र (for तात). — ^{d}) K_3 D_5 अन्व°; Dc $D_{2.3}$ M अभि° (for अभ्य°).

41 K_1 om. 41 (cf. v.l. 40). — ^{a}) B Dn $D_{3.4.5}$ T_1 G_3 M (by transp.) तीर्थेषु सर्वेषु; Dc_2 (marg. *sec. m.*) वनेषु सर्वेषु. — ^{b}) K_4 B_4 Dc D_2 वनोत्सर्गं; Dc_2 (by corr.) विचरंती. — ^{c}) K_2 Dn_3 कुर्वंती. K_3 D_6 ऋषि° (for द्विज°). T_2 $G_{1.2.4}$ M कुर्वं(G_1 °र्वं)ती द्विजमुख्येषु.

२७८

C. 3. 16658
B. 3. 294. 1
K. 3. 295. 1

मार्कण्डेय उवाच ।
अथ मद्राधिपो राजा नारदेन समागतः ।
उपविष्टः सभामध्ये कथायोगेन भारत ॥ १
ततोऽभिगम्य तीर्थानि सर्वाण्येवाश्रमांस्तथा ।
आजगाम पितुर्वेश्म सावित्री सह मन्त्रिभिः ॥ २
नारदेन सहासीनं दृष्ट्वा सा पितरं शुभा ।
उभयोरेव शिरसा चक्रे पादाभिवन्दनम् ॥ ३
नारद उवाच ।
क्व गताभूत्सुतेयं ते कुतश्चैवागता नृप ।
किमर्थं युवतीं भर्त्रे न चैनां संप्रयच्छसि ॥ ४
अश्वपतिरुवाच ।
कार्येण खल्वनेनैव प्रेषिताद्यैव चागता ।
तदस्याः शृणु देवर्षे भर्तारं योऽनया वृतः ॥ ५
मार्कण्डेय उवाच ।
सा ब्रूहि विस्तरेणेति पित्रा संचोदिता शुभा ।
दैवतस्येव वचनं प्रतिगृह्येदमब्रवीत् ॥ ६
आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातः पश्चादन्धो बभूव ह ॥ ७
विनष्टचक्षुषस्तस्य बालपुत्रस्य धीमतः ।
सामीप्येन हृतं राज्यं छिद्रेऽस्मिन्पूर्ववैरिणा ॥ ८

— d) K2 D6 तं देशं सा (for तं तं देशं).

Colophon. K3 missing. — *Major parvan:* K1. 2 T2 G2. 4 आरण्य. — *Sub-parvan:* N (K3 missing) T G1. 3 M (all om. sub-parvan name) mention only सावित्र्यु(D3 °त्र्यो)पाख्यान. — *Adhy. name:* D6 वरान्वेषणं; M2 सावित्रीजन्मकथनं. — *Adhy. no.* (figures, words or both): Dn 291 (Dn3 292); D1 296; T1 M2 (orig.) 283; T2 G4 M (M2 *inf. lin.*) 281; G1 278; G2 280. — *Śloka no.:* Dn1. n2 40; Dn3 D1 41.

278

1 In K3, 1^a–19^b are missing (cf. v.l. 3. 276. 13). K1 मार्कंडेयः; M2 श्रीमार्कंडेयः. — a) D1 राजन्.

2 K3 missing (cf. v.l. 1). — a) M2 [ऽ]धिगम्य. — b) K1 D6 T1 सर्वान् (for सर्वाणि). B2 च (for [ए]व). B3. 4 च सा; T2 G2. 4 तदा (for तथा). — In D3, the portion from 2^{cd} up to 3. 279. 7 is lost on a missing fol. — c) K (K3 missing) Dc D1. 2. 5 पुनर् (for पितुर्). — d) K1. 2 °त्री च समन्विता.

3 K3 D3 missing (cf. v.l. 1, 2). — a) K1 B3. 4 Dc D2 G2–4 समासीनं. — b) B Dn D1. 2. 4. 6 G3 transp. दृष्ट्वा and सा. K1. 2 तं (for सा). K1 शुभम्; D1. 5 तदा. — d) =(var.) 3. 277. 40^b. B2–4 D (except Dc D1; D3 missing) T2 G3 M2 °वादनं (for °वन्दनम्).

4 K3 D3 missing (cf. v.l. 1, 2). — a) K1. 2 गतासीत्; T2 [आ]गताभूत्. — b) K1. 2 पुनः (for नृप). — c) K1 B2. 3 भद्रे; K2 भद्रं; T2 G1. 2. 4 भद्र (for भर्त्रे). — d) G1 K (K3 missing) D1. 5 T2 G1 M चेमां (for चैनां). G1 त्वं (for सं-).

5 K3 D3 missing (cf. v.l. 1, 2). D1 राजा उ°. — a) K1 तेन (for [अ]नेन). — b) T2 G1. 2. 4 समागता (for [ए]व चागता). — c) B2. 4 Dn D1. 4. 6 G3 एतस्याः; T2 ततोस्याः. T2 विप्रर्षे. — d) K4 Dc D2. 5 भर्ता वै (D1 च); D1 भर्तृत्वे (for भर्तारं). T1 M1 वृतं. K1. 2 भर्ता यो वै नराधिपः; T2 भर्तारं येन सा वृता.

6 K3 D3 missing (cf. v.l. 1, 2). K1 मार्कंडेय; M1 श्रीमार्कं°. — a) G1 पितरेणेति (for विस्त°). — b) D1 M तदा संनोदिता; D6 संबोधिता. T1 सती; T2 G1. 2. 4 M तदा (for शुभा). — c) B2. 4 Dn2. n3 तदैव तस्य (for दैवतस्येव). B1 D1 T1 G1 M2 [ए]व; D6 [इ]ति (for [इ]व). Before 7, al

7 K3 D3 missing (cf. v.l. 1, 2). ins. सावित्र्युवा MSS. (except T2 M; K3 D3 missing) ins. सावित्र्युवा (resp. सावित्री). — a) K1. 2 S (except T1) आसीत्साल्वेषु — d) B1. 2. 4 Dn D4. 6 G3 चांधो; T G2. 4 M स्वं (for अन्धो). K (K3 missing) B2 M सः (for ह).

8 K3 D3 missing (cf. v.l. 1, 2). — a) T2 G1. 2 विचक्षुषस्तदा तस्य. — b) T1 साल्व° (for बाल°). — K (K3 missing) Dc1 D1. 5 सामंतेन; B2 सामात्येन (सामीप्येन). T1 सामीप्येपहृतं राज्यं. — d) B1 वैरिणा वि (for पूर्ववैरिणा).

स बालवत्सया सार्धं भार्यया प्रस्थितो वनम् ।
महारण्यगतश्चापि तपस्तेपे महाव्रतः ॥ ९
तस्य पुत्रः पुरे जातः संवृद्धश्च तपोवने ।
सत्यवाननुरूपो मे भर्तेति मनसा वृतः ॥ १०

नारद उवाच ।

अहो बत महत्पापं सावित्र्या नृपते कृतम् ।
अजानन्त्या यदनया गुणवान्सत्यवान्वृतः ॥ ११
सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ।
ततोऽस्य ब्राह्मणाश्चक्रुर्नामैतत्सत्यवानिति ॥ १२
बालस्याश्वाः प्रियाश्चास्य करोत्यश्वांश्च मृन्मयान् ।
चित्रेऽपि च लिखत्यश्वांश्चित्राश्व इति चोच्यते ॥ १३

राजोवाच ।

अपीदानीं स तेजस्वी बुद्धिमान्वा नृपात्मजः ।
क्षमावानपि वा शूरः सत्यवान्पितृनन्दनः ॥ १४

नारद उवाच ।

विवस्वानिव तेजस्वी बृहस्पतिसमो मतौ ।
महेन्द्र इव शूरश्च वसुधेव क्षमान्वितः ॥ १५

अश्वपतिरुवाच ।

अपि राजात्मजो दाता ब्रह्मण्यो वापि सत्यवान् ।
रूपवानप्युदारो वाप्यथ वा प्रियदर्शनः ॥ १६

नारद उवाच ।

साङ्कृते रन्तिदेवस्य स शक्त्या दानतः समः ।
ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा ॥ १७
ययातिरिव चोदारः सोमवत्प्रियदर्शनः ।
रूपेणान्यतमोऽश्विभ्यां द्युमत्सेनसुतो बली ॥ १८
स दान्तः स मृदुः शूरः स सत्यः स जितेन्द्रियः । C. 3. 16676 B. 3. 294. 19 K. 3. 295. 19

---

9 K_3 D_3 missing (cf. v.l. 1, 2). — ^{c}) B D (except D_5; D_3 missing) महारण्यं. — ^{d}) T_1 सुदारुणं (for महा°).

10 K_3 D_3 missing (cf. v.l. 1, 2). M_2 om. 10–11. — ^{a}) D_1 अस्य (for तस्य). $K_{1.2}$ पुनर् (for पुरे). — ^{c}) D_c D_2 वै; T_2 [ऽ]सौ (for मे). G_1 सत्यवान्मेनुरूपश्च. — ^{d}) T_2 मे भर्तेति समावृतः.

11 K_3 D_3 missing (cf. v.l. 1, 2). M_2 om. 11 (cf. v.l. 10). — ^{a}) K (K_3 missing) D_1 T_1 कष्टं (for पापं). — ^{c}) B_{2-4} T_1 M_1 अजानत्या. T_1 तनयया (for यदनया). — ^{d}) B_1 D_5 सत्यवान्गुणवान् (by transp.).

12 K_3 D_3 missing (cf. v.l. 1, 2). — ^{b}) $G_{2.4}$ माता सत्यं (by transp.). D_5 [अ]व- (for प्र-). — ^{c}) K_4 $B_{1.2}$ D_n $D_{4.6}$ G_3 तथा; T_2 तेन (for ततो).

13 K_3 D_3 missing (cf. v.l. 1, 2). — ^{a}) D_c D_2 तस्य; D_1 चैव; M चासन् (for चास्य). — ^{b}) T_2 $G_{1.2.4}$ स (for च), and मृण्म° (for मृन्म°). — ^{c}) T_1 चित्रे च; G_1 पित्रे च (for चित्रेऽपि). B_2 D_n $D_{4.6}$ G_3 विलिख°; G_1 तालिँख°; M चालिख° (for च लिख°). — ^{d}) B_4 तेन (for इति). D_1 कीर्त्यते (for चोच्य°).

14 K_3 D_3 missing (cf. v.l. 1, 2). T_1 om. the ref. $K_{1.2}$ अश्वपतिः (for राजो°). — ^{b}) B_2 D_1 स; T_2 $G_{1.2.4}$ चै (for वा). $K_{1.2}$ बृहस्पतिसमो मतौ (=15^{b}). — ^{c}) D_{c2} D_5 शूरश्च (for वा शूरः). $K_{1.2}$ महेंद्र इव शूरश्च (=15^{c}). — ^{d}) B D_c D_n $D_{2.4.6}$ T_1 G_3 पितृवत्सलः; D_1 नृपनंदनः; G_4 मित्रनंदनः. D_5 त्वया दोषो न दर्शितः.

15 K_3 D_3 missing (cf. v.l. 1, 2). — ^{a}) M आदित्य इव ते°. — ^{c}) B D_n $D_{1.4-6}$ G_3 वीर° (for शूर°).

16 K_3 D_3 missing (cf. v.l. 1, 2). K_4 $D_{1.5}$ S (except G_3) राजा ($D_{1.5}$ add उ°). — ^{a}) B_1 वापि (for दाता). — ^{b}) B D (except $D_{1.5}$) G_3 चापि (for वापि). K (K_3 missing) $B_{1.3.4}$ D_c $D_{1.5}$ वीर्य° (for सत्य°). — ^{cd}) D_{c1} D_2 T_1 G_1 om. (the *second*) [अ]पि (leaving hiatus !).

17 K_3 D_3 missing (cf. v.l. 1, 2). M_2 om. the ref. — ^{a}) K_1 संकृते; K_2 संस्कृते; K_4 आकृते. — ^{b}) B D_c D_n $D_{2.4.6}$ G_3 स्व- (for स). D_5 G_1 शक्त्या दानरतः समः. — ^{c}) T_2 सत्यसंधश्च (for °वादी).

18 K_3 D_3 missing (cf. v.l. 1, 2). — ^{c}) D_c °प्रतिमो (for °न्यतमो). — For 18^{d}, cf. 3. 50. 1^{b}. — After 18, S (except G_3) ins.:

1312* स वदान्यः स तेजस्वी स धीमान्स क्षमान्वितः ।

19 D_3 missing (cf. v.l. 2). 19^{ab} missing in K_3 (cf. v.l. 1). — ^{a}) $K_{1.2}$ सौम्यः (for शूरः). D_c (marg. *sec. m.*) सदा दांतः समृदुश्च. — M om. 19^{b}–20^{a}. — ^{b}) B_1 T $G_{1.2.4}$ सत्यसंधो; D_{c2} शूरः सत्यो (for स सत्यः स). B_{2-4} D_{c1} D_n $D_{1.4.6}$ G_3 संय(B_3 °जि)तेंद्रियः (for स जितेन्द्रियः). — ^{c}) $G_{2.4}$ सन्मैत्रः. D_{c2}

3.16676
3.294.19
3.295.19
स मैत्रः सोऽनसूयश्च स ह्रीमान्धृतिमांश्च सः ॥ १९
नित्यशश्चार्जवं तस्मिन्स्थितिस्तस्यैव च ध्रुवा ।
संक्षेपतस्तपोवृद्धैः शीलवृद्धैश्च कथ्यते ॥ २०
अश्वपतिरुवाच ।
गुणैरुपेतं सर्वैस्तं भगवन्प्रब्रवीषि मे ।
दोषानप्यस्य मे ब्रूहि यदि सन्तीह केचन ॥ २१
नारद उवाच ।
एको दोषोऽस्य नान्योऽस्ति सोऽद्य प्रभृति सत्यवान् ।
संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति ॥ २२
राजोवाच ।
एहि सावित्रि गच्छ त्वमन्यं वरय शोभने ।
तस्य दोषो महानेको गुणानाक्रम्य तिष्ठति ॥ २३
यथा मे भगवानाह नारदो देवसत्कृतः ।
संवत्सरेण सोऽल्पायुर्देहन्यासं करिष्यति ॥ २४
सावित्र्युवाच ।
सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥ २५
दीर्घायुरथ वाल्पायुः सगुणो निर्गुणोऽपि वा ।
सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥ २६
मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।
क्रियते कर्मणा पश्चात्प्रमाणं मे मनस्ततः ॥ २७
नारद उवाच ।
स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव ।
नैषा चालयितुं शक्या धर्मादस्मात्कथंचन ॥ २८

(marg. *sec. m.*) सोमसूर्यश्च; T_2 $G_{1.2.4}$ चानसूय($G_{2.4}$ °यु)श्च. — ^{d}) D_1 धीमान्स; T_1 स धीमान् (for स ह्रीमान्). $B_{1.2.4}$ Dn D_6 द्युतिमांश्च; D_5 कीर्तिमांश्च.

20 D_3 missing (cf. v.l. 2). M om. 20^{abc} (cf. v.l. 19). — ^{a}) T_2 G_2 चार्जवस्. K_3 तस्य; T_2 तं च (for तस्मिन्). — ^{b}) T_2 G_2 धृतिस्; G_1 रतिस् (for स्थितिस्). T $G_{1.2}$ तत्रैव. G_4 धृतिश्चैव त्रपा ध्रुवा. — ^{c}) K_3 स दमेन; T_1 स शिक्षितस् (for संक्षेपतस्). K_4 $D_{1.5}$ T_2 G_1 ततो; G_2 तथा; G_4 तदा (for तपो-). — ^{d}) B_3 M शीलवृत्तै°. K_{1-3} स (for च). K_4 (marg. *sec. m.* as in text) बाल-वृद्धैः स कथ्यते.

21 D_3 missing (cf. v.l. 2). $K_{3.4}$ $D_{1.5}$ S (except G_3) राजोवाच (resp. राजा). — ^{a}) T_1 सर्वैस्त्वं; T_2 $G_{1.2.4}$ भगवन्. — ^{b}) K Dc $D_{1.2.5}$ M भगवान्. $K_{1.4}$ $B_{1.3.4}$ $D_{1.5}$ M_1 प्रब्रवीति; K_2 °सि; K_3 T_1 °हि; Dc D_2 °तु. T_2 $G_{1.2.4}$ सत्यवंतं ब्रवीषि मे. — ^{c}) B_2 दोषानप्येव. $K_{1.2.4}$ D_1 वै (for मे).

22 D_3 missing (cf. v.l. 2). After the ref., K_3 B_{2-4} D (except $D_{1.5}$) G_3 ins.:

1313* एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति।
स च दोषः प्रयत्नेन न शक्यमतिवर्तितुम्।
[For line 1, cf. 23^{cd}.]

— ^{a}) $K_{1.2}$ Dn $D_{4.6}$ G_3 [ऽ]स्ति; K_3 B_2 D_5 G_1 हि (for ऽस्य). B_2 Dn $D_{1.4.6}$ G_3 नान्योस्य. — 22^{cd} = (var.) 24^{cd}. — ^{c}) = Matsyapurāṇa 208. 13^{a}. T_2 $G_{1.2.4}$ सोल्पायुर् (for क्षीणायुर्). — D_4 om. 22^{d}–23^{c}. — ^{d}) K_4 D_5 देहत्यागं; M_1 °न्यायं.

23 D_3 missing (cf. v.l. 2). $K_{1.2.4}$ T_1 om. (hapl.) 23–24; D_4 om. 23^{abc} (cf. v.l. 22). B_3 अश्वपतिरुवाच. — ^{a}) B Dc_1 Dn D_6 G_3 गच्छस्व. — ^{d}) $B_{1.3}$ Dn $D_{4.6}$ G_3 च (B_1 हि) स्थितः (for तिष्ठति); cf. 1313* (line 1).

24 D_3 missing (cf. v.l. 2). $K_{1.2.4}$ T_1 om. 24 (cf. v.l. 23). — ^{a}) K_3 Dc $D_{1.2.5}$ मां (for मे). — ^{b}) Dc D_2 देवसत्तमः. — 24^{cd} = (var.) 22^{cd}. — ^{d}) Dn_2. n_3 D_5 G_1 देहत्यागं.

25 = (var.) Manu. 9. 47. — D_3 missing (cf. v.l. 2). — ^{a}) K_2 M_1 निपतितः. K_3 सकृज्जल्पंति भूमीशाः. — ^{c}) K_4 सकृच्चाहं. K_4 D_1 ददामीति. — ^{d}) K_{1-3} D सतां (for the *first* सकृत्), the Manusmṛti variant.

26 D_3 missing (cf. v.l. 2). — ^{a}) $K_{1.2}$ स्वल्पायु (for वा°). — ^{c}) T_2 भक्त्या (for भर्ता).

27 D_3 missing (cf. v.l. 2). — ^{a}) $K_{1.2}$ मनसो G_4 निश्चितं. — ^{b}) Dc Dn_2. n_3 D_2 वाचा विधी°; T_1 वाग्वभिधी°; T_2 G_1 वागभिधी°. — ^{c}) Dc transp. क्रियते and कर्मणा.

28 D_3 missing (cf. v.l. 2). T_2 $G_{2.4}$ om. (hapl.) 28–30. — ^{a}) B_1 °नृपश्रेष्ठ. — After 28^{ab}, K_1. ins.:

1314* विलम्बो नात्र कर्तव्यो निश्चिते कर्मणि ध्रुवम्।

— $K_{1.2}$ D_4 om. (hapl.) 28^{c}–29^{d}; G_3 om. 28^{cd}. — K_4 पाल°; B Dc Dn $D_{2.6}$ वार° (for चाल°).

नान्यस्मिन्पुरुषे सन्ति ये सत्यवति वै गुणाः ।
प्रदानमेव तस्मान्मे रोचते दुहितुस्तव ॥ २९

राजोवाच ।

अविचार्यमेतदुक्तं हि तथ्यं भगवता वचः ।
करिष्याम्येतदेवं च गुरुर्हि भगवान्मम ॥ ३०

नारद उवाच ।

अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव ।
साधयिष्यामहे तावत्सर्वेषां भद्रमस्तु वः ॥ ३१

मार्कण्डेय उवाच ।

एवमुक्त्वा खमुत्पत्य नारदस्त्रिदिवं गतः ।
राजापि दुहितुः सर्वं वैवाहिकमकारयत् ॥ ३२

इति श्रीमहाभारते आरण्यकपर्वणि अष्टसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७८ ॥

२७९

मार्कण्डेय उवाच ।

अथ कन्याप्रदाने स तमेवार्थं विचिन्तयन् ।
समानिन्ये च तत्सर्वं भाण्डं वैवाहिकं नृपः ॥ १
ततो वृद्धान्द्विजान्सर्वानृत्विजः सपुरोहितान् ।
समाहूय तिथौ पुण्ये प्रययौ सह कन्यया ॥ २
मेध्यारण्यं स गत्वा च द्युमत्सेनाश्रमं नृपः । C. 3. 16693 B. 3. 295. 3 K. 3. 296. 3

---

29 D_3 missing (cf. v.l. 2). $K_{1.2}$ D_4 T_2 $G_{2.4}$ om. 29 (cf. v.l. 28). — ^{c}) D_5 प्रदानमेतत्तस्मात्ते.

30 D_3 missing (cf. v.l. 2). T_2 $G_{2.4}$ om. 30 (cf. v.l. 29). $K_{1.2}$ अश्वपतिः (for राजो°). — ^{a}) Hypermetric! M यत् (for हि). $K_{3.4}$ B Dc Dn $D_{1.2.4.6}$ G_3 अविचार्यमेतदुक्तं; D_5 अवश्यमेतदुक्तं हि; T_1 अविचार्यं मे तावदुक्तं (hypermetric); G_1 अविचार्यं तदुक्तं यत्. — ^{b}) K_4 M भगवतो. K_3 B_{1-3} Dn $D_{4.6}$ T_1 G_3 तथ्यं च (K_3 हि तथ्यं; T_1 यत्तथ्यं) भवता वचः. — ^{c}) K_1 तदैवैवं; K_2 तदैवेतं; $K_{3.4}$ Dc $D_{1.2}$ तदेवं वै; B_3 [ए]तदेवाहं; D_5 T_1 M [ए]तदेवं हि (M वै); G_1 [ए]तदेवेह. — ^{d}) T_1 त्वं गुरुर् (for गुरुर्हि).

31 D_3 missing (cf. v.l. 2). — ^{b}) Dc $D_{2.5}$ प्रदानं. — ^{c}) $K_{1.2}$ B_3 Dn °ष्याम्यहं तावत्; K_4 °ष्यामहे तात; D_1 T_1 °ष्यामि हे तात; G_4 °ष्यामि भोस्तावत्. — ^{d}) $K_{1.2}$ प्रदाने (for सर्वेषां).

32 D_3 missing (cf. v.l. 2). D_1 om. 32. T $G_{2.4}$ M_2 om. the ref. K_1 मार्कंडेय. — ^{a}) B_1 Dn $D_{4.6}$ G_3 समु° (for खमु°). — ^{b}) S (except G_3) ययौ (for गतः). — ^{c}) K तु; $G_{2.4}$ च (for [अ]पि). B_2 Dn $D_{4.6}$ G_3 सज्जं (for सर्वं). — ^{d}) D_5 °मथाकरोत्.

Colophon om. in D_1. D_3 missing. G_1 partly broken. — *Major parvan*: $K_{1.2}$ T_2 $G_{2.4}$ आरण्य. — *Sub-parvan*: $K_{3.4}$ B D (D_1 om.; D_3 missing) $G_{1.3}$ M (all om. sub-parvan name) mention only सावित्र्युपाख्यान. — *Adhy. name*: B_4 नारदवाक्यं; M_2 सावित्रीस्वयंवरकथनं. — *Adhy. no.* (figures, words or both): Dn_1 (*sup. lin.*). n_2 292; Dn_3 293; T_1 M_2 (orig.) 284; T_2 G_4 M (M_2 *inf. lin.*) 282; G_1 279; G_2 281. — *Śloka no.*: Dn 33.

279

1 In D_3, st. 1–7 are missing (cf. v.l. 3. 278. 2). K_1 मार्कंडेयः; M_2 श्रीमार्कंडेयः. — ^{a}) $K_{1.2.4}$ Dc $D_{1.2.5}$ °प्रदानाय; S (except T_1 G_3) °प्रदानेन (for °प्रदाने स). — ^{b}) K_4 Dc वैवाहिकमचिंतयत्. — ^{d}) K_3 $D_{1.5}$ नृप; Dc D_2 ततः (for नृपः).

2 D_3 missing (cf. v.l. 1). — ^{a}) T_2 वृद्धद्विजान्. — ^{b}) T_2 G_2 M_2 ऋत्विग्भिः; G_1 °ग्भ्यः; T_2 $G_{1.2.4}$ चं (for स-). Dc ऋत्विजः सपुरोहितः; T_1 ऋत्विक्सभ्यपुरोगमान् (*inf. lin.* °हितान्). — ^{c}) $K_{1.2}$ M समानीय. B Dn $D_{4.6}$ G_3 दिने (for तिथौ). — ^{d}) D_1 (by transp.) कन्यया सह.

3 D_3 missing (cf. v.l. 1). — ^{a}) $K_{1.2}$ Dc_2 D_1 मेधारण्यं. T_1 M तु; $G_{2.4}$ [अ]थ (for च). — ^{b}) B_2 द्युमत्सेनात्मजं. $K_{1.2}$ ततः; B_1 G_2 प्रति; T_2 पुरः; $G_{1.2}$

3. 16693 3. 295. 3 3. 296. 3 पद्भ्यामेव द्विजैः सार्धं राजर्षिं तमुपागमत् ॥ ३
तत्रापश्यन्महाभागं शालवृक्षमुपाश्रितम् ।
कौश्यां बृस्यां समासीनं चक्षुर्हीनं नृपं तदा ॥ ४
स राजा तस्य राजर्षेः कृत्वा पूजां यथार्हतः ।
वाचा सुनियतो भूत्वा चकारात्मनिवेदनम् ॥ ५
तस्यार्घ्यमासनं चैव गां चावेद्य स धर्मवित् ।
किमागमनमित्येवं राजा राजानमब्रवीत् ॥ ६
तस्य सर्वमभिप्रायमितिकर्तव्यतां च ताम् ।
सत्यवन्तं समुद्दिश्य सर्वमेव न्यवेदयत् ॥ ७

अश्वपतिरुवाच ।

सावित्री नाम राजर्षे कन्येयं मम शोभना ।
तां स्वधर्मेण धर्मज्ञ स्नुषार्थे त्वं गृहाण मे ॥ ८

द्युमत्सेन उवाच ।

च्युताः स्म राज्याद्वनवासमाश्रिताश्चराम धर्मं नियतास्तपस्विनः ।
कथं त्वनर्हा वनवासमाश्रमे
सहिष्यते क्लेशमिमं सुता तव ॥ ९

अश्वपतिरुवाच ।

सुखं च दुःखं च भवाभवात्मकं
यदा विजानाति सुताहमेव च ।
न मद्विधे युज्यति वाक्यमीदृशं
विनिश्चयेनाभिगतोऽस्मि ते नृप ॥ १०
आशां नार्हसि मे हन्तुं सौहृदात्प्रणयेन च ।
अभितश्चागतं प्रेम्णा प्रत्याख्यातुं न मार्हसि ॥ ११
अनुरूपो हि संयोगे त्वं ममाहं तवापि च ।
स्नुषां प्रतीच्छ मे कन्यां भार्यां सत्यवतः सुताम् ॥ १२

द्युमत्सेन उवाच ।

पूर्वमेवाभिलषितः संबन्धो मे त्वया सह ।

(*sup. lin.*). $_4$ पुनः (for नृपः). — ^{c}) G_4 [अ]थ तैः (for द्विजैः). — ^{d}) K_4 Dc $D_{1.2}$ S (except T_1 G_3) राजर्षिस्. K_1 उपागतं.

4 D_3 missing (cf. v.l. 1). — ^{a}) Dc T_1 °न्महा-स्मानं. — ^{b}) $K_{1.2}$ S (except T_2 G_3) सालवृक्षम्. B_1 Dc D_4 अपाश्रितं; B_3 अवा°; Dn_2 समा°. — ^{c}) K_2 कौस्यां. K_{1-3} Dn_2. n_3 D_6 G_1 M वृस्यां; K_4 वृश्यां; B_{2-4} Dc_1 D_1 वृष्यां; Dc_2 Dn_1 $D_{2.5}$ वृष्यां; D_4 वृश्यां; T_2 G_{2-4} ब्रस्यां. — ^{d}) $Dc_{1.}$ c_2 (before corr.) D_2 G_4 उपा° (for समा°). चक्षुहीनं.

5 D_3 missing (cf. v.l. 1). — ^{b}) T_2 $G_{1.2.4}$ चक्रे (for कृत्वा). K Dc $D_{1.2}$ यथाविधि.

6 D_3 missing (cf. v.l. 1). — ^{a}) Dc_2 D_5 तस्यार्वम्; D_1 °र्धम्; $G_{2.4}$ °र्हम्. K_4 Dc_1 मानसं (for आसनं). — ^{b}) K_4 आवेद्य; B_1 निवेद्य (for चा°). T_2 $G_{1.2.4}$ पाद्यं चा-(($G_{2.4}$ °द्यमा)वेद्य धर्म°. — ^{c}) K S (except T_2 G_3) इत्येव.

7 D_3 missing (cf. v.l. 1). — ^{a}) D_5 राजा (for तस्य). $D_{1.5}$ पूर्व° (for सर्व°). — ^{b}) $K_{3.4}$ Dc $D_{2.5}$ प्रति; $B_{1.4}$ S (except G_3) च सः (for च ताम्). $K_{1.2}$ इतिकर्तव्यसंयुतं.

8 $B_{1.3.4}$ S (except M_1) om. the ref. — ^{c}) B_1 धर्मात्मन् (for धर्मज्ञ). — In D_1, the portion of the text from 8^d up to 3. 284. 26 is lost on missing fol. — ^{d}) K Dc D_2 $G_{2.4}$ स्नुषार्थं. $G_{2.4}$ सं- (for त्वं).

9 D_1 missing (cf. v.l. 8). K_4 राजा उ°. — ^{a}) S (except G_3 M_2) च (for स्म). — ^{c}) Dc_2 ह्यनर्हा (for त्व°). D_3 G_4 आश्रिता (for आश्रमे). — ^{d}) B Dn $D_{4.6}$ G_3 निवत्स्यते; T_2 $G_{1.2.4}$ सहिष्यति; M विशक्ष्यति.

10 D_1 missing (cf. v.l. 8). D_5 राजोवाच. — ^{a}) Dc तु (for the *second* च). D_5 भवात्मकं यदा (for भवाभवात्मकं). — ^{b}) K_4 Dc $D_{2.3}$ सदा; D_5 पुरा; S (except G_3) यथा (for यदा). $K_{1.2}$ सुता मम; T_1 सुखा-र्हम् (for सुताहम्). D_3 वा (for च). — ^{c}) G_4 मद्विधो. D_5 तिष्ठति (for युज्यति). — ^{d}) K_3 Dc $D_{2.3}$ T_1 M °ना-धिगतो(Dc D_2 °नाभिगता)स्मि ते नृप; T_2 $G_{2.4}$ नाहमिहा-गतो नृप.

11 D_1 missing (cf. v.l. 8). — ^{a}) $K_{1.2}$ छेत्तुं (for हन्तुं). — ^{b}) N (except D_3; D_1 missing) G_3 प्रणतस्य (for °येन). — ^{c}) B_3 Dc D_2 स्वागतं; T_2 $G_{2.4}$ चागतः. B_2 प्रेप्सुः; D_5 T_2 प्रीत्या (for प्रेम्णा). — ^{d}) K_4 च नार्हसि (for न मार्हसि).

12 D_1 missing (cf. v.l. 8). — ^{a}) K_4 अभि° (for अनु°). $K_{1.2}$ G_1 [ऽ]सि; Dc D_2 [ऽ]पि (for हि). K_4 $D_{3.5}$ T_1 संयोगस; B Dc Dn $D_{2.4.6}$ G_3 युक्तश्च; T_2 G_1 संयोक्ता; $G_{2.4}$ M संयुक्तः (G_4 °क्ता). — ^{b}) T_2 क्षमो मे चैव वै तव; $G_{1.2.4}$ M त्वं ममाहं च वै तव. — ^{c}) D_1 G_3

भ्रष्टराज्यस्त्वहमिति तत एतद्विचारितम् ॥ १३
अभिप्रायस्त्वयं यो मे पूर्वमेवाभिकाङ्क्षितः ।
मेघान्कृत्वा जहासोच्चैस्तदद्भुतमिवाभवत् ।

30 ^{a}) K_1 वावातेन; K_2 वाधानेन; $B_{1.3.4}$ Dn $D_{2.4.6}$ G_3 विधानेन. T_1 G_1 व्यायामेन च किं पार्थ. — ^{b}) D_5 तथा; T $G_{1.2.4}$ पयः (for ततः). — ^{c}) B Dc_1 Dn $D_{2.4.6}$ G_3 M च (B_4 तु; Dc_1 वा; M [ए]व) पिबन्; Dc_2 वापि तान्; D_5 वै पुनः; T_1 च ततः (for तु ततः). $K_{1.2}$ पश्चात् (for प्रश्नान्). — ^{d}) T $G_{1.2.4}$ M पीत्वैव (T_2 $G_{2.4}$ °त्वा तु) निपतिष्यसि. — After 30, B Dc Dn $D_{2.4.6}$ G_3 ins.:

1365* एवमुक्तस्ततः पार्थः सव्यसाची धनंजयः ।

[Before the line, B_{2-4} Dc D_2 ins. वैशं°.]

31 $B_{1.2.4}$ Dc D_2 om. 31^{ab}. B_3 (marg.) Dn $D_{4.6}$ G_3 read 31^{ab} after 29^{ab}. K_3 B_3 Dn $D_{4.6}$ S (except M_1) om. the ref. — ^{a}) S (except G_3) स तु मोघानिषून्दृष्ट्वा. — ^{b}) M_2 तृषया. K_4 T $G_{2.4}$ च (for [अ]भि·). — ^{c}) D_5 अविज्ञाय च; T $G_{1.2.4}$ अविज्ञात्वैव; M अवज्ञायैव. B Dc Dn $D_{2.4.6}$ G_3 अवज्ञायैव तां वाचं.

C. 3. 17274
B. 3. 312. 33
K. 3. 313. 33

अथाब्रवीद्भीमसेनं कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च बीभत्सुश्चापराजितः ॥ ३२
चिरं गतास्तोयहेतोर्न चागच्छन्ति भारत ।
तांश्चैवानय भद्रं ते पानीयं च त्वमानय ॥ ३३
भीमसेनस्तथेत्युक्त्वा तां दिशं प्रत्यपद्यत ।
यत्र ते पुरुषव्याघ्रा भ्रातरोऽस्य निपातिताः ॥ ३४
तान्दृष्ट्वा दुःखितो भीमस्तृषया च प्रपीडितः ।
अमन्यत महाबाहुः कर्म तद्यक्षरक्षसाम् ।
स चिन्तयामास तदा योद्धव्यं ध्रुवमद्य मे ॥ ३५
पास्यामि तावत्पानीयमिति पार्थो वृकोदरः ।
ततोऽभ्यधावत्पानीयं पिपासुः पुरुषर्षभः ॥ ३६

यक्ष उवाच ।

मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ॥ ३७

वैशंपायन उवाच ।

एवमुक्तस्ततो भीमो यक्षेणामिततेजसा ।
अविज्ञायैव तान्प्रश्नान्पीत्वैव निपपात ह ॥ ३८
ततः कुन्तीसुतो राजा विचिन्त्य पुरुषर्षभः ।

— ^{d}) T_2 $G_{2.4}$ पीत्वा च; M पीत्वा स.

32 Before 32, T_1 ins. युधिष्ठिरः. — ^{a}) T_2 $G_{2.4}$ ततो° (for अथा°). — $32^b = 14^b, 20^b$. — ^{d}) K_3 D_5 om. च. B Dn $D_{4.6}$ G_3 परंतप; Dc D_2 परंतपः; G_1 पराजितः (for [अ]पराजितः).

33 ^{a}) $K_{1.2}$ चिरं गते. K_4 वै तोयार्थं (for तोयहेतोर्). — ^{b}) T_1 चादर्शत (for चागच्छन्ति). — ^{d}) $=15^d, 20^f$. G_3 तथानघ (for त्वमा°).

34 Before 34, T $G_{1.3.4}$ ins. वैशं°. — 34^{ab} = (var.) 16^{ab}. — ^{b}) B Dc Dn $D_{2.4.6}$ G_3 तं देशं (for तां दिशं). K_3 D_5 तस्मिन्देशे प्रपद्यत. — ^{c}) Dc_1 D_2 पुरुषव्याघ्र. — ^{d}) T $G_{1.3.4}$ च; M वि- (for नि-).

35 ^{b}) K $D_{1.3.5}$ T G तृष्णया. — ^{c}) B_3 अवमन्य (for अमन्यत). — ^{d}) D_5 किमेतद्; S (except G_3) कर्मैतद्. — ^{e}) Dn_1, n_3 सं- (for स-). K B_1 Dc $D_{1.5}$ चिंतयामास स (K_{1-3} B_1 च) तदा. — ^{f}) D_5 कथम् (for ध्रुवम्). $K_{1.2}$ अस्ति (for अद्य). K_4 B Dn $D_{4.6}$ G_3 वै (for मे).

36 ^{b}) M इत्युक्त्वा जलमाययौ. — M om. 36^{cd}. — ^{c}) K_2 ततोभि°. — ^{d}) $K_{1.3}$ Dc_1 पुरुषर्षभ; D_5 पांडवर्षभः. — After 36, Dc D_2 ins.:

1366* वागुवाचाथ सुस्पष्टमदृश्या पाण्डुनन्दनम् ।

37 Dc_2 G_2 om. the ref. — 37 = (var.) 12, 18. — ^{a}) T_2 $G_{2.4}$ तात मा (by transp.). Dc_1 D_2 कार्षीन्; Dc_2 कार्यं. — ^{c}) T $G_{1.2.4}$ [अ]थ (for तु). — ^{d}) B_2 पिबस्व च (for ततः पिब).

38 M om. 38^{ab}. All MSS. except K $D_{1.2.5}$ M_1 om. the ref. — ^{a}) $K_{1.2}$ उक्त्वा (for उक्तस्). B Dn $D_{4.6}$ G_3 तदा (B_4 तथा) (for ततो). — ^{b}) Dc D_2 यक्षेणाद्भुत°. — $38^{cd} = 31^{cd}$. — ^{c}) $= 31^c$. B_{1-3} Dc Dn $D_{2.4.6}$ G_3 अनुक्त्वैव तु ($B_{1.2}$ च); B_4 D_5 M अवज्ञायैव (D_5 °य च). B_4 तद्वाक्यं (for तान्प्रश्नान्). — ^{d}) M_1 पीत्वा स. — After 38, B_3 ins.:

1367* ततः कुन्तीसुतो राजा धर्मपुत्रो युधिष्ठिरः ।;

while B_4 ins.:

1368* ततश्चिरगतान्भ्रातॄनथ ज्ञातुं युधिष्ठिरः ।

$B_{3.4}$ cont. (cf. 1370* below):

1369* चिरायमानान्बहुशः पुनः पुनरुवाच ह ।
माद्रेयौ किं चिरायेते गाण्डीवी किं चिरायते ।
महाबलधरस्तत्र किं नु भीमश्चिरायते ।
गच्छाम्येषां पदं द्रष्टुमिति कृत्वा युधिष्ठिरः ।,

followed by 39^{cd}.

39 $B_{3.4}$ transp. 39^{ab} and 39^{cd}. — ^{a}) S (except G_3) धर्म° (for कुन्ती°). — ^{b}) $K_{3.4}$ B D (except D_1; D_3 missing) G_3 प्र- (for वि-). $K_{2.3}$ Dc_2 Dn_3 °र्षभ. — After 39^{ab}, K_4 B_{2-4} (see below) Dc D_2 ins.:

1370* आत्मनात्मानमेतच्च चिन्तयन्निदमब्रवीत् ।

Colophon.

वैशंपायन उवाच ।

ततश्चिरगतान्भ्रातॄनथ राजा युधिष्ठिरः ।
चिरायमाणान्बहुशः पुनः पुनरुवाच ह ।
किं स्विद्वनमिदं द्रष्टुं किं स्विद् दृष्टो मृगो भवेत् । [5]
प्राहसन्वा महाभूतं शप्तास्तेनाथ तेऽपतन् ।
न पश्यन्त्यथ वा वीराः पानीयं यत्र ते गताः ।
अन्विषद्भिर्वने तोयं कालोऽयमिति पातितः ।
किं नु तत्कारणं येन नायान्ति पुरुषर्षभाः ।
गच्छाम्येषां पदं द्रष्टुमिति कृत्वा युधिष्ठिरः ।

[B_2 om. lines 3–8; B_3 om. lines 2–3; B_4 om. lines 2–3. 9.]

— B_4 cont.:

समुत्थाय महाबाहुर्दह्यमानेन चेतसा ॥ ३९
अपेतजननिर्घोषं प्रविवेश महावनम् ।
रुरुभिश्च वराहैश्च पक्षिभिश्च निषेवितम् ॥ ४०
नीलभास्वरवर्णैश्च पादपैरुपशोभितम् ।
भ्रमरैरुपगीतं च पक्षिभिश्च महायशाः ॥ ४१
स गच्छन्कानने तस्मिन्हेमजालपरिष्कृतम् ।
ददर्श तत्सरः श्रीमान्विश्वकर्मकृतं यथा ॥ ४२
उपेतं नलिनीजालैः सिन्धुवारैश्च वेतसैः ।
केतकैः करवीरैश्च पिप्पलैश्चैव संवृतम् ।
श्रमार्तस्तदुपागम्य सरो दृष्ट्वाथ विस्मितः ॥ ४३

इति श्रीमहाभारते आरण्यकपर्वणि षण्णवत्यधिकद्विशततमोऽध्यायः ॥ २९६ ॥

२९७

वैशंपायन उवाच ।
स ददर्श हतान्भ्रातॄँल्लोकपालानिव च्युतान् ।
युगान्ते समनुप्राप्ते शक्रप्रतिमगौरवान् ॥ १
विप्रकीर्णधनुर्बाणं दृष्ट्वा निहतमर्जुनम् ।
भीमसेनं यमौ चोभौ निर्विचेष्टान्गतायुषः ॥ २
स दीर्घमुष्णं निःश्वस्य शोकबाष्पपरिप्लुतः ।

C. 3. 17290
B. 3. 313. 3
K. 3. 314. 3

1371* वैशंपायन उवाच ।
एवमादीनि वाक्यानि विसृजन्नृपसत्तमः ।

— ^{c}) $B_{3.4}$ समुत्तस्थौ; D_5 स तत्रायान् (for समुत्थाय). S (except G_3) महाबुद्धिर् (for °बाहुर्).

40 ^{a}) B Dc Dn $D_{2.4.6}$ G_3 व्यपेत° (for अपेत°). — ^{b}) M तद् (for प्र-). S (except T_2 G_3) महद्वनं. — ^{c}) K_3 D_5 रुरुऋक्ष- (for °भिश्च). — ^{d}) K $D_{1.5}$ महिषै° (for पक्षिभि°).

41 ^{b}) D_5 श्वापदैर् (for पादपैर्). — ^{d}) S (except G_3) समंततः (for महायशाः). — After 41, S (except G_3) ins.:

1372* मृदुशाड्वलसंकीर्णं भूमिभागं मनोहरम् ।
[M °संपन्नं (for °संकीर्ण).]

42 ^{a}) S (except G_3) गत्वा (for गच्छन्). — ^{b}) K_3 D_5 लताजालपरिष्कृते; S (except T_1 G_3) सेतुजालपरिष्कृतं. — ^{c}) D_5 च ततः (for तत्सरः). — ^{d}) B_1 Dc D_2 मनसः प्रीतिवर्धनं.

43 ^{b}) K_4 Dc $D_{1.2.4.5}$ $G_{1.2}$ M सिंदुवारैः. K_4 B D (except D_5; D_3 missing) G_3 स- (for च). B Dn_2. n_3 D_6 G_3 -चेतसैः; T $G_{1.2.4}$ M शोभितं. — ^{c}) $K_{1.2}$ केसरैः; K_4 केतकी-. — ^{d}) $K_{1.2.4}$ Dc $D_{1.2}$ G_1 M_2 प्रियालैश्च; T_2 वंजलैश्च; $G_{2.4}$ वंचुळैश्च (for पिप्पलैश्च). T_2 $G_{1.2.4}$ चापि; M_2 च सु- (for चैव). M_1 प्रियवालैश्च संवृतं. — After 43^{cd}, S (except G_3) ins.:

1373* ततो धर्मसुतः श्रीमान्भ्रातृदर्शनलालसः ।

— Dn_3 om. 43^{ef}. — ^{e}) S (except G_3) उपाक्रामत् (for उपागम्य). K_3 स प्रशांतमुपागम्य; D_5 प्रशांतः समुपा°. — ^{f}) $K_{1.3.4}$ D_5 दृष्ट्वाति-; K_2 D_1 दृष्ट्वा तु; S (except G_3) दृष्ट्वा सु- (for दृष्ट्वाथ).

Colophon. B_1 D_3 missing. — *Major parvan :* $K_{1.2}$ T_2 $G_{2.4}$ आरण्य. — *Sub-parvan :* K_4 B_3 Dc D_2 आरणीय; B_2 Dn_2 D_{4-6} अरणीहरण; B_4 D_1 आरणेय; Dn_1. n_2 G_3 आरणीहरण; M_1 अरणि; M_2 अरणी. — *Adhy. name :* M_2 पानीयनिवारणं. — *Adhy. no.* (figures, words or both): Dn_1 (marg.). n_2 310; Dn_3 311; D_1 313; T_1 296 (as in text !); T_2 G_4 $M_{1.2}$ (*inf. lin.*) 300 (M_2 orig. 132); G_1 297; G_2 299. — *Śloka no.:* Dn_1 45; Dn_2. n_3 46.

297

☞ This adhy. is missing in D_3 (cf. v.l. 3. 283. 10); the MS. is mostly ignored here.

1 ^{a}) D_1 स वै ददर्श तान्भ्रातॄन्. — ^{b}) D_5 नभश्च- (for इव). — ^{d}) S (except G_3) शक्रवैश्रवणोपमान्.

2 ^{a}) K_4 विप्रकीर्णधनुर्बाणान्; B Dc_1 Dn $D_{2.4.6}$ G_3 विनिकीर्णधनुर्बाणं; T_2 $G_{1.2.4}$ विप्र(T_2 °नि)कीर्णधनुष्पाणिं. — ^{c}) B Dc Dn $D_{2.4.6}$ G_3 चैव (for चोभौ). — ^{d}) K_3 T_1 G_1 निर्विचेष्टौ; D_5 निर्विशेषौ. K_2 कृतायुषः; K_3 D_5 गतायुषौ; D_1 गतायुषान्; T $G_{1.2.4}$ M व्यसूं(T_1 G_1 °सू)स्तदा.

3 ^{a}) D_1 M सु- (for स). Some MSS. निश्वस्य. $K_{1.2}$ दीर्घमुष्णं च निःश्वस्य; G_4 दीर्घमुष्णं विनिश्वस्य. — ^{b}) $K_{1.2}$ शोचन्बाष्प°. — After 3^{ab}, B Dc Dn $D_{2.4.6}$ G_3 ins.

C. 3. 17307
B. 3. 313. 20
K. 3. 314. 18

बुद्ध्या विचिन्तयामास वीराः केन निपातिताः ॥ ३
नैषां शस्त्रप्रहारोऽस्ति पदं नेहास्ति कस्यचित् ।
भूतं महदिदं मन्ये भ्रातरो येन मे हताः ।
एकाग्रं चिन्तयिष्यामि पीत्वा वेत्स्यामि वा जलम् ॥ ४
स्यात्तु दुर्योधनेनेदमुपांशुविहितं कृतम् ।
गान्धारराजरचितं सततं जिह्मबुद्धिना ॥ ५
यस्य कार्यमकार्यं वा सममेव भवत्युत ।
कस्तस्य विश्वसेद्वीरो दुर्मतेरकृतात्मनः ॥ ६
अथ वा पुरुषैर्गूढैः प्रयोगोऽयं दुरात्मनः ।
भवेदिति महाबाहुर्बहुधा समचिन्तयत् ॥ ७
तस्यासीन्न विषेणेदमुदकं दूषितं यथा ।
मुखवर्णाः प्रसन्ना मे भ्रातृणामित्यचिन्तयत् ॥ ८
एकैकशश्चौघबलानिमान्पुरुषसत्तमान् ।
कोऽन्यः प्रतिसमासेत कालान्तकयमादृते ॥ ९
एतेनाध्यवसायेन तत्तोयमवगाढवान् ।
गाहमानश्च तत्तोयमन्तरिक्षात्स शुश्रुवे ॥ १०

यक्ष उवाच ।

अहं बकः शैवलमत्स्यभक्षो
मया नीताः प्रेतवशं तवानुजाः ।
त्वं पञ्चमो भविता राजपुत्र
न चेत्प्रश्नान्पृच्छतो व्याकरोषि ॥ ११
मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।

---

a passage given in App. I (No. 31). — ^{c}) D_5 बुद्ध्या विचार° ; T $G_{1.2.4}$ M स्व(M_2 स)बुद्ध्या चिंत°.

4 ^{a}) $K_{1.2.4}$ D_1 शरैः; K_3 B_3 D_5 शर- (for शस्त्र-). — ^{b}) T $G_{1.2.4}$ नैवास्ति (for नेहास्ति). — ^{c}) $K_{1.2}$ इदं भूतं महन्मन्ये; Dc D_2 विदितं तन्महद्भूतं. — ^{d}) M_1 पातिताः (for मे हताः). M_2 भ्रातरो ये निपातिताः. — ^{e}) $K_{1.3.4}$ एकाग्रश्च; T $G_{1.2.4}$ एकांते. Dc D_2 एकाग्रश्चिंतयामास; M एकाग्रचित्तः पानीयं — ^{f}) G_4 योत्स्यामि (for वेत्स्यामि). T $G_{1.2.4}$ चाप्यपः; M कारणं (for वा जलं). Dc D_2 महद् दुःखमिदं मम. — After 4, S (except G_3) ins.:

1374* भ्रातॄणां व्यसनं घोरं सममेव महात्मनाम् ।

5 ^{a}) K_3 D_5 अत्र; K_4 D_1 जातु (for स्यात्तु). — ^{b}) T_2 $G_{2.4}$ उपांशु परिकल्पितं. — ^{c}) $K_{1.2}$ T_2 $G_{2.4}$ °राजेन कृतं; $K_{3.4}$ $B_{3.4}$ D_5 °राजरुचितं; Dn_2 $D_{1.2}$ °राजचरितं; T_1 G_1 M °राजविहितं. — ^{d}) T_2 $G_{2.4}$ असताधर्मबुद्धिना.

6 ^{c}) K_3 D_5 धीमान्; D_1 T $G_{2.4}$ धीरो (for वीरो). — ^{d}) K_2 B_{1-3} Dn $D_{4.6}$ G_3 दुष्कृतेर् (for दुर्मतेर्).

7 B_3 D_5 om. (hapl.) 7^{ab}. — ^{b}) T $G_{2.4}$ दुरात्मभिः. — ^{c}) B Dn $D_{4.6}$ G_3 M महाबुद्धिर्. — ^{d}) B D (except D_1; D_3 missing) G_3 तद° (for सम°). — After 7, T $G_{1.2}$ M ins.:

1375* आचार्यं किं नु वक्ष्यामि कृपं भीष्ममहं नु किम् ।

T_2 G_2 cont.:

1376* विदुरं किं नु वक्ष्यामि बृहस्पतिसमं नये ।

T_2 G_2 cont.: T_1 G_1 M ins. after 1375*: G_4 ins. after 7:

1377* अम्बां च किं नु वक्ष्यामि सदा दुःखस्य भागिनीम् ।
दृष्ट्वा मां भ्रातृभिर्हीनं पृच्छन्तीं पुत्रगृद्धिनीम् ।
यदा त्वं भ्रातृभिः सर्वैः शक्रतुल्यपराक्रमैः ।
सार्धं वनं गतो वीरैः कथमेकस्त्वमागतः ।

[(L. 1) G_4 आर्यां (for अम्बां). T_2 $G_{2.4}$ सर्वथा दुःखभागिनीं (for the posterior half). — (L. 2) G_4 गच्छंतं (for पृच्छन्तीं). T_2 $G_{1.2.4}$ पुत्रगर्धिनीं. — (L. 3) M यथा (for यदा). T_1 गाहमानश्च तत्तोयं (for the prior half). — (L. 4) T_2 विनिर्गतो (for वनं गतो).]

8 ^{a}) T_2 $G_{1.2.4}$ कस्य किं नु; M_2 किं चासीन्न (for तस्यासीन्न). D_1 विशेषेण (for विषेणेदम्). — After 8^{ab}, B Dc Dn $D_{2.4.6}$ G_3 ins.:

1378* मृतानामपि चैतेषां विकृतं नैव जायते ।
[Dc D_2 विकृतिर्.]

9 ^{a}) K_3 चातिबलान्; D_5 चाप्यचलान् (for चौघबलान्). T_2 $G_{2.4}$ एकैकशो बलवत (T_2 G_4 °ता). — D_4 om. 9^{b}–10^{c}. — ^{c}) G_2 नान्यः (for कोऽन्यः). $K_{1.2.4}$ $B_{1.3.4}$ प्रतिसमासीत; D_2 °सेन. — ^{d}) S (except G_3) °यमान्विना.

10 D_4 om. 10^{abc} (cf. v.l. 9). — ^{a}) N (D_4 om; D_3 missing) G_3 एतेन व्यवसायेन. — ^{b}) $K_{3.4}$ D_5 M अवगाहत; $B_{1.2}$ Dn $D_{1.6}$ T_2 G_3 व्यवगाढवान्. — ^{c}) B_2 गच्छमानश्च; T_2 $G_{2.4}$ पातुकाम°.

11 ^{a}) $K_{2.3}$ D_5 केवलमत्स्यभक्षो; D_1 शैवलमत्स्यभोजी; T_1 °भोजो; $G_{2.4}$ °भोजनो. T_2 अहं बलज्ञो बलमत्स्यभोजनो. — ^{b}) B_{2-4} Dn $D_{4.6}$ G_3 (by transp.) नीता मया; T_1 मयार्दिताः. $K_{3.4}$ $D_{1.5}$ प्रेतगतिं. — ^{c}) T_2 $G_{2.4}$ चाप्येवं (for पञ्चमो). — ^{d}) D_5 भवान्; T_1 G_1 न मे (for न चेत्). T G_4 पृच्छते.

12 12 = (var.) 3. 296. 12, 18, 37. — ^{a}) K $D_{1.5}$ M_2 पार्थ मा; $B_{1.3.4}$ M_1 मा पार्थ (for मा तात). — D_5 च (for तु). T $G_{1.2.4}$ यथाकामं (for तु कौन्तेय)

प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ॥ १२
युधिष्ठिर उवाच ।
रुद्राणां वा वसूनां वा मरुतां वा प्रधानभाक् ।
पृच्छामि को भवान्देवो नैतच्छकुनिना कृतम् ॥ १३
हिमवान्पारियात्रश्च विन्ध्यो मलय एव च ।
चत्वारः पर्वताः केन पातिता भुवि तेजसा ॥ १४
अतीव ते महत्कर्म कृतं बलवतां वर ।
यन्न देवा न गन्धर्वा नासुरा न च राक्षसाः ।
विषहेरन्महायुद्धे कृतं ते तन्महाद्भुतम् ॥ १५
न ते जानामि यत्कार्यं नाभिजानामि काङ्क्षितम् ।
कौतूहलं महज्जातं साध्वसं चागतं मम ॥ १६
येनास्म्युद्विग्नहृदयः समुत्पन्नशिरोज्वरः ।
पृच्छामि भगवंस्तस्मात्को भवानिह तिष्ठति ॥ १७

यक्ष उवाच ।
यक्षोऽहमस्मि भद्रं ते नास्मि पक्षी जलेचरः ।
मयैते निहताः सर्वे भ्रातरस्ते महौजसः ॥ १८
वैशंपायन उवाच ।
ततस्तामशिवां श्रुत्वा वाचं स परुषाक्षराम् ।
यक्षस्य ब्रुवतो राजन्नुपक्रम्य तदा स्थितः ॥ १९
विरूपाक्षं महाकायं यक्षं तालसमुच्छ्रयम् ।
ज्वलनार्कप्रतीकाशमधृष्यं पर्वतोपमम् ॥ २०
सेतुमाश्रित्य तिष्ठन्तं ददर्श भरतर्षभः ।
मेघगम्भीरया वाचा तर्जयन्तं महाबलम् ॥ २१
यक्ष उवाच ।
इमे ते भ्रातरो राजन्वार्यमाणा मयासकृत् ।
बलात्तोयं जिहीर्षन्तस्ततो वै सूदिता मया ॥ २२

C. 3. 17326
B. 3. 313. 41
K. 3. 314. 43

— ^{d}) K_{3} D_{5} T $G_{1.2.4}$ पिबस्व च (for ततः पिब).

13 ^{b}) Dc D_{2} G_{3} च (for वा). K_{4} प्रधानधृक्. — ^{c}) K_{1-3} D_{5} देव (for देवो). — ^{d}) $K_{1.2.4}$ $D_{1.5}$ शकुनिवत्.

14 ^{a}) $K_{3.4}$ पारिजातश्च; B °पात्रश्च. — ^{d}) $K_{1.2.4}$ D_{1} धरणीतले; K_{3} D_{5} पृथिवीतले; B Dc Dn $D_{2.4.6}$ G_{3} भूरितेजसः.

15 ^{a}) T_{2} $G_{2.4}$ त्वयातीव (for अतीव ते). — ^{b}) M_{2} बलं (for कृतं). B Dn $D_{4.6}$ G_{3} च बलिनां (for बलवतां). — After 15^{ab}, S (except G_{3}) ins.:

1379* विनिघ्नता महेष्वासांश्चतुरोऽपि ममानुजान् ।

— ^{c}) K_{4} Dc यं न; B_{1-3} Dn $D_{4.6}$ G_{3} यान्न. — ^{d}) K_{1} B_{2} Dn $D_{4.6}$ G_{3} च न (by transp.); B_{3} यक्ष-. — ^{e}) T_{1} $G_{1.2.4}$ न समर्थाः; T_{2} समर्थास्तु (for विषहेरन्). K D_{5} महाबुद्धे; T_{1} G_{1} महद्युद्धे. — ^{f}) $K_{3.4}$ Dc $D_{1.2}$ एतन् (for ते तन्). T $G_{1.2.4}$ M कृतं त्व(M त)त्तेजसाद्भुतं.

16 ^{a}) D_{1} तत्कार्यं; M यत्कर्मं. T_{1} G_{1} नैते जानंति यत्कामं. — ^{b}) $G_{1.4}$ नाभिजानाति; M न हि जानामि. — In D_{1}, 16^{c}–62^{d} is lost on a missing fol. (223).

17 D_{1} missing (cf. v.l. 16). — ^{a}) T_{2} $G_{2.4}$ त्वये-त्युद्विग्न°. — ^{b}) K_{4} समुद्भूतशिरोरुहः; B_{3} M_{1} समुत्पन्न-शिरोरुजः. — ^{c}) S (except G_{3}) transp. भगवन् and तस्मात्. K_{4} पृच्छामि हि भवंतं स्म. — ^{d}) =(var.) 1. 13. 18^{b}. K इह (K_{3} अन्व-) धिष्ठितः; B_{2} इत्यभाषत; D_{5} अव-तिष्ठते; M_{1} इति तिष्ठति.

18 D_{1} missing (cf. v.l. 16). K_{3} om. the ref. — ^{b}) K G_{4} जलेश्वरः. D_{6} नास्मि पक्षिकलेवरः. — ^{c}) T_{1} G_{1} [ऽ]तिबलाः (for निहताः). — ^{d}) $K_{3.4}$ Dc D_{2} [ऽ]मि-तौजसः; T_{1} G_{1} M निपातिताः; T_{2} $G_{2.4}$ निवारिताः.

19 D_{1} missing (cf. v.l. 16). K_{4} T_{1} G_{1} om. the ref. — ^{b}) K_{1} तु पुरुषा°; K_{2} सुपरुषा°; K_{3} T_{1} G_{1} M_{1} सुप-रुषाक्षरं; B Dn_{2} (by corr.) M_{2} स परुषाक्षरं. — ^{d}) $K_{1.2}$ $B_{1.4}$ Dc_{1} अपक्रम्य; K_{4} पराक्रम्य; D_{6} M अपाक्रम्य; T_{2} $G_{2.4}$ नाकंपत (for उपक्रम्य). T_{1} G_{1} नाकंपत युधिष्ठिरः. — After 19, T_{1} G_{1} ins.:

1380* ततो राजन्नपाक्रम्य तस्माद्देशादवस्थितः ।

20 D_{1} missing (cf. v.l. 16). — ^{a}) K Dc D_{2} महात्मानं (for °कायं). — ^{b}) $K_{1.2}$ °च्छ्रियं; K_{3} G_{4} °च्छ्रितं.

21 D_{1} missing (cf. v.l. 16). — ^{a}) B Dn $D_{4.6}$ G_{3} वृक्षम्; Dc D_{2} सर (for सेतुम्). K D_{6} आवृत्य; Dc T_{2} चावृत्य (for आश्रित्य). — ^{b}) K_{3} T_{2} भरतर्षभ; M_{2} पुरु-षर्षभः. — ^{c}) $B_{1.2}$ Dn $D_{4.6}$ G_{3} मेघगंभीरनादेन; T_{1} घोरगंभीरया वाचा; T_{2} $G_{2.4}$ घोराकृतिर्महावाचा. — ^{d}) T_{1} G_{1} तर्जयंस्तं. B D (except D_{5}; $D_{1.3}$ missing) T_{1} G_{3} °स्वनं (for °बलम्). — After 21, T $G_{1.2.4}$ ins.:

1381* उवाच यक्षः कौन्तेयं भ्रातृशोकाभिपीडितम् ।
[T_{2} G_{4} °शोकप्रपीडितं.]

22 D_{1} missing (cf. v.l. 16). — ^{a}) M_{1} त इमे; M_{2} य इमे (for इमे ते). K D_{5} तवेमे ह्यनुजा राजन्. — B_{3}

C. 3. 17327
B. 3. 313. 41
K. 3. 314. 43

न पेयमुदकं राजन्प्राणानिह परीप्सता ।
पार्थ मा साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ॥ २३

युधिष्ठिर उवाच ।

नैवाहं कामये यक्ष तव पूर्वपरिग्रहम् ।
कामं नैतत्प्रशंसन्ति सन्तो हि पुरुषाः सदा ॥ २४
यदात्मना स्वमात्मानं प्रशंसेत्पुरुषः प्रभो ।
यथाप्रज्ञं तु ते प्रश्नान्प्रतिवक्ष्यामि पृच्छ माम् ॥ २५

यक्ष उवाच ।

किं स्विदादित्यमुन्नयति के च तस्याभितश्चराः ।
कश्चैनमस्तं नयति कस्मिंश्च प्रतितिष्ठति ॥ २६

युधिष्ठिर उवाच ।

ब्रह्मादित्यमुन्नयति देवास्तस्याभितश्चराः ।
धर्मश्चास्तं नयति च सत्ये च प्रतितिष्ठति ॥ २७

यक्ष उवाच ।

केन स्विच्छ्रोत्रियो भवति केन स्विद्विन्दते महत् ।
केन द्वितीयवान्भवति राजन्केन च बुद्धिमान् ॥ २८

युधिष्ठिर उवाच ।

श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत् ।
धृत्या द्वितीयवान्भवति बुद्धिमान्वृद्धसेवया ॥ २९

यक्ष उवाच ।

किं ब्राह्मणानां देवत्वं कश्च धर्मः सतामिव ।
कश्चैषां मानुषो भावः किमेषामसतामिव ॥ ३०

युधिष्ठिर उवाच ।

स्वाध्याय एषां देवत्वं तप एषां सतामिव ।
मरणं मानुषो भावः परिवादोऽसतामिव ॥ ३१

यक्ष उवाच ।

किं क्षत्रियाणां देवत्वं कश्च धर्मः सतामिव ।

---

om. 22^{cd}. — ^{c}) K Dc D_2 जिहीर्षंति. — ^{d}) T_1 G_1 तदा; T_2 $G_{3.4}$ मया (for ततो). $K_{1.3}$ [ऽ]त्रसूदिता; B Dn D_4 G_3 वै मृदिता. T_2 $G_{2.4}$ तदा (for मया).

23 D_1 missing (cf. v.l. 16). — ^{b}) B_2 परीक्षते; D_6 परीप्सथ. — 23^{cdef} = (var.) 12 (*q. v.*). — ^{c}) K_3 D_6 मा तात; T_2 $G_{2.4}$ मा पार्थ (by transp.). — T_1 G_1 M om. 23^{ef}. — ^{e}) T_2 $G_{3.4}$ राजेंद्र (for कौन्तेय). — ^{f}) B_4 D_6 पिबस्व च (for ततः पिब).

24 D_1 missing (cf. v.l. 16). — ^{a}) B_2 Dc_1 Dn $D_{4.6}$ G_3 न चाहं. B_1 तोयं (for यक्ष). — ^{b}) Dc_2 D_2 °परिग्रहः. — With 24^{cd}–25^{ab}, cf. 1. 30. 2 : 5. 166. 5. — ^{c}) T_2 $G_{3.4}$ अन्ये (for कामं). D_6 आत्मानं न प्रशं°.

25 D_1 missing (cf. v.l. 16). — ^{a}) Dc T_1 तथात्मना. D_6 आत्मानं न प्रशंसंति (cf. v.l. 24). — ^{b}) B Dn $D_{2.4.6}$ G_3 पुरुषर्षभ. D_6 ह्यसंतः पुरुषाः सदा (cf. 24^{d}). — ^{d}) T_1 पृच्छतां; M पृच्छतः (for पृच्छ माम्). T_1 प्रवक्ष्यामीह पृच्छतः. — After 25, T_1 G_1 ins. (an addl.) colophon (*adhy no.*: T_1 297; G_1 298).

26 D_1 missing (cf. v.l. 16). K_4 om. 26. — ^{a}) Hypermetric! K_3 किंश्चिद् (for किं स्विद्) almost throughout in this adhy. — ^{d}) G_2 M_2 कस्मिंश्चित् (for कस्मिंश्च).

27 D_1 missing (cf. v.l. 16). — ^{b}) T_2 G_2 वेदा° (for देवा°). — ^{c}) K Dc D_2 तं; B_3 [ए]नं (for the second च). M om. (the second) च. T_1 G_1 धर्म एवास्तं नयति; T_2 $G_{2.4}$ अधर्मस्तमस्तं नयति (hypermetric). — ^{d}) K_3 T_3 $G_{2.4}$ M स सत्ये (for सत्ये च).

28 D_1 missing (cf. v.l. 16). — ^{a}) Hypermetric! K_4 केनचिच्. — ^{c}) Hypermetric! $K_{1.2}$ $B_{1.3.4}$ Dc_1 Dn $D_{3.4.6}$ $G_{3.4}$ केन स्विद् (for केन). T_2 G_3 द्वितीयो (for द्वितीयवान्). D_6 राजन् (for भवति). — ^{d}) $K_{1.3}$ केन स्विद्बुद्धिमांस्तथा; D_6 कथा हि वद बुद्धिमान्.

29 D_1 missing (cf. v.l. 16). — ^{a}) Hypermetric! D_6 — ^{c}) Hypermetric! $G_{3.4}$ सहाय° (for द्वितीय°). D_6 यक्ष (for भवति). — ^{d}) Dc_2 D_2 (m as in text) धर्म° (for वृद्ध°).

30 D_1 missing (cf. v.l. 16). — ^{a}) Dc T_1 G_1 दैवत्वं. — ^{b}) = 32^{b}. K_1 किं च धर्मः; K_4 (m as in text) किं च कर्म. — B_1 om. (hapl.) 30^{cd}. — ^{c}) $K_{1.3}$ किमेषां; T_1 G_4 क एव; T_2 $G_{1.2}$ M क एषां. — ^{d}) $K_{1.3}$ D_6 कश्चैषाम्; K_3 परिवादो-; G_4 परित्यागो- (for किमेषाम्).

31 D_1 missing (cf. v.l. 16). G_1 om. (hapl.) 31–32. — ^{a}) $K_{1.3}$ एव (for एषां). — ^{b}) B_2 यज्ञ; D_6 धर्म; T_1 संत (for तप). K_3 तपः पथ्यं (for तप एषां). — ^{c}) T_1 भयं वै (for मरणं). — ^{d}) B_4 $Dn_{1.n2}$ G_3 परीवादो; M_1 परित्यागो.

कश्चैषां मानुषो भावः किमेषामसतामिव ॥ ३२
युधिष्ठिर उवाच ।
इष्वस्त्रमेषां देवत्वं यज्ञ एषां सतामिव ।
भयं वै मानुषो भावः परित्यागोऽसतामिव ॥ ३३
यक्ष उवाच ।
किमेकं यज्ञियं साम किमेकं यज्ञियं यजुः ।
का चैका वृश्चते यज्ञं कां यज्ञो नातिवर्तते ॥ ३४
युधिष्ठिर उवाच ।
प्राणो वै यज्ञियं साम मनो वै यज्ञियं यजुः ।
वागेका वृश्चते यज्ञं तां यज्ञो नातिवर्तते ॥ ३५
यक्ष उवाच ।
किं स्विदापततां श्रेष्ठं किं स्विन्निपततां वरम् ।
किं स्वित्प्रतिष्ठमानानां किं स्वित्प्रवदतां वरम् ॥ ३६
युधिष्ठिर उवाच ।
वर्षमापततां श्रेष्ठं बीजं निपततां वरम् ।
गावः प्रतिष्ठमानानां पुत्रः प्रवदतां वरः ॥ ३७
यक्ष उवाच ।
इन्द्रियार्थाननुभवन्बुद्धिमाँल्लोकपूजितः ।
संमतः सर्वभूतानामुच्छ्वसन्को न जीवति ॥ ३८
युधिष्ठिर उवाच ।
देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति ॥ ३९
यक्ष उवाच ।
किं स्विद्गुरुतरं भूमेः किं स्विदुच्चतरं च खात् ।
किं स्विच्छीघ्रतरं वायोः किं स्विद्बहुतरं नृणाम् ॥ ४०
युधिष्ठिर उवाच ।
माता गुरुतरा भूमेः पिता उच्चतरश्च खात् ।
मनः शीघ्रतरं वायोश्चिन्ता बहुतरी नृणाम् ॥ ४१
यक्ष उवाच ।
किं स्वित्सुप्तं न निमिषति किं स्विज्जातं न चोपति ।

C. 3. 17346
B. 3. 313. 6
K. 3. 314. 6

---

32 D$_1$ missing (cf. v.l. 16). G$_1$ om. 32 (cf. v.l. 31). K$_1$ reads 32^{ab}, 33 after 35; K$_2$ reads 32–33 after 35. — 32^{b}=30^{b}. — K$_1$ om. (hapl.) 32^{cd}. — ^{c}) S (except G$_3$; G$_1$ om.) एषां (for चैषां).

33 D$_1$ missing (cf. v.l. 16). For sequence in K$_{1.2}$ cf. v.l. 32. — ^{b}) K$_3$ D$_5$ यज्ञा; S (except G$_3$) दानम् (for यज्ञ). — ^{c}) T$_1$ G$_1$ मरणं (for भयं वै); cf. 31^{c}. — ^{d}) K$_{1.2}$ परिवादोसता°.

34 D$_1$ missing (cf. v.l. 16). For K$_{1.2}$ cf. v.l. 32. — ^{a}) D$_5$ S (except G$_3$) याज्ञियं. — ^{b}) S (except T$_1$ G$_3$) याज्ञियं. — ^{c}) B$_{1.2.4}$ Dn D$_{2.4.6}$ G$_3$ चैषां; T$_2$ चैता (for चैका). B Dc Dn D$_{2.4.6}$ G$_3$ वृणुते; T$_1$ G$_1$ पृच्छते; T$_2$ विशते (for वृश्चते).

35 D$_1$ missing (cf. v.l. 16). For K$_{1.2}$ cf. v.l. 32. — ^{ab}) S (except G$_3$) याज्ञियं (in both places). — ^{c}) T$_2$ विशते (for वृश्चते). B Dc Dn D$_{2.4.6}$ T$_1$ G$_{1.3}$ ऋगेका वृणु(T$_1$ G$_1$ पृच्छ)ते यज्ञं. — After 35, K$_1$ reads 32^{ab} and 33.

36 D$_1$ missing (cf. v.l. 16). — ^{a}) K$_{1-3}$ B$_{3.4}$ Dn D$_{4.6}$ G$_3$ आवपतां; M$_2$ आतपतां (for आपततां). — ^{b}) K$_{1.2}$ B Dc$_1$ Dn$_1$. n$_2$ D$_{4.6}$ G$_3$ निवपतां; K$_3$ D$_2$ G$_4$ निपतितां; G$_1$ आपततां. — ^{c}) M किं स्वित्प्रतिष्ठतां श्रेष्ठं. — ^{d}) B Dc Dn D$_{2.4.6}$ G$_3$ प्रसवतां (for प्रवदतां).

37 D$_1$ missing (cf. v.l. 16). — ^{a}) Dn D$_{4.6}$ G$_3$ आवपतां (for आपततां). — ^{b}) N (except D$_2$; K$_4$ orig. as in text; D$_{1.3}$ missing) T$_1$ G$_{1.3}$ निवपतां (for निपततां). — ^{c}) M गावः प्रतिष्ठतां श्रेष्ठाः. — ^{d}) B$_{1-3}$ D (except D$_5$; D$_{1.3}$ missing) G$_3$ प्रसवतां; B$_4$ प्रवमतां (for प्रवदतां).

38 D$_1$ missing (cf. v.l. 16). M$_2$ om. the ref. — ^{b}) Dc D$_2$ (marg. *sec. m.* as in text) लोकविश्रुतः. — ^{c}) B$_3$ संपन्नः; B$_4$ सर्वतः; T$_2$ G$_{2.4}$ निंदकः (for संमतः).

39 D$_1$ missing (cf. v.l. 16). B$_3$ om. the ref. — ^{d}) K$_4$ T$_1$ G$_1$ M स न; D$_5$ स च (for न स).

40 D$_1$ missing (cf. v.l. 16). — ^{a}) T$_2$ G$_{1.2.4}$ गुरुतरा; M °तरी. — ^{b}) T$_1$ G$_1$ उच्चतरश्च; G$_4$ उच्चरितं. D$_5$ बलं; M$_1$ नभात्. — ^{c}) K D$_5$ वातात् (for वायोः). — ^{d}) T$_1$ शीघ्रतरा; T$_2$ G$_{2.4}$ बहुतरी. K$_4$ B$_{1.3}$ Dn D$_{2.4.6}$ G$_3$ तृणात् (for नृणाम्).

41 D$_1$ missing (cf. v.l. 16). — ^{a}) B$_3$ Dc D$_2$ (before corr.)$_{.4}$ M गुरुतरी. — ^{b}) T$_1$ G$_1$ M ह्युच्चतरश्च; G$_2$ उच्चतरं; G$_4$ उच्चरितश्च (for उच्चतरश्च). D$_5$ ततः (for च खात्). K B Dc Dn D$_{2.4.6}$ G$_3$ खात्पितोच्चतरस्तथा (K$_{1.2.4}$ °रः स्मृतः; K$_3$ °रस्ततः). — ^{c}) K$_3$ जलं (for मनः).

C. 3. 17346
B. 3. 313. 61
K. 3. 314. 63

कस्य स्विद्धृदयं नास्ति किं स्विद्वेगेन वर्धते ॥ ४२

युधिष्ठिर उवाच ।

मत्स्यः सुप्तो न निमिषत्यण्डं जातं न चोपति ।
अश्मनो हृदयं नास्ति नदी वेगेन वर्धते ॥ ४३

यक्ष उवाच ।

किं स्वित्प्रवसतो मित्रं किं स्विन्मित्रं गृहे सतः ।
आतुरस्य च किं मित्रं किं स्विन्मित्रं मरिष्यतः ॥ ४४

युधिष्ठिर उवाच ।

सार्थः प्रवसतो मित्रं भार्या मित्रं गृहे सतः ।
आतुरस्य भिषङ् मित्रं दानं मित्रं मरिष्यतः ॥ ४५

यक्ष उवाच ।

किं स्विदेको विचरति जातः को जायते पुनः ।
किं स्विद्धिमस्य भैषज्यं किं स्विदावपनं महत् ॥ ४६

युधिष्ठिर उवाच ।

सूर्य एको विचरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भैषज्यं भूमिरावपनं महत् ॥ ४७

यक्ष उवाच ।

किं स्विदेकपदं धर्म्यं किं स्विदेकपदं यशः ।
किं स्विदेकपदं स्वर्ग्यं किं स्विदेकपदं सुखम् ॥ ४८

युधिष्ठिर उवाच ।

दाक्ष्यमेकपदं धर्म्यं दानमेकपदं यशः ।
सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम् ॥ ४९

यक्ष उवाच ।

किं स्विदात्मा मनुष्यस्य किं स्विद्दैवकृतः सखा ।

N ($D_{1.3}$ missing) G_3 वातात् (for वायोः). — ^{d}) D_5 घृणा (for चिन्ता). K (except K_3) बहुतरा; Dn_3 G_1 बहुतरं. K_4 $B_{1.3}$ Dn $D_{2.4.6}$ G_3 तृणात् (for नृणाम्).

42 D_1 missing (cf. v.l. 16). — ^{a}) Hypermetric! K_3 Dc D_2 S (except G_3) सुप्तो. K_3 D_5 मिषति; K_4 S (except T_2 G_3) निमिषेत् (for निमिषति). — ^{b}) T_1 $G_{1.2}$ न चेंगति (G_2 °ते); T_2 G_4 च नेंगते. — ^{c}) $K_{3.4}$ Dn_3 M_1 कस्यचिद्; T_2 $G_{2.4}$ कस्य वा. — ^{d}) T_2 $G_{2.4}$ का च (for किं स्विद्).

43 D_1 missing (cf. v.l. 16). — ^{ab}) D_5 सुप्तो न मत्स्यो (for मत्स्यः सुप्तो न). $K_{1.2}$ निमिषति अंडं (K_2 °ड-) जातं; K_3 निमिषत्यंबु जातं; K_4 T_1 $G_{1.2.4}$ M निमिषेदंडं (T_1 $G_{2.4}$ °ड-) जातं; D_5 मिषति अंडजातं. T_1 G_1 न चेंगति; T_2 च नेंगते; $G_{2.4}$ न चेंगते.

44 D_1 missing (cf. v.l. 16). — ^{a}) T_1 G_1 किं स्विन्मित्रं प्रवसतः. — ^{c}) M_1 मित्रं किं (by transp.).

45 D_1 missing (cf. v.l. 16). — ^{a}) S (except G_3) विद्या (for सार्थः). — ^{b}) D_5 मित्रं भार्या (by transp.). — ^{d}) D_5 पुण्यं (for दानं). — After 45, B Dc Dn $D_{2.4.6}$ G_3 ins.:

1382* यक्ष उवाच ।
कोऽतिथिः सर्वभूतानां किं स्विद्धर्मं सनातनम् ।
अमृतं किं स्विद्राजेन्द्र किं स्वित्सर्वमिदं जगत् ।
युधिष्ठिर उवाच ।
अतिथिः सर्वभूतानामग्निः सोमो गवामृतम् ।
सनातनोऽमृतो धर्मो वायुः सर्वमिदं जगत् ।

[(L. 2) B_4 Dc अमृतं किं गवां चैव. — (L. 3) Dc सर्वभूतातिथिर्वह्निर्धर्मः सत्यं सनातनः. — (L. 4) Dc सोमेमृतं गवां चैव (for prior half).]

46 D_1 missing (cf. v.l. 16). — ^{a}) K_4 Dc कश्चिद्; D_4 कः स्विद्. $K_{1.2}$ B Dn $D_{2.4.6}$ G_3 विचरते. — ^{c}) T $G_{1.2.4}$ हिमस्य भेषजं किं स्वित्. — ^{d}) $M_{1.3}$ (*inf. lin.* as in text) °वचनं (for °वपनं). Dc किं स्विदायतनं जगत्.

47 D_1 missing (cf. v.l. 16). — ^{a}) B Dn $D_{2.4.6}$ G_3 M_1 विचरते. $G_{1.4}$ सूर्य एकाकी चरति. — ^{c}) T_1 भिषजं; T_2 $G_{1.2.4}$ भेषजं. — ^{d}) Cf. 1. 83. 13^d. M_1 °वचनं (for °वपनं).

48 D_1 missing (cf. v.l. 16). — ^{a}) $K_{1.2}$ °पदे. Dc_2 Dn_3 $D_{2.5}$ G_3 धर्मं; T_1 G_1 मित्रं; M_2 धन्यं. — ^{b}) $K_{1.2}$ °पदे. — ^{c}) $K_{1.2}$ °पदे. K_2 धर्म्यं; D_5 T_2 $G_{2.4}$ स्वर्गं. — ^{d}) $K_{1.2}$ °पदे.

49 D_1 missing (cf. v.l. 16). — ^{a}) K_3 दांतम्; T_1 G_1 धार्ष्ट्यम् (for दाक्ष्यम्). $K_{1.2}$ एकपदे. D_2 धर्मं; T_1 G_1 मित्रं; M_2 धन्यं. — ^{b}) $K_{1.2}$ एकपदे. — ^{c}) K_2 एकपदे; K_4 चैकपदं. D_5 T $G_{1.2.4}$ स्वर्गं. — ^{d}) $K_{1.2}$ एकपदे.

50 D_1 missing (cf. v.l. 16). — ^{a}) K_4 कश्चिद्. — ^{b}) K_4 कश्चिद्. K_2 D_5 S (except T_1 G_1 मनुष्याणां. — ^{c}) G_3) देवकृतः. — D_4 om. (hapl.) 50^c–51^b. — ^{c}) D_5 Hypermetric! $K_{1.2}$ च वै किं स्वित्; K_3 किंश्चित्स्यात्; S (except G_3) अस्योपच किं च स्वित् (for किं स्विदस्य). S (except G_3) अस्योपजीवनं किं स्वित्. — ^{d}) M स्विद्दास्ये (cf. v.l. 51).

51 D_1 missing (cf. v.l. 16). T_2 om. 51–52; D_4

उपजीवनं किं स्विदस्य किं स्विदस्य परायणम् ॥ ५०
युधिष्ठिर उवाच ।
पुत्र आत्मा मनुष्यस्य भार्या दैवकृतः सखा ।
उपजीवनं च पर्जन्यो दानमस्य परायणम् ॥ ५१
यक्ष उवाच ।
धन्यानामुत्तमं किं स्विद्धनानां किं स्विदुत्तमम् ।
लाभानामुत्तमं किं स्वित्किं सुखानां तथोत्तमम् ॥ ५२
युधिष्ठिर उवाच ।
धन्यानामुत्तमं दाक्ष्यं धनानामुत्तमं श्रुतम् ।
लाभानां श्रेष्ठमारोग्यं सुखानां तुष्टिरुत्तमा ॥ ५३
यक्ष उवाच ।
कश्च धर्मः परो लोके कश्च धर्मः सदाफलः ।
किं नियम्य न शोचन्ति कैश्च संधिर्न जीर्यते ॥ ५४
युधिष्ठिर उवाच ।
आनृशंस्यं परो धर्मस्त्रयीधर्मः सदाफलः ।
मनो यम्य न शोचन्ति सद्भिः संधिर्न जीर्यते ॥ ५५
यक्ष उवाच ।
किं नु हित्वा प्रियो भवति किं नु हित्वा न शोचति ।
किं नु हित्वार्थवान्भवति किं नु हित्वा सुखी भवेत् ॥
युधिष्ठिर उवाच ।
मानं हित्वा प्रियो भवति क्रोधं हित्वा न शोचति ।
कामं हित्वार्थवान्भवति लोभं हित्वा सुखी भवेत् ॥ ५७
यक्ष उवाच ।
मृतः कथं स्यात्पुरुषः कथं राष्ट्रं मृतं भवेत् ।

C. 3. 17368
B. 3. 313. 83
K. 3. 314. 85

---

om. 51^{ab} (cf. v.l. 50). M_2 om. the ref. — ^{a}) T_1 मनुष्याणां. — ^{b}) $K_{1.2.4}$ S (except G_3; T_2 om.) देवकृतः. — ^{c}) T_1 G_1 उपजीव्यस् (for उपजीवनं). S (except G_3; T_2 om.) तु (for च). — ^{d}) M दास्ये (for अस्य); cf. v.l. 50.

52 D_1 missing (cf. v.l. 16). T_2 om. 52 (cf. v.l. 51). — ^{a}) $K_{1.2}$ G_1 M धान्यानाम् (for धन्यानाम्). $K_{3.4}$ Dc_2 किं स्याद्; B_2 किंचिद् (for किं स्विद्). — ^{b}) B Dn $D_{2.4.6}$ G_3 स्यात्किम् (for किं स्विद्). — ^{c}) $K_{3.4}$ B D ($D_{1.3}$ missing) G_2 किं स्यात् (for किं स्वित्). — ^{d}) T_1 G_1 तथोत्तरम्. K_{1-3} D_5 G_2 सुखानां किं स्वि(K_3 °श्चि)दुत्तमं; K_4 B Dc Dn $D_{2.4.6}$ G_3 सुखानां स्यात्किमुत्तमं.

53 D_1 missing (cf. v.l. 16). — ^{a}) $K_{1.2}$ G_1 M धान्यानाम् (for धन्या°). — ^{c}) B Dc Dn $D_{2.4.6}$ G_3 श्रेय (Dc_2 Dn_1 °ष्ठ) आरोग्यं. — ^{d}) M_1 शुभानां तुष्टिरुत्तमं.

54 D_1 missing (cf. v.l. 16). — ^{a}) S (except G_3) किं स्विद्धर्मात् (for कश्च धर्मः). T_2 G_1 M_1 परं (for परो). — ^{b}) K_4 कश्चिद् (for कश्च). — ^{c}) K_1 किं नु भित्वा; K_2 किं नु यंत्वा; Dc निनियम्य (for किं नियम्य). — ^{d}) $K_{1.2}$ केन; K_4 (marg. *sec. m.*) T_1 G_1 M_2 कस्य; Dc क च; D_5 कश्च.

55 D_1 missing (cf. v.l. 16). — ^{a}) T_2 $G_{2.4}$ M परं धर्मात् (for परो धर्मस्); cf. v.l. 54. — ^{b}) $K_{1.2}$ D_5 T_2 $G_{1.2.4}$ M त्रेताधर्मः; T_1 त्राता धर्मः. — ^{c}) $K_{1.2}$ यंत्वा; K_3 नियम्य (hypermetric); $B_{2.3}$ Dc M_1 यस्य (for यम्य). — ^{d}) $B_{1.2.4}$ Dn $D_{4.6}$ $G_{1.3}$ transp. सद्भिः and संधिः. B_1 हीयते (for जीर्यते).

56 D_1 missing (cf. v.l. 16). — ^{a}) Hypermetric! B_3 हत्वा. K_4 प्रियो भवति किं हित्वा. — ^{b}) B_3 Dc_2 हत्वा. — ^{c}) Hypermetric! B_3 Dc_2 हत्वा. B_4 Dc [आ]त्म° (for [अ]र्थ°). — ^{d}) B_3 Dc_2 हत्वा.

57 D_1 missing (cf. v.l. 16). — ^{a}) Hypermetric! B_3 हत्वा. — ^{b}) K Dc D_5 लोभं (for क्रोधं). B_3 हत्वा. — ^{c}) Hypermetric! $B_{1.3}$ हत्वा. B_4 Dc [आ]त्म° (for [अ]र्थ°). — ^{d}) $K_{1.3.4}$ Dc क्रोधं; D_5 कोपं (for लोभं). B_3 हत्वा. — After 57, B Dc Dn $D_{2.4.6}$ T_2 G_{2-4} ins.:

1383*
यक्ष उवाच ।
किमर्थं ब्राह्मणे दानं किमर्थं नटनर्तके ।
किमर्थं चैव भृत्येषु किमर्थं चैव राजसु ।
युधिष्ठिर उवाच ।
धर्मार्थं ब्राह्मणे दानं यशोर्थं नटनर्तके ।
भृत्येषु भरणार्थं वै भयार्थं चैव राजसु ।
यक्ष उवाच ।
केन स्विदावृतो लोकः केन स्विन्न प्रकाशते । [5]
केन त्यजति मित्राणि केन स्वर्गं न गच्छति ।
युधिष्ठिर उवाच ।
अज्ञानेनावृतो लोकस्तमसा न प्रकाशते ।
लोभात्त्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति ।

[(L. 4) B_1 कर्मार्थं चैव भृत्येषु; T_2 $G_{2.4}$ संग्रामार्थं च भृत्येषु (for the prior half). B_1 प्रियार्थं for भयार्थं).]

58 D_1 missing (cf. v.l. 16). — ^{a}) S (except G_3) कथं मृतः (by transp.). — ^{c}) $K_{1.2}$ कथं मृतं (by

C. 3. 17368
B. 3. 313. 83
K. 3. 314. 85

श्राद्धं मृतं कथं च स्यात्कथं यज्ञो मृतो भवेत् ॥ ५८

युधिष्ठिर उवाच ।

मृतो दरिद्रः पुरुषो मृतं राष्ट्रमराजकम् ।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ॥ ५९

यक्ष उवाच ।

का दिक्किमुदकं प्रोक्तं किमन्नं पार्थ किं विषम् ।
श्राद्धस्य कालमाख्याहि ततः पिब हरस्व च ॥ ६०

युधिष्ठिर उवाच ।

सन्तो दिग्जलमाकाशं गौरन्नं प्रार्थना विषम् ।
श्राद्धस्य ब्राह्मणः कालः कथं वा यक्ष मन्यसे ॥ ६१

यक्ष उवाच ।

व्याख्याता मे त्वया प्रश्ना याथातथ्यं परंतप ।
पुरुषं त्विदानीमाख्याहि यश्च सर्वधनी नरः ॥ ६२

युधिष्ठिर उवाच ।

दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणः ।
यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥ ६३
तुल्ये प्रियाप्रिये यस्य सुखदुःखे तथैव च ।
अतीतानागते चोभे स वै सर्वधनी नरः ॥ ६४

यक्ष उवाच ।

व्याख्यातः पुरुषो राजन्यश्च सर्वधनी नरः ।
तस्मात्तवैको भ्रातृणां यमिच्छसि स जीवतु ॥ ६५

युधिष्ठिर उवाच ।

श्यामो य एष रक्ताक्षो बृहच्छाल इवोद्गतः ।
व्यूढोरस्को महाबाहुर्नकुलो यक्ष जीवतु ॥ ६६

यक्ष उवाच ।

प्रियस्ते भीमसेनोऽयमर्जुनो वः परायणम् ।

---

transp.). B Dn D$_{2.4.6}$ G$_3$ वा; D$_5$ हि (for च).

59 D$_1$ missing (cf. v.l. 16). — ^{c}) S (except G$_3$) अश्रोत्रिये (for °यं).

60 D$_1$ missing (cf. v.l. 16). — ^{a}) S (except G$_3$) पार्थ (for प्रोक्तं). D$_5$ किमुदकं नृप प्रोक्तं. — ^{b}) B$_{1.2.4}$ अर्थं; D$_5$ मतं; T$_1$ M रत्नं (for अन्नं). B Dn D$_{2.4.6}$ G$_3$ किं च वै (for पार्थ किं). — In T$_1$, the portion from 60^{cd} up to the *end* of this parvan is not written; fol. 144 is blank. — ^{d}) =3. 296. 12^{d}, 18^{d}, 37^{d}, etc. D$_5$ G$_4$ पिबस्व च (for ततः पिब).

61 D$_1$ T$_1$ missing (cf. v.l. 16; 60). — ^{a}) D$_5$ संतो ह्युदकमाख्यातं; cf. v.l. 60. — ^{b}) D$_5$ गौरन्नं; G$_3$ M गौ रत्नं (for गौरन्नं). K$_3$ पार्थिवा; T$_2$ G$_{1.2.4}$ M ब्राह्मणो (for प्रार्थना). — ^{d}) T$_2$ G$_{1.2.4}$ M किं वा त्वं (for कथं वा). — After 61, Dn D$_6$ G$_3$ ins. a long passage given in App. I (No. 32), which from the documentary view-point, is a palpable interpolation, as is also evident from intrinsic considerations.

62 D$_1$ T$_1$ missing (cf. v.l. 16, 60). — ^{a}) Dc$_2$ D$_2$ आख्याता (for व्या°). — ^{b}) K$_{1.3.4}$ D$_4$ M$_2$ यथातथ्यं; T$_2$ G$_{1.2.4}$ यथातत्त्वं (for याथातथ्यं). — ^{c}) Hypermetric! B Dn D$_4$ G$_3$ व्याख्याहि (for आ°). — ^{d}) D$_5$ G$_4$ [ई]श्वरः (for नरः). K यश्च सर्व (K$_3$ धर्म)धने(K$_2$ °नी)श्वरः.

63 =3. 191. 21. — T$_1$ missing (cf. v.l. 60). D$_1$ resumes. — ^{a}) K$_4$ दिवि; Dc$_2$ एवं; G$_1$ दिशं (for दिवं). — ^{b}) B$_{1-3}$ Dc Dn D$_{2.4.6}$ पुण्येन कर्मणा. — ^{c}) B$_{3.4}$ Dc D$_{2.4}$ यावान् (for यावत्). Dc D$_2$ हि (for स). — ^{d}) B$_{3.4}$ D$_4$ तावान् (for तावत्).

64 T$_1$ missing (cf. v.l. 60). — ^{a}) M तुल्यौ प्रियाप्रियौ. — ^{b}) D$_1$ सुखं दुःखं (for सुखदुःखे). — After 64^{ab}, T$_2$ G$_{2.4}$ ins.:

1384* समत्वं यस्य सर्वेषु स वै पुरुष उच्यते ।
भूतभव्यभविष्येषु निःस्पृहः शान्तमानसः ।

— ^{c}) B$_2$ अतीतेनागते. G$_1$ चैव (for चोभे). T$_2$ G$_{2.4}$ सुप्रसन्नः सदा योगी. — ^{d}) Cf. v.l. 62^{d}. K$_{2.4}$ °धनेश्वरः (for °धनी नरः). K$_1$ सर्वैः सर्वे धनेश्वरः; K$_3$ स वै धर्मधनीश्वरः; D$_1$ सर्वे सर्वधनेश्वरः.

65 T$_1$ missing (cf. v.l. 60). — ^{a}) K$_4$ Dc D$_2$ आख्यातः (for व्या°). — ^{b}) K$_{1.2.4}$ D$_1$ °धनेश्वरः; K$_3$ D$_5$ G$_4$ °धनीश्वरः (for °धनी नरः). — ^{c}) B Dn D$_{4.6}$ त्वमेकं; G$_2$ तवैके; G$_3$ तवैकं (for तवैको).

66 T$_1$ missing (cf. v.l. 60). — ^{b}) K$_{1-3}$ बृहत्साल; T$_2$ G$_{1.2.4}$ M Dc D$_2$ °त्ताल (D$_2$m *sec. m.* as in text); T$_2$ G$_{1.2.4}$ M Dc D$_2$ °त्ताल (Dn$_1$ सालस्कंध. K$_4$ B$_{1.2}$ Dn D$_{2.4.6}$ G$_3$ [उ]त्थितः (Dn$_1$ °च्छ्रितः); B$_3$ [उ]द्धतः (for [उ]द्गतः).

67 T$_1$ missing (cf. v.l. 60). — ^{b}) K Dc D$_{1.2.4}$ B$_1$ Dc D$_5$ G$_4$ परायणः. ते; T$_2$ G$_{1.2.4}$ M च (for वः). B (except B$_3$) Dn$_3$ — ^{c}) T$_2$ G$_{2.4}$ त्वं (for स).

स कस्मान्नकुलं राजन्सापत्नं जीवमिच्छसि ॥ ६७
यस्य नागसहस्रेण दशसंख्येन वै बलम् ।
तुल्यं तं भीममुत्सृज्य नकुलं जीवमिच्छसि ॥ ६८
तथैनं मनुजाः प्राहुर्भीमसेनं प्रियं तव ।
अथ केनानुभावेन सापत्नं जीवमिच्छसि ॥ ६९
यस्य बाहुबलं सर्वे पाण्डवाः समुपाश्रिताः ।
अर्जुनं तमपाहाय नकुलं जीवमिच्छसि ॥ ७०

युधिष्ठिर उवाच ।

आनृशंस्यं परो धर्मः परमार्थाच्च मे मतम् ।
आनृशंस्यं चिकीर्षामि नकुलो यक्ष जीवतु ॥ ७१
धर्मशीलः सदा राजा इति मां मानवा विदुः ।
स्वधर्मान्न चलिष्यामि नकुलो यक्ष जीवतु ॥ ७२
यथा कुन्ती तथा माद्री विशेषो नास्ति मे तयोः ।
मातृभ्यां सममिच्छामि नकुलो यक्ष जीवतु ॥ ७३

यक्ष उवाच ।

यस्य तेऽर्थाच्च कामाच्च आनृशंस्यं परं मतम् ।
तस्मात्ते भ्रातरः सर्वे जीवन्तु भरतर्षभ ॥ ७४

C. 3. 17418
B. 3. 313. 13
K. 3. 314. 13

इति श्रीमहाभारते आरण्यकपर्वणि सप्तनवत्यधिकद्विशततमोऽध्यायः ॥ २९७ ॥

$D_{1.2.4.6}$ G_3 नकुलो (for °लं). — ^{d}) $=69^{d}$. D_5 सांप्रतं; G_2 सापत्न्यं; G_4 सापत्यं. G_1 जीवयिष्यसि (for °मिच्छसि).

68 T_1 missing (cf. v.l. 60). K_2 om. (hapl.) 68–70; G_1 om. (hapl.) 68–69. K_4 reads 68–70 in marg. *sec. m.* — ^{a}) M नागसहस्रस्य. — ^{b}) K (K_2 om.) B_{2-4} Dc $D_{1.2}$ (before corr.) शतसंख्येन; M दशसंख्यस्य. — ^{c}) D_5 तमुत्सृज्य कथं भीमं. — ^{d}) M कस्मान्नकुलमिच्छसि.

69 T_1 missing (cf. v.l. 60). K_2 G_1 om. 69 (cf. v.l. 68); K_1 om. (hapl.) 69–70. — ^{a}) K_4 D_1 T_2 $G_{2.4}$ M तथैव; Dc D_5 तथेमं. K_4 सर्वदा (for मनुजाः). — ^{b}) B_1 परंतप (for प्रियं तव). — ^{c}) B_2 [अ]नुमानेन; D_1 तु भावेन (for [अ]नुभावेन). — ^{d}) $=67^{d}$. T_2 G_2 सापत्न्यं; G_4 सापत्यं.

70 T_1 missing (cf. v.l. 60). $K_{1.2}$ om. 70 (cf. v.l. 68, 69). — ^{b}) B_{1-3} Dn $D_{4.6}$ G_3 °पासते (for °पाश्रिताः). — ^{c}) D_5 T_2 $G_{1.2.4}$ M तमर्जुनं कथं त्यक्त्वा (D_5 हित्वा). — After 70, T_2 $G_{1.2.4}$ M ins. 1386*.

71 T_1 missing (cf. v.l. 60). — After the ref., $B_{2.4}$ Dc Dn $D_{2.4.6}$ G_3 ins.:

1385* धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मं न त्यजामि मा नो धर्मो हतो वधीत् ।
[=(var.) Manu. 8. 15.]

— ^{a}) $=55^{a}$. T_2 $G_{1.2.4}$ M परं धर्मात् (for परो धर्मः). — ^{b}) K_{1-3} B_4 $D_{1.5}$ परमार्थश्च (D_5 °र्थः स); T_2 $G_{2.4}$ °र्थं च. K_3 D_5 मतः; T_2 $G_{1.2.4}$ M प्रियम् (for मतम्). — $71^{d}=72^{d}, 73^{d}$.

72 T_1 missing (cf. v.l. 60). K_4 D_1 om. (hapl.) 72. — ^{a}) T_2 $G_{2.4}$ सदाचार (for सदा राजा). — $B_{2.4}$ Dc Dn $D_{2.4.6}$ ins. after 72: T_2 $G_{1.2.4}$ M, after 70:

1386* कुन्ती चैव तु माद्री च द्वे भार्ये तु पितुर्मम ।
उभे सपुत्रे स्यातां वै इति मे धीयते मतिः ।

[Before line 1, $G_{1.2.4}$ M_1 ins. युधिष्ठिरः. — (L. 1) B_4 T_2 $G_{1.2.4}$ M च यक्ष (for चैव तु). T_2 $G_{1.2.4}$ M पांडोर्भार्ये उभे अपि (for the posterior half). — (L. 2) T_2 $G_{1.2.4}$ M माद्र्यास्तु नकुलो जीवेत्कुन्त्या जीवामि चाप्यहं.]

73 T_1 missing (cf. v.l. 60). K_2 om. (hapl.) 73. — ^{b}) D_1 न विशेषोस्ति (by transp.); M विशेषं नास्ति. $G_{2.4}$ [ऽ]नयोः (for तयोः). — T_2 G_4 om. 73^{cd}.

74 T_1 missing (cf. v.l. 60). — ^{a}) T_2 $G_{1.2.4}$ M यस्मात् (for यस्य). T_2 $G_{2.4}$ पार्थ (for ऽर्थाच्च). T_2 $G_{1.2.4}$ M धर्माच्च (for कामा°).

Colophon. D_3 T_1 missing. — *Major parvan*: $K_{1.2}$ Dn_2 $G_{2.4}$ आरण्य. — *Sub-parvan*: K_3 $D_{1.5}$ आरणेय; $B_{1.3.4}$ अरणीय; B_2 Dn D_6 G_3 अ(Dn_1 आ)रणीहरण; Dc D_4 आरणीय; D_2 corrupt; M_1 अरणि. — *Adhy. name*: T_2 G_2 यक्षप्रश्ने यक्षप्रसादः; G_1 यक्षप्रश्नः. — *Adhy. no.* (figures, words or both): Dn_1 (marg.). n_2 311; Dn_3 312; D_1 314; T_2 31 (for 301); G_1 129 (wrongly for 298); G_2 300; G_4 $M_{1.2}$ (*inf. lin.*) 301 (M_2 orig. 303). — *Śloka no.*: Dn_1 26(? for 126); Dn_2. n_3 D_2 (*sec. m.*) 131; D_1 74.

298

☞ In D_3, this adhy. is lost on missing fol. (cf. v.l. 3. 287. 10); T_1 leaves a lacuna in its place; the MSS. are mostly ignored here.

1 ^{b}) $K_{2.3}$ उदतिष्ठंति. — ^{c}) T_2 $G_{2.4}$ क्षुत्पिपासा

२९८

C. 3. 17419
B. 3. 314. 1
K. 3. 315. 1

वैशंपायन उवाच ।

ततस्ते यक्षवचनादुदतिष्ठन्त पाण्डवाः ।
क्षुत्पिपासे च सर्वेषां क्षणे तस्मिन्व्यगच्छताम् ॥ १

युधिष्ठिर उवाच ।

सरस्येकेन पादेन तिष्ठन्तमपराजितम् ।
पृच्छामि को भवान्देवो न मे यक्षो मतो भवान् ॥ २
वसूनां वा भवानेको रुद्राणामथ वा भवान् ।
अथ वा मरुतां श्रेष्ठो वज्री वा त्रिदशेश्वरः ॥ ३
मम हि भ्रातर इमे सहस्रशतयोधिनः ।
न तं योगं प्रपश्यामि येन स्युर्विनिपातिताः ॥ ४
सुखं प्रतिविबुद्धानामिन्द्रियाण्युपलक्षये ।
स भवान्सुहृदस्माकमथ वा नः पिता भवान् ॥ ५

यक्ष उवाच ।

अहं ते जनकस्तात धर्मो मृदुपराक्रम ।
त्वां दिदृक्षुरनुप्राप्तो विद्धि मां भरतर्षभ ॥ ६
यशः सत्यं दमः शौचमार्जवं ह्रीरचापलम् ।
दानं तपो ब्रह्मचर्यमित्येतास्तनवो मम ॥ ७
अहिंसा समता शान्तिस्तपः शौचममत्सरः ।
द्वाराण्येतानि मे विद्धि प्रियो ह्यसि सदा मम ॥ ८
दिष्ट्या पञ्चसु रक्तोऽसि दिष्ट्या ते षट्पदी जिता ।
द्वे पूर्वे मध्यमे द्वे च द्वे चान्ते सांपरायिके ॥ ९
धर्मोऽहमस्मि भद्रं ते जिज्ञासुस्त्वामिहागतः ।
आनृशंस्येन तुष्टोऽस्मि वरं दास्यामि तेऽनघ ॥ १०
वरं वृणीष्व राजेन्द्र दाता ह्यस्मि तवानघ ।

(see below). — ^{d}) K_{2} विगच्छतां; K_{4} D_{5} अगच्छतां; G_{1} अनश्यतां (for व्यगच्छताम्). B_{2} Dn $D_{1.4.6}$ G_{3} क्षणेन व्यपगच्छतां; T_{2} $G_{2.4}$ तत्क्षणादेव हन्यंते (see above).

2 ^{b}) T_{2} G_{3} तिष्ठंस्त्वाम् (for तिष्ठन्तम्). — ^{d}) $K_{1.2}$ भवान्मतः (by transp.).

3 T_{2} $G_{2.4}$ M_{1} om. (hapl.) 3^{ab}; M_{2} damaged. — ^{c}) G_{1} एको (for श्रेष्ठो). Dc D_{2} मरुतां चाथ वा श्रेष्ठो. — ^{d}) K_{4} D_{1} यदि (for वज्री). K_{4} त्रिदिवे° (for त्रिदशे°).

4 ^{ab}) M_{2} damaged. K_{4} वा (for हि). K_{4} D_{1} केन (for इमे). — ^{c}) $B_{1.4}$ न तं योधं; $B_{2.3}$ Dn $D_{4.6}$ G_{3} तं योधं न; T_{2} $G_{2.4}$ न ते योधान् (for न तं योगं). — ^{d}) B Dn $D_{2.4.6}$ G_{3} येन सर्वे निपातिताः.

5 ^{a}) K_{1-3} $G_{2.4}$ M सुख- (for सुखं). $K_{1.2}$ $B_{1.2.4}$ Dn $D_{4.6}$ G_{3} प्रतिप्र°; T_{2} विप्रति° (for प्रतिवि°). D_{1} सुसुखं प्रतिबुद्धानाम्. — B_{2} om. 5^{cd}. — ^{c}) K_{2} D_{5} भवान्वै; K_{3} भगवान् (for स भवान्). $B_{1.3}$ Dn $D_{2.4.6}$ G_{3} सुहृदोस्माकम्.

6 K $D_{1.5}$ धर्मः (K_{2} श्रीधर्मः) (for यक्षः). — ^{b}) K Dc $D_{1.2.5}$ धर्मो वीर ($K_{1.2}$ D_{1} °रः) सनातनः (D_{2} °तन); M धर्मोमितपराक्रम (M_{1} °मः). — ^{c}) G_{1} इह (for अनु-). K D_{5} °क्षुमनुप्राप्तं. — ^{d}) T_{2} $G_{1.2.4}$ M तद्विद्धि (for विद्धि मां). K_{2} Dc भरतर्षभः; G_{2} पुरुषर्षभ.

7 ^{a}) B_{3} transp. सत्यं and शौचं. K_{3} D_{5} M तपः (for दमः). — ^{b}) K Cnp (!) मार्दवं (for आर्जवं). B_{2} श्रीर् (m ह्रीर् as in text). — ^{c}) K_{3} T_{2} $G_{2.4}$ M दमो (for तपो). — ^{d}) Dc D_{2} G_{1} [ए]ते (for [ए]तास्). B_{2} G_{1} तनया (for तनवो).

8 ^{a}) B_{3} T_{2} $G_{1.2.4}$ M अहिंसा संयमः क्षांतिस् (B_{3} शांतिस्). — ^{b}) M_{1} आनृशंस्यम् (for तपः शौचम्). $K_{1.2}$ अमत्सरं. — ^{c}) T_{2} $G_{2.4}$ दारान् (for द्वाराणि). — ^{d}) B_{4} [ऽ]सि त्वं (for ह्यसि). T_{2} $G_{2.4}$ सुतो (for सदा).

9 ^{a}) $K_{1.2}$ [अ]रक्तो° (for रक्तो°). — ^{b}) D_{5} [ई]क्षिता (m जिता as in text). D_{1} दिष्ट्या तेऽद्य जीविता; G_{1} दिष्ट्या तेषां प्रतिष्ठिताः. — D_{1} om. 9^{cd}. — ^{c}) T_{2} $G_{1.2.4}$ द्वे चान्ये; K_{3} M चोभे (for द्वे च). — ^{d}) K_{1} T_{2} $G_{1.2.4}$ द्वे चान्ये; K_{3} M_{1} द्वे चांत्ये (for द्वे चान्ते).

10 ^{a}) B Dn $D_{4.6}$ G_{3} इति; D_{5} वत्स (for अस्मि). T_{2} $G_{1.2.4}$ अहं प्रीतोस्मि भद्रं ते. — ^{b}) K_{4} अहं गतः; G_{1} उपागतः (for इहा°). — ^{c}) M_{1} [ऽ]हं (for ऽस्मि). — ^{d}) KD_{1} वरान् (for वरं). — After 10, K_{4} ins. (a gloss on the word षट्पदी of stanza 9):

1387* कामक्रोधौ तु प्रथमौ लोभमोहौ तु मध्यमौ ।
अन्ते भयविषादौ च एषा सा षट्पदी स्मृता ।

11 $K_{1.2}$ B_{2} om. (hapl.) 11^{ab}. — ^{a}) $K_{3.4}$ Dc $D_{2.5}$ M वरान् (for वरं). — ^{b}) K_{4} दातास्मि तव चानघ; D_{1} ददामि च तवा°; G_{1} दातास्मि हि तवा°. — ^{c}) M मां

ये हि मे पुरुषा भक्ता न तेषामस्ति दुर्गतिः ॥ ११

युधिष्ठिर उवाच ।

अरणीसहितं यस्य मृग आदाय गच्छति ।
तस्याग्नयो न लुप्येरन्प्रथमोऽस्तु वरो मम ॥ १२

धर्म उवाच ।

अरणीसहितं तस्य ब्राह्मणस्य हृतं मया ।
मृगवेषेण कौन्तेय जिज्ञासार्थं तत्र प्रभो ॥ १३

वैशंपायन उवाच ।

ददानीत्येव भगवानुत्तरं प्रत्यपद्यत ।
अन्यं वरय भद्रं ते वरं त्वममरोपम ॥ १४

युधिष्ठिर उवाच ।

वर्षाणि द्वादशारण्ये त्रयोदशमुपस्थितम् ।
तत्र नो नाभिजानीयुर्वसतो मनुजाः क्वचित् ॥ १५

वैशंपायन उवाच ।

दादानीत्येव भगवानुत्तरं प्रत्यपद्यत ।
भूयश्चाश्वासयामास कौन्तेयं सत्यविक्रमम् ॥ १६
यद्यपि स्वेन रूपेण चरिष्यथ महीमिमाम् ।
न वो विज्ञास्यते कश्चित् त्रिषु लोकेषु भारत ॥ १७
वर्षं त्रयोदशं चेदं मत्प्रसादात्कुरूद्वहाः ।
विराटनगरे गूढा अविज्ञाताश्चरिष्यथ ॥ १८
यद्वः संकल्पितं रूपं मनसा यस्य यादृशम् ।
तादृशं तादृशं सर्वे छन्दतो धारयिष्यथ ॥ १९
अरणीसहितं चेदं ब्राह्मणाय प्रयच्छत ।
जिज्ञासार्थं मया ह्येतदाहृतं मृगरूपिणा ॥ २०
तृतीयं गृह्यतां पुत्र वरमप्रतिमं महत् ।
त्वं हि मत्प्रभवो राजन्विदुरश्च ममांशभाक् ॥ २१

C. 3. 17440
B. 3. 314. 22
K. 3. 315. 22

(for मे). G_1 सक्ता (for भक्ता). — ^{d}) D_5 अपि (for अस्ति).

12 ^{a}) =(var.) 13^{a}. T_2 $G_{1.2.4}$ M तु हृता (for °सहितं). — $K_{1.2}$ om. (hapl.) 12^{b}–13^{a}. — ^{b}) K_3 B Dn $D_{4.6}$ G_3 मृगो ह्यादाय गच्छति; T_2 $G_{2.4}$ तां वृणे वदतां वर; G_1 M मृगेण तप(G_1 दद)तां वर.

13 $K_{1.2}$ om. 13^{a} with the ref. (cf. v.l. 12). — D_5 om. 13–14. $B_{1.2}$ Dn $D_{2.4.6}$ G_3 यक्षः (for धर्मः). — ^{a}) =(var.) 12^{a}. K_4 B_2 Dn $D_{1.4.6}$ G_3 ह्यस्य (for तस्य). T_2 $G_{1.2.4}$ M आरणेयमिदं तस्य. — ^{c}) $K_{1.2}$ $B_{3.4}$ मृगवेशेन; B_2 T_2 $G_{1.2.4}$ M °रूपेण. — ^{d}) T_2 $G_{1.2.4}$ [अ]नघ (for प्रभो).

14 D_5 om. 14 (cf. v.l. 13). — $14^{ab}=16^{ab}$. — ^{a}) K_4 D_1 T_2 G_4 ददामी° (for ददानी°). — ^{b}) K_3 Dc D_2 प्रत्यभाषत. — K_3 om. (hapl.) 14^{c}–16^{b}. — ^{d}) T_2 $G_{2.4}$ देयं (for वरं). M °त्तम (for °पम).

15 K_3 om. 15 (cf. v.l. 14). — ^{c}) D_1 T_2 $G_{1.2.4}$ M तच्च (for तत्र). D_5 T_2 $G_{2.4}$ ते (G_2 नो) न वि° (for नो नाभि°). — ^{d}) $G_{1.2.4}$ सर्वतो (for वसतो).

16 K_3 om. 16^{ab} (cf. v.l. 14). — $16^{ab}=14^{ab}$. — ^{a}) K_4 D_1 T_2 ददामी°. — ^{b}) K_4 Dc_2 $D_{1.2}$ प्रत्यभाषत. — Dc_1 om. 16^{cd}. — ^{cd}) T_2 $G_{2.4}$ भूयश्चापि हि कौंतेयमवदत्सत्य°.

17 Before 17, K_4 Dc $D_{1.2}$ M_1 ins. धर्म उ° (resp. धर्मः). — ^{b}) T_2 $G_{2.4}$ M_2 चरिष्यसि (for °थ). — ^{c}) T_2 $G_{2.4}$ च (for वो). — ^{d}) G_1 मानवः (for भारत).

18 ^{a}) K चेमं; B Dn $D_{4.6}$ G_3 इदं (B_3 °मं); T_2 $G_{1.2.4}$ चैव; M चतन् (for चेदं). — ^{b}) D_5 T_2 $G_{2.4}$ °त्कुरूद्वह. — ^{c}) K_4 $G_{2.4}$ रूढा (for गूढा). — ^{d}) $G_{2.4}$ M अज्ञाता विचरि°.

19 ^{a}) T_2 $G_{1.2.4}$ M_2 यद्वा (for यद्वः). — ^{b}) T_2 $G_{2.4}$ यस्य वै; G_1 M यस्य यत् (for यादृशम्). — ^{c}) Dc D_2 भ्रातॄणां (D_2 marg. *sec. m.* as in text) (for the *first* तादृशं). Dc D_2 (marg. *sec. m.* as in text) T_2 $G_{1.2.4}$ रूपं (for सर्वे). — ^{d}) $K_{1.3}$ छद्मतो; T_2 छद्मं वै; G_1 तत्तथा; $G_{2.4}$ छद्मं वो.

20 ^{a}) T_2 $G_{1.2.4}$ M भांडं (for चेदं). — ^{b}) $K_{2.3}$ D_5 ब्राह्मणस्य. K_3 प्रयच्छति; Dc_2 °तु; D_5 G_1 M_1 °थ (for °त). — ^{cd}) B_2 तात गृहीतं (for ह्येतदाहृतं). — After 20, $B_{1.3.4}$ Dc Dn $D_{2.4.6}$ G_3 ins.:

1388* प्रवृणीष्वापरं सौम्य वरमिष्टं ददानि ते ।
न तृप्यामि नरश्रेष्ठ प्रयच्छन्वै वरांस्तव ।

21 ^{a}) D_1 उच्यतां (for गृह्यतां). T_2 $G_{1.2.4}$ M तृती($G_{2.4}$ द्वती)यं च गृहाण त्वं. — ^{b}) T_2 $G_{2.4}$ वरं मत्प्रभवं; G_1 परमं प्रीतिदं. K Dc $D_{1.2.5}$ भुवि (for महत्). — ^{c}) B_4 मत्संभवो (for मत्प्र°). — ^{d}) B Dn $D_{4.6}$ G_3 ममांशजः; D_1 °कः (for °भाक्).

22 ^{a}) K_4 देवरूपो; T_2 $G_{2.4}$ देवदेव. — ^{b}) K_4

C. 3. 17441
B. 3. 314. 23
K. 3. 315. 23

युधिष्ठिर उवाच ।

देवदेवो मया दृष्टो भवान्साक्षात्सनातनः ।
यं ददासि वरं तुष्टस्तं ग्रहीष्याम्यहं पितः ॥ २२
जयेयं लोभमोहौ च क्रोधं चाहं सदा विभो ।
दाने तपसि सत्ये च मनो मे सततं भवेत् ॥ २३

धर्म उवाच ।

उपपन्नो गुणैः सर्वैः स्वभावेनासि पाण्डव ।
भवान्धर्मः पुनश्चैव यथोक्तं ते भविष्यति ॥ २४

वैशंपायन उवाच ।

इत्युक्त्वान्तर्दधे धर्मो भगवाँल्लोकभावनः ।
समेताः पाण्डवाश्चैव सुखसुप्ता मनस्विनः ॥ २५
अभ्येत्य चाश्रमं वीराः सर्व एव गतक्लमाः ।
आरणेयं ददुस्तस्मै ब्राह्मणाय तपस्विने ॥ २६

इदं समुत्थानसमागमं मह-
तिपतुश्च पुत्रस्य च कीर्तिवर्धनम् ।
पठन्नरः स्याद्विजितेन्द्रियो वशी
सपुत्रपौत्रः शतवर्षभाग्भवेत् ॥ २७

न चाप्यधर्मे न सुहृद्विभेदने
परस्वहारे परदारमर्शने ।
कदर्यभावे न रमेन्मनः सदा
नृणां सदाख्यानमिदं विजानताम् ॥ २८

इति श्रीमहाभारते आरण्यकपर्वणि अष्टनवत्यधिकद्विशततमोऽध्यायः ॥ २९८ ॥

साक्षी (for साक्षात्). — ^{c}) K_3 Dc_2 $D_{1.5}$ G_1 यद् (for यं). K Dc $D_{1.2}$ (before corr.)$_{.5}$ मह्यं; $B_{3.4}$ G_1 M हृष्टस् (for तुष्टस्). T_2 $G_{2.4}$ यं यं वरं ददौ हृष्टस्. — ^{d}) $K_{3.4}$ Dc $D_{1.5}$ G_1 तद् (for तं). A few MSS. गृहीष्यामि. K_1 ततः; K_3 D_5 T_2 G_4 पितुः (for पितः).

23 ^{a}) K_3 Dc D_2 त्यजे° (for जये°). — ^{b}) K Dc $D_{1.2.5}$ कामं क्रोधं; T_2 $G_{2.4}$ क्रोधं चैव; G_1 क्रोधं पापं (for क्रोधं चाहं). — ^{c}) K_4 D_1 धर्मे (for दाने).

24 ^{a}) =(var.) 3. 50. 1^{c}. B Dn $D_{4.6}$ G_3 एतैः (for सर्वैः). — ^{b}) T_2 $G_{1.3.4}$ M [ए]व (for [अ]सि). — ^{c}) K_1 धर्मे; $K_{2.3}$ D_1 धर्मी; Dc धर्मं (for धर्मः). T_2 $G_{1.3.4}$ M धर्मपरश्च (for धर्मः पुनश्च). $K_{1.2}$ B_3 Dc D_5 M चैतद्; T_2 $G_{2.4}$ चैको (for चैव). — ^{d}) G_1 तद् (for ते).

25 In B_1, the portion of the text from 25^{a} up to 3. 299. 26^{b} is lost on a missing fol. — ^{a}) K_4 D_1 [अं]तर्हितो (for °र्दधे). — ^{d}) K D_1 सुखमाप्ता (K_1 marg. *sec. m.* °युक्ताः; K_4 सुखं प्राप्ता); Dc D_2 मुदमाप्ता; D_5 सुखसुप्त्वा (for °सुप्ता).

26 B_1 missing (cf. v.l. 25). — ^{a}) B_{2-4} Dn $D_{4.6}$ G_3 उपेत्य (for अभ्येत्य). — ^{b}) K_3 D_1 गतज्वराः. K_4 सर्वे ह्यमिततेजसः. — ^{c}) K_4 अरणिं प्रददौ तस्मै. — ^{d}) K_4 D_1 मनस्विने; G_1 महात्मने (for तप°).

27 B_1 missing (cf. v.l. 25). — ^{a}) K_2 इत्थं; M इमं (for इदं). B_{2-4} Dn $D_{4.6}$ T_2 $G_{2.3}$ °गतं (for °गमं). — ^{b}) T_2 G_1 (by corr.)$_{.2.4}$ M_1 पुण्य(M_1 धर्म)कीर्तनं (for कीर्ति°). — ^{c}) K_3 M पठेन् (for पठन्). — ^{d}) K_3 °भुक् (for °भाग्). K $B_{3.4}$ Dc $D_{1.2.5}$ तथा (for भवेत्).

28 B_1 missing (cf. v.l. 25). M_2 om. 28. — ^{a}) D_5 [अ]धर्मश्च (for [अ]धर्मे न). $K_{1.2}$ °रोधने; G_1 °योजने (for °भेदने). — ^{b}) K B_4 $D_{1.5}$ °धर्षणे; B_3 Dc Dn $D_{2.4.6}$ °मर्षणे; T_2 G_3 °दर्शने (for °मर्शने). — ^{c}) K_2 Dc_2 कंदर्प°; T_2 $G_{1.3.4}$ M_1 अकार्य° (for कदर्य°). $K_{1.2}$ B_2 Dn_2. n_3 D_4 $G_{1.3}$ M_1 च (for न). $K_{1.2}$ $G_{2.4}$ भवेन् (for रमेन्). — ^{d}) $B_{3.4}$ इहा° (for सदा°). K_{1-3} Dc $D_{2.5}$ नृणां महाख्यानमिहोपजीवतां (K_2 °जीवितां; K_3 °जीवितं; D_2 °जीवतं; D_5 °जीवनं); K_4 नृणां महाख्यानपदोपजीवनात्; D_1 M_1 नृणां महाख्यानमिदं हि शृण्वतां; T_2 $G_{2.4}$ नृणां वराख्यानवरं च शृण्वतां; G_1 नृणां सदाख्यानरत्नं च शृण्वतां.

Colophon. B_1 D_3 T_1 missing. — *Major parvan:* $K_{1.2}$ Dn_1. n_2 T_2 $G_{1.2.4}$ M आरण्य ($G_{1.2}$ M °ण्यक also). — *Sub-parvan:* $K_{1.3}$ B_4 $D_{1.5}$ आरणेय; B_2 Dn $D_{4.6}$ G_3 अरणीहरण; B_3 Dc D_2 आरणीय; M_1 अरणि. $K_{1.3}$ B_4 $D_{1.5}$ read समाप्त after sub-parvan name; G_2 M read it after major parvan. — *Adhy. name:* T_2 $G_{2.4}$ युधिष्ठिरवरलाभः; M वरप्रदानः. — *Adhy. no.* (figures, words or both): Dn_1 (marg.). n_2 (in figure) 312 (Dn_2 in words 300); Dn_3 313; D_1 315; T_2 G_4 M_1 302; G_1 130 (wrongly for 299); G_2 301; M_2 (wrongly) 334. — *Śloka no.:* Dn 29; D_1 28.

२९९

वैशंपायन उवाच ।
धर्मेण तेऽभ्यनुज्ञाताः पाण्डवाः सत्यविक्रमाः ।
अज्ञातवासं वत्स्यन्तश्छन्ना वर्षं त्रयोदशम् ।
अपि चान्याश्च शत्रुघ्न तव पित्रा विसर्जिताः ।
ततः शक्रेण संदिष्टश्चित्रसेनो ममान्तिकम् ।
प्राप्तः कमलपत्राक्ष स च मामब्रवीदथ ।
त्वत्कृतेऽहं सुरेशेन प्रेषितो वरवर्णिनि ।
प्रियं कुरु महेन्द्रस्य मम चैवात्मनश्च ह ।
शक्रतुल्यं रणे शूरं रूपौदार्यगुणान्वितम् ।
पार्थं प्रार्थय सुश्रोणि त्वमित्येवं तदाब्रवीत् ।
ततोऽहं समनुज्ञाता तेन पित्रा च तेऽनघ ।
तवान्तिकमनुप्राप्ता शुश्रूषितुमरिंदम ।
त्वद्गुणाकृष्टचित्ताहमनङ्गवशमागता ।
चिराभिलषितो वीर ममाप्येष मनोरथः ।
वैशंपायन उवाच ।
तां तथा ब्रुवतीं श्रुत्वा भृशं लज्जावृतोऽर्जुनः ।
उवाच कर्णौ हस्ताभ्यां पिधाय त्रिदशालये ।
दुःश्रुतं मेऽस्तु सुभगे यन्मां वदसि भाविनि ।
गुरुदारैः समाना मे निश्चयेन वरानने ।
यथा कुन्ती महाभागा यथेन्द्राणी शची मम ।
तथा त्वमपि कल्याणी नात्र कार्या विचारणा ।
यच्चेक्षितासि विस्पष्टं विशेषेण मया शुभे ।
तच्च कारणपूर्वं हि शृणु सत्यं शुचिस्मिते ।
इयं पौरववंशस्य जननी मुदितेति ह ।
त्वामहं दृष्टवांस्तत्र विज्ञायोत्फुल्ललोचनः ।
न मामर्हसि कल्याणि अन्यथा ध्यातुमप्सरः ।
गुरोर्गुरुतरी मे त्वं मम वंशविवर्धिनी ।
उर्वश्युवाच ।
अनावृताश्च सर्वाः स्म देवराजाभिनन्दन ।
गुरुस्थाने न मां वीर नियोक्तुं त्वमिहार्हसि ।
पूरोर्वंशे हि ये पुत्रा नप्तारो वा त्विहागताः ।

गते; D_2 तत्र चोपगते (for तत्र चावभृथे). — (L. 93) K_4 D_2 स्वान् स्वान् निलयान् (D_2 लीलया) सुराः; S (G_1 damaged) गताः स्वनिलयान् (T_1 °यं) सुराः. — (L. 94) K_2 B_1 Dn D_4 विशिष्टाः (for विसृष्टाः). K_4 Dc $D_{1-3.5}$ स्वान्गृहान्; S निलयं (for स्वगृहं). Dc $D_{1.5}$ तथा; T_1 सुराः (for गताः). — (L. 95) Dc $D_{1.5}$ एताश्; S अहं (for अपि). B_1 D_5 विवर्जिताः (for विस°). — (L. 96) D_3 निर्दि° (for संदि°). — (L. 97) K_4 $D_{2.3}$ S (G_1 damaged) स्वयं; B_2 इदं (for अथ). Dc $D_{1.5}$ मामेवं स्वयमब्रवीत् (for the posterior half). — (L. 98) Dc त्वत्कृतेन (for °तेऽहं). D_3 सुरेंद्रेण. $D_{1.2}$ G_4 M_2 प्रेषिता (for °तो). $D_{1.2}$ $G_{3.4}$ वरवर्णिनी. — (L. 99) D_2 सुरेशस्य (for महेन्द्रस्य). D_3 °त्मनस्तथा; D_5 °त्मना सह (for °त्मनश्च ह). — (L. 100) Dc $D_{1.3}$ वीरं (for शूरं). K_2 B Dn $D_{4.6}$ G_1 सदौ° (for रूपौ°). — (L. 101) Dc $D_{1.4.5}$ त्वमित्येव. Dc च सो; D_2 S स मा; D_5 वचो (for तदा). D_3 (corrupt) त्वमेनं समुनोदितं. — (L. 102) Dc D_1 तथा (for ततो). T_1 $G_{1.2}$ M प्रीता (for पित्रा). M_3 तवांतिकं (for च तेऽनघ). D_3 तव पित्रा च तेन च (for the posterior half). — (L. 103) M_3 अनुप्राप्ता महाबाहो (for the prior half). — (L. 104) K_4 D_2 S न केवलं हि शक्रेण प्रेषिता चाह(K_4 D_2 संदिष्टेत्यह)मागता; D_3 त्वत्संनिधानं शक्रस्य संदेशादहमागता. — (L. 106) D_3 वदतीं (for ब्रुवतीं). K_4 D_2 S °न्वितो (for °वृतो). — (L. 107) K_4 D_2 transp. उवाच and पिधाय. K_4 B_4 $D_{2.3}$ S त्रिदशोपमः (for °शालये). — (L. 108) S अश्रुतं (for दुःश्रुतं). Dc_1 $D_{2.3.5}$ ते (for मे). Dc_2 D_1 तेषु (for मेऽस्तु). K_4 यथा; G_2 M यन्मा (for यन्मां). K_4 Dc_2 $D_{1-3.5.6}$ T_1 $G_{1.2}$ M भामिनि (for भाविनि). — (L. 109) Dc Dn_3 $D_{1.5}$ त्वं; S हि (T_1 -सि; M_1 -सि also) (for मे). K_4 D_2 नित्यमेव; Dc $D_{1.5}$ नित्यमेषा; D_3 बिभेम्येषा; S नित्यं मेसि (T_1 मे हि) (for निश्चयेन). Dc $D_{1.5}$ मतिर्मम; D_3 वरांगने (for वरा°). — K_4 B_{1-3} D_2 S om. lines 110–111. — (L. 110) D_5 reads line 110 in marg. $D_{3.5}$ यथा कुंती च माद्री च तथा त्वमपि भामिनि. — (L. 111) Dc Dn $D_{1.4.6}$ कल्याणि (for °णी). — (L. 112) Dc $D_{1.5}$ यद्वीक्षि°; T_2 G_{2-4} यत्प्रेक्षि° (for यच्चेक्षि°). D_3 सुभगे (for विस्पष्टं). K_4 तवाशुभे (m मया शुभे as above). — (L. 113) K_4 त्वं तच्च कारणं सर्वं; Dc $D_{1.2.5}$ T G तच्च मे कारणं पूर्वं (D_2 T G सर्वं); D_3 M तत्र (M_1 तस्य) मे कारणं सर्वं (for the prior half). K_4 $D_{2.3}$ S शृणु सत्येन सुस्मिते (D_3 सुव्रते). — (L. 114) D_3 इह (for इयं). K_2 D_3 जननीमुचितेति ह (D_3 °न हि); K_4 °नी मुदितेन ह; $B_{2.3}$ Dc D_5 °नी विदितेति ह; $D_{1.2}$ °नी मुदितोभवं; S °नी सुदतीति ह (T_1 °नीति सुनीति हि) (for the posterior half). — (L. 115) K_4 $D_{2.3}$ S विस्मयो°; D_5 विज्ञानो° (for विज्ञायो°). — (L. 116) T_2 $G_{2.3}$ सुश्रोणि (for कल्याणि). K_2 $D_{5.6}$ मंतुम्; K_4 B_3 Dc Dn_2 D_{1-3} S गंतुम्; D_4 मातुम् (for ध्यातुम्). K_4 $D_{1.2}$ अप्सरे; D_3 उत्सहे; S अंगने (for अप्सरः). — (L. 117) K_2 Dc_2 Dn गुरुतरा. $D_{2.3}$ T $G_{1.3.4}$ M त्वं मे (by transp.). Dn_1 सा मे (for मम). K_2 Dn_2. n_3 मम त्वं वंशवर्धिनी; $B_{1.2.4}$ $D_{2.3.6}$ T G_{2-4} M_2 मम वंशविवर्धनी. — (L. 118) K_4 च ताः सर्वाः; S वयं सर्वा (for च सर्वाः स्म). K_4 $D_{2.5}$ देवराज्ञा वरानन; Dc D_1 °राजं (D_1 °राज-) वरानने; D_2 °राजानुगानघ; T G °वार(T_1 °वारा)-वरांगनाः; M °वारा वरानन (for the posterior half). — (L. 119) T_2 $G_{1.3}$ ना (for मां). — (L. 120) B

तपसा रमयन्त्यस्माश्च च तेषां व्यतिक्रमः ।
तत्प्रसीद न मामार्तां विसर्जयितुमर्हसि ।
हृच्छयेन च संतप्तां भक्तां च भज मानद ।
अर्जुन उवाच ।
शृणु सत्यं वरारोहे यत्त्वां वक्ष्याम्यनिन्दिते ।
शृण्वन्तु मे दिशश्चैव विदिशश्च सदेवताः । [125]
यथा कुन्ती च माद्री च शची चैव ममानघे ।
तथा स्ववंशजननी त्वं हि मेऽद्य गरीयसी ।
गच्छ मूर्ध्ना प्रपन्नोऽस्मि पादौ ते वरवर्णिनि ।
त्वं हि मे मातृवत्पूज्या रक्ष्योऽहं पुत्रवत्त्वया ।
वैशंपायन उवाच ।
एवमुक्ता तु पार्थेन उर्वशी क्रोधमूर्छिता । [130]
वेपन्ती भ्रुकुटीवक्त्रा शशापाथ धनंजयम् ।
उर्वश्युवाच ।
तव पित्राभ्यनुज्ञातां स्वयं च गृहमागताम् ।
यस्मान्मां नाभिनन्देथाः कामबाणवशं गताम् ।
तस्मात्त्वं नर्तनः पार्थ स्त्रीमध्ये मानवर्जितः ।
अपुमानिति विख्यातः षण्ढवद्विचरिष्यसि । [135]
वैशंपायन उवाच ।
एवं दत्त्वार्जुने शापं स्फुरदोष्ठी श्वसन्त्यथ ।
पुनः प्रत्यागता क्षिप्रमुर्वशी गृहमात्मनः ।
ततोऽर्जुनस्त्वरमाणश्चित्रसेनमरिंदमः ।
संप्राप्य रजनीवृत्तं तदुर्वश्या यथा तथा ।
निवेदयामास तदा चित्रसेनाय पाण्डवः । [140]
तत्र चैवं यथावृत्तं शापं चैव पुनः पुनः ।
न्यवेदयच्च शक्रस्य चित्रसेनोऽपि सर्वशः ।
तत आनाय्य तनयं विविक्ते हरिवाहनः ।
सान्त्वयित्वा शुभैर्वाक्यैः स्मयमानोऽभ्यभाषत ।
सुपुत्राद्य पृथा तात त्वया पुत्रेण सत्तम । [145]
ऋषयोऽपि हि धैर्येण जिता वै ते महाभुज ।

Dc Dn_3 D_1 पुरोर् (for पू°). Dc D_1 च (for हि). K_4 D_2 पितरः कस्य पुत्राश्च ; D_3 पितरो वापि तनया ; S पितरः सोदराः पुत्रा (for the prior half). D_3 [ऽ]पि (for वा). D_1 M_2 इहागताः ; T G M_1 [आ]गता इह (for त्विहा°). — (L. 121) T_1 °यंति स्म (for °यन्त्यस्मान्). T_1 G_1 M न चास्त्ये(M_2 °स्त्वे)षां ; T_2 $G_{2.3}$ नैव तेषां ; G_4 न वै तेषां (for न च तेषां). — (L. 123) K_4 B_1 S संप्राप्तां (for संतप्तां). S (except G_4) मानघ (for °द). — (L. 124) T_1 यथा ; G_1 यद्वा ; G_2 M यत्त्वा (for यत्त्वां). — (L. 125) B_3 सदैवताः (for सदे°). — (L. 126) K_3 D_5 वेह ; K_4 B_{1-3} Dc Dn $D_{1.2}$ चेह (for चैव). S समा इह (for ममानघे). D_3 समानेति समासि मे (for the posterior half). — (L. 127) K_2 B Dn $D_{4.6}$ च ; T_1 त्वं (for स्व-). D_3 [ऽ]ति (for ऽद्य). — (L. 128) M_3 त्वत्पादौ (for पादौ ते). — (L. 129) K_4 पाल्या (for पूज्या). G_1 ईक्ष्यो ; a few MSS. रक्षो (for रक्ष्यो). — (L. 130) K_4 Dc $D_{2.3.6}$ S तथा(S °तो)वधूता पार्थेन (for the prior half). — T_2 G_3 om. lines 131–134. — (L. 131) K_4 चुकोप चोर्वशी राजन् ; B_3 Dc $D_{1-3.5}$ T_1 $G_{1.2.4}$ M वेपंती भ्रुकुटीं कृत्वा. K_4 शापो दत्तश्च दारुणः (for the posterior half). — (L. 132) K_4 om. line 132. $G_{3.4}$ चित्रसेना° (for तव पित्रा°). — (L. 133) T_1 $G_{2.4}$ M त्वं (for मां). D_3 °प्रपीडितां (for °वशं गताम्). K_4 भजंतीं मामनादृत्य न कृतं वचनं मम. — (L. 134) $B_{2.4}$ Dc D_5 T_1 $G_{1.3.4}$ नर्तकः (for °नः). — (L. 135) S अपुंस्त्वेन च (for अपुमानिति). A few MSS. षंट° or खंढ° (for षण्ढ°). — (L. 136) K_2 B D (except $D_{1-3.5}$) S (except M_1) om. the ref. (M_1 om. उवाच). K_4 D_2 S स्फुरितोष्ठी ; $B_{3.4}$ D_5 स्फुरदोष्ठा. K_2 श्वसत्यथ ; K_4 $D_{2.6}$ °सन्निव ; B_4 °सत्तथा ; Dc T G_3 M_1 °संत्यपि ; D_3 °सित्यलं ; $G_{1.2.4}$ M_2 श्वसत्यपि. — (L. 137) S शीघ्रम् (for क्षिप्रम्). K_4 D_{1-3} S स्वं निवेशनं (for गृहमा°). — K_4 B_3 D_{1-3} S subst. for lines 138–139 : D_5 ins. (the first line only) after 137 :

पार्थोऽपि लब्ध्वा तं शापं तां निशां दुःखितोऽवसत् ।
चिन्तयंश्चित्रसेनाय प्राप्तं सर्वमदृष्टवान् ।
ततः प्रभाते विमले गन्धर्वस्य यथातथम् ।

[(L. 1) T_2 G_{2-4} शापं तं (by transp.). G_1 [ऽ]भवत् (for ऽवसत्). B_3 तां निशां दुःखितो राजन्तदा पार्थस्तदावसत्. — (L. 2) B_3 M_2 om. line 2. T G विवक्षु° (for चिन्तयं°). M_2 विचित्रं चित्रसेनाय ; G_1 स चित्रवीर्यसेनाय (for the prior half). T G_{2-4} M_1 °महृष्टवत् ; G_1 °मदृष्टवत् (for °मदृष्टवान्).] — M_1 om. lines 138–141. — (L. 138) Dc त्वरायुक्तश (for त्वरमाणश्). B Dc $D_{5.6}$ चित्रसेनस्य मंदिरं (Dc °रे) (for the posterior half). — (L. 139) Dc D_5 उर्वश्याश्च (for तदुर्वश्या). B Dc D_6 यथातथं. — (L. 140) D_6 T_1 G M_2 चित्रसेनस्य. S (M_1 om.) फल्गुनः (for पाण्डवः). — (L. 141) K_4 B Dc $D_{1-3.5}$ S (M_1 om.) तत्र (T_1 यच्च ; T_2 $G_{1.2.4}$ M_2 तच्च) सर्वं ; $D_{4.6}$ चित्रसेनं (for तत्र चैवं). S (M_1 om.) यथातथं (for पुनः पुनः). D_3 शापस्येव तथा पुनः (for the posterior half). — (L. 142) K_2 Dn D_4 अवेदयच्च (K_2 °द्ध) ; K_4 निवे° ; Dc D_5 आवे° ; D_6 न्यवेदयत्स. — (L. 143) S तदा त्वानाय्य तनयं. — (L. 144) K_4 B_{2-4} शांत° (for सान्त्व°). — (L. 145) B_4 Dc Dn_2 D_5 सत्पुत्रा° (for सु°). Dc T_2 G_{2-4} transp. पृथा and त्वया. D_5 त्वया (for पृथा), and माता (for त्वया). K_4 $B_{1.3.4}$ $D_{1-3.5}$ S पुरुषसत्तम (G_1 [अ]द्य पुरुषर्षभ) ; Dc [अ]हं पुरुषोत्तमः (for पुत्रेण सत्तम). — (L. 146) D_3 damaged. S जिताश्चैते.

यत्तु दत्तवती शापमुर्वशी तव मानद ।
स चापि तेऽर्थकृत्तात साधकश्च भविष्यति ।
अज्ञातवासो वस्तव्यो युष्माभिर्भूतलेऽनघ ।
वर्षे त्रयोदशे वीर तत्र त्वं क्षपयिष्यसि । [150]
तेन नर्तनवेषेण अपुंस्त्वेन तथैव च ।
वर्षमेकं विहृत्यैव ततः पुंस्त्वमवाप्स्यसि ।
एवमुक्तस्तु शक्रेण फाल्गुनः परवीरहा ।
मुदं परमिकां लेभे न च शापं व्यचिन्तयत् ।
चित्रसेनेन सहितो गन्धर्वेण यशस्विना । [155]
रेमे स स्वर्गभवने पाण्डुपुत्रो धनंजयः ।
य इदं शृणुयान्नित्यं वृत्तं पाण्डुसुतस्य वै ।
न तस्य कामः कामेषु पापकेषु प्रवर्तते ।
इदममरवरात्मजस्य घोरं
शुचि चरितं विनिशम्य फाल्गुनस्य । [160]
व्यपगतमददम्भरागदोषा-
स्त्रिदिवगताभिरमन्ति मानवेन्द्राः ।

Colophon.

7

K_3 B (except B_1) D (except D_{1-3}) ins. after 3. 49. 24; K_1 (which om. 21–24) ins. after 3. 49. 20:

द्यूतप्रियेण राजेन्द्र कृतं तद्भवता तथा ।
प्रायेणाज्ञातचर्यायां वयं सर्वे निपातिताः ।
न तं देशं प्रपश्यामि यत्र सोऽस्मान्सुदुर्जनः ।
न विज्ञास्यति दुष्टात्मा चारैरिति सुयोधनः ।
अधिगम्य च सर्वान्नो वनवासमिमं ततः । [5]
प्रव्राजयिष्यति पुनर्निकृत्याधमपूरुषः ।
यद्यस्मानभिगच्छेत पापः स हि कथंचन ।
अज्ञातचर्यामुत्तीर्णान्दृष्ट्वा च पुनराह्वयेत् ।
द्यूतेन ते महाराज पुनर्द्यूतमवर्तत ।
भवांश्च पुनराहूतो द्यूतेनैवापनेष्यति । [10]
स तथाक्षेषु कुशलो निश्चितो गतचेतनः ।
चरिष्यसि महाराज वनेषु वसतीः पुनः ।
यद्यस्मान्सुमहाराज कृपणान्कर्तुमर्हसि ।
यावज्जीवमवेक्षस्व वेदधर्मांश्च कृत्स्नशः ।
निकृत्या निकृतिप्रज्ञा हन्तव्या इति निश्चयः । [15]
अनुज्ञातस्त्वया गत्वा यावच्छक्ति सुयोधनम् ।
यथैव कक्षमुत्सृष्टो दहेदनिलसारथिः ।
हनिष्यामि तथा मन्दमनुजानातु नो भवान् ।

T_1 °रथ (for °भुज). — (L. 147) K_4 D_{1-3} यच्च; S यं च (for यत्तु). — (L. 148) D_3 स चापि हि तथा काले (for the prior half). — (L. 149) K_2 B_2 Dn $D_{4.6}$ भवद्भिर् (for युष्माभिर्). D_3 किल (for ऽनघ). — (L. 150) K_2 B_1 Dn $D_{4.6}$ तं तत्र; B_3 $D_{1.3.5}$ तत्र तं (D_3 तद्) (for तत्र त्वं). $D_{2.3}$ क्षपयिष्यति; S गमयिष्यसि. — (L. 151) D_3 तत्र (for तेन). T_2 G नर्तक° (for नर्तन°). S अपुंस्कत्वेन (T_1 अप्यपुंस्त्वेन) चैव हि. — (L. 152) K_3 Dn G_4 °मेवं (for °मेकं). B_3 Dc_2 D_3 °त्वैवं (for °त्वैव). — (L. 153) Before line 153, K_4 Dc $D_{1-3.5}$ S ins. वैशं° उ° (S om. उ°). S अर्जुनः (for फाल्गुनः). — (L. 154) $D_{1.2}$ विचिंत°; S अचिंत° (for व्यचिन्त°). — (L. 156) S रतवान् (for रेमे स). K_4 $B_{1.3.4}$ Dc $D_{1-3.5}$ स्वर्गसदने; S शक्र(G_1 चित्र)सदने (for स्वर्गभवने). — (L. 157) K_2 Dn इदं यः (by transp.); $B_{1.4}$ $D_{1.2}$ T_2 G_1 य इमं; T_1 M य इमां. K_2 Dn वृत्तं नित्यं (by transp.); S नित्यं धृतिं. — (L. 158) K_4 D_2 पातकेषु; T_1 कामु° (for पाप°). D_3 पापेषु परिवर्तते. — Metre of final stanza: Puṣpitāgrā. — (L. 159) T_1 इयम् (for इदम्). S घोरां (for घोरं). — (L. 160) B_3 पांडवस्य (for फाल्गु°). K_3 Dc D_2 शुचि चरितं धनंजयस्य श्रुत्वा; S धृतिमचलां च धनंजयस्य श्रुत्वा (T_2 G_{2-4} दृष्ट्वा). — (L. 161) T_2 G_{2-4} अपगत- (for व्यपगत-). B_3 °रागदंभ° (by transp.); S -भयदं(T_2 (G_3 °दं)भरागदोषाम्. — (L. 162) S रमयंति (for [अ]भिरमन्ति). D_3 त्रिदिवगतान्रमयेद्धि पार्थिवेंद्रान्.

7

(L. 1) K_1 Dn transp. कृतं and तथा. Dc यतं तद्भवता यथा. — (L. 3) K_2 सुदुर्जयः (for °र्जनः). — (L. 4) K_3 चारैर्वेत्ति (for °रिति). — (L. 5) B_3 reads line 5 in marg. K_1 अभि° (for अधि°). — (L. 6) D_5 पराजयिष्यसि (for प्रव्राज°). B_4 Dc_1 D_5 [अ]धर्म°; D_4 यम° (for [अ]धम°). — (L. 7) B_1 तथास्मानधिगच्छेत. — (L. 8) B_{2-4} Dc अज्ञातवासा(B_2 °चर्या)दुत्तीर्णान्. — (L. 9) B_3 D_1 युद्धम् (for द्यूतम्). K_1 पुनः पूर्ववदेव हि (for the posterior half). — (L. 10) K_2 $B_{3.4}$ Dc तु (for च). B_2 °यास्यति (for °नेष्यति). — (L. 11) B_4 स यथा; Dc Dn_2 D_6 सर्वथा (for स तथा). B_3 Dn_2 [अ]कुशलो (for कुशलो). K_1 [ऽ]कृत° (for गत°). — (L. 12) K_1 चरिष्यति भवान्राजन् (for the prior half). Dc वसतिं (for °तीः). — (L. 13) K_1 तु; Dn_1 न (for सु-). — (L. 14) $B_{2.4}$ Dc D_6 वेदान्; B_3 देवान् (for वेद-). K_1 B_{2-4} Dc D_{4-6} शाश्वतान् (for कृत्स्नशः). — Line 15 = 3. 49. 20^{ab}. — (L. 16) Dc Dn D_2 यावद्धन्मि (for °च्छक्ति). — (L. 18) K_1 मे; B_4 मां (for नो).

8

(L. 1) B_2 वस्त्राणि (for वासांसि). — (L. 2) B Dc $D_{5.6}$

8

After 3. 53. 7, K$_{1.2}$ B D (except D$_{1-3}$) ins.:

विरजांसि च वासांसि दिव्याश्चित्राः स्रजस्तथा।
भूषणानि तु मुख्यानि देवान्प्राप्य तु भुङ्क्ष्व वै।
य इमां पृथिवीं कृत्स्नां संक्षिप्य ग्रसते पुनः।
हुताशमीशं देवानां का तं न वरयेत्पतिम्।
यस्य दण्डभयात्सर्वे भूतग्रामाः समागताः।
धर्ममेवानुरुध्यन्ति का तं न वरयेत्पतिम्।
धर्मात्मानं महात्मानं दैत्यदानवमर्दनम्।
महेन्द्रं सर्वदेवानां का तं न वरयेत्पतिम्।
क्रियतामविशङ्केन मनसा यदि मन्यसे।
वरुणं लोकपालानां सुहृद्वाक्यमिदं शृणु।
नैषधेनैवमुक्ता सा दमयन्ती वचोऽब्रवीत्।
समाप्लुताभ्यां नेत्राभ्यां शोकजेनाथ वारिणा।
देवेभ्योऽहं नमस्कृत्य सर्वेभ्यः पृथिवीपते।
वृणे त्वामेव भर्तारं सत्यमेतद्ब्रवीमि ते।
तामुवाच ततो राजा वेपमानां कृताञ्जलिम्।
दौत्येनागत्य कल्याणि तथा भद्रे विधीयताम्।
कथं ह्यहं प्रतिश्रुत्य देवतानां विशेषतः।
परार्थे यत्नमारभ्य कथं स्वार्थमिहोत्सहे।
एष धर्मो यदि स्वार्थो ममापि भविता ततः।
एवं स्वार्थं करिष्यामि तथा भद्रे विधीयताम्।

9

After 3. 55. 1, M$_{3}$ ins.:

मद्यपूर्णं समादाय घटं कटिसमन्वितम्।
अपरेण तु मांसं च दग्धकाष्ठाचितं बहु।
श्वभिः परिवृतो रौद्रः कपटी भ्रुकुटीमुखः।
रक्ताम्बरधरः कालो रक्तस्रगनुलेपनः।
कथयन्विविधास्तत्र कथाः परमदारुणाः।
परदारापहरणं परद्रव्यप्रलम्भनम्।
पाने चातिप्रसङ्गं च विश्वासस्य च घातनम्।
द्यूते च मृगयायां च चौर्ये चाशुचिकर्मणि।

10

For 3. 62. 1–17, K$_{4}$ D$_{1-3}$ subst.:

बृहदश्व उवाच।
सा तच्छ्रुत्वानवद्याङ्गी सार्थवाहवचस्तदा।
अगच्छद्राजशार्दूल विद्युल्लेखेव शारदी।
सार्थे महति दुःखार्ता भर्तृदर्शनलालसा।
रजसा समवच्छन्ना सार्थजेन शुचिस्मिता।
अनभिज्ञायमानैव गच्छन्ती सुमहद्वनम्।
आससाद सरो रम्यं भास्करस्यास्तसंगमे।
शीततोयं सुविपुलं निर्मलं नैकयोजनम्।
कह्लारैः समवच्छन्नं पद्मोत्पलविराजितम्।
हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम्।
तीरजैस्तरुभिर्हृद्यैः फलपुष्पोपशोभितैः।
व्यराजत यथा राजा सुभृत्यैः परिवारितः।
तदाश्रित्य स सार्थस्तु निवासायोपजग्मिवान्।
भारार्ताः सौरभेयास्तु क्षुत्तृषापरिवारिताः।
अवरोपितभारास्तु लेभिरे परमं सुखम्।
तथाश्वा वारणाश्चैव रासभाः करभैः सह।
दृष्ट्वैव तत्सरो रम्यमाश्वासं परमं ययुः।
अथानन्तरमेवेह वणिजः पथिकास्तथा।
यथायोगं यथास्थानं स्वावासं प्रतिपेदिरे।
यथास्थितिसमाचारमाहारस्थानमेव च।
अवतीर्यावसन्नानां चक्षुश्चैव प्रवेक्षणम्।

च (for the first तु). — (L. 4) K$_{2}$ Dc$_{1}$ D$_{4}$ कांतं; B$_{1}$ या तं (for का तं). — (L. 5) K$_{1}$ भूतास्त्राससमन्विताः (for the posterior half). — (L. 6) Dc °मेवाव° (for °मेवानु°). K$_{2}$ Dc$_{1}$ Dn$_{2}$ कांतं (for का तं). — (L. 7) B$_{1.3}$ °सूदनं (for °मर्दनम्). — (L. 8) K$_{2}$ Dc$_{1}$ कांतं (for का तं). —(L. 11) B$_{1.3.4}$ Dc D$_{5}$ तु (for सा). — (L. 13) K$_{3}$ B$_{1.3}$ Dc नमस्कृत्वा. — (L. 16) D$_{5}$ दूत्येन (for दौ°). B$_{2}$ Dc D$_{5}$ नाहं (Dc कथं) स्वार्थमिहोत्सहे (for the posterior half); cf. line 18. — (L. 18) B$_{3}$ कर्तुं (for कथं). — (L. 19) K$_{1}$ तथा; K$_{2}$ पुनः (for ततः). — (L. 20) Dc तत्र (for भद्रे).

10

(L. 1) = 3. 62. 1^{ab}. D$_{3}$ सार्थवाहस्य तद्वचः. — (L. 2) D$_{1}$ नर° (for राज°). — (L. 3) Cf. 3. 62. 1^{cd}. D$_{3}$ भर्तुर् (for भर्तृ-). — (L. 4) D$_{1}$ सार्थेन सह दुःखिता (for the posterior half). — (L. 5) D$_{1}$ °माने च; D$_{3}$ °माना तु (for °मानैव). — (L. 7) K$_{4}$ चैक°; D$_{1}$ नव° (for नैक°). — (L. 10) K$_{4}$ °शोभितं (for °शोभितैः). — (L. 11) K$_{4}$ विराजति; D$_{1}$ विराजत. K$_{4}$ स्व° (for सु°). — (L. 12) D$_{1}$ यदाश्रित्य. K$_{4}$ D$_{1}$ तु (for च), and °चक्रमे (for °जग्मिवान्). — (L. 13) K$_{4}$ D$_{1}$ च (for तु). K$_{4}$ लेभिरे परमं सुखं; D$_{2}$ क्षुत्तृपापरिकाशिताः. — K$_{4}$ om. line 14. — (L. 17) D$_{1}$ °मेवाह; D$_{2}$ °मेते च (for °मेवेह). — (L. 18) K$_{4}$ यथाजोपं (for °योगं). K$_{4}$ आवासं; D$_{3}$ स्ववासं. — (L. 20) D$_{1}$ विषण्णानां (for [अ]वसन्नानां). K$_{4}$ [अ]न्ववेषणं; D$_{1}$ [अ]प्य- वेक्षणं (for प्रवेक्षणम्). — (L. 22) D$_{3}$ परे (for [अ]परे). — (L. 23) K$_{4}$ समागमान्. — (L. 25) D$_{1}$ च (for ते).

चक्रुः कथाश्च विविधाः क्रयविक्रयसंश्रिताः ।
प्रशंसन्त्यपरे कष्टामटवीं श्वापदावृताम् ।
स्मरन्तो गृहभोगांश्च ज्ञातीनां च समागमम् ।
पुत्रमित्रकलत्राणि सर्वे निद्रावशं ययुः ।
संवाहनेन भाराणां बहुवासरजेन ते ।
खिन्नाः पतितगात्रास्तु निद्रयापहृता भृशम् ।
प्रसारिताङ्गाः खिन्नाश्च मृतकल्पा इवासते ।
अथार्धरात्रसमये गजयूथं महत्तदा ।
आजगाम सरो यत्र पिपासुस्तत्सरोजलम् ।
अथापश्यत तं सार्थं सार्थजान्सुबहून्गजान् ।
ते तान्ग्राम्यगजान्दृष्ट्वा सर्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ।
तेषामापततां वेगः करीणां दुःसहोऽभवत् ।
नगाग्रादिव शीर्णानां शृङ्गाणां पततां क्षितौ ।
स्पन्दतामपि नागानां नालं संस्था वनोद्भवैः ।
करिभिः करिणः सर्वे नीता मृत्युवशं क्षणात् ।
स च सार्थो विमथितः सस्त्रीबालगजान्वितः ।
आरावः सुमहानासीत्त्रैलोक्यभयकारकः ।
वाजिभिः प्रद्रुतैश्चैव महोष्ट्रै रासभैस्तथा ।
अन्योन्यं नाभिरक्षन्तं मथ्यमाना वनद्विपैः ।
हतो भ्राता हतः पुत्रो हतः स्वामी हतो मम ।
एषोऽग्निरुत्थितः कष्टं त्रायध्वं धावताधुना ।
रत्नराशिर्विशीर्णोऽयं गृह्णीध्वं किं प्रधावत ।
सामान्यमेतद् द्रविणं न मिथ्या वचनं मम ।
एवमेवाभिभाषन्तो विद्रवन्ति भयात्ततः ।
पुनरेवाभिधावन्ति वित्तप्रध्वंसकास्तथा ।
तस्मिंस्तथा वर्तमाने दारुणे जनसंक्षये ।
दमयन्ती च बुबुधे भयसंत्रस्तमानसा ।
अपश्यद्वैशसं तच्च सर्वलोकभयंकरम् ।
अदृष्टपूर्वं तद् दृष्ट्वा बाला पद्मनिभेक्षणा ।
संत्रस्तमनसा तस्मिंस्तस्थौ शशिनिभानना ।
सर्वैर्विध्वंसितैर्भग्नैस्तरुभिश्चन्दनादिभिः ।
विक्षिप्तैर्भाति भूः सर्वा द्यौरभ्रैरिव शारदी ।
पतद्भिः पात्यमानैश्च पतितैश्च ततस्ततः ।
भीषणीयं वनं तद्धि बभौ तत्र समन्ततः ।
विमुक्तनादसंत्रस्तं हाहाकारविनादितम् ।
बभौ तत्सत्त्वसंबाधं महारणमिवापरम् ।
ये तु तत्र विनिर्मुक्ताः सार्थाः केचिदविक्षताः ।
तेऽब्रुवन्सहिताः सर्वे कस्येदं कर्मणः फलम् ।
नूनं न पूजितोऽस्माभिर्मणिभद्रो महायशाः ।
तथा यक्षाधिपः श्रीमान्न च वैश्रवणः प्रभुः ।
न पूजा विघ्नकर्तॄणामथ वा सार्थिकैः कृता ।
शकुनानां फलं चाथ विपरीतमिदं ध्रुवम् ।
ग्रहा वा विपरीतास्तु किमन्यदिदमागतम् ।
अपरे त्वब्रुवन्दीना ज्ञातिद्रव्यविनाकृताः ।
यासावद्य महासार्थे नारी ह्युन्मत्तदर्शना ।
प्रविष्टा विकृताकारा कृत्वा रूपममानुषम् ।
तयेयं विहिता पूर्वं माया परमदारुणा ।
राक्षसी वा ध्रुवं यक्षी पिशाची वा भयंकरी ।
तस्याः सर्वमिदं पापं नात्र कार्या विचारणा ।
यदि पश्याम तां पापां सार्थघ्नीं नैकदुष्कृताम् ।
लोष्टभिः पांशुभिश्चैव तृणैः काष्ठैश्च मुष्टिभिः ।
अवश्यमेव हंस्यामः सा तु सार्थस्य कृत्यका ।
दमयन्ती तु तच्छ्रुत्वा वाक्यं तेषां सुदारुणम् ।
भीता त्रस्ता च संविग्ना प्राद्रवद्येन काननम् ।
आशङ्कमाना तत्पापमात्मानं पर्यदेवयत् ।

— (L. 26) D_1 च (for तु). D_2 °पहता (for °पहृता). — (L. 27) D_1 प्रसारिताश्च (for °ताङ्गाः). K_4 corrupt. — (L. 29) K_4 D_2 राजन् (for यत्र). — (L. 30) D_1 अथापश्यच्च. K_4 सार्थं तु ; D_1 तत्सार्थं ; D_2 सार्थं तत्. — (L. 32) D_1 °द्रवंतो ; D_3 °द्रवंति (for °द्रवन्त). — (L. 34) D_1 मृगाणां ; D_2 शृंगिणां (for शृङ्गाणां). — (L. 35) K_4 स्पंदनादपि. K_4 marg. स्पंदनानपि मातंगानालानस्थान्वनोद्भवैः. — (L. 38) D_1 सुमहांश्चासीत्. — (L. 40) K_4 °लक्षंत (for °रक्षन्तं). — (L. 41) D_1 हताः पुत्राः. K_4 D_1 सहायो (D_1 °या) निहतो (D_1 °ता) मम (for the posterior half). — (L. 42) K_4 कष्टस् (for कष्टं). — (L. 44) D_1 एव (for एतद्). — (L. 45) D_1 [ऽ]भिद्र° (for विद्र°). — (L. 49) D_3 °द्विषमं (for °द्वैशसं). D_1 तत्र (for तच्च). — (L. 50) D_2 तच्छ्रुत्वा (for तद् दृष्ट्वा). — (L. 52) K_4 D_1 सार्थं (for सर्वैर्). D_1 विध्वंसिते. K_4 मणिरासिस्तचंदनैः (sic) (for the posterior half). K_4 (marg.) सार्थं विध्वंसिते भग्नेगुरुभिः सह चंदनैः. — D_3 om. from the posterior half of line 52 up to पतितैश्च in line 54. — (L. 53) D_3 शारदैः (for °दी). — (L. 54) D_1 पतद्भिः पातितैस्ततः (for the posterior half). — (L. 58) K_4 सार्थात् (for सार्थाः). — (L. 61) K_4 नूनं (for न च). D_1 नार्चितो धनदः प्रभुः (for the posterior half). — (L. 64) D_3 °दिह वागतं (for °दिदमा°). — (L. 66) D_1 ह्युत्तम° (for ह्युन्मत्त°). — (L. 68) D_1 तथैवं (for तयेयं), and नूनं (for पूर्वं). — D_1 om. lines 69-70. — (L. 70) K_4 (by corr.) काचिद् (for कार्या). D_2 कृत्वा वै राक्षसीमिव (for the posterior half). — D_2 om. lines 71-88. — (L. 71) D_1 व्रत माचिरं ; D_3 सर्वदुःखदां (for नैकदु°). — (L. 72) D_1 लोष्टैश्च (for लोष्टभिः). — (L. 74) K_4 तेषां वाक्यं (by transp.). — (L. 75) K_4 त्रस्ता भीता ; D_1 भीता भीता.

अहो ममोपरि विधेः संरम्भो दारुणो महान् ।
नानुबध्नाति कुशलं कस्येदं कर्मणः फलम् ।
न स्मराम्यशुभं किंचित्कृतं कस्यचिदण्वपि ।
कर्मणा मनसा वाचा कस्येदं कर्मणः फलम् । [80]
नूनं जन्मान्तरकृतं पापमापतितं महत् ।
अपश्चिमामिमां कष्टामापदं प्राप्तवत्यहम् ।
भर्तृराज्यापहरणं स्वजनाच्च पराभवः ।
भर्त्रा सह वियोगं च तनयाभ्यां च विच्युतिः ।
निर्वस्त्रता वने वासो बहुव्यालनिषेविते । [85]
योऽप्यकस्मान्मया प्राप्तो निर्जने गहने वने ।
सोऽपि सार्थः पराभूतो दैवेन विधिना ध्रुवम् ।
आशङ्कते च मां पापां मदीयं व्यसनं तथा ।
साहमेवंविधा नूनं ध्रुवं नास्त्यत्र संशयः ।
मन्दाया हि ममाभाग्यैः सार्थो नूनं निपातितः । [90]
कुत्रात्मानं पातयेयं यामि कं शरणं वने ।
मरणेन भवेच्छान्तिर्म्रियन्त्या दुःखजीवितम् ।
हा नाथ हा महाराज हा स्वामिञ्जीवितेश्वर ।
किं मां विलपतीमेवं नाभिजल्पसि मानद ।
एवमादि बहूनन्यान्प्रलापान्बाष्पविक्लवा । [95]
कुर्वती पर्यधावच्च विजनं गहनं वनम् ।

Colophon.

☞ This passage has many lines in common with passages No. 11–12 given below, with which it should be compared.

11

For 3. 62. 6^{ab}–10^{cd}, D_5 subst.:

भारार्ताः सौरभेयाश्च क्षुत्तृषाभिपरिप्लुताः ।
अवरोपितभारास्तु लेभिरे परमां मुदम् ।
तथाश्वा वारणाश्चैव रासभाः करभैः सह ।
दृष्ट्वैव तत्सरो रम्यमाह्लादं परमं ययुः ।
तथानन्तरमेवेह वणिजः पथिकास्तथा । [5]
यथायोग्यं यथास्थानमावासं प्रतिपेदिरे ।
यथास्थितैः समाचारमाहारं स्थानमेव च ।
अवतीर्यावसन्नानां चक्रुश्चैवान्ववेक्षणम् ।
चक्रुः कथाश्च विविधाः क्रयविक्रयसंश्रिताः ।
प्रशंसन्त्यपरे कष्टं पदवींश्चापदावृताम् । [10]
स्मरन्तो गृहभोगांश्च ज्ञातीनां च समागमम् ।
पुत्रमित्रकलत्राणि सर्वे निद्रावशं ययुः ।
संवाहनेन भाराणां बहुवासरजेन च ।
खिन्नाः शयितुकामास्ते निद्रयापगता भृशम् ।
प्रसारिताङ्गाः खिन्नाश्च मृतकल्पा इवासते । [15]
अथार्धरात्रसमये निःशब्दस्तिमितं तदा ।
सुप्ते सार्थे परिश्रान्ते हस्तियूथमुपागमत् ।
अथ सार्थं गिरिनिभा मदप्रस्रवणाविलाः ।
मार्गं संरुध्य संसुप्तं पद्मिन्यास्तीरमुत्तरम् ।
अथापश्यत तं सार्थं सार्थजान्सुबहून्गजान् । [20]
तांश्च पान्थगजान्दृष्ट्वा सर्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ।
तेषामापततां वेगः करिणां दुःसहोऽभवत् ।
नगाग्रादिव शीर्णानां शृगाणां पततां क्षितौ ।
स्पन्दतामपि नागानां बालसंस्थावनोद्भवैः । [25]
करिभिः करिणः सर्वे मृत्युतां प्रापिताः क्षणात् ।
सार्थश्च सोऽपि मथितः सस्त्रीबालगजान्वितः ।
आरावः सुमहानासीत्त्रैलोक्यभयकारकः ।
वाजिभिः प्राहतैश्चैव गजोष्ट्रै रासभैस्तथा ।
अन्योन्यं नाभ्यरक्षन्त मथ्यमाना वनद्विपैः । [30]
सुप्तं ममर्दुः सहसा चेष्टमानं महीतले ।
हाहाकारं प्रमुञ्चन्तः सार्थकाः शरणार्थिनः ।
न च गुल्मांश्च धावन्तो निद्रान्धा बहवोऽभवन् ।
केचिद्दन्तैः करैः केचित्केचित्पद्भ्यां हता गजैः ।
निहतोष्ट्राश्च बहुलाः पदातिजनसंकुलाः । [35]
भयादाधावमानाश्च परस्परहतास्तदा ।
घोरान्नादान्विमुञ्चन्तो निपेतुर्धरणीतले ।
वृक्षेष्वासज्य संहृष्टाः पतिता विषमेषु च ।
तथा तं निहतं सर्वं समृद्धं सार्थमण्डलम् ।
हतो भ्राता हतः पुत्रः सहायो निहतो मम । [40]
एषोऽग्निरुत्थितः कष्टस्त्रायध्वं धावताधुना ।
रत्नराशिर्विशीर्णोऽयं गृह्णीध्वं किं प्रधावतः ।

D_3 °घत्र (for °घेन). — (L. 76) D_3 °निंदयत् (for °देवयत्). — (L. 78) K_4 नाशु बध्नामि कुशलं. — (L. 81) D_1 य[द्य]ज्जन्मांतरकृतं तत्पापं पतितं महत्. — (L. 82) D_1 कष्टां विपदं; D_3 कष्टामापदां. — (L. 83) D_1 स्वजनस्य (for °नाच्च). K_4 पराभवं. — (L. 84) D_1 वियोगश्च; D_3 °गो हि. — (L. 86) D_3 यो ह्यकस्मादनुप्राप्तो. — (L. 88) D_1 सार्थो (for पापां). D_1 जनविध्वंसकारिणी; D_3 कृत्यां वै राक्षसीमिव (for the posterior half). — (L. 89) D_2 resumes. D_2 °स्म्यत्र (for °स्त्यत्र). D_1 लोकैर्यत्परिशंकिता (for the posterior half). — (L. 90) K_4 मम हाभाग्यैः (for हि ममा°). D_3 [ऽ]यं विनि° (for नूनं नि°). — (L. 91) D_1 पातयेहं (for °येयं). $D_{2.3}$ त्यक्त्वात्मानं तु पापिष्ठा कस्याहं शरणं वने. — (L. 94) K_4 °जानासि (for °जल्पसि). — (L. 95) D_3 विलापान् (for प्र°). — (L. 96) D_1 °धावत्सा (for °धावच्च). D_3 विपिनं गहने वने (for the posterior half). — Colophon. *Adhy. no.:* D_1 (in figures and words) 67.

संत्रस्तवदना भैमी तस्थौ शशिनिभानना ।
सार्थे विध्वंसितैर्भग्नैरगरुभिः सचन्दनैः ।
विक्षिप्तैर्भाति भूः सर्वा द्यौरिवर्क्षैश्च शारदैः ।
पतितैः पात्यमानैश्च धावद्भिश्च ततस्ततः ।
विमुक्तनादसंत्रस्तं हाहाकारविनादितम् ।
भीषणीयं वनं तद्धि तत्राभूद्धि समन्ततः ।
अभूत्प्रलयसंकाशं महारण्यमिवापरम् ।
ये तु तत्र विनिर्मुक्ताः सार्थाः केचिदभिद्रुताः ।
तेऽब्रुवन्सहिताः सर्वे कस्येदं कर्मणः फलम् ।
नूनं न पूजितोऽस्माभिर्मणिभद्रो महायशाः ।
तथा यक्षाधिपः श्रीमान्न वै वैश्रवणो विभुः ।
न पूजा विघ्नकर्तॄणामथ वा सार्थिकैः कृता ।
शकुनानां फलं वाथ विपरीतमिदं ध्रुवम् ।
ग्रहास्तु विपरीता वा किमन्यदिदमागतम् ।
अपरे त्वब्रुवन्दीना ज्ञातिद्रव्यविनाकृताः ।
यासावद्य महासार्थे नारीवोन्मत्तदर्शना ।
प्रविष्टा विकृताकारा कृत्वा रूपममानुषम् ।
तयेयं विहिता पूर्वं माया परमदारुणा ।
राक्षसी वा पिशाची वा यक्षी वातिभयंकरी ।
तस्याः सर्वमिदं पापं नात्र कार्या विचारणा ।
यदि पश्याम तां पापां सार्थघ्नीं नैकदुःखदाम् ।
लोष्टैः पांशुभिश्चैव तृणैः काष्ठैश्च मुष्टिभिः ।
अवश्यमेव हन्तव्या सा सार्थस्य तु कृच्छ्रदा ।
दमयन्ती तु तच्छ्रुत्वा वाक्यं तेषां सुदारुणम् ।
ह्रीता भीता च संविग्ना प्राद्रवद्येन काननम् ।
आशङ्कमाना तत्पापानात्मानं पर्यदेवयत् ।
अहो ममोपरि विधेः संरम्भो दारुणो महान् ।
नानुबध्नामि कुशलं कस्येदं कर्मणः फलम् ।
नूनं जन्मान्तरकृतं पापं मापतितं महत् ।
अपश्चिमामिमां कष्टामापदं प्राप्तवत्यहम् ।
राज्यापहरणं भर्तुः स्वजनाच्च पराभवः ।
भर्त्रा सह वियोगश्च तनयाभ्यां च विच्युतिः ।
विवस्त्रता वने वासो बहुव्यालनिषेविते ।
यो ह्यकस्मान्मया प्राप्तो निर्जने गहने वने ।
सोऽपि सार्थः पराभूतो विधिना केनचिद्भृशम् ।
आशङ्कमाना सा पापं महीयो व्यसनं तथा ।
साहमेवंविधा नूनं ध्रुवं नास्त्यत्र संशयः ।
मन्दायास्तु ममाभाग्यैः सार्थो नूनं निपातितः ।
कुत्रात्मानं पातयेयं यामि कं शरणं वने ।
मरणात्तु भवेच्छान्तिर्धिगस्या दुःखजीवितम् ।
हा नाथ हा महाराज हा स्वामिञ्जीवितेश्वर ।
किं मां विलपतीमेवं नाभिजानासि मानद ।
एवमादीन्बहूनन्यान्प्रलापान्बाष्पविक्लवा ।
कुर्वती पर्यधावत्सा गहनं विपिनान्तरम् ।

Colophon.

☞ This passage is a variant version of lines 13–96 of passage No. 10 given above (q.v.).

12

K_2 Dn ins. after 3. 62. 10: D_6, after 281*:

आरावः सुमहांश्चासीत्त्रैलोक्यभयकारकः ।
एषोऽग्निरुत्थितः कष्टस्त्रायध्वं धावताधुना ।
रत्नराशिर्विशीर्णोऽयं गृह्णीध्वं किं प्रधावत ।
सामान्यमेतद् द्रविणं न मिथ्या वचनं मम ।
एवमेवाभिभाषन्तो विद्रवन्ति भयात्तदा ।
पुनरेवाभिधास्यामि चिन्तयध्वं सकातराः ।
तस्मिंस्तथा वर्तमाने दारुणे जनसंक्षये ।
दमयन्ती च बुबुधे भयसंत्रस्तमानसा ।
अपश्यद्वैशसं तत्र सर्वलोकभयंकरम् ।
अदृष्टपूर्वं तद् दृष्ट्वा बाला पद्मनिभेक्षणा ।
संसक्तवदनाश्वासा उत्तस्थौ भयविह्वला ।
ये तु तत्र विनिर्मुक्ताः सार्थास्केचिदविक्षताः ।
तेऽब्रुवन्सहिताः सर्वे कस्येदं कर्मणः फलम् ।
नूनं न पूजितोऽस्माभिर्मणिभद्रो महायशाः ।
तथा यक्षाधिपः श्रीमान्न वै वैश्रवणः प्रभुः ।
न पूजा विघ्नकर्तॄणामथ वा प्रथमं कृता ।
शकुनानां फलं वाथ विपरीतमिदं ध्रुवम् ।
ग्रहा न विपरीतास्तु किमन्यदिदमागतम् ।
अपरे त्वब्रुवन्दीना ज्ञातिद्रव्यविनाकृताः ।
यासावद्य महासार्थे नारी ह्युन्मत्तदर्शना ।
प्रविष्टा विकृताकारा कृत्वा रूपममानुषम् ।
तयेयं विहिता पूर्वं माया परमदारुणा ।
राक्षसी वा ध्रुवं यक्षी पिशाची वा भयंकरी ।
तस्याः सर्वमिदं पापं नात्र कार्या विचारणा ।
यदि पश्याम तां पापां सार्थघ्नीं नैकदुःखदाम् ।
लोष्टभिः पांसुभिश्चैव तृणैः काष्ठैश्च मुष्टिभिः ।
अवश्यमेव हन्यामः सार्थस्य किल कृत्यकाम् ।

12

(L. 9) Dn_3 सर्वे (for तत्र). — (L. 11) Dn_3 °वदनोच्छ्वासा. — (L. 21) K_2 अमानुषा; Dn_3 च मानुषं. — (L. 23) D_6 सा ध्रुवा (for वा ध्रुवं). — (L. 25) D_6 नैकदुष्कृतां. — (L. 26) D_6 लोष्टैश्च (for लोष्टभिः). — (L. 27) D_6 हंस्यामः (for हन्यामः), and सा वै सार्थस्य कृत्यका (for the posterior half). — (L. 29) K_2 D_6 °वेन (for °वत्र).

दमयन्ती तु तच्छ्रुत्वा वाक्यं तेषां सुदारुणम्
ह्रोता भीता च संविग्ना प्राद्रवद्यत्र काननम् ।
आशङ्कमाना तत्पापमात्मानं पर्यदेवयत् । [30]
अहो ममोपरि विधेः संरम्भो दारुणो महान् ।
नानुबध्नाति कुशलं कस्येदं कर्मणः फलम् ।
न स्मराम्यशुभं किंचित्कृतं कस्यचिदण्वपि ।
कर्मणा मनसा वाचा कस्येदं कर्मणः फलम् ।
नूनं जन्मान्तरकृतं पापं मापतितं महत् । [35]
अपश्चिमामिमां कष्टामापदं प्राप्तवत्यहम् ।
भर्तृराज्यापहरणं स्वजनाच्च पराजयः ।
भर्त्रा सह वियोगश्च तनयाभ्यां च विच्युतिः ।
निर्नाथता वने वासो बहुव्यालनिषेविते ।

☞ Cf. passages No. 10 and 11 given above, which are similar in content. This amplified version of the story, though adopted in all old printed editions, is restricted to a small group of Devanāgarī MSS., $K_{2.4}$ Dn $D_{1-3.5.6}$ and is undoubtedly spurious. It was rightly athetized by Böhtlingk in his edition of the Nalopākhyāna in the first edition of his *Chresthomathie*. Cf. Holtzmann, *Das Mahābhārata*, 3. 70.

13

After 3. 83. 82, $K_{1.2}$ B Dc Dn $D_{4.6}$ ins.:

कुरुक्षेत्रसमा गङ्गा यत्रतत्रावगाहिता ।
विशेषो वै कनखले प्रयागे परमं महत् ।
यद्यकार्यशतं कृत्वा कृतं गङ्गावसेचनम् ।
सर्वं तत्तस्य गङ्गापो दहत्यग्निरिवेन्धनम् ।
सर्वं कृतयुगे पुण्यं त्रेतायां पुष्करं स्मृतम् । [5]
द्वापरेऽपि कुरुक्षेत्रं गङ्गा कलियुगे स्मृता ।
पुष्करे तु तपस्तप्येद्दानं दद्यान्महालये ।
मलये त्वग्निमारोहेद् भृगुतुङ्गे त्वनाशनम् ।
पुष्करे तु कुरुक्षेत्रे गङ्गायां मगधेषु च ।
स्नात्वा तारयते जन्तुः सप्त सप्तावरांस्तथा । [10]
पुनाति कीर्तिता पापं दृष्टा भद्रं प्रयच्छति ।
अवगाढा च पीता च पुनात्यासप्तमं कुलम् ।
यावदस्थि मनुष्यस्य गङ्गायाः स्पृशते जलम् ।
तावत्स पुरुषो राजन्स्वर्गलोके महीयते ।
यथा पुण्यानि तीर्थानि पुण्यान्यायतनानि च । [15]
उपास्य पुण्यं लब्ध्वा च भवत्यमरलोकभाक् ।
न गङ्गासदृशं तीर्थं न देवः केशवात्परः ।
ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः ।

14

After 3. 97. 27, $K_{1.2}$ B D (except $D_{1-3.5}$) ins.:

वातेरिता पताकेव विराजति नभस्तले ।
प्रतार्यमाणा कूटेषु यथा निम्नेषु नित्यशः ।
शिलातलेषु संत्रस्ता पन्नगेन्द्रवधूरिव ।
दक्षिणां वै दिशं सर्वां प्लावयन्ती च मातृवत् ।
पूर्वं शम्भोर्जटाभ्रष्टा समुद्रमहिषी प्रिया । [5]
अस्यां नद्यां सुपुण्यायां यथेष्टमवगाह्यताम् ।
लोमश उवाच ।
युधिष्ठिर निबोधेदं त्रिषु लोकेषु विश्रुतम् ।

— (L. 30) K_2 तत्पापाम्. — (L. 31) K_2 संरंभे दारुणे महत् (for the posterior half). — (L. 35) Dn_2 D_6 मां पतितं (for मापतितं). — (L. 36) K_2 कष्टम् (for कष्टाम्). — (L. 38) K_2 वियोगं च (for °गश्च).

13

(L. 1) Dc transp. lines 1–2 and 3–4. K_1 Dc_2 °कुत्रा° (for °तत्रा°). — (L. 2) K_1 नखलं; Dc_1 परमे (for परमं). — B_4 om. lines 3–4. — (L. 3) B_1m अश्वमेध° (for यद्यकार्य°). K_2 गत्वा (for कृत्वा). K_2 °वसेवनं; B_2 °भिषेचनं (for °वसेचनम्). — (L. 4) K_2 गांगेयो; B_2 गंगांभो; B_3 Dc गंगायां (for गङ्गापो). $K_{1.2}$ दहंत्यग्नि°. — (L. 6) B_1 Dc च; B_{2-4} तु (for ऽपि). B_2 कलौ गंगैव केवला (for the posterior half). — (L. 7) Dc पुष्करेषु (for °रे तु). — (L. 8) B_1 Dc त्वनाशकं. — (L. 9) $B_{1.3.4}$ D_6 पुष्करेषु; B_2 °रे च; Dc °रे हे. B Dc D_4 मध्यमेषु च. — (L. 10) K_2 सप्तावरं; B_{2-4} सप्तापरान्; Dc पूर्वावरान्. — (L. 11) B Dn_1 दृष्ट्वा (for दृष्टा). — (L. 12) Dc अवगाह्य च पीत्वा च. — (L. 13) B_5 गंगातोये निमज्जति. — (L. 16) K_1 तापस्य- (for उपास्य). Dc तु (for च). B_3 Dn °लोकता (B_3 °तां) (for °लोकभाक्). — (L. 18) B_1 प्रजापतिः (for पितामहः).

14

D_1 om. from line 1 up to the prior half of line 6. — (L. 2) Dc तथा (for यथा). — (L. 3) B_3 Dc_1 संभ्रांता; Dc_2 संजाता (for संत्रस्ता). B_4 पातालेषु च संभूता (for the prior half). — (L. 4) B [इ]व (for च). — (L. 5) B_1 पूर्वं समुद्रं तु गता (for the prior half). — (L. 6) Dc तस्यां (for अस्यां). K_2 तु (for सु-). — After line 6, K_2 $B_{3.4}$ Dc Dn_2 ins. an addl. colophon (*adhy. no.*: Dn_2 99). — $K_{1.2}$ om. lines 7–82.

भृगोस्तीर्थं महाराज महर्षिगणसेवितम् ।
यत्रोपस्पृष्टवान्रामो हृतं तेजस्तदाप्तवान् ।
अत्र त्वं भ्रातृभिः सार्धं कृष्णया चैव पाण्डव ।
दुर्योधनहृतं तेजः पुनरादातुमर्हसि ।
कृतवैरेण रामेण यथा चोपहृतं पुनः ।

वैशंपायन उवाच ।

स तत्र भ्रातृभिश्चैव कृष्णया चैव पाण्डवः ।
स्नात्वा देवान्पितॄंश्चैव तर्पयामास भारत ।
तस्य तीर्थस्य रूपं वै दीप्ताद्दीप्ततरं बभौ ।
अप्रधृष्यतरश्चासीच्छात्रवाणां नरर्षभ ।
अपृच्छच्चैव राजेन्द्र लोमशं पाण्डुनन्दनः ।
भगवन्किमर्थं रामस्य हृतमासीद्वपुः प्रभो ।
कथं प्रत्याहृतं चैव एतदाचक्ष्व पृच्छतः ।

लोमश उवाच ।

शृणु रामस्य राजेन्द्र भार्गवस्य च धीमतः ।
जातो दशरथस्यासीत्पुत्रो रामो महात्मनः ।
विष्णुः स्वेन शरीरेण रावणस्य वधाय वै ।
पश्यामस्तमयोध्यायां जातं दाशरथिं ततः ।
ऋचीकनन्दनो रामो भार्गवो रेणुकासुतः ।
तस्य दाशरथेः श्रुत्वा रामस्याक्लिष्टकर्मणः ।
कौतूहलान्वितो रामस्त्वयोध्यामगमत्पुनः ।
धनुरादाय तद्दिव्यं क्षत्रियाणां निबर्हणम् ।
जिज्ञासमानो रामस्य वीर्यं दाशरथेस्तदा ।
तं वै दशरथः श्रुत्वा विषयान्तमुपागतम् ।
प्रेषयामास रामस्य रामं पुत्रं पुरस्कृतम् ।
स तमभ्यागतं दृष्ट्वा उद्यतास्त्रमवस्थितम् ।
प्रहसन्निव कौन्तेय रामो वचनमब्रवीत् ।
कृतकालं हि राजेन्द्र धनुरेतन्मया विभो ।
समारोपय यत्नेन यदि शक्नोषि पार्थिव ।
इत्युक्तस्त्वाह भगवंस्त्वं नाधिक्षेप्तुमर्हसि ।
नाहमप्यधमो धर्मे क्षत्रियाणां द्विजातिषु ।
इक्ष्वाकूणां विशेषेण बाहुवीर्ये न कत्थनम् ।
तमेवंवादिनं तत्र रामो वचनमब्रवीत् ।
अलं वै व्यपदेशेन धनुरायच्छ राघव ।
ततो जग्राह रोषेण क्षत्रियर्षभसूदनम् ।
रामो दाशरथिर्दिव्यं हस्ताद्रामस्य कार्मुकम् ।
धनुरारोपयामास सलील इव भारत ।
ज्याशब्दमकरोच्चैव स्मयमानः स वीर्यवान् ।
तस्य शब्दस्य भूतानि वित्रसन्त्यशनेरिव ।
अथाब्रवीत्तदा रामो रामं दाशरथिस्तदा ।
इदमारोपितं ब्रह्मन्किमन्यत्करवाणि ते ।
तस्य रामो ददौ दिव्यं जामदग्न्यो महात्मनः ।
शरमाकर्णदेशान्तमयमाकृष्यतामिति ।
एतच्छ्रुत्वाब्रवीद्रामः प्रदीप्त इव मन्युना ।
श्रूयते क्षम्यते चैव दर्पपूर्णोऽसि भार्गव ।
त्वया ह्यधिगतं तेजः क्षत्रियेभ्यो विशेषतः ।
पितामहप्रसादेन तेन मां क्षिपसि ध्रुवम् ।
पश्य मां स्वेन रूपेण चक्षुस्ते वितराम्यहम् ।
ततो रामशरीरे वै रामः पश्यति भार्गवः ।
आदित्यान्सवसून्रुद्रान्साध्यांश्च समरुद्गणान् ।
पितरो हुताशनश्चैव नक्षत्राणि ग्रहास्तथा ।
गन्धर्वा राक्षसा यक्षा नद्यस्तीर्थानि यानि च ।
ऋषयो वालखिल्याश्च ब्रह्मभूताः सनातनाः ।
देवर्षयश्च कार्त्स्न्येन समुद्राः पर्वतास्तथा ।

---

the MSS. are ignored totally hereafter. — (L. 9) B$_{1.3}$ हृततेजास् (B$_3$ °जस्). — (L. 10) B$_1$ तत्र (for अत्र). B$_4$ भारत (for पाण्डव). — (L. 12) B$_4$ Dc om. line 12. B$_1$ (corrupt) कृतवैरावने चैव न चैवोपहृताः पुनः. — (L. 13) D$_1$ भारत (for पाण्डवः). — (L. 14) Dc तत्र स्नात्वा (for स्नात्वा देवान्). — (L. 15) B$_1$ Dc दीप्त्या; Dn$_3$ जातं (for दीप्ताद्). Dc$_2$ विभो; Dn$_3$ च भो (for बभौ). — (L. 16) Dc °स्त्वासी° (for °श्चासी°). — (L. 17) नृप° (for पाण्डु°). — (L. 18) B$_2$ पुनः (for वपुः). — Dn$_2$ om. line 19. — (L. 24) B Dc D$_4$ आर्चीक°; D$_1$ आर्चिका° (for ऋचीक°). — (L. 26) B$_{2.3}$ प्रभुः (for पुनः). — (L. 27) D$_1$ दिव्यं तु (for तद्दिव्यं). — (L. 28) B$_4$ ततः; D$_6$ तथा (for तदा). — (L. 30) D$_6$ मंत्र- (for पुत्रं). — (L. 31) D$_1$ °मुप° (for °मव°). — (L. 33) B$_3$ क्षत्रियांतकरं राम धनुरेतन्महन्मम. — (L. 35) B$_3$ पूजनीयोसि; D$_1$ इत्युक्तः प्राह. B$_4$ भगवन्समधिक्षेप्तुं न त्वमर्हसि मां विभो. — For line 36, B$_4$ subst.:

नाहमप्यथ मोहन त्वामधिक्षेप्तुमुत्सहे ।
अधर्मेण क्षयं चात्र क्षत्रियाणां द्विजातिषु ।

— (L. 44) B Dc शब्देन (for शब्दस्य). — (L. 47) B$_{1.3.4}$ Dc महाबलः; D$_1$ °मनः (for °त्मनः). — (L. 48) Dc शर (for शरम्). — (L. 52) B$_1$ Dc क्षिपसे (for °सि). — (L. 54) D$_1$ पश्यति स च (for रामः पश्यति). — (L. 55) D$_1$ आदित्यांश्च वसून्. Dc transp. रुद्रान् and साध्यान्. B$_1$ आदित्या वसवो रुद्रा साध्याश्च समरुद्गणाः. — (L. 56) Hypermetric! B$_1$ पितरोथानलश्चैव; B$_3$ D$_{1.6}$ पितरो हुताशनश्च; Dc Dn$_2$ पितॄन्हुताशनां(Dn$_2$ °न)श्चैव. B$_3$ Dc ग्रहांस्तथा. — (L. 57) B$_{3.4}$ व (for च). Dc गंधर्वांश्राक्षसान्यक्षान्नदीस्तीर्थानि यानि च. — (L. 58) Dc ऋषीन्वै. B$_{2.3}$ Dc वालिखिल्या(Dc °ल्यां)श्च. Dc ब्रह्मभूतान्सनातनान्. — (L. 59) Dc देवर्षींश्चैव कार्त्स्न्येन समुद्रान्पर्वतांस्तथा. — (L. 60) B$_{1.3}$ °निषदा (for °निषदो). Dc वेदांश्च सोप-

वेदाश्च सोपनिषदो वषट्कारैः सहाध्वरैः ।
चेतोमन्ति च सामानि धनुर्वेदश्च भारत ।
मेघवृन्दानि वर्षाणि विद्युतश्च युधिष्ठिर ।
ततः स भगवान्विष्णुस्तं वै बाणं मुमोच ह ।
शुष्काशनिसमाकीर्णं महोल्काभिश्च भारत ।
पांसुवर्षेण महता मेघवर्षैश्च भूतलम् ।
भूमिकम्पैश्च निर्घातैर्नादैश्च विपुलैरपि ।
स रामं विह्वलं कृत्वा तेजश्चाक्षिप्य केवलम् ।
आगच्छज्ज्वलितो बाणो रामबाहुप्रचोदितः ।
स तु विह्वलतां गत्वा प्रतिलभ्य च चेतनाम् ।
रामः प्रत्यागतप्राणः प्राणमद्विष्णुतेजसम् ।
विष्णुना सोऽभ्यनुज्ञातो महेन्द्रमगमत्पुनः ।
भीतस्तु तत्र न्यवसद्व्रीडितस्तु महातपाः ।
ततः संवत्सरेऽतीते हृतौजसमवस्थितम् ।
निर्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन् ।
न वै सम्यगिदं पुत्र विष्णुमासाद्य वै कृतम् ।
स हि पूज्यश्च मान्यश्च त्रिषु लोकेषु सर्वदा ।
गच्छ पुत्र नदीं पुण्यां वधूसरकृताह्वयाम् ।
तत्रोपस्पृश्य तीर्थेषु पुनर्वपुरवाप्स्यसि ।
दीप्तोदं नाम तत्तीर्थं यत्र ते प्रपितामहः ।
भृगुर्देवयुगे राम तप्तवानुत्तमं तपः ।
तत्तथा कृतवान्रामः कौन्तेय वचनात्पितुः ।
प्राप्तवांश्च पुनस्तेजस्तीर्थेऽस्मिन्पाण्डुनन्दन ।
एतदीदृशकं तात रामेणाक्लिष्टकर्मणा ।
प्राप्तमासीन्महाराज विष्णुमासाद्य वै पुरा ।

☞ For a criticism of this passage, cf. Sukthankar, "Epic Studies (VI)", *ABORI*. 1936. 20 f.

15

After 3. 115. 8, $K_{1.2}$ B Dc Dn $D_{3.4.6}$ G_3 ins.:

अकृतव्रण उवाच ।

अहं ते कथयिष्यामि महदाख्यानमुत्तमम् ।
भृगूणां राजशार्दूल वंशे जातस्य भारत ।
रामस्य जामदग्न्यस्य चरितं देवसंमितम् ।
हैहयाधिपतेश्चैव कार्तवीर्यस्य भारत ।
रामेण चार्जुनो नाम हैहयाधिपतिर्हतः ।
तस्य बाहुशतान्यासंस्त्रीणि सप्त च पाण्डव ।
दत्तात्रेयप्रसादेन विमानं काञ्चनं तथा ।
ऐश्वर्यं सर्वभूतेषु पृथिव्यां पृथिवीपते ।
अव्याहतगतिश्चैव रथस्तस्य महात्मनः ।
रथेन तेन तु सदा वरदानेन वीर्यवान् ।
ममर्द देवान्यक्षांश्च ऋषींश्चैव समन्ततः ।
भूतांश्चैव स सर्वांस्तु पीडयामास सर्वतः ।
ततो देवाः समेत्याहुर्ऋषयश्च महाव्रताः ।
देवदेवं सुरारिघ्नं विष्णुं सत्यपराक्रमम् ।
भगवन्भूतरक्षार्थमर्जुनं जहि वै प्रभो ।
विमानेन च दिव्येन हैहयाधिपतिः पुनः ।
शचीसहायं क्रीडन्तं धर्षयामास वासवम् ।

निषदान्. B_{1-3} वषट्कारः; Dc °कारान्. $B_{1.2}$ °गर्मैः (for °ध्वरैः). — (L. 61) B_2 चेतोवंति. Dc धनुर्वेदांश्च. — (L. 62) $B_{1.3.4}$ Dc_2 विद्युतो मेघवृंदानि (B_1 °दाश्च) (for the prior half). $B_{1.3.4}$ Dc वर्षाणि च युधिष्ठिर. — (L. 65) B Dc D_6 केवलं (for भूतलम्). — (L. 66) $B_{1.3.4}$ Dc स- (for the first च). — (L. 67) B_1 दृष्ट्वा (for कृत्वा). — (L. 68) B Dc °प्रेरितः (B_2 °प्रबोधितः) (for °प्रचोदितः). — (L. 71) B_3 प्रभुः (for पुनः). — (L. 72) Dc भीतश्च. $B_{1.3.4}$ व्रीडितश्च. Dc लज्जितश्च महारथः (for the posterior half). — (L. 73) $B_{1.4}$ Dc_2 तत्र (for ततः). B_4 कृतौ° (for हृतौ°). — (L. 74) B_2 वाक्यम् (for रामम्). — (L. 78) Dc ततोप° (for तत्रोप°). — (L. 79) D_1 तीर्थं तु (for तत्तीर्थं). B_1 वै (for ते). — (L. 80) B_1 Dc तात (for राम). $B_{1.4}$ Dc कृतवानभिषेचनं (for the posterior half). — (L. 83) D_4 यत्तद् (for एतद्). $B_{1.4}$ °कांतारं (for °कं तात). — (L. 84) D_1 आप्तम् (for प्राप्तम्).

15

(L. 1) B_2 Dn हंत (for अहं). — (L. 3) D_3 om. line 3. Dc_2 वेद° (for देव°). — (L. 5) B_1 बभूवेहार्जुनो नाम; D_3 राजासीदर्जुनो नाम (for the prior half). B_1 D_3 पुरा (for हतः). — (L. 6) B_2 °न्याहु° (for °न्यासं°). — (L. 7) D_3 कांचनप्रभं. — (L. 8) D_3 च मही° (for पृथिवी°). — (L. 9) $B_{2.4}$ °श्चैव (for °स्तस्य). — (L. 10) B_1 D_3 om. line 10. $B_{1.4}$ Dc स तदा (for तु सदा). B_1 Dc वरदानाच्च. — (L. 12) B_1 Dc भूतानि चैव सर्वाणि. B_2 वीर्यवान् (for सर्वतः). — (L. 13) B_1 °त्मनः (for °व्रताः). — (L. 14) B_1 Dc अब्रुवंस्तं (for देवदेवं). — D_3 reads line 15 after the addl. line स तु प्रसाद° (see below). — (L. 16) K_2 Dc Dn_1 प्रभुः (for पुनः). — After line 16, D_3 ins.:

खेचरान्कामचारी च बलान्मर्दति मोहितः ।

— (L. 17) D_3 शचीसुरसहायं तु (for the prior half). — After line 17, D_3 ins.:

स तु प्रसादयामास विष्णुं सत्यपराक्रमम् ।,

which is followed by line 15. — (L. 19) B_2 वीर्यवान् (for भारत). — (L. 20) K_2 प्रवे° (for निवे°). D_3 यत्तद्भूतमनाधृष्यं मृत्युरित्यभिधीयत. — After line 20, D_3

ततस्तु भगवान्देवः शक्रेण सहितस्तदा ।
कार्तवीर्यविनाशार्थं मन्त्रयामास भारत ।
यत्तद्भूतहितं कार्यं सुरेन्द्रेण निवेदितम् । [20]
स प्रतिश्रुत्य तत्सर्वं भगवाँल्लोकपूजितः ।
जगाम बदरीं रम्यां स्वमेवाश्रममण्डलम् ।
एतस्मिन्नेव काले तु पृथिव्यां पृथिवीपतिः ।

[Correction! This insertion is found in D_3 in addition to the MSS. mentioned on p. 385. The above list has been corrected accordingly.]

16

After adhy. 142, B D (except D_{1-3}) ins. the foll. addl. adhy.:

लोमश उवाच ।
द्रष्टारः पर्वताः सर्वे नद्यः सपुरकाननाः ।
तीर्थानि चैव श्रीमन्ति स्पृष्टं च सलिलं करैः ।
पर्वतं मन्दरं दिव्यमेष पन्थाः प्रयास्यति ।
समाहिता निरुद्विग्नाः सर्वे भवत पाण्डवाः ।
अयं देवनिवासो वै गन्तव्यो वो भविष्यति । [5]
ऋषीणां चैव दिव्यानां निवासः पुण्यकर्मणाम् ।
एषा शिवजला पुण्या याति सौम्य महानदी ।
बदरीप्रभवा राजन्देवर्षिगणसेविता ।
एषा वैहायसैर्नित्यं वालखिल्यैर्महात्मभिः ।
अर्चिता चोपयाता च गन्धर्वैश्च महात्मभिः । [10]
अत्र साम स्म गायन्ति सामगाः पुण्यनिस्वनाः ।
मरीचिः पुलहश्चैव भृगुश्चैवाङ्गिरास्तथा ।
अत्राह्निकं सुरश्रेष्ठो जपते समरुद्गणः ।
साध्याश्चैवाश्विनौ चैव परिधावन्ति तं तदा ।
चन्द्रमाः सह सूर्येण ज्योतींषि च ग्रहैः सह । [15]
अहोरात्रविभागेन नदीमेनामनुव्रजन् ।
एतस्याः सलिलं मूर्ध्ना वृषाङ्कः पर्यधारयत् ।
गङ्गाद्वारे महाभाग येन लोकस्थितिर्भवेत् ।
एतां भगवतीं देवीं भवन्तः सर्व एव हि ।
प्रयतेनात्मना तात प्रतिगम्याभिवादत । [20]
तस्य तद्वचनं श्रुत्वा लोमशस्य महात्मनः ।
आकाशगङ्गां प्रयताः पाण्डवास्तेऽभ्यवादयन् ।
अभिवाद्य च ते सर्वे पाण्डवा धर्मचारिणः ।
पुनः प्रयाताः संहृष्टाः सर्वैरृषिगणैः सह ।
ततो दूरात्प्रकाशन्तं पाण्डुरं मेरुसंनिभम् । [25]
ददृशुस्ते नरश्रेष्ठा विकीर्णं सर्वतोदिशम् ।
तान्प्रष्टुकामान्विज्ञाय पाण्डवान्स तु लोमशः ।
उवाच वाक्यं वाक्यज्ञः शृणुध्वं पाण्डुनन्दनाः ।
एतद्विकीर्णं सुश्रीमत्कैलासशिखरोपमम् ।
यत्पश्यसि नरश्रेष्ठ पर्वतप्रतिमं स्थितम् । [30]
एतान्यस्थीनि दैत्यस्य नरकस्य महात्मनः ।
पर्वतप्रतिमं भाति पर्वतप्रस्तराश्रितम् ।
पुरातनेन देवेन विष्णुना परमात्मना ।
दैत्यो विनिहतस्तात सुरराजहितैषिणा ।
दश वर्षसहस्राणि तपस्तप्यन्महामनाः । [35]
ऐन्द्रं प्रार्थयते स्थानं तपःस्वाध्यायविक्रमात् ।
तपोबलेन महता बाहुवेगबलेन च ।
नित्यमेव दुराधर्षो धर्षयन्स दितेः सुतः ।
स तु तस्य बलं ज्ञात्वा धर्मे च चरितव्रतम् ।
भयाभिभूतः संविग्नः शक्र आसीत्तदानघ । [40]
तेन संचिन्तितो देवो मनसा विष्णुरव्ययः ।
सर्वत्रगः प्रभुः श्रीमानागतश्च स्थितो बभौ ।

---

ins.:

शपितं स्थाणुना घोरं श्वेतराज्ञः कृते पुरा ।
भस्मीभूतं महद्भूतं भस्मकूटमदृश्यत ।
यमुनातीरमासाद्य समुद्रमवगाहत ।
तत्र मृत्योः समुद्रेण संगमोऽस्य भविष्यति ।
ततः स कार्तवीर्यस्य विनाशाय प्रतिष्ठितम् ।

— (L. 21) B_1 D_3 तथा विधाय; B_2 स प्रतिज्ञाय (for स प्रतिश्रुत्य). D_3 °विश्रुतः (for °पूजितः). — (L. 23) K_2 Dn_1. n_2 D_3 °पते (for °पतिः).

16

(L. 1) B_1 नागाश्च- (for नद्यः स-). — (L. 2) Dc रम्याणि (for श्रीमन्ति). — (L. 7) B_{2-4} सौम्या (for सौम्य). — (L. 9) Dc एषा वैखानसैर्नित्यं. B_{1-3} Dc D_4 वालिखिल्यैर्. — (L. 13) B_4 द्विज° (for सुर°). B_3 यजते (for जपते). D_6 स मरुद्गणैः. — (L. 14) B_4 सिद्धाश्चाप्सरसौ चापि (for the prior half). Dc तां; D_4 तत् (for तं). — (L. 16) $B_{1.\,3.\,4}$ Dc एताम् (for एनाम्). B_3 चलंति रथवर्त्मना (for the posterior half). — (L. 17) Dn_1 D_6 मूर्ध्नि (for °र्ध्ना). — (L. 18) B_4 लोके गतिर् (for लोकस्थितिर्). — (L. 20) $B_{1.\,3}$ Dc अभि° (for प्रति°). Dc °वंदत (for °वादत). — (L. 22) B_2 ते न्यवेद°; B_4 तेऽभ्यनाद°; Dc अभ्यवाद° (for तेऽभ्यवाद°). — (L. 24) B_1 Dc_2 Dn_1. n_3 D_{4-6} सर्वे (for सर्वैर्). — (L. 25) B Dn_2 पांडरं. — (L. 34) B_4 Dn_1 D_4 °स्तेन (for °स्तात). — (L. 35) B_1 Dc तपस्तप्तं महात्मना (for the posterior half). — (L. 36) Dc प्रार्थयत. — (L. 37) Dc वात° (for बाहु°). — (L. 39) Dc चरितं शुभं (for °तव्रतम्). — (L. 40) B_3 नृप (for [अ]नघ). — (L. 42) D_4 स्थिरो (for स्थितो). — (L. 45) B_1 यस्य तेजोवभासितः; Dc यस्य

ऋषयश्चापि तं सर्वे तुष्टुवुश्च दिवौकसः।
तं दृष्ट्वा ज्वलमानश्रीर्भगवान्हव्यवाहनः।
नष्टतेजाः समभवत्तस्य तेजोभिभर्त्सितः।
तं दृष्ट्वा वरदं देवं विष्णुं देवगणेश्वरम्।
प्राञ्जलिः प्रणतो भूत्वा नमस्कृत्य च वज्रभृत्।
प्राह वाक्यं ततस्तत्वं यतस्तस्य भयं भवेत्।

विष्णुरुवाच।

जानामि ते भयं शक्र दैत्येन्द्रान्नरकात्ततः।
ऐन्द्रं प्रार्थयते स्थानं तपःसिद्धेन कर्मणा।
सोऽहमेनं तव प्रीत्या तपःसिद्धमपि ध्रुवम्।
वियुनज्मि देहाद्देवेन्द्र मुहूर्तं प्रतिपालय।
तस्य विष्णुर्महातेजाः पाणिना चेतनां हरत्।
स पपात ततो भूमौ गिरिराज इवाहतः।
तस्यैतदस्थिसंघातं मायाविनिहतस्य वै।
इदं द्वितीयमपरं विष्णोः कर्म प्रकाशते।
नष्टा वसुमती कृत्स्ना पाताले चैव मज्जिता।
पुनरुद्धरिता तेन वाराहेणैकशृङ्गिणा।

युधिष्ठिर उवाच।

भगवन्विस्तरेणेमां कथां कथय तत्वतः।
कथं तेन सुरेशेन नष्टा वसुमती तदा।
योजनानां शतं ब्रह्मन्पुनरुद्धरिता तदा।
केन चैव प्रकारेण जगतो धरणी ध्रुवा।
शिवा देवी महाभागा सर्वसस्यप्ररोहिणी।
कस्य चैव प्रभावाद्धि योजनानां शतं गता।
केनैतद्वीर्यसर्वस्वं दर्शितं परमात्मनः।
एतत्सर्वं यथातत्वमिच्छामि द्विजसत्तम।
श्रोतुं विस्तरशः सर्वं त्वं हि तस्य प्रतिश्रयः।

लोमश उवाच।

यत्तेऽहं परिपृष्टोऽस्मि कथामेतां युधिष्ठिर।
तत्सर्वमखिलेनेह श्रूयतां मम भाषतः।
पुरा कृतयुगे तात वर्तमानेऽभयंकरे।
यमत्वं कारयामास आदिदेवः पुरातनः।
यमत्वं कुर्वतस्तस्य देवदेवस्य धीमतः।
न तत्र म्रियते कश्चिज्जायते वा तथाच्युत।
वर्धन्ते पक्षिसंघाश्च तथा पशुगवेडकम्।
गवाश्वं च मृगाश्चैव सर्वे ते पिशिताशनाः।
तथा पुरुषशार्दूल मानुषाश्च परंतप।
सहस्रशो ह्ययुतशो वर्धन्ते सलिलं यथा।
एतस्मिन्संकुले तात वर्तमाने भयंकरे।
अतिभाराद्वसुमती योजनानां शतं गता।
सा वै व्यथितसर्वाङ्गी भारेणाक्रान्तचेतना।
नारायणं वरं देवं प्रपन्ना शरणं गता।

पृथिव्युवाच।

भगवंस्त्वत्प्रसादाद्धि तिष्ठेयं सुचिरं त्विह।
भारेणास्मि समाक्रान्ता न शक्नोमि स्म वर्तितुम्।
ममेमं भगवन्भारं व्यपनेतुं त्वमर्हसि।
शरणागतास्मि ते देव प्रसादं कुरु मे विभो।

लोमश उवाच।

तस्यास्तद्वचनं श्रुत्वा भगवानक्षरः प्रभुः।
प्रोवाच वचनं हृष्टः श्रव्याक्षरसमीरितम्।
न ते महि भयं कार्यं भारार्ते वसुधारिणि।
अयमेवं तथा कुर्मि यथा लघ्वी भविष्यसि।
स तां विसर्जयित्वा तु वसुधां शैलकुण्डलाम्।
ततो वराहः संवृत्त एकशृङ्गो महाद्युतिः।
रक्ताभ्यां नयनाभ्यां तु भयमुत्पादयन्निव।
धूमं च ज्वलयँल्लक्ष्म्या तत्र देशे व्यवर्धत।
स गृहीत्वा वसुमतीं शृङ्गेणैकेन भास्वता।
योजनानां शतं वीर समुद्धरति सोऽक्षरः।
तस्यां चोद्धार्यमाणायां संक्षोभः समजायत।
देवाः संक्षुभिताः सर्वे ऋषयश्च तपोधनाः।

तेजावभर्त्सितः. — (L. 46) B3 om. line 46. Dc1 सर्व° (for देव°). — (L. 48) Dc °स्तूर्णं (for °स्तत्त्वं). — (L. 49) B1 Dc तात (for शक्र). — (L. 50) Dc प्रार्थयतः. — (L. 51) B1. 4 °मेवं (for °मेनं). — (L. 52) Hypermetric! B1 वियुंक्ष्मि; Dc वियुंज्मि (for वियुनज्मि). — (L. 54) Dc °पतत् (for °हतः). — (L. 56) Dn1 °परमं (for °मपरं). B3 तूर्णं (for कर्म). — (L. 58) B1 °णोरु° (for °णैक°). — After line 58, B1. 4 ins. an addl. colophon. — (L. 59) B2 सुव्रत (for तत्त्वतः). — (L. 61) B3 तेन (for ब्रह्मन्). — (L. 64) B1–3 Dc °वाद्दै (for °वाद्धि). — (L. 65) Dc Dn2. n3 केन तद् (for केनैतद्). B2 वीर्यमात्मनः; Dc स्वं महात्मनः. — (L. 66) B1 Dc °वृत्तम् (for °तत्त्वम्). — (L. 69) Dc भारत (for भाषतः). — (L. 71) B4 Dc2 सनातनः (for पुरा°). — (L. 77) D4. 6 वर्धते. — (L. 78) Dc3 तावद् (for तात). B2 भयावहे (for भयंकरे). — (L. 81) B1. 3. 4 Dc तदा (for गता). — (L. 82) Dc2 त्वत्प्रसादेन. B3. 4 तिष्ठेहं. — (L. 84) B1m Dc3 ममेवं. — (L. 85) Hypermetric! B1. 3 प्रभो (for विभो). — Most MSS. om. लोमश उ° before line 86. — (L. 87) B2. 3 कृष्णः (for हृष्टः). B1 सत्याहर° समन्वितं (m as above). — (L. 88) Before line 88, most MSS. ins. विष्णुरुवाच. B1 Dc मयि (for महि). — (L. 89) B1–3 अहमेव (B2 °वं) (for अयमेवं). — Before line 90, most MSS. ins. लोमश उ°. — (L. 91) Dc संभूत (for संवृत्त). — (L. 92) Dc इति (for इव). — (L. 93) Dc भूस्त्वथ — (L. 95) B2 साग्रं (for वीर).

हाहाभूतमभूत्सर्वं त्रिदिवं व्योम भूस्तथा।
न पर्यवस्थितः कश्चिद्देवो वा मानुषोऽपि वा।
ततो ब्रह्माणमासीनं ज्वलमानमिव श्रिया। [100]
देवाः सर्षिगणाश्चैव उपतस्थुरनेकशः।
उपसर्प्य च देवेशं ब्रह्माणं लोकसाक्षिकम्।
भूत्वा प्राञ्जलयः सर्वे वाक्यमुच्चारयंस्तदा।
लोकाः संक्षुभिताः सर्वे व्याकुलं च चराचरम्।
समुद्राणां च संक्षोभस्त्रिदशेश प्रकाशते। [105]
सैषा वसुमती कृत्स्ना योजनानां शतं गता।
किमेतत्किंप्रभावेण येनेदं व्याकुलं जगत्।
आख्यातु नो भवाञ्शीघ्रं विसंज्ञाः स्मेह सर्वशः
ब्रह्मोवाच।
असुरेभ्यो भयं नास्ति युष्माकं कुत्रचित्क्वचित्।
श्रूयतां यत्कृतेष्वेष संक्षोभो जायतेऽमराः। [110]
योऽसौ सर्वत्रगः श्रीमानक्षरात्मा व्यवस्थितः।
तस्य प्रभावात्संक्षोभस्त्रिदिवस्य प्रकाशते।
यैषा वसुमती कृत्स्ना योजनानां शतं गता।
समुद्धृता पुनस्तेन विष्णुना परमात्मना।
तस्यामुद्धार्यमाणायां संक्षोभः समजायत। [115]
एवं भवन्तो जानन्तु छिद्यतां संशयश्च वः।
देवा ऊचुः।
क्व तद्भूतं वसुमतीं समुद्धरति हृष्टवत्।
तं देशं भगवन्ब्रूहि तत्र यास्यामहे वयम्।
ब्रह्मोवाच।
हन्त गच्छत भद्रं वो नन्दने पश्यत स्थितम्।
एषोऽत्र भगवाञ्श्रीमान्सुपर्णः संप्रकाशते। [120]
वाराहेणैव रूपेण भगवाँल्लोकभावनः।
कालानल इवाभाति पृथिवीतलमुद्धरन्।
एतस्योरसि सुव्यक्तं श्रीवत्समभिराजते।
पश्यध्वं विबुधाः सर्वे भूतमेतदनामयम्।
लोमश उवाच।
ततो दृष्ट्वा महात्मानं श्रुत्वा चामन्त्र्य चामराः। [125]
पितामहं पुरस्कृत्य जग्मुर्देवा यथागतम्।
वैशंपायन उवाच।
श्रुत्वा तु तां कथां सर्वे पाण्डवा जनमेजय।
लोमशादेशितेनाशु पथा जग्मुः प्रहृष्टवत्।
Colophon.

☞ It may be noted that this passage is om. also in the old Āraṇyakaparvan MS. belonging to the Bombay Branch of the Royal Asiatic Society (Bhau Daji Collection No. 245).

17

After adhy. 153, B (for B_1 see below) D (except $D_{1-3.5}$) S ins. the foll. addl. adhy.:

वैशंपायन उवाच।
